॥ श्रीः ॥

श्रीमद्ब्रह्मसूत्राणि

श्रीजगन्नाथयतिकृतभाष्यदीपिकासमलङ्कृत-

श्रीमन्मध्वभाष्यसहितानि

सूत्रदीपिकासंवलितानि

(अविरोधाध्यायः)

श्रीचामराजेन्द्रसंस्कृतमहापाठशालायां

द्वैतवेदान्तप्रधानाध्यापकैः

विद्याविशारद न्यायवेदान्तचूडामणि **मागडि श्रीरङ्गनाथाचार्यैः**

मुद्रणावसरे संशोधितानि

श्रीमद्व्यासराजगुरुसार्वभौमविद्याकर्णाटकसिंहासनाधीश्वर-

श्रीमद्विद्याप्रसन्नतीर्थश्रीपादानामाज्ञानुसारेण

बेङ्गळूरुनगरीस्थया

भाष्यदीपिकाप्रकाशनसमित्या

प्रकाशितानि

शालिवाहनशकाब्दाः १८८७

क्रिस्ताब्दाः १९६५

पुस्तकप्राप्तिस्थानम् :—

श्री बि. एस्. प्राणेशराव्

अड्वोकेट्

४७, II स्ट्रीट्, माडल् हौस् ब्लाक्

बेंगळूर-४.

अयं ग्रन्थः कल्याणनगर्यां गौडिगेरे श्रीश्रीनिवासाचार्याणामात्मजेन

श्री डि. एस्. कृष्णाचार्येण स्वकीयमुद्रणालये सम्मुद्रितः

शालिवाहन शकाब्दाः १८८७

विश्वावसु सं. आषाढ कृष्ण पञ्चमी

१८-७-१९६५

श्रीमद्ब्रह्मसूत्राधिकरणविषयसूचिका

द्वितीयाध्यायस्य प्रथमः पादः

अधि०।	सूत्र०।	विषयाः।
१	१–३	परमात्मनः जगज्जन्मादिकर्तृत्वे पाशुपतादिस्मृतिविरोधस्य परिहारः ॥
२	४–५	श्रुत्यादिप्रामाण्ये युक्तिविरोधपरिहारः ॥
३	६–७	मृदब्रवीत् इति वचनात् अवगतमृत्कर्तृकवचनरूपाविद्यमानार्थप्रतिपादकत्वस्य परिहारः ॥
४	८-१३	ब्रह्मणः जगत्कर्तृत्वे श्रुत्युपसर्जनप्रागभावकर्तृत्वसाधकयुक्तिविरोधपरिहारः ॥
५	१४	जीवेश्वरैक्यस्य निरासः ॥
६	१५–२१	परमात्मनः सृष्ट्यर्थं स्वतन्त्रसाधनापेक्षत्वस्य निरासः ॥
७	२२–२७	जगत्स्रष्टुः जीवकर्तृकत्वनिरासः ॥
८	२८–३२	ब्रह्मणः जगत्कर्तृत्वविषये जीवपक्षोक्तदोषस्य निरासः ॥
९	३३–३४	ब्रह्मणः जगत्कर्तृत्वविषये प्रयोजनवत्त्वादिदोषनिरासः ॥
१०	३५–३७	परमात्मनः वैषम्यनैर्घृण्यदोषनिरासः ॥
११	३८	परमात्मनः सर्वगुणैः पूर्णत्वनिगमनम् ॥

द्वितीयाध्यायस्य द्वितीयः पादः

१	१–४	प्रकृतेः जगत्कर्तृत्वं सम्भवतीति यत् निरीश्वरसाङ्ख्यमतं तस्य निराकरणम् ॥
२	५	ईश्वरसाहाय्येन प्रधानस्यैव जगत्कर्तृत्वं इति यत् सेश्वरसाङ्ख्यमतं तस्य निराकरणम् ॥

अधि० ।	सूत्र० ।	विषयाः ।
३	६	यत् प्रत्यक्षं तदेव प्रमाणं इति यत् चार्वाकमतं तस्य निराकरणम् ॥
४	७–८	जीवोपसर्जनेन प्रकृतेरेव कर्तृत्वमिति यत् सेश्वरसाङ्ख्यैकदेशिमतं तस्य निराकरणम् ॥
५	९–१०	प्रकृत्युपसर्जनेन जीवस्यैव कर्तृत्वमिति यत् निरीश्वरसाङ्ख्यैकदेशिमतं तस्य निराकरणम् ॥
६	११–१७	अणुभिः कार्यं जायते इति यत् तार्किकाणां मतं तस्य निराकरणम् ॥
७	१८–२५	परमाणुसमुदाय एव घटादिबुद्धिं जनयति न तु तदतिरिक्तवस्तु अस्तीति यत् बौद्धैकदेशिवैभाषिकसौत्रान्तिकमतं तस्य निराकरणम् ॥
८	२६–२९	शून्यादेव जगदुत्पत्तिरिति यत् शून्यवादिमाध्यमिकमतं तस्य निराकरणम् ॥
९	३०–३२	जगत् विज्ञानमात्रमिति यत् योगाचारमतं तस्य निराकरणम् ॥
१०	३३–३६	जैनमतनिराकरणम् ॥
११	३७–४१	पशुपतिः जगत्कर्ता इति यत् पाशुपतमतं तस्य निराकरणम् ॥
१२	४२–४५	शक्तिः जगत्कर्त्री इति यत् शाक्तमतं तस्य निराकरणम् ॥

द्वितीयाध्यायस्य तृतीयः पादः ।

१	१–७	आकाशस्य उत्पत्तिमत्त्वविषयकश्रुतिविरोधपरिहारेण उत्पत्तिमत्त्वनिरूपणम् ॥
२	८	मुख्यवायोः उत्पत्तिमत्त्वविषयकश्रुतिविरोधपरिहारेण मुख्यप्राणः उत्पत्तिमान् इति निरूपणम् ॥

॥ हरिः ॐ ॥

उपकारस्मरणे

भाष्यदीपिकेय एरडनेय भागद मुद्रणक्के पूर्तियागि धनसहायमाडि दवरु श्रीकृष्णसेवाधुरीण, पितृभक्तिपरायण, धर्मभूषण, समाजभूषण, श्रीमान् के.सीतारामरायरु. ई महनीयर अन्नदान, भगवत्सेवे मत्तु धर्मकार्य गळिगे तम्म पूज्य तंदेयवरद श्रीकृष्णभक्त गोविंददासर अनुग्रहद कारण.

ई कृष्णभक्तरु संत गोविंददासरु श्री मध्वाचार्यर कार्यक्षेत्रवाद उडुपिगे हत्तिरदल्लिरुव कुत्तेत्तूरिनल्लि जन्मताळिदरु. बाल्यदल्लिये इवरु अनन्यवाद भक्तियिंद पुरंदरदासर कीर्तनेगळन्नु हाडुत्तिद्दरु. इवर भजनेयन्नू, दैवभक्तियन्नू कंडु उडुपि सीरूरुमठद लक्ष्मीवल्लभतीर्थरु तावु पूजिसुत्तिद्द मारुतिय विग्रहवन्नु कोट्टु इवरन्नु 'दास'रेंदु अनुग्रह माडिदरु. गोविंददासरु काणूरु मत्तु पेजावरमठद स्वामिगळवरिंद नैजभक्तिगे अवश्यकवाद वेदांतद ज्ञानवन्नु पडेदरु.

संत गोविंददासरिगे १४ वयस्सादाग अवर अण्ण रामकृष्णराय रोंदिगे सोदे, मंत्रालय, मधुरे, रामेश्वर, कन्याकुमारि क्षेत्रगळ यात्रेयन्नु माडि, मदरासिन पार्थसारथिय सन्निधिगे बंदु एरडु वर्षगळकाल मधुकर वृत्तियिंद पडेद अक्कि, बेळे, काळुगळल्लि स्वल्पभागवन्नु बडवरिगे मोदलु कोट्टु अनंतर उळिद स्वल्प अंशवन्नु तावु सेविसुत्तिद्दरु. इदल्लवे अचल धर्ममार्ग !

आमेले तिरुपतिय यात्रेयन्नु माडि भगवान् श्रीनिवासन कृपेयन्नु हौदि काशिगे होगुव योचनेयल्लिद्दाग, शिवमोग्गदबळि प्राणेशविट्ठल दासरिंद चतुराश्रमगळल्लि, देवर मत्तु आतन भक्तर सेवेगे गृहस्थाश्रमवे श्रेष्ठवेंदु उपदेशवायितु. इदे मातन्ने पुरंदरदासरु "ईसबेकु, इदु जैसबेकु। हेसिगे संसारदल्लि। आशे लेश इडदहांगे" एंदु हेळिद्दारे. अदरंते गोविंददासरु श्रीमति गंगाबाइयन्नु मदुवेयादरु. श्रीमति गंगाबायि

परम साध्वीमणि. दासर हेज्जेयल्लि हेज्जेयिट्टरु. 'सहधर्मिणी' एंब हेसरिगे तक्कवरागिद्दरु.

केलवु कालदमेले दासवर्यर अण्णंदिराद रामकृष्णरायरु इहलोकवन्नु बिट्टुबुदक्के मुंचे नावु संग्रहिसिद्द दाससाहित्यवन्नु नित्यवू भगवान् नारायणन संकीर्तनमाडुवंते गोविंददासरिगे उपदेशिसि इवरिगे ओप्पि सिदरु. संत गोविंददासरु अण्णंदिर सलहेयंते दिनवहि माडिद संकीर्तनेयु मादरियागित्तु. एतन्मध्ये देवरु कोट्ट अनुकूलदल्लिये इवरु मक्कळिगे विद्येयन्नु कलिसिदरु. अवरल्लि ईग मद्रासिनल्लिरुव मेले हेळिद दानि श्री सीतारामरायरु मत्तु अवर सादरु सेरि कुत्तत्तूरिनल्लि कण्वाश्रम दंतिरुव शांतवाद प्रदेशदल्लि ओंदु मने कट्टि अदर गृहप्रवेशवन्नु पुत्तिगे मठद पूज्य श्री सुधींद्रतीर्थस्वामिगळवर सन्निधियल्लि माडिसिदरु. ई स्वामिगळ शतमानोत्सववन्नु श्री सीतारामरायरु भक्तियिंद विजृंभणेयिंद इष्टमित्रर सम्मुखदल्लि नेरवेरिसि कृतार्थरादरु.

गोविंददासरु नम्म कोनेय हदिनेंदु वर्षगळल्लि श्री सीतारामरायर नेरविनिंद प्रतिवर्षवू उडुपी श्रीकृष्णन महापूजे मत्तु ब्रह्मोत्सवगळन्नु माडिसुत्तिद्दरु. इदक्कागि यारादरू अवरन्नु (भक्त गोविंददासरन्नु) होगळिदाग 'ई ऐश्वर्यवु नन्नदू अल्ल, नन्न मक्कळदू अल्ल, श्रीकृष्णनदु. अवनदन्न तिरुगि अवनिगे अर्पिसुत्तिद्देने अष्टे. नानु उत्तरायणप शुक्लपक्षद हगलिनल्लि अनायासवागि शांतनागि प्राणत्यागमाडिदरे पुण्यवंत अंदु कोब्बुत्तेने" एन्नुत्तिद्दरु.

गोविंददासर निर्याणक्के एळुतिंगळ हिंदेये अवर कण्णिन दृष्टिय बलवु हल्लदंतायितु. तन्न हृदयदल्लि स्थापितनाद देवर दर्शनवोंदन्ने अवरु काणलेंदु होगायितेनो एन्निसुत्तित्तु. दासरु बहिर्मुखरागदे "बंददेल्ला बरलि, गोविंदन दयेयोंदिरलि" एंदुकोंडु अवरु उदासीनरागिद्दरु.

अवर कोनेगालक्के केलवु दिनगळ हिंदे अवर मक्कळु तम्म तंदेयन्नू नंटरिष्टरन्नू उडुपिगे करेदुकोंडुहोगि विजृंभणेयिंद ब्रह्मोत्सववन्नु माडिसिदरु. आग दासरु रथद मुंदे मक्कळोंदिगे हाडुत्ता कुणियुत्तिद्दरु.

ा कालदल्लि आश्चर्यकरवागि श्रीकृष्णनु भक्तिपरवशराद इवरिगे अनुग्रहमाडिद संगति कंडितु. मत्ते कुत्तेत्तूरिगे बंदमेले अवर नडते ल्लियू मनस्सिनल्लियू ओंदु गंभीरवाद बदलावणे आयितु. यावागलू भगवन्नामवन्नु जप माडुत्तिद्दरु. ओंदुदिनवादरू अवरु नित्यकर्मगळन्नु बेडलिल्ल. कोनेयदिन अवर मक्कळिंदलू नेंटरिष्टरिंदलू परिवृतरागि तुळसिय वृंदावनदबळि नारायणस्मरणे माडुत्ता शांतरागि असुवन्नु नीगिदरु.

अनंतर अवर मक्कळाद श्री सीतारामरायरु बदलागुत्तिरुव समाज स्थितिगे अनुगुणवागि मदरासिन प्रमुखभागदल्लि "दासप्रकाश"वेंब भोजनगृहवन्नु निर्मिसि अल्लि ओंदु प्रार्थनामंदिरमाडि अदरल्लि श्रीकृष्णन विग्रहवन्नु स्थापिसि, प्रतियोब्बरू प्रार्थनेमाडुवंते पर्पाडिसिद्दारे. अल्लि होदवरिगे पुरातन जीवनमार्गवन्नु कलिसिकोट्टिद्दारे.

"दासप्रकाश"द हत्तिरवे अवर तायि श्रीमति गंगाबायियवर हेसरिनल्लि (गंगाबायि चारिटीस) "धर्मप्रकाश"वेंब कल्याणमंदिरवन्नु कट्टिसिरुवरु. इल्लि बडवरिगे एल्ला सौकर्यगळन्नू कल्पिसिरुवुदु ओंदु निदर्शन. इल्लिये अखिल भारत माध्वतत्त्वज्ञान सम्मेळनवु श्री व्यासराजमठद स्वामिगळ अध्यक्षतेयल्लि श्रीमन्मैसूरु महाराजराद श्री जयचामराजेंद्रओडेयरिंद उद्घाटिसल्पट्टु यशस्वियागि नडेयितु.

१९६३र जून् तिंगळिनल्लि श्री सीतारामरायरु १०० ब्राह्मण बालकरिगे धर्मोपनयनगळन्नु श्लाघ्यवाद रीतियल्लि नडेसिदरु. १९६४ रल्लू इदे रीतियागि धर्मोपनयनगळन्नु माडिसिदरु. बटुगळ तायितंदेयवरिगू बटुगळिगू उडुगोरेगळन्नु कोट्टरु. आ उपनयनगळु तम्म मक्कळद्देएनो एंबुवंते रायर दंपतिगळु एल्लर योगक्षेमवन्नू नोडिकोंडरु. आ चिरंजीविगळु दीक्षावस्त्रवन्नु धरिसि पलाशदंडवन्नु हिडिदु संध्यावंदने माडुवुदन्नु नोडलु एरडु कण्णुगळू सालदु एन्नुत्तितु. आग संतगोविंददासरे मगनन्नु ई सत्कार्यदल्लि तोडगिसुत्तिद्दरो एन्नुवंते इत्तु. श्री सीताराम रायरु अंथा संदर्भगळल्लि तम्म तंदेय अंतर्यामियाद श्रीकृष्णने एल्लवन्नू नडेसुत्तिद्दानेंदु तिळिविद्दारे.

ईग तम्म तंदेयवर हेसरिनल्लि उडुपि श्रीकृष्णनसेवेयन्नु रायरु प्रतिवर्षवू नडेसुत्तिद्दारे. मदरासिगे याव अष्टमठद स्वामिगळु बंदरू श्री रायर भिक्षे पडेदु श्रीरायरु, श्रीश्रीयवर परमानुग्रहक्के पात्र रागुत्तारे. प्रति वर्षवू मदरासिनल्लि इवर "दासप्रसाद"दल्लि मध्वनवमि उत्सववन्नु विजृंभणेयिंद नडेसुत्तिद्दारे. इदे वर्ष कळेद फेब्रुवरियल्लि ई मध्वनवमी उत्सवद २५ ने वर्षद सन्दुवागि रजतमहोत्सववन्नु "धर्म प्रकाश"दल्लि श्री भंडारकेरि श्रीपादंगळवर मत्तु उडुपि श्री पेजावर श्रीपादंगळवर नेतृत्वदल्लि श्री भंडारकेरि श्रीपादंगळवर श्री मा. रा. सं. समेय ३३ ने अधिवेशनदिंद संयुक्तवागि बहु वैभवदिंद नडेसिद्दारे.

इंथा महामहिमराद श्री भक्त गोविंददासरु तम्म नित्यजीवनदल्लि दिनवहि पुरुषोत्तमनाद नारायणन आराधनेय क्रमवन्नु अनुसरिसुत्तिद्द "भजनपद्धति"यन्नु श्री सीतारामरायरू अवर कुटुंबदवरू नित्यवू पालिसुत्तिद्दारे. अवरु एष्टु उत्साहदिंद भजने माडुवरेंबुदन्नु कण्णिंद नोडि किविगिंद केळि तिळियबेकु. श्री सीतारामरायरादरो "इदु नन्न शक्तियल्ल. नन्न तंदे गोविंददासर अंतर्यामियाद भगवंतनु नन्नल्लि निंतु ई धर्मकार्यगळन्नु माडिसुत्तिद्दारेंदु" विनय भक्तिगळिंद हेळुत्तारे.

इंथा श्री भक्त गोविंददासर मक्कळाद श्री सीतारामरायरिगे भाष्यदीपिका प्रकाश समितियवरु श्रीरायर महोपकारक्कागि कृतज्ञ रागिद्दारे.

अधि० ।	सूत्र० ।	विषयाः ।
३	९	ब्रह्मणः उत्पत्तिमत्त्वविषयकश्रुतिविरोधपरिहारेण ब्रह्मणः उत्पत्तिर्नास्तीति निरूपणम् ।
४	१०	तेजसः ब्रह्मणस्सकाशादुत्पत्तिविषयकश्रुतिविरोधपरिहारेण ब्रह्मणस्सकाशात् तेजसः उत्पत्तिनिरूपणम् ॥
५	११	अपां ब्रह्मणः सकाशादुत्पत्तिविषयकश्रुतिविरोधपरिहारेण ब्रह्मणः सकाशात् उत्पत्तिरिति निरूपणम् ॥
६	१२	जलं ब्रह्मणः अन्नसृष्टौ द्वारकारणं पृथिवीसृष्टौ द्वारद्वारकारणं इत्येतद्बोधकश्रुतिविरोधपरिहारेण जलं पृथिवीद्वारकारणं इति निरूपणम् ॥
७	१३	ब्रह्मणः अधिभूताधिदैवसंहारकर्तृत्वविषयकश्रुतिविरोधपरिहारेण ब्रह्मणः अधिभूतादिसंहारकर्तृत्वनिरूपणम् ॥
८	१४	अधिभूतादिसंहारक्रमविषयकश्रुतिविरोधपरिहारेण व्युत्क्रमेण लीयते इति निरूपणम् ॥
९	१५–१६	मनस्तत्त्वस्य उत्पत्तिक्रमेण लयः सर्वेषां विपरीतक्रमेण लयः इत्येतत्प्रतिपादकश्रुतिविरोधपरिहारेण सर्वेषां विपरीतक्रमेणैव लयः इति निरूपणम् ॥
१०	१७	परमात्मा न लीयते परमात्मा लीयते इत्येतत्प्रतिपादकश्रुतिविरोधपरिहारेण परमात्मनः लयः नास्तीति निरूपणम् ॥
११	१८–१९	जीवोत्पत्तिविषयकश्रुतिविरोधपरिहारेण स्थूलशरीरेण ब्रह्मणः जीवः उत्पद्यत इति जीवस्य स्थूलशरीरसम्बन्ध एव उत्पत्तिः इति निरूपणम् ॥
१२	२०–२६	जीवाणुत्वविषयकश्रुतिविरोधपरिहारेण जीवः अणुरिति निरूपणम् ॥

अधि० ।	सूत्र० ।	विषयाः ।
१३	२७	जीवः बहुरूपः बहुरूपो न इत्येतत्प्रतिपादकश्रुतिविरोध-परिहारेण जीवः स्वरूपेण एकः । अंशेन बहुरूपः इति निरूपणम् ॥
१४	२८–२९	जीवस्य परमात्माभिन्नत्वविषयकश्रुतिविरोधपरिहारेण जीवः भिन्न इति निरूपणम् ॥
१५	३०	जीवस्य उत्पत्तिरस्ति, जीवः अनादिः, इत्येतद्बोधक-श्रुतिविरोधपरिहारेण स्वरूपतः अनादिरिति निरूपणम् ।
१६	३१–३२	जीवः ज्ञानानन्दरूपः जीवः ज्ञानानन्दादिरूपो न इत्ये-तद्बोधकश्रुतिविरोधपरिहारेण जीवः स्वरूपतः ज्ञाना-नन्दादिरूपः इति निरूपणम् ॥
१७	३३–४२	जीवकर्तृत्वविषयकश्रुतिविरोधपरिहारेण दत्तस्वातन्त्र्येण जीवः कर्ता इति निरूपणम् ॥
१८	४३–५०	जीवः परमात्मनः अंशः परमात्मनः अंशो न इत्येतद्बोधक-श्रुतिविरोधपरिहारेण भिन्नांशः नाम, अल्पशक्तिः किञ्चित्सादृश्यमात्रवान् इति निरूपणम् ॥
१९	५१–५३	जीवः परमात्मनः प्रतिबिम्बः इति श्रुतिः न इति अनु मितश्रुतिः अनयोर्विरोधपरिहारेण प्रतिबिम्बः नाम, किञ्चित् साम्योपेतः इति निरूपणम् ॥

द्वितीयाध्यायस्य चतुर्थः पादः ।

१	१–३	इन्द्रियोत्पत्तिविषयकबलवच्छ्रुतिविरोधस्य परिहारेण इन्द्रियाणि परमात्मना स्थूलरूपेण उत्पद्यन्ते इति निरूपणम् ॥
२	४	मनोजन्मविषयकबलवच्छ्रुतिविरोधस्य परिहारेण मनः परमात्मना स्थूलरूपेण उत्पद्यते इति निरूपणम् ॥

अधि० ।	सूत्र० ।	विषयाः ।
३	५	वागुत्पत्तिविषयकबलवच्छ्रुतिविरोधस्य परिहारेण वाक् परमात्मना स्थूलरूपेण उत्पद्यते इति निरूपणम् ॥
४	६–७	प्राणसङ्ख्याविषयकबलवच्छ्रुतिविरोधस्य परिहारेण प्राणाः द्वादश इति निरूपणम् ॥
५	८	प्राणपरिमाणविषयकश्रुतिविरोधस्य परिहारेण प्राणाः अणव इति निरूपणम् ॥
६	९–१०	मुख्यप्राणजन्मविषयकश्रुतिविरोधस्य परिहारेण स्थूलरूपेण मुख्यप्राणः उत्पद्यते इति निरूपणम् ॥
७	११–१२	मुख्यप्राणः स्वतन्त्रः मुख्यप्राणः परमात्माधीनः इत्येतद्बोधकश्रुतिविरोधस्य परिहारेण परमात्माधीनः इति निरूपणम् ॥
८	१३	प्राणादयः मुख्यप्राणस्य स्वरूपभूताः मुख्यप्राणस्य दासाः इत्येतद्बोधकश्रुतिविरोधस्य परिहारेण दासभूताः पञ्च, स्वरूपभूताः पञ्च इति निरूपणम् ॥
९	१४	मुख्यप्राणः व्याप्तः मुख्यप्राणः अणुः इत्येतद्बोधकश्रुतिविरोधस्य परिहारेण अन्तर्गतरूपेण अणुः बहिर्गतरूपेण व्याप्तः इति निरूपणम् ॥
१०	१५–१७	प्राणाः जीवस्य करणानि ब्रह्मणः करणानि इत्येतद्बोधकश्रुतिविरोधस्य परिहारेण ब्रह्मणः करणानि इति निरूपणम् ॥
११	१८–२०	सर्वे प्राणाः इन्द्रियाणि मुख्यप्राणादन्ये द्वादश प्राणाः एव इन्द्रियाणि इत्येतद्बोधकश्रुतिविरोधस्य परिहारेण अन्ये एव इन्द्रियाणि इति निरूपणम् ॥

अधि० ।	सूत्र० ।	विषयाः ।
१२	२१	इन्द्रियाश्रयशरीरं परमात्मसृष्टं विरिञ्चसृष्टं इत्येतद्बोधक-श्रुतिविरोधस्य परिहारेण परमात्मसृष्टमिति निरूपणम् ॥
१३	२२–२३	इन्द्रियाश्रयशरीरं जलमात्रेण उत्पद्यते पृथिव्यादिभ्यः उत्पद्यते इत्येतद्बोधकश्रुतिविरोधस्य परिहारेण पृथिव्यादिभ्यः इति निरूपणम् ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ हरिः ॐ ॥

॥ ब्रह्मसूत्रभाष्यम् ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम् ।

॥ अथ द्वितीयाध्यायः ॥

प्रथमः पादः

॥ १. स्मृत्यधिकरणम् ॥

(१) उक्तेऽर्थेऽविरोधं दर्शयत्यनेनाध्यायेन । प्रथमपादे युक्त्यविरोधम् । प्रथमतः स्मृत्यविरोधं दर्शयति–

॥ अथ द्वितीयाध्यायः ॥

॥ १. स्मृत्यधिकरणम् ॥

(१) पूर्वाध्यायसङ्गतत्वेनैतदध्यायार्थं दर्शयति—उक्त इति ॥ नारायणे निखिलवेदसमन्वयेन यो जगत्कारणत्वरूपोऽर्थो गताध्याये निरूपितस्तस्मिन्नित्यर्थः । 'अविरोधं' न विरोधोऽविरोधस्तं युक्त्यादिविरोधाभावं 'दर्शयति' प्रतिपादयति 'अनेन' द्वितीयाध्यायेन सूत्रकार इत्यर्थः । अनेन पूर्वाध्यायस्यास्य च हेतुहेतुमद्भावलक्षणा सङ्गतिरुक्ता भवति । पूर्वस्याशेषशब्दसमन्वयमुखेन जगत्कर्तृत्वरूपधर्मिज्ञापकत्वेनास्य च विरोधनिरासेनोक्तजगत्कर्तृत्वस्थैर्यसाधकत्वेन हेतुत्वसम्भवात् । एतत्पादप्रतिपाद्यं दर्शयति–प्रथमेति । अस्येति विपरिणामेनास्यान्वयः । उक्तेऽर्थे दर्शयतीत्यनुवर्तते । युक्तिरनुमानम् । सङ्गतिप्रदर्शनायैतत्पादीयाद्याधिकरणप्रतिपाद्यं दर्शयति–प्रथमत इति । प्रथमाधिकरण इत्यर्थः । अनुवृत्त्यादि पूर्ववत् । स्मृतिरलौकिकार्थविषयाप्तवाक्यरूपा पाशुपतादिलक्षणा । स्मृतीत्यनेन पाशुपतादिस्मृतीनां युक्तिग्रथनात्मकत्वेन तद्विरोधाभाव-

(२) सू—ॐ ॥ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ ॐ ॥ १ ॥

सर्वज्ञा हि रुद्रादयः । अतस्तेषां वचनविरोधेऽप्रामाण्य-मेव स्यादिति चेत्—

प्रतिपादकस्यास्याधिकरणस्य युक्त्यविरोधप्रतिपादकत्वादत्र पादे निवेशः सङ्गत इति सूचितम्। स्मृतीनां समयादिरूपत्वेऽपि न प्रथमातिक्रमो युक्तः, कारणाभावात्। अनेनास्याधिकरणस्य शास्त्रादिसङ्गतिरुक्ता भवति।

(२) पूर्वपक्षादिप्रदर्शनाय सूत्रमुपन्यस्यति--स्मृतीति ॥ अत्र पूर्व-पक्षांशं व्याख्यास्यन् विशेषणस्य परनिपातेनाभिप्रेतेनानवकाशस्मृती-त्यन्वये सति तत्रानवकाशपदेन लब्धान् हेतून् दर्शयति—सर्वज्ञाहीति। हिहेतौ प्रसिद्धौ च। सार्वज्ञं जगद्धितोपदेष्टृत्वस्याप्युपलक्षकम्। आदि-शब्देन कपिलकमलासनादयो गृह्यन्ते। अनेनातिमूलत्वप्रावल्यार्थान्तर-परत्वासम्भवरूपानवकाशत्वाख्यहेतवो दर्शिताः। ततः किमित्यत आह—अत इति। 'तेषां' रुद्रादीनां। विरोधे सति विष्णुजगत्कर्तृतापरत्वरूप-विरुद्धार्थकल्पनेनेति भावः। 'अप्रामाण्यं' श्रुतेरित्याकृष्यते। एवशब्देन विरोधेऽपि अप्रामाण्याभावो देशकालभेदेनाविरोधश्च व्यवच्छिद्यते। स्यादित्यनेन सौत्रः प्रसङ्गशब्दो विवृतः। तथाच यतो रुद्रादयः सार्वज्ञा-दिमत्त्वेनागमसिद्धाः, अतस्तेषां वचनानां तत्स्मृतीनामातिमूलत्वं सिद्धं, अत एव प्रावल्यं च, अत एव निरवकाशत्वं च; अतः श्रुतेः 'यतो वा' (तै. उ. ३-१-१.) इत्यादिरूपायाः विष्णुजगत्कर्तृतापरत्वकल्पने तद्विरोध एव स्यात्, न त्वविरोधः। तद्विरोधे च तन्निमित्ताप्रामाण्यमेव स्यात्, न तु भागविशेषे प्रामाण्यमपि, न वा देशकालभेदेन अविरोधोऽपि। तथासति वस्तुनि विकल्पप्रसङ्गः, ततस्तत्परिहारार्थं श्रुतेर्विष्णुजगत्कर्तृतापरत्वत्यागे-नार्थान्तरपरता वक्तव्या। अतः प्रमाणाभावान्न सा सिध्यति। अतो न तस्य जिज्ञास्यतेति योजना। वचनविरोधेऽप्रामाण्यमित्यनेन सौत्रस्मृतिपदं तद्विरोधोपलक्षकं, दोषपदंचाप्रामाण्याख्यदोषपरमित्युक्तं भवति। एवेत्यनेन प्रोपसर्गार्थ उक्तो भवति ॥

(३) न, अन्यस्मृतीनां विष्ण्वादिभिर्नितरां सर्वज्ञैरेव कृतत्वाच्छ्रुतेराधिक्यं च सिध्यति ॥ १ ॥

---

(३) सिद्धान्तांशं व्याचष्टे—नेति ॥ स्मृतीनामिति कृतत्वादिति श्रुतेरिति चावर्तते । विरोध इत्यनुवर्तते । अत्रापि सार्वज्ञमुपलक्षकम् । एवशब्दोऽसार्वज्ञव्यवच्छेदकः । यदा सर्वज्ञकृतानामाप्तिमूलत्वं तदा सुतरां निरतिशयसर्वज्ञकृतानामिति कैमुत्ये वा एवशब्दः । स्मृतेरप्रामाण्यं चशब्दार्थः । तथात्र न विष्णुजगत्कर्तृत्वं प्रमाणशून्यत्वादयुक्तम्, किन्तु युक्तमेव । कुतः ? 'श्रुतेः' 'यतो वा' इत्यादिश्रुतिसिद्धत्वात् । न च श्रुतेर्विष्णुजगत्कर्तृतापरत्वे अन्यस्मृतिविरोधेनाप्रामाण्यदोषप्रसङ्गात् तस्याः अर्थान्तरपरत्वमिति वाच्यम् । कुतः ? यतोऽन्यस्मृतीनां पाशुपतादिरूपाणामेवाप्रामाण्यम् । कुत एतत् ? श्रुतेः 'विरोधे' विरोधनिमित्तात् । न च श्रुतिविरोधेऽपि नान्यस्मृतीनामप्रामाण्यं सिध्यति, स्मृत्यपेक्षया श्रुतेराधिक्यासिद्धेरधिकबलविरोधस्यैव अप्रामाण्यहेतुत्वादिति वाच्यम् । यतोऽन्यस्मृतीनां पाशुपतादिभ्योऽन्यासां व्याख्यानरूपाणां पञ्चरात्रादिस्मृतीनां सहायीकृतत्वात् श्रुतेराधिक्यं सिध्यति । न च वाच्यं पञ्चरात्रादिस्मृत्यानुकूल्येऽपि कथं श्रुतेराधिक्यं सिद्ध्यतीति । पञ्चरात्रादिरूपान्यस्मृतीनां रुद्राद्यपेक्षया 'नितरां' निरतिशयं निस्संशयं वा 'सर्वज्ञैरेव' विष्ण्वादिभिः विष्णुमनुप्रभृतिभिः 'कृतत्वात्' प्रणीतत्वादिति योजना । अनेन पाशुपतादिस्मृतेः श्रुतिबाधः । पञ्चरात्रादिस्मृतिसहितश्रुत्यादिबाधश्चोक्तो भवति । सर्वज्ञैरेव कृतत्वादित्यनेन निरवकाशत्वं चोक्तम् । तेनानवकाशपदं स्मृतिविशेषणं विवृतम् । अत्रापि परनिपातः । श्रुतेरित्यनेन सूत्रे स्मृतिपदं तत्सहितश्रुतिपरम् । तथाच तद्विरोधो लभ्यते, श्रुतिसमन्वयस्य स्मृतिविरोधे शङ्किते श्रुतिं त्यक्त्वा केवलस्मृतिविरोधोक्तेरयुक्तत्वात् । स्मृत्युपन्यासस्तु श्रुतेः प्राबल्यार्थ इति सूचितं भवति । आधिक्यमिति प्रोपसर्गतात्पर्यकथनम् । अनेन—यतोऽनवकाशान्यस्मृतिविरोधनिमित्तात् श्रुतेरप्रामाण्याख्यदोषप्रसङ्गो भवति । अतो न तस्याः विष्णुजगत्कर्तृतापरत्वं युक्तं, अतो न तया तत्सिद्धिरिति मानाभावान्न युक्तं विष्णोर्जगत्कर्तृत्वमिति चेत्—न, कुतः ? 'अन्यस्मृत्यनवकाशदोष-

(४) सू—ॐ ॥ इतरेषां चानुपलब्धेः ॥ ॐ ॥ २ ॥

इतरेषां तासु स्मृतिषूक्तानां फलादीनां प्रत्यक्षतोऽनुपलब्धेरप्रामाण्यं तासां युक्तम् ।

प्रसङ्गात्' अन्यासां पाशुपतादिस्मृतीनां निरवकाशपञ्चरात्रादिस्मृतिसहितश्रुतिविरोधेन नितरामप्रामाण्यदोषेण प्रकृष्टसम्बन्धाभ्युपगमात्, तथा च तद्विरोधोऽकिञ्चित्कर इति न तन्निमित्तं श्रुतेरर्थान्तरपरत्वं कल्प्यमिति सूत्रार्थ उक्तो भवति ॥

(४) यदुक्तं वैष्णवस्मृतीनां परमाप्तप्रणीतत्वेन तत्साहाय्ययुक्तश्रुत्या प्रबलया विष्णोर्जगत्कारणत्वसिद्धिरिति, न तदुक्तम् । तथा सति पाशुपतादिस्मृतीनामप्रामाण्यप्रसङ्गात्, नचाप्तोक्तानां तासां अप्रामाण्यं युज्यत इत्याशङ्क्य परिहरत्सूत्रं पठित्वा व्याचष्टे—इतरेषां चेति ॥ अनुपलब्धेरित्येतत्काकाक्षिन्यायेनोभयत्रान्वेति । भाष्येऽप्यावृत्त्योभयत्रान्वयः । न विद्यते उपलब्धिर्यस्यासावनुपलब्धिः प्रत्यक्षायोग्यः पदार्थः तस्मादितरेषां फलादीनां प्रत्यक्षतोऽनुपलब्धेरित्यर्थः । यद्वा अनुपलब्धेरित्यस्य नोभयत्रान्वयः, किंतु पूर्वसूत्रे यस्मिन् जगत्कारणत्वादौ स्मृतिविरोधश्शङ्कितः, तदितरेषां प्रत्यक्षयोग्यानामित्येकत्रैवान्वयः । इतरेषामित्यस्योक्तस्मृत्युक्तानां इत्यर्थान्तरमभिप्रेत्याह—तास्विति । अत एव इतरेषां इत्यनुवादेन तास्विति व्याख्यानम् । चशब्दोऽनुपलब्धेश्चेत्यन्वेति । 'तासु' पाशुपतादिरूपासु फलं पुमर्थः । आदिपदेनानर्थो गृह्यते । अनुष्ठानपरित्यागयोः कृतयोरपीति शेषः । तथाच 'इतरेषां' वैष्णवेतरपशुपत्यादिप्रणीतस्मृत्युक्तानां 'अनुपलब्धेः' इतरेषां प्रत्यक्षयोग्यानां फलानामनर्थानां च मध्ये केषाञ्चिदफलत्वात्तदितरेषां च तासूक्तानुष्ठानपरित्यागयोः कृतयोरपि प्रत्यक्षतोऽनुपलब्धेरनुपलम्भाच्चेति योजना । आनुमानिकोपलब्धिमादायासिद्धिवारणाय—प्रत्यक्षत इति । अनुपलब्धेश्चेत्यन्वितश्चशब्दः आप्तोक्तत्वानिश्चयादिति हेत्वन्तरसूचकोऽप्ययमेवानुपलब्धिहेतोः साध्यतया अन्वेतीत्याशयेन अस्य हेतोरन्वययोग्यं प्राग्दोषप्रसङ्गादित्यनेनोक्तं परमसाध्यं दर्शयति—अप्रामाण्यमिति । 'तासां' पाशुपतादिस्मृतीनाम् । एवेति चशब्दस्यार्थः युक्तमेवेत्यन्वेति ॥

(५) चशब्देन भागोपलब्धिरङ्गीकृता ॥ २ ॥

(६) सू—ॐ ॥ एतेन योगः प्रत्युक्तः ॥ ॐ ॥ ३ ॥

योगफलं प्रत्यक्षोपलभ्यमिति न मन्तव्यम् ।

---

(५) ननु पाशुपतादिस्मृतिविहिताचरणे फलस्य तन्निषिद्धाचरणेऽनर्थस्य चोपलम्भात्कथं तदनुपलब्धिमसूत्रयत्सूत्रकार इत्यत आह—चशब्देनेति॥ इति सूचितं सूत्रकृतेति शेषः। अनेनेतरेषां मध्ये केषाञ्चिदुपलम्भात्तदितरेषां अनुपलम्भाच्चेति समुच्चयार्थश्चशब्द इत्युक्तं भवति। तथा चेतरस्मृतिषु भागविशेषे उक्तानां फलादीनां उपलम्भेऽपि न तत्राप्तोक्तत्वनिश्चयो युज्यते, अदृष्टफलकभागान्तरवदनाप्तोक्तत्वस्यापि सम्भवादिति भावः॥

(६) ननु तथापि न सर्वासामवैष्णवस्मृतीनां उक्तनिमित्तादप्रामाण्यम्, योगस्मृत्युक्तफलादीनां नियमेनोपलम्भात्तासामाप्तप्रणीतत्वनिश्चयोपपत्तेरित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे— एतेनेति॥ एतेनेत्यतिदेशोपयुक्ताभ्यधिकाशङ्कां दर्शयति—योगफलमिति। योगशब्दस्य व्याख्यानान्तरमेतत्। स्वेदकम्पादिरूपं योगस्मृत्युक्तं योगाभ्यासफलमित्यर्थः। सूत्रऽपेक्षितं पूरयति—प्रत्यक्षोपलभ्यमिति। इन्द्रियग्राह्यं भवतीत्यर्थः। नियमेन यत इति शेषः। अस्यात आप्तप्रणीतत्वनिश्चयोपपत्तेर्न योगस्मृतीनामप्रामाण्यमिति प्रकृतसाध्येनान्वयः। प्रत्युक्तपदतात्पर्यमाह—इति न मन्तव्यमिति। अत्राभ्यधिकाशङ्कानिरासायैतेनेत्यतिदिष्टहेतुं व्यनक्ति—उक्तेति। प्रथमं फलं स्वेदनं, द्वितीयं गात्रभञ्जनमित्येवंरूपक्रमविशिष्टफलकतया योगशास्त्रोक्तानां स्वेदनगात्रभञ्जनादिरूपफलोपायानां 'अभ्यासे' अनुष्ठाने सति 'तत्काल एव' अभ्यासावस्थोत्कर्षसम्पत्तिकाल एव 'फलादृष्टेः' स्वेदनादिफलादर्शनादित्यर्थः। तथाच नियमेन फलोपलम्भहेतोरसिद्धेस्तेनाप्तोक्तत्वनिश्चयासम्भवाद्योगस्मृतेरप्रामाण्यमेवेति सर्वासामवैष्णवस्मृतीनामप्रामाण्यं युक्तमेवेति भावः। अनेन—'एतेन' उक्तक्रमेण तत्तत्फलोपायाभ्यासे तत्काल एव तदुक्तक्रमविशिष्टफलादर्शनेन 'योगः' योगशास्त्रोदितं योगाभ्यासफलं नियमेन

उक्ताभ्यासे तत्काल एव फलादृष्टेः ॥ ३ ॥

॥ इति स्मृत्यधिकरणम् ॥ १ ॥

॥ २. नविलक्षणत्वाधिकरणम् ॥

(१) सू—ॐ ॥ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ॐ ॥ ४ ॥

नैवं श्रुतेस्तदनुसारिस्मृतेश्च तदुक्तानुपलब्धेरप्रामाण्यं वाच्यम् । विलक्षणत्वात् नित्यत्वात् तदनुसारित्वाच्च ।

प्रत्यक्षोपलभ्यमिति मतं निरस्तम् । अत एव योगस्यासोक्तत्वनिश्चयो निरस्तः । अत एव योगोऽप्यप्रमाणत्वेन निरस्त इति सूत्रार्थ उक्तो भवति ।

॥ इति स्मृत्यधिकरणम् ॥ १ ॥

॥ २. नविलक्षणत्वाधिकरणम् ॥

(१) अत्राधिकरणे विष्णोर्जगत्कारणत्वे प्रमाणत्वेनोक्तवेदादिप्रामाण्ये युक्तिविरोधः परिह्रियते । विषयपूर्वपक्षादेः सूत्र एवोक्तत्वात्तमनुपन्यस्य सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे—नेति ॥ एवमित्यनेन तथात्वमित्येतन्नेत्यनेनापि संयोज्यमिति दर्शितम् । अस्येत्यस्यार्थः श्रुतेस्स्मृतेश्चेति । चः समुच्चये । पाशुपतादिव्यावर्तनाय–तदनुसारीति । श्रुत्यनुसारीत्यर्थः । न च श्रुत्यादेरित्यादिशब्दविवक्षया सूत्रेऽस्येति प्रयोगात्तद्विवरणरूपे भाष्ये श्रुतेः स्मृतेरिति कथं प्रयोग इति वाच्यम् । तत्रापि श्रुतेः स्मृतेरित्यस्य श्रुतिवाक्यस्य स्मृतिवाक्यस्येत्यर्थाश्रयणात् । यदेवमित्यनेन तथात्वमिति व्याख्यानम्, तस्य तथात्वं पाशुपतादिस्मृतिवत् भावस्तदुक्तानुपलब्ध्यप्रामाण्ये इत्यर्थाश्रयणेनैवमित्युक्तं विवृणोति—तदुक्तेति ॥ श्रुतितदनुसारिस्मृत्युक्तवृष्ट्यादिफलानुपलम्भादित्यर्थः । तदुक्तकारीर्यादिसाधनानुष्ठानेऽपीति शेषः । अनेन सूत्रे प्रतिज्ञान्वितं तथात्वमित्येतदप्रामाण्यस्य तद्धेतोः फलानुपलम्भस्य तत्र दृष्टान्तस्य ज्ञापकमित्युक्तं भवति । कुतो नेत्यतस्तत्र हेतुत्वेन प्रवृत्तं विलक्षणत्वादित्येतदनूद्य द्वेधा व्याख्याति—विलक्षणत्वादिति । श्रुतेस्स्मृतेरित्यस्ति । तथाच श्रुतेः 'नित्यत्वात्' नित्यत्वाख्य-

(२) न हि नित्ये दोषाः कल्प्याः । स्वतश्च प्रामाण्यम् ।
अन्यथानवस्थितेः ।

वैलक्षण्यवत्त्वात् स्मृतेः 'तदनुसारित्वात्' श्रुत्यनुसारित्वाख्यवैलक्षण्यवत्त्वादित्यर्थः । क्रमिकहेतुसमुच्चये चशब्दः ।

(२) ननु नित्यत्वादिसद्भावेऽपि कुतोऽप्रामाण्याभावः, तद्धेतोर्दोषाभावस्यानिश्चयात् । तथाचाप्रयोजकं हेतुद्वयमित्यतस्तत्रास्य तथात्वं पाशुपतादिवत्सदोषत्वमपि नेति योजनाश्रयेण लब्धं नित्यत्वादेः साक्षात्साध्यभूतं प्रामाण्ये साक्षाद्धेतुं दर्शयति—न हीति ॥ 'हि' यतः 'नित्ये' वेदे । उपलक्षणमेतत् । तदनुसारिस्मृतौ चेत्यपि द्रष्टव्यम् । अत एव प्राक् तदनुसारीत्युक्तम् । नित्य इति हेतुगर्भम् । 'दोषाः' वक्तृदोषाः 'कल्प्याः' अप्रामाण्यनिमित्ततयेति शेषः । अस्मातो नाप्रामाण्यमिति पूर्वेणान्वयः । तथाच नित्यत्वादेः प्राग्व्यवधानेन हेतुत्वस्याभिप्रेतत्वान्नोक्तदोष इति भावः । ननु क्वचित्फलव्यभिचारात्पाशुपतादिस्मृतिवद्वेदादेरप्रामाण्यमित्याशङ्कापरिहारायाप्युक्तं वैलक्षण्याख्यहेतुं स्वतःप्रामाण्याख्यवैलक्षण्योपेतत्वादिति प्रकारान्तरेण व्याचष्टे—स्वतश्चेति । चशब्दोऽप्यर्थेऽवधारणे हेतौ च । श्रुतेः स्मृतेरित्यस्ति । तथाच यतः 'अस्य' श्रुत्यादेः 'प्रामाण्यं' यथार्थज्ञानजनकत्वरूपं स्वतः फलोपलब्ध्यादिरूपसंवादनिरपेक्षश्रुत्यादिस्वरूपग्राहकेणैव गृह्यतेऽतोऽपि फलव्यभिचारेऽपि नैवमवैष्णवस्मृतिवदप्रामाण्यं शङ्कनीयमित्यर्थः । न चैवं "करणप्रामाण्यज्ञप्तिस्तु परत एवेति" पद्धतिवाक्येन "करणानां तु ज्ञप्तौ स्वतस्त्वं नाङ्गीक्रियते" इति सुधावाक्येन च विरोध इति वाच्यम् । इहापि निर्दोषत्वतदनुसारित्वाभ्यामेव यथार्थज्ञानजनकत्वरूपकरणप्रामाण्योपलब्धौ न तत्र संवादापेक्षेत्यत्रैव तात्पर्येण करणस्वरूपग्राहकेणैव तत्प्रामाण्यग्रह इत्यत्र तात्पर्याभावात् । यद्वा—अन्यत्र शक्तिशक्तिमतोर्भेदमभ्युपेत्य स्वरूपग्राहकाग्राह्यत्वरूपपरतस्त्वोक्तावपि इहामेदमभ्युपेत्य स्वरूपग्राहकस्यैव ज्ञानजनकत्वशक्तिग्राहकत्वं तस्यैव च प्रमाजननशक्तिरूपप्रामाण्यग्राहकत्वमिति भावेन संवादनिरपेक्षस्वरूपग्राहकग्राह्यत्वरूपस्वतस्त्वस्योक्तत्वान्न विरोधः । प्रामाण्यं संवादाधीनज्ञानविषय एव किं न स्यादित्यतः तत्रास्य तथात्वं प्रामाण्यस्य

(३) 'न चक्षुर्न श्रोत्रं न तर्को न स्मृतिर्नो वेदा ह्येवैनं वेदयन्ति' इति भाल्लवेयश्रुतेश्च ।

(४) नित्यत्वं चशब्दादेव प्रतीयते 'वाचा विरूप नित्यया'

स्वतस्त्वं चान्यथाऽनवस्थानात्सिद्ध्यतीति योजनाश्रयेण विपक्षे बाधकतर्करूपां शब्दाच्चेत्यप्यन्वितचशब्देन सूचितां युक्तिमाह—अन्यथेति। प्रामाण्यस्य स्वतस्त्वानङ्गीकारे संवादमापेक्षेणैव स्वरूपग्राहकेण ग्राह्यत्वाङ्गीकार इत्यर्थः। अनवस्थितेरिति। फलोपलब्धिरूपसंवादजनकनिष्ठप्रामाण्यमपि स्वत एव चेत् परम्पराकल्पनावैयर्थ्यात्, संवादान्तरेणैव ग्राह्यं चेदनवस्थाप्रसङ्गादित्यर्थः।

(३) अस्य वेदस्य स्वतः प्रामाण्यं च शब्दादित्यन्वयेन वेदस्य स्वतः प्रामाण्ये सूत्रसूचितां श्रुतिं चाह—नेति ॥ 'चक्षुः' अक्षचक्षुः। एवमक्षश्रोत्रं 'तर्कः' शुष्कानुमानं 'स्मृतिः' वेदाननुकूला। एनमिति सर्वत्र सम्बध्यते। 'वेदयन्ति' ज्ञापयन्तीत्येतदेष्वपि विपरिणामेनान्वेति। तर्हि किमेनं ज्ञापयतीत्यत आह—वेदा इति ॥ ऋग्यजुस्सामाथर्वाश्चेत्यादिनोक्ता वेदा एवैनं परमात्मानं स्वतो वेदयन्ति। हि यतः वेदयन्त्यतो वेदा इत्युच्यन्त इत्यर्थः। प्रसिद्धौ हिशब्दः। नेत्यादिना एवशब्दो विवृतः। श्रुतेरित्यस्य स्वतः प्रामाण्यं चेति पूर्वेणान्वयः। साधकबाधकसमुच्चये चशब्दः। अत्र चक्षुरादीनां परमात्मप्रमापकत्वमुक्त्वा वेदस्यैव तत्प्रमापकत्वोक्तेः संवादानपेक्षतया स्वत एव प्रामाण्यमित्युक्तं भवति संवादरूपज्ञानस्य चक्षुरादिनैवोत्पाद्यत्वात्।

(४) यद्वेदस्य नित्यत्वाख्यं वैलक्षण्यमुक्तं तस्यासिद्धिमाशङ्क्य तदुत्तरत्वेनापि शब्दादित्यंशं योजयति—नित्यत्वं चेति ॥ अनेन हेतावप्यन्वितस्य तथात्वमित्यस्य नित्यत्वमित्यर्थान्तरमुक्तं भवति। अस्य श्रुतिवाक्यस्येति वर्तते। चस्त्वर्थः। कोऽसौ शब्द इत्यतस्तमाह—वाचेति। इत्यादेः शब्दादेवेत्यन्वयः। न प्रकृताद्वेदादन्यत्प्रमाणं गवेषणीयमित्येवशब्दार्थः। परेणापि प्रमाणत्वेनाङ्गीकृतादेवेति वा। 'ऋचस्सामानि जज्ञिरे' (तै. आ. ३-१२-४.) इत्युत्पत्तिश्रुतेर्वर्तमानतामात्रेण नित्यत्वोपचारः किं न स्यादित्यतः तदुत्तरत्वेन शब्दादित्येतत्स्मृतिपरतयापि

(ऋ. ८-६४-६.) इत्यादेः । 'अनादिनिधना नित्या' इति च स्मृतिः ॥ ४ ॥

(५) सू—ॐ ॥ दृश्यते तु ॥ ॐ ॥ ५ ॥

अधिकारिणां फलम् । भविष्यत्पुराणे च—

ऋग्यजुस्सामाथर्वाख्या मूलरामायणं तथा ।
भारतं पञ्चरात्रं च वेदा इत्येव शब्दिताः ॥

व्याख्याति—अनादीति । श्रुतिस्मृत्योस्समुच्चये चशब्दः । स्मृतिरिति । यतोऽस्तीति शेषः । अस्यातो न वेदनित्यत्वमुपचरितं, उत्पत्तिश्रुतिस्तु व्यक्त्यभिप्रायेत्युपस्कृतसाध्येनान्वयः । अत एव इत्यादेरित्यनेन न स्मृतेस्सङ्ग्रहः, किंतु श्रुतिशेषस्य वा श्रुत्यन्तरस्य वा ग्रहणमित्याशयेन स्मृतेः पृथगुपादानमिति ध्येयम् । श्रुतिस्मृती तु देवताधिकरणे व्याख्याते । अनेन—'अस्य' श्रुत्यादेः 'तथात्वं' पाशुपतादिस्मृतिवदुक्तानुपलब्धेरप्रामाण्यं न, कुतः ? यतोऽस्य 'न तथात्वं' न दोषत्वम् । कुतः ? विलक्षणत्वात् श्रुतेर्नित्यत्वाख्यवैलक्षण्येन स्मृतेस्तादृग्वेदानुसारित्वरूपवैलक्षण्येन युक्तत्वात् । एवं फलव्यभिचारेऽपि नावैष्णवस्मृतिवदप्रामाण्यम् । अस्य 'विलक्षणत्वात्' स्वतःप्रामाण्योपेतत्वात् । अस्य 'तथात्वं' नित्यत्वं तु 'वाचा विरूप नित्यया' इत्यादेः शब्दादेव प्रतीयते । न चायमुपचारः । 'अनादिनिधना' इति स्मृतेः । न चास्य स्वतः प्रामाण्यासिद्धिः । 'न चक्षुः' इत्यादेः शब्दात्तत्सिद्धेः, विपक्षेऽनवस्थाबाधकाच्च । 'अस्य' पाशुपतादेस्तु 'न' 'तथात्वं' फलव्यभिचारेऽपि प्रामाण्यादिकं कल्प्यं, कुतः ? यतोऽस्य 'न' 'तथात्वं' निर्दोषत्वं स्वतः प्रामाण्यादिकं च निश्चितमिति सूत्रार्थ उक्तो भवति ।

(५) ननु श्रुत्यादेः स्वतः प्रामाण्यवादिनापि दोषदर्शनेऽप्रामाण्यस्यावश्यं ग्राह्यत्वात्, वेदेऽपि स्वोक्तफलादर्शनात् दोषादप्रामाण्यमेव वक्तव्यमित्याशङ्कां परिहरत्सूत्रमुपन्यस्य तुशब्दार्थप्रदर्शनपूर्वकं तच्छेषं पूरयति—दृश्यतेत्विति ॥ अधिकारिणामिति सम्बन्धे षष्ठी । कर्मवैगुण्यप्रतिबन्धादिशून्यत्वरूपयोग्यत्वशालिनामित्यर्थः । न चैवं टीकायां वाशब्दानुप-

पुराणानि च यानीह वैष्णवानि विदो विदुः ।
स्वतः प्रामाण्यमेतेषां नात्र किञ्चिद्विचार्यते ॥

(६) यद्येषूक्तं न दृश्येत पूर्वकर्मात्र कारणम् ।
नाप्रामाण्यं भवेदेषां दृश्यते ह्यधिकारतः ॥

पत्तिः । कर्मवैगुण्यशून्यत्वं वा प्रतिबन्धककर्मशून्यत्वं वा तत्फलयोग्यत्वमिति योजनोपपत्तेः । अनेन तुशब्दार्थो दर्शितः । केचित्तु-योग्यत्वमन्यत् । कर्मवैगुण्यप्रतिबन्धादिशून्यत्वं चान्यत् । अतएव टीकायां वाशब्दः । तथाचाधिकारिणामित्यस्य योग्यानां कर्मवैगुण्यप्रतिबन्धादिशून्यानां चेति द्वेधाऽर्थ इत्याहुः । 'फलं' वेदोक्तं कारीर्यादिसाध्यं वृष्ट्यादि । अस्य दृश्यत इत्यनेनान्वयः । द्रष्टृभिर्यत इति शेषः । अस्य न फलादर्शनेन श्रुत्यादेरप्रामाण्यं वक्तव्यमित्युपस्कृतसाध्येनान्वयः । फलादर्शनस्य कर्तुरयोग्यतयोपपत्तेरिति भावः । अधिकरणार्थं स्मृतिं चाह—भविष्यत्पुराणे चेति । एतदधिकरणार्थ उक्त इति शेषः । न केवलं सूत्रे, किंतु भविष्यत्पुराणे चेति वा न केवलं 'न चक्षुः' इत्यादिश्रुतिस्मृतिषु, किंतु पुराणे चेति वा चशब्दार्थः । तद्वाक्यं पठति । ऋगिति । तथाचशब्दास्समुच्चये । ऋक्च यजुश्च साम च अथर्वश्चेत्येवमाख्या येषां ते तथोक्ताः ग्रन्था इति शेषः । अवान्तररामायणव्युदासाय मूलरामायणमिति । एते सर्वे वेदा इत्येव शब्दिता इत्यर्थः । तथाच ये ऋगादिरूपाः वेदशब्दवाच्याः, 'विदः' ज्ञानिनो यानीह पुराणेषु मध्ये वैष्णवानीति विदुः एतेषां 'स्वतः' फलसंवादादिरहितनिर्दोषतयैव 'प्रामाण्यं' यथार्थज्ञानकरणत्वरूपं सिद्ध्यतीति शेषः । ये ऋगादयो वैष्णवपुराणान्ताः वेदा इत्येव शब्दिताः एतेषां स्वत एव प्रामाण्यमिति वा । 'अत्र' स्वतः प्रामाण्यविषये 'न किञ्चित् निमित्तं विचार्यते' न केनापि निमित्तेन संशयोऽस्तीत्यर्थः । यद्वा—अत्र तेषां प्रामाण्यग्रहे 'किञ्चित्' संवादादिकं 'न विचार्यते' न मृग्यत इत्यर्थः । अनेन यत्स्मृतीनां वेदानुसारित्वमुक्तं यच्च श्रुत्यादेः स्वतः प्रामाण्यमाधसूत्रे तत्प्रमापितं भवति ॥

(६) ननु फलविसंवाददर्शनेनैतेषामप्रामाण्यमेव किं नोच्यत इत्यत आह—यदीति ॥ यदि 'एषु' वेदवेदानुसारिषु 'उक्तं' फलं न दृश्येत

(७) इतः प्रामाण्यमन्येषां न स्वतस्तु कथंचन ।
अदृश्योक्तौ ततस्तेषामप्रामाण्यं न संशयः ॥ इति ॥ ५ ॥

॥ इति नविलक्षणत्वाधिकरणम् ॥ २ ॥

॥ ३. अभिमान्यधिकरणम् ॥

(१) 'मृदब्रवीत्' (श.ब्रा. ६-१-३.) 'आपोऽब्रुवन्'
(श.ब्रा. ६-१-३.) इत्यादिवचनात् युक्तिविरुद्धो वेद इति ।

तदुक्तसाधनानुष्ठानेऽपीति शेषः । तर्हि 'पूर्वकर्म' जन्मान्तरीयं फलप्रतिबन्धकादृष्टं कर्मवैगुण्यं, प्रतिबन्धादिरूपायोग्यत्वस्याप्युपलक्षणमेतत्। 'अत्र' फलानुपलम्भे कारणमित्यर्थः । ततः किमित्यतः फलविसंवादस्यान्यथा सिद्धत्वात् न तेनाप्रामाण्यमेषां सिध्यतीत्याह—नेति । ननु फलादर्शनस्यान्यथोपपत्तिः तदा वाच्या, यदि केषांचित्फलदर्शनं स्यात् तदेवासिद्धमित्यतो नेत्याह—दृश्यते हीति । हिशब्दो यतइत्यर्थे । 'अधिकारतः' कर्मवैगुण्यप्रतिबन्धादिशून्यत्वरूपफलयोग्यतानिमित्तात्, तद्वतामिति यावत् । अतो न फलादर्शनादप्रामाण्यमेषां भवेदिति पूर्वेणान्वयः ॥

(७) नन्ववैष्णवस्मृतीनामप्येवं स्वतः प्रामाण्यं किमर्थं नाङ्गीक्रियत इत्यतो नेत्याह—इत इति ॥ 'अन्येषां' पाशुपतादीनां तु 'इतः' फलदर्शनत एव प्रामाण्यं बुद्धिदोषनिरसनद्वारा सिद्ध्यति, न तु स्वतः फलसंवादं विना केनचिदुपायेन उत्पत्तिमुखेन वा ज्ञप्तिमुखेन वा फलमुखेन वेत्यर्थः । ततः किमित्यत आह—अदृश्येति । यतोऽन्येषां प्रामाण्यं फलसंवादाधीनं अतः 'अदृश्योक्तौ' अनुपलभ्यमानफलसाधनस्य तेषूक्तौ तेषामप्रामाण्यमेव निश्चितं भवति, न तत्र संशय इत्यर्थः । इति भविष्यत्पुराण इत्यन्वयः ॥

॥ इति नविलक्षणत्वाधिकरणम् ॥ २ ॥

॥ ३. अभिमान्यधिकरणम् ॥

(१) अत्राधिकरणे विष्णोर्जगत्कर्तृत्वप्रतिपादकवेदप्रामाण्यरूपोक्तार्थे दृढयुक्त्यविरोध उच्यते । पूर्वपक्षयति—मृदिति ॥ 'मृदब्रवीत्' इत्येकं

(२) अतोऽब्रवीत्—

सू—ॐ ॥ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ ॐ ॥ ६ ॥

मृदाद्यभिमानिदेवता तत्र व्यपदिश्यते ।

श्रुतिवाक्यम्। 'ता आपोऽब्रुवन्' इत्यपरं तैत्तिरीयवाक्यम्। इत्यादीत्यादिपदेन 'ता आप ऐक्षन्त' (छां. ६-२-४.) 'तत्तेज ऐक्षत' (छां. ६-२-३.) 'ओषधयः संवदन्ते सोमेन सह राज्ञा' (ऋ. १०-९७-२२.) 'प्र वो ग्रावाणः सविता देवस्सुवतु धर्मेण' (ऋ. १०-१७६-१.) इत्यादीनां ग्रहणम्। इत्यादीति वेद इति चावर्तते। तथेति प्रकृतमप्रमाणमिति चास्ति। तथाच 'मृदब्रवीत्' इत्यादिवेदस्तदेकदेशोऽप्रमाणं, कुतः? 'मृदब्रवीत्' 'इत्यादिवचनात्' इत्यादिरूपेण मृदादेर्वचनादिकर्तृत्वाभिधायकत्वात्। वेदस्य मृदादिकर्तृकवचनादिकर्तृताभिधायकत्वं कुत इत्यतोऽप्युक्तं—मृदित्यादि। वचनादित्यनन्तरं मृदादीनां वचनादिकर्तृतावगमादिति शेषः। मृदादेर्वचनदर्शनाद्यभिधायकत्वेऽपि कुतो वेदस्याप्रामाण्यमित्यत उक्तं—युक्तिविरुद्ध इति। तथाच यतो 'मृदब्रवीत्' इत्यादि वेदो 'युक्तिविरुद्धो' मृदा वक्ति जडत्वादित्याद्यनुमानविरुद्धमृदादिवक्तृत्वाभिधायकः अतः। युक्तिविरुद्धार्थस्य चासत्त्वनियमात् असदर्थाभिधायकत्वस्यैव अप्रामाण्यादिति भावः। ननु वेदैकदेशस्याप्रामाण्येऽपि 'यतो वा' इत्यादेस्तत्कुत इत्यतोऽप्युक्तम्—वेद इति। यतो मृदब्रवीदित्यादिवेदोऽप्रमाणमतस्तदन्यवेदोऽपि तथा। तथाच सर्वोऽपि वेदोऽप्रामाण्यं प्राप्नोति, तत्सामान्यादिति न्यायात्। तथाच न तेन विष्णोः जगत्कर्तृता सिद्ध्यतीति योजना। अत्र श्रुतौ मृदादिशब्दैः सर्गाद्यकालीनपृथिव्यादिकमुच्यते। तस्य च वचनाद्यभावो नास्मदादिप्रत्यक्षसिद्ध इति प्रत्यक्षविरुद्ध इत्यनुक्त्वा युक्तिविरुद्ध इत्युक्तम्। अनेन पादसङ्गतिरपि प्रदर्शिता भवति। 'राजा' सोमेन लतारूपेण सहौषधयः संवादं कुर्वन्ति। हे ग्रावाणः 'वो' युष्मान् सविता देवो धर्मेण प्रसुवत्विति श्रुत्यर्थः॥

(२) सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति॥ अब्रवीत् सूत्र-

(३) तासां चेतरेभ्यो विशिष्टं सामर्थ्यमनुगतिश्च सर्वत्र ।
अतस्तासां सर्वमुक्तं युज्यते ॥ ६ ॥

कृदिति शेषः । मृदिति । मृदादेरभिमानिनी घटादिरूपा देवता 'तत्र' 'मृदब्रवीत्' इत्यादिश्रुतौ मृदादिशब्दैः 'व्यपदिश्यते' मुख्यवृत्त्या प्रतिपाद्यते इत्यर्थः । एवशब्देन जडव्यावर्तकेन योग्यतयाऽभिमानिपदेनान्वितः सौत्रस्तुशब्दोऽवधारणमुखेन विशेषार्थतया व्याख्यातः । जडापेक्षया चेतने मृदादिशब्दो मुख्य इति विशेषार्थो वा तुशब्दः । देवतेत्येकवचनेन अभिमानिनो व्यपदेशोऽभिमानिव्यपदेश इत्येकवचनान्तो विग्रहः सूचितः । अस्य मूलं तु 'दृश्यते च' इत्युत्तरसूत्रम् । एकवचनं च समुदायाभिप्रायम् । अत एव तासामित्यादिवचनम् । व्यपदिश्यत इत्यनन्तरं यत इति शेषः, अस्यात इति वक्ष्यमाणेनान्वयः ॥

(३) ननु तथापि नाभिमानिदेवता नाम सन्ति, तासामदेहत्वे वचनकर्तृत्वायोगात् । सदेहत्वेऽभिमन्यमानव्यापित्वे च दर्शनप्रसङ्गात् । अभिमन्यमानैकदेशवृत्तित्वे चाभिमानिरहितप्रदेशवदन्यदेशस्यापि विनैव ता अवस्थानोपपत्तेर्वैयर्थ्यापातादिति युक्तिविरुद्धत्वादित्याशङ्क्य तदुत्तरत्वेन विशेषेत्यादिसूत्रखण्डं व्याचष्टे—तासामिति ॥ देवतेत्येकवचनान्ते प्रकृतेऽपि 'दृश्यन्ते मुनिभिः' इति स्मृतौ बहुवचनप्रयोगात्तासामित्युक्तम् । आद्यश्चशब्दस्तुशब्दार्थो यत इत्यर्थे च । द्वितीयो विग्रहसमुच्चये, नासत्त्वमिति साध्यसमुच्चये च । तथाच यतः 'तासां' देवतानां 'सर्वत्र' स्वस्वाभिमन्यमाने 'अनुगतिः' व्याप्तिर्विग्रहश्चास्ति । अतः नोक्तयुक्तिविरोधेनासत्त्वं वाच्यम् । न चोपलम्भप्रसङ्गः । यतस्तासां 'इतरेभ्यः' चेतनेभ्यो 'विशिष्टं सामर्थ्यं' अदर्शनानुकूलोऽन्तर्धानशक्तिविशेषोऽस्त्यत इति योजना । विशिष्टमित्यनेन विशिष्यते अतिशीयतेऽनेनेति व्युत्पत्तिमाश्रित्य विशेषपदार्थ उक्तो भवति । सामर्थ्यमिति सूत्रे शेषोक्तिः । सन्तु देवताः, प्रकृते किमायातमित्यत 'अभिमानिव्यपदेशः' इत्यनेनोक्तहेतोर्योग्यसाध्यमध्याहृत्य दर्शयति—अत इति । यतोऽत्र श्रुतौ मृदादिशब्दैस्तदभिमानिदेवता व्यपदिश्यन्ते, अतस्तासां चेतनत्वेन श्रुतावुक्तं 'सर्वं' वचनकर्तृत्वादिकं युज्यते ततो न युक्ति-

(४) सू—ॐ ॥ दृश्यते च ॥ ॐ ॥ ७ ॥

तासां सामर्थ्यं महद्भिः ।

(५) भविष्यत्पुराणे च—

पृथिव्याद्यभिमानिन्यो देवताः प्रथितौजसः ।

विरुद्धो वेदोऽतो नाप्रमाणमतस्तत्रोक्तं जगत्कर्तृत्वं विष्णौ युक्तमेवेति योजना ॥

(४) नन्वप्रामाणिकदेवतातत्सामर्थ्यकल्पनापेक्षया वेदाप्रामाण्यकल्पनमेव वरं लाघवात् । न च 'मृदब्रवीत्' इत्यादिवेदेन तत्सिद्धिस्तत्प्रामाण्ये विवादादित्याशङ्कां परिहरत्सूत्रं पठित्वा तच्छेषं पूरयति—दृश्यते चेति ॥ 'तासां' पृथिव्याद्यभिमानिदेवतानाम् । अत्रापि बहुवचनं स्मृत्यनुसारेणेति ध्येयम् । 'सामर्थ्यं' शक्तिः । सामर्थ्यमित्यनेन विशेष इति प्रथमान्तपदस्य बुद्ध्या विविक्तस्येहानुवृत्तिस्सूचिता । महद्भिरिति सूत्रं शेषोक्तिः । यद्वा — सामर्थ्यमित्यनन्तरं अनुवृत्तविशेषपदान्वितः सौत्रश्चशब्दो न केवलं देवतातत्सामर्थ्यसमुच्चयार्थः, किन्तु त्वर्थस्सन् महद्भिरित्यर्थद्योतकश्च । यथोक्तं पूर्वाधिकरणटीकायां तुशब्दः कर्तृविशेषद्योतक इति । महद्भिरित्यनन्तरं यत इति शेषः । अस्यातो नाभिमानिदेवतानां तत्सामर्थ्यस्य चाप्रामाणिकत्वमित्यध्याहृतसाध्येनान्वयः ॥

(५) ननु महद्भिः दृश्यमानत्वादिति हेतुरसिद्धः । परबुद्धेरप्रत्यक्षत्वादित्यतश्चशब्दसूचितं वाक्यं पठति—भविष्यदिति ॥ न केवलं महद्भिर्दृश्यते, किन्तु पुराणेऽप्युक्तमिति समुच्चये वा, न केवलं देवता तच्छक्त्योः प्रत्यक्षसिद्धत्वं सूत्रकृदुक्तमेव, किन्तु पुराणेऽप्युक्तमिति समुच्चये वा, चशब्दः । अतो न हेत्वसिद्धिरिति भावः । पुराण इत्यनन्तरं उक्तमिति शेषः । किमुक्तमित्यतः तद्वाक्यं पठति—पृथिवीति । आदिपदेन अब्वादिग्रहणम् । 'प्रथितौजसः' प्रसिद्धसामर्थ्याः । न केवलं प्रथितौजसः, किन्तु तासां शक्तयोऽचिन्त्याश्च । अचिन्त्यशक्तयश्च । न केवलमेतावत्, किन्तु 'सर्वगताः' स्वांशैर्यावदभिमन्यमानव्यापिन्यश्चेत्येकस्य चशब्दस्यार्थः । न केवलं ताः देवताः दृश्यन्ते, किन्तु तासा-

अचिन्त्याश्शक्तयस्तासां दृश्यन्ते मुनिभिश्च ताः ।
ताश्च सर्वगता नित्यं वासुदेवैकसंश्रयाः ॥ इति ॥ ७ ॥

॥ इत्यभिमान्यधिकरणम् ॥ ३ ॥

अचिन्त्याः शक्तयश्च मुनिभिर्दृश्यन्त इत्यन्यचशब्दस्यार्थः । यद्वा—एकेनैव प्रथमान्ततच्छब्देन देवतातच्छक्त्योः परामर्शसम्भवादन्यः प्रथमान्ततच्छब्दो देवतामात्रपरामर्शकः, तत्प्रयोजनं तु देवतामात्रे सर्वगतत्वविधानम् । एवमेकेनैव अनेकविशेषणसमुच्चयसम्भवात् अन्यश्चशब्दो न विशेषणसमुच्चयार्थः, किन्तु तुशब्दार्थो विशेषद्योतकः । तासां शक्तयोऽचिन्त्या इत्यनेन देवतानामचिन्त्यशक्तित्वमुक्तं, तत्कथमित्यत आह—वासुदेवेति । वासुदेव एव एको मुख्यः संश्रयोऽस्माकं शरणमिति ज्ञानं येषां ते तथोक्ताः । अनेनोत्तमाधिकारित्वोक्त्या परमात्मप्रसादादेव तेषाममुख्यमचिन्त्यशक्तित्वमित्युक्तं भवति । इति भविष्यत्पुराणे इत्यन्वयः । अथवा—विग्रहवतीनां सर्वगतानां तासां दर्शनप्रसङ्ग इत्युक्ते प्रष्टव्यं, किमज्ञानां दृश्येरन् महतां वा । आद्यस्योत्तरं विशेषपदं सूत्रे, तासां विशिष्टं सामर्थ्यमिति भाष्यं च तद्व्याख्यानरूपम् । द्वितीयस्याभ्युपगमेनोत्तरमुक्तम्—दृश्यन्ते चेति । अस्मिन् पक्षे न केवलमभिमानिदेवता अन्तर्धानशक्त्याख्यविशेषसामर्थ्येनाज्ञैः न दृश्यते, किन्तु महद्भिर्योगिभिः दृश्यते चेति दर्शनादर्शनसमुच्चये पूर्ववद्देवतातत्सामर्थ्यसमुच्चये वा चशब्दः । यद्वा—वस्त्वन्तरमधिष्ठाय तासां वचनादिकं कथमिति चोद्यस्योत्तरं—तासां चेतरेभ्यो विशिष्टं सामर्थ्यमिति । परिच्छिन्नानामभिमानिनीनां कथमनेकाभिमन्यमानाधिष्ठातृत्वमपीत्यस्योत्तरं—अनुगतिरिति । चोऽप्यर्थः । योगिभिरप्यनुपलभ्यमानत्वान्नास्त्यभिमानिदेवतेति शङ्कानिरासाय—दृश्यते च इति सूत्रम् । अत्र पक्षे चोऽवधारणे । योगिभिरभिमानिदेवता दृश्यते एवेति । तथाच नानुपलब्धिबाधोऽभिमानिदेवताया इति भावः । अस्मिन् पक्षे विशेषानुगतिभ्यां दृश्यते चेत्युक्तहेतूनां नाकांक्षाक्रमेण तत्तदवतारिकागतयोग्यसाध्येनान्वयः, अपि तु यथाश्रुतक्रमेणान्वयः इत्ययं पक्षो विशिष्ट इति ध्येयम् ॥

॥ इत्यभिमान्यधिकरणम् ॥ ३ ॥

॥ ४. असदधिकरणम् ॥

(१) 'असदेवेदमग्र आसीत्' (छा. ६-२-१.) 'असतः सदजायत' (ऋ. १०-७२-३.) इत्यादिनाऽसतः कारणत्वोक्तेर्विरोध इति ।

॥ ४. असदधिकरणम् ॥

(१) अत्र ब्रह्मणो जगत्कर्तृत्वे श्रुत्युपसर्जनप्रागभावकर्तृकत्वसाधक-युक्तिविरोधो निरस्यते । तत्र असदिति चेदित्यनेन सूचितं पूर्वपक्षं दर्शयति-असदेवेति ॥ 'असदेवेदमग्र आसीत्' इति छन्दोगवाक्यम् । 'देवानां पूर्वे युगे असतः सदजायत' इति ऋग्वेदवाक्यम् । 'इत्यादिना' वाक्येन । आदिशब्देन 'असद्वा इदमग्र आसीत्' (तै.उ. २-७-१.) इति तैत्तिरीयादिवाक्यं गृह्यते । विरोध इति । अत्र वेदस्येति विपरिणामेनानुवर्तते । तथाच 'यतो वा' इत्यादिवेदस्य 'असदेव' इत्यादिना विरोधः । कुतः ? 'इत्यादिना' वाक्येन 'असतः' विश्वप्रागभावस्य 'कारणत्वोक्तेः' विश्वकर्तृत्वोक्तेः वेदेन च विष्णुकर्तृत्वोक्तेरिति योजना । यद्वा—तत्त्वप्रदीपोक्तरीत्याऽनुवृत्तिं विनैव सत इति पदच्छेदेन 'सतो' ब्रह्मणः कारणत्वोक्तेः 'यतो वा' इत्यादिश्रुतेः 'असद्वा' इत्यादिना विरोध इति योजना । अथवा — तत्त्वप्रदीपरीत्या 'असदेव' इत्यनेन असतः कारणत्वोक्तेरादिशब्दगृहीतेन 'यतो वा' इत्यादिना सतः कारणत्वोक्तेः परस्परविरोध इत्यन्वयः । न च अनेन श्रुतिविगानेन सन्देह एव भवति, नान्यतरपक्षावधारणमिति वाच्यम् । पूर्वपक्षीयश्रुतेः प्रागुत्पत्तेर्विनाशादूर्ध्वं चासदात्मकत्वात्कार्यस्य तत्कारणमपि प्रलयेऽसद्भवितुमर्हति यस्तुत्वात्कार्यवदित्यादियुक्तियुक्तत्वेन प्रबलत्वात्तया सैद्धान्तिकश्रुतेर्बाधोपपत्तेः । तथाचायं विरोधशब्दो युक्तिविरोधस्याप्युपलक्षको बाधार्थश्च द्रष्टव्यः । विरोध इत्यनन्तरं यत इति शेषः । अम्यातो न वेदो विष्णुजगत्कर्तृत्वे प्रमाणं अतः प्रमाणाभावान्न तद्युक्तमित्युपस्कृतवाक्येनान्वयः । अनेन—सूत्रे असदित्युक्तिर्न केवलं प्रागभावरूपधर्म्युपस्थापिका, किंतु श्रुतिप्रतीकग्रहणरूपापि । जगत्कर्त्रिति शेषः । तथाच 'असत्' विश्वप्रागभाव एव जगत्कर्तृ, न ब्रह्म । कुतः ? 'असत्' इति श्रुतेरिति सूत्रखण्डार्थ

(२) अतो वक्ति—

सू—ॐ ॥ असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ ॐ ॥ ८ ॥

प्रतिषेधमात्रत्वान्नासतः कारणत्वं युक्तम् ।

उक्तो भवति। सिद्धान्तरीत्या श्रुत्यर्थस्तु—'इदमग्रे' अस्याग्रे जगत्सृष्टेः पूर्वं प्रलये न विद्यते सदुत्तमं यस्मात्तत् 'असत्' सर्वोत्तमं ब्रह्मैवासीत् तत्तस्मात्सन्नामको मुख्यवायुः 'अजायत' अभूत्। 'पूर्वे युगे' आदिसृष्टिकाले 'असतो' ब्रह्मणो देवानां प्रथमः सन्नामको वायुरजायतेति। तैत्तिरीयभाष्ये तु—असन्नामा नारायणो मूलरूपी आसीत्। तस्मात्सन्नामा वासुदेवः प्रादुरभूदित्यर्थ उक्तः। प्रमेयदीपे तु 'असतः' इति श्रुतेरनेकार्थत्वादित्यादिनाऽसच्छब्दः प्रकृतिपरतया व्याख्यातः। पूर्वपक्षी तु शतुः छान्दसं भावसाधनत्वमाश्रित्य असदभाव इति व्युत्पत्त्या वा असदसत्त्वमिति भावप्रधानत्वेन वाऽसच्छब्दो विश्वप्रागभावपरः, सच्छब्दस्तु भावकार्यवाचीति मन्यते।

(२) सिद्धान्तयत्सूत्रमवतार्य आक्षेपांशस्य पूर्वमेव विवृतत्वात् परिहारांशं व्याचष्टे—अत इति॥ प्रतिषेधेति। अभावरूपधर्मद्वारमन्तरेण धर्मिस्वरूपेणैव प्रतिषेधबुद्धिविषयत्वादित्यर्थः। घटप्रागभावादिवदिति दृष्टान्तवाक्यस्याप्युपलक्षकमेतत्। भावेषु कुलालादिषु अन्योन्याभावरूपधर्मस्वरूपेण प्रतिषेधरूपत्वमस्तीति व्यभिचारवारणाय मात्रपदं सूत्रे भाष्ये च। अभावधर्मात्मतामन्तरेण स्वरूपत एवेति तदर्थः। अभावस्याप्यभिधेयत्वादिधर्मात्मनाऽप्रतिषेधरूपत्वादसिद्धिपरिहाराय—स्वरूपत एवेति। प्राधान्येनेत्यर्थः। तथाच धर्मधर्म्यभेदपक्षे सर्वस्य वस्तुनो धर्मधर्मिरूपेण द्विरूपत्वेऽपि धर्माद्धर्मी प्रधान इति तेनाकारेण निषेधरूपत्वस्य विवक्षितत्वान्नोक्तदोष इति भावः। सूत्रे हेत्वंशस्य स्पष्टत्वात्तदन्यत्र व्याकृतत्वाच्च तद्व्याख्यामकृत्वा नेति साध्यान्वयाय तदनुकृत्य प्रतिषेध्यप्रदर्शनेन साध्यांशं व्याचष्टे—प्रतिषेधमात्रत्वादिति। 'असतः' अभावस्य 'कारणत्वं' जगत्कर्तृत्वं न युक्तमित्यर्थः।

(३) असतः कारणत्वाद्युक्तिविरुद्धं वेदवाक्यमित्येतदत्र निषिध्यते ।

(४) सर्वशब्दानां ब्रह्मणि समन्वयेऽपि 'तदधीनत्वादर्थवत्' इत्यादिनाऽमुख्यत्वेनान्यस्यापि वाच्यत्वेनाङ्गीकारादसतः प्राप्तिः । तथा श्रुतिप्राप्तमेवासन्मतमत्र निषिध्यते । समयस्योपरि निषेधात् ।

---

(३) नन्वत्राधिकरणेऽसतो जगत्कारणत्वं वदतां शून्यवादिनां समयो निराक्रियते, न तु श्रुतिप्राप्ताभावकर्तृत्वमतम्, अतः 'एतेन सर्वे' इत्यत्रासदादिशब्दानां ब्रह्मपरत्वस्योक्तत्वेन अत्र श्रुत्याऽसतः प्राप्तयभावादपव्याख्यानमेतदित्यत आह—असत इति । आदिशब्देन प्रलयस्थितत्वमनःपूर्वकत्वादेर्ग्रहणम् । कारणत्वादेरुक्तिः कारणत्वाद्युक्तिस्तया विरुद्धमिति विग्रहः । तथाच विष्णुकर्तृत्वपरं 'यतो वा' इत्यादिवेदवाक्यं 'असतो' विश्वप्रागभावस्य या कारणत्वाद्युक्तिः 'असदेव' इत्यादिरूपा, तद्विरुद्धमित्येवं श्रुतिप्राप्तं 'एतत्' असन्मतं 'अत्र' एतस्मिन्नधिकरणे 'निषिध्यते' निराक्रियते इत्यर्थः । तत्त्वप्रदीपे तु असतः कारणत्वाद्युक्तिरूपाद्धेतोर्विरुद्धं 'असदेवेदम्' इत्यादिवाक्यमुक्तसमन्वयविरुद्धमप्रामाण्यमेतीत्येतदत्र निषिध्यते । अथवा — क्वचिदसतः कारणत्वोक्तेरादिशब्दगृहीतायाः क्वचित्सतः कारणत्वोक्तेश्च परस्परविरुद्धं वेदवाक्यमित्येतदत्र निषिध्यते । अथवा—वस्तुत्वादियुक्तया च असतः कारणत्वावगमाद्युक्तिविरुद्धं ब्रह्मकारणतावाक्यमित्येतदत्र निषिध्यते, न शून्यसमय इति 'असतः कारणत्वात्' इति वाक्यं बहुधा व्याख्यातम् । अत्राद्यपक्षेऽसतः कारणत्वाद्युक्तेः हेतोर्विरुद्धमिति पञ्चमीगर्भो विग्रहः । द्वितीयेऽप्ययमेव विग्रहः, आदिशब्दार्थो भिन्नः । तृतीये कारणत्वादिति भिन्नं पञ्चम्यन्तं पदमिति विवेको द्रष्टव्यः ।

(४) ननूक्तं श्रुत्यादिना नासतः प्राप्तिरिति तत्राह—सर्वशब्दानामिति ॥ आदिशब्देन 'तथा ह्यधीयते' इत्यादिकं गृह्यते । अपिः शङ्काद्योतकः । न केवलं ब्रह्मण इति समुच्चये द्वितीयः । तथाच सर्वेषां शब्दानां ब्रह्मणि 'समन्वये' परममुख्यत्वे 'एतेन' इत्यादिनोक्तेऽपि 'तदधीनत्वादर्थवत्' इत्यादिना सूत्रकृता 'अन्यस्य' असदादेरपि

(५) अर्थाद्युक्तिविरोधो निराक्रियते ॥ ८ ॥

(६) सू—ॐ ॥ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥

॥ ॐ ॥ ९ ॥

'अमुख्यत्वेन' परममुख्यान्यवृत्त्या 'वाच्यत्वाङ्गीकारात्' असदादिशब्द-बोध्यत्वाङ्गीकारादसतः कर्तृत्वेन श्रुत्या प्राप्तिरस्तीत्यर्थः। नन्वस्त्येवमसतः प्राप्तिस्तथाऽप्यसत्कर्तृत्वसमयोऽत्र निराक्रियते इति किं न स्यादित्यत आह—तथेति। तस्मादित्यादावुपस्कार्यम्। श्रुतिप्राप्तमेवासन्मतमित्यनेन एतदिति स्ववाक्यमेतच्छब्दार्थप्रदर्शनेन सावधारणतया विवृतं भवति। न समयप्राप्तमित्येवशब्दार्थः। तथाच यस्मादसतो मुख्यत्वेन श्रुत्या प्राप्तिरस्ति तस्मात् 'तथा' मुख्यतया श्रुतिप्राप्तमेव 'असन्मतं' अभाव-कर्तृत्वदर्शनं 'अत्र' अधिकरणे निषिध्यते, न समय इत्यर्थः। निषिध्यत इत्यनन्तरं इत्येवाङ्गीकार्यमिति शेषः। कुत इत्यत आह—समयस्येति। शून्यकारणत्वसिद्धान्तस्य 'उपरि' उपरितनपादे 'नासतः' इत्यनेन 'निषेधात्' निराकरिष्यमाणत्वादित्यर्थः। अन्यथाऽत्रापि समयप्राप्तस्यैव निषेधे प्रागभावकर्तृत्वप्रापकसमयाभावेन शून्यसमयनिषेधस्यैव प्राप्तया पौनरुक्त्यापातादिति भावः ॥

(५) यद्यत्र ब्रह्मणो जगत्कारणत्ववाचिश्रुतेः श्रुतिप्राप्तासन्मतविरोधो निराक्रियते, तर्ह्येतदधिकरणं तृतीयपादे निबन्धनीयं, न तु युक्तिविरोध-परिहारेऽस्मिन् पादे इत्यत आह—अर्थादिति ॥ विरोधशब्दात्परमपि-शब्दोऽनुषञ्जनीयः। तथाच यतोऽत्राधिकरणे न केवलं श्रुतिविरोधः, किं नाम? युक्तिविरोधोऽपि निराक्रियते अतो नासङ्गतिरित्यध्याहारेण योजना। तथाऽपि युक्तिविरोधमात्रपरिहारात्मकेऽस्मिन् पादे श्रुतियुक्ति-विरोधपरिहारोऽसङ्गत इत्यत उक्तं—अर्थादिति। फलत इत्यर्थः। अत्रापि-शब्दस्यादावेवान्वयः। तथा च पूर्वपक्षिणा निर्मूलयुक्तेरसाधकत्वेन युक्तिप्राबल्याय श्रुत्युपन्यासात्तदनुसारेण मुख्यतः श्रुतिविरोधपरिहारेऽपि फलतः प्राधान्येन युक्तिविरोधस्यैव परिहारात्स्वातन्त्र्येण युक्तिविरोध-मात्रपरिहारात्मकेऽस्मिन् पादे उभयविधपरिहारो नासङ्गत इति भावः ॥

(६) यदुक्तं प्रतिषेधमात्रत्वादिति युक्तिविरोधान्नासतः कारणत्व-

असत उत्पत्तौ प्रलये सर्वासत्त्वमेव स्यात् ॥ ९ ॥

(७) सू—ॐ ॥ न तु दृष्टान्तभावात् ॥ॐ॥ १० ॥

मिति, न तदुक्तम्। युक्तिविरुद्धस्यापि श्रुतिबलात्कस्यचिदभावस्य कर्तृत्वाभ्युपगमे बाधकाभावात्। न चैवं घटप्रागभावादीनामपि कर्तृत्वप्रसङ्ग इति वाच्यम्। भावेषु कस्यचित्कर्तृत्वं कस्यचिदकर्तृत्वमिति वैलक्षण्यवदभावेष्वपि घटप्रागभावादेरकर्तृत्वं विश्वप्रागभावस्य च 'असदेव' इत्यादिश्रुतिबलात्कर्तृत्वमिति वैलक्षण्योपपत्तेरित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—अपीताविति॥ सूत्रेऽनिष्टप्रसङ्गोक्त्या लब्धमापादकं दर्शयति—असत इति। पञ्चमीयं, विश्वप्रागभावात्सर्वकार्योत्पत्तौ अभ्युपेतायामित्यर्थः। प्रलये भावमात्रस्य असत्त्वे कालोऽपि न स्यादिति प्रसङ्गसूचनायापीताविति युक्तम्। तस्यार्थमाह—प्रलय इति। यद्यपि 'अप्ययोऽयं समुद्दिष्टस्तदन्येषामदर्शनम्' इति वचनान्न प्रलयोऽपीतिशब्दार्थः। तथापि तस्य पर्यवसितार्थोक्तिरियमित्यदोषः। तद्वदित्यत्र तच्छब्दः प्रकृतासत्परोऽवधारणमात्रशब्दशिरस्कश्च। वदिति मतुप्प्रत्ययः, न तु पररीत्या वतिः। तद्वदिति च भावप्रधानमित्यभिप्रेत्य तद्वत्प्रसङ्गादित्यस्य तात्पर्यार्थमाह—सर्वेति। न तु कस्यचिदसत्त्वमित्येवशब्दार्थः। तथाच प्रलये सर्वस्य भावमात्रस्यासत्त्वे असन्मात्रावशेषः स्यात्, कार्यनाशे कारणमात्रावशेषनियमादिति भावः। यद्वा—तद्वदिति वतिरेव। तथाच कार्यवत्सर्वस्यापि भावस्यासत्त्वं स्यादित्यर्थः। तत्राद्यः टीकारीत्या, द्वितीयोऽर्थः तत्त्वप्रदीपरीत्या उक्त इति ज्ञातव्यम्। स्यादित्यनन्तरं यत इति शेषः। अस्यातः 'असमञ्जसं' अयुक्तमसन्मतमिति साध्यभागेनान्वयः। स्पष्टत्वादस्यार्थो नोक्तः। अनेन—असतः सकाशाज्जगदुत्पत्तावभ्युपेतायां 'अपीतौ' प्रलये 'तद्वत्प्रसङ्गात्' असन्मात्रवत्त्वप्रसङ्गात्तन्मात्रावशेषप्रसङ्गात् 'असमञ्जसं' अयुक्तमसत्कर्तृत्वमतमिति सूत्रार्थ उक्तो भवति ॥

(७) नन्वस्माभिरपि प्रलयेऽसन्मात्रावशेषस्याभिलषितत्वान्नानिष्टापादनमेतदित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—न त्विति ॥ प्रलय इत्यनेन पूर्वसूत्रादनुवृत्तस्यापीतावित्यस्य सर्वासत्त्वमित्यनेन तत एवानुवृत्तस्य तद्वत्त्वमित्यस्य भाव एव, न त्वभाव इत्यनेन तुशब्दस्यार्थ

प्रलये सर्वासत्त्वं भावे दृष्टान्तभावादेव न युज्यते ।
सत उत्पत्तिः सशेषविनाशश्च हि लोके दृष्टः ॥ १० ॥

(८) सू—ॐ ॥ स्वपक्षदोषाच्च ॥ ॐ ॥ ११ ॥

दृष्टान्ताभावादेव ॥ ११ ॥

उक्तो भवति। दृष्टान्तसत्त्वं कुत्रेत्याकांक्षायां तद्योग्यविषयं दर्शयति—भाव इति। पदार्थसत्त्वे इत्यर्थः। तथाच प्रलये भावे पदार्थसत्त्वविषय एव 'दृष्टान्तभावात्' दृष्टान्तगृहीतव्याप्तिकानुमानसद्भावान्न तदा सर्वपदार्थानामसत्त्वमभ्युपगन्तुं युज्यत इति भाष्ययोजना। दृष्टान्तभावादेवेति यथाश्रुतान्वयो वा। अस्मिन् पक्षे अनुमानप्राबल्यप्रदर्शनमुखेन नेतरत्र प्रमाणान्तरविरोधो मृग्य इत्यर्थक एवशब्दः। कोऽसौ प्रलये पदार्थसत्त्वसाधने दृष्टान्त इत्यत आह—सत इति। भावपदार्थादित्यर्थः। 'सशेषः' सावशेषः। चः समुच्चये। 'हि' यतः 'लोके' पटादौ। दृष्ट इत्यस्य यथायोग्यमुभयत्राप्यन्वयः। अस्यातो न युज्यते इति पूर्वेण सम्बन्धः। अनेनेमौ प्रयोगौ सूचितौ—विप्रतिपन्ना महदादिकार्योत्पत्तिः भावपदार्थोद्भवितुमर्हति, उत्पत्तित्वात्, पटोत्पत्तिवत्। एवं विमतो विनाशः सशेषः, विनाशत्वात् पटनाशवदिति। पटनाशेऽपि तन्त्वाद्यवशेषदर्शनाद्दृष्टान्तत्वोपपत्तिः। तथाच प्रलये सर्वासत्त्वमनुमानप्रमाणसिद्धार्थपरित्यागरूपत्वाद्भवत्येव तदापादनमनिष्टापादनरूपमिति भावः।

(८) न केवलं प्रामाणिकपरित्यागप्रसक्त्या प्रलये सर्वासत्त्वमनिष्टं अपि तु अप्रामाणिकत्वाच्चेत्यर्थप्रतिपादकं सूत्रमुपन्यस्य व्याचष्टे—स्वपक्षेति ॥ दृष्टान्ताभावादित्यावर्तते। अनेन दोषादित्यस्य एवेत्यनेन चशब्दस्यार्थ उक्तो भवति। तथाच दृष्टान्तसापेक्षानुमानप्रमाणाभावान्न सर्वासत्त्वं युज्यते। कुतस्तदभावः? दृष्टान्ताभावादेव, नन्वनुमानाभावमात्रेण कथं सर्वासत्त्वमप्रामाणिकम्? प्रत्यक्षागमयोः सम्भवादित्यत आह—दृष्टान्तेति। दृष्टं प्रत्यक्षं अन्तो निर्णयस्तज्जनक आगमस्तयोरभावादित्यर्थः। अनेन सूत्रे दोषपदमनेकार्थं प्रत्यक्षागमयोरभावमनुमानस्य दुष्टत्वं तत्प्रयोजकं दृष्टान्ताभावं च वक्तीति सूचितम्। एवशब्देन न दुष्टत्वे निमित्तान्तरं

(९) सू—ॐ॥ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः॥ ॐ॥१२॥

एतावानेव तर्क इति प्रतिष्ठापकप्रमाणाभावात् उक्तादन्यथाऽप्यनुमेयमिति चेत्—

(१०) न, एवं सति प्रमाणसिद्धेऽपि

वक्तव्यमिति सूचयति। तथा च प्रलये सर्वासत्त्वपक्षस्याप्रामाणिकत्वात्तदभ्युपगमोऽनिष्ट इति भावः। यद्यपि टीकारीत्या न केवलं भावे दृष्टान्तभावात्, किंतु स्वपक्षे प्रलये सर्वाभावपक्षे दृष्टान्ताभावात्प्रमाणसामान्याभावादिति समुच्चयार्थतया सौत्रश्चशब्दो भाति। तथापि भाष्येऽर्थान्तरं चोक्तमिति न विरोधः।

(९) तर्केण सदसतोः कारणत्वसाधनबाधने आक्षिप्य समादधत्सूत्रमुपन्यस्याक्षेपांशं तावद्व्याचष्टे—तर्केति॥ एवशब्दोऽनेवंभावव्यावर्तकः। अन्यथा वैपरीत्येनापीत्यनेनावृत्तोपिर्भिन्नक्रमः समुच्चयार्थ इत्युक्तं भवति॥ अनुमेयमित्यनन्तरं यत इति शेषः। तथाच 'तर्कः' प्रत्यनुमानं 'एतावानेव' एतादृशस्थापनानुमानं प्रति विरोधितया वर्तते, नैतादृशं प्रतीत्येवंभावोपेत एवेत्यत्र 'प्रतिष्ठापकप्रमाणाभावात्' नियामकप्रमाणाभावात् सर्वानुमानेष्वप्युक्तादन्यथाऽप्यनुमेयमनुमातुं शक्यं यतोऽतः तर्कः सूत्रद्वयोक्तं स्थापनानुमानमपि 'अन्यथा' अप्रमाणम्। कुतः? यतोऽत्रापि 'न तु दृष्टान्तभावात्' स्वपक्षदोषाच्च, इत्युक्तात्सत्कारणत्वासत्कारणत्वाभावादन्यथाऽभावकारणत्वभावाकारणत्वरूपमप्यनुमेयमत इति योजना।

(१०) नञध्याहारेण परिहारांशं व्याचष्टे—नेति॥ एवं सतीत्यनेन एवमित्यस्य प्रमाणसिद्धेऽपीत्यनेन अपीत्यस्यार्थ उक्तो भवति। मोक्षपदं तत्त्वप्रदीपरीत्या प्रामाणिकमात्रोपलक्षकम्। यद्यपितथापीत्यर्थे न केवलं अप्रामाणिक इति समुच्चये कैमुत्ये वाऽपिशब्दः। उक्तादित्यस्ति। अन्यथानुमेयत्वादित्यनेन अत्राप्येवमपीत्यनन्तरं यतश्शब्दशिरस्कमन्यथानुमेयमिति पदद्वयं च संयोज्यमिति सूचितम्। तथाच प्रतितर्कपराहतत्वेन सर्वतर्कस्याप्यप्रमाणत्वात् न तेन साधनं बाधनं वा युक्तमिति यत्पूर्व-

मोक्षेऽन्यथानुमेयत्वादनिर्मोक्षप्रसङ्गः ।

(११) अतो यावत्प्रमाणसिद्धं तावदेवाङ्गीकर्तव्यं नातोऽन्यच्छङ्कयम् ।

पक्षिणोक्तं, तन्न, कुतः ? एवं सत्यागमाप्रामाण्यवादिनं प्रत्यवश्यमुपन्यसनीयेन अनुमानप्रमाणेन सत्त्वेन नित्यत्वेन च सिद्धे 'मोक्षे' तद्विषये प्रामाणिकातीन्द्रियार्थमात्रेऽपि चार्वाकादिभिरास्तिकोक्तान्मोक्षास्तित्वनित्यत्वादिरूपार्थान् 'अन्यथाऽनुमेयत्वात्' अनुमातुं शक्यत्वात्, अतएव मोक्षाद्यलौकिकार्थविषयानुमानस्य अन्यथाऽप्रमाणत्वेन अनुमेयत्वात् 'अनिर्मोक्षप्रसङ्गो' निरयमतिशयार्थो न निषेधार्थः नञ्च प्रतिषेधार्थस्तथाचात्यन्तिकदुःखनिवृत्तिरूपस्य त्वयापि शास्त्रमहाफलत्वेनाङ्गीकृतस्य मोक्षस्याप्यभावः प्रसज्येतेति योजना। अनेन–'तर्काप्रतिष्ठानात्' एतावानेव प्रतितर्क इत्यत्र नियामकप्रमाणाभावात्सर्वत्राप्युक्तात् 'अन्यथाप्यनुमेयं' यतोऽतः 'तर्काप्रतिष्ठानात्' सर्वानुमानेषु तर्कस्य प्रत्यनुमानस्य विरोधितया अनिवारणीयत्वात् अत एव 'तर्काप्रतिष्ठानात्' स्थापनानुमानानां प्रामाण्याभावात्तर्कोऽन्यथैव अर्थसाधनबाधनाक्षम एव भवतीति चेत्—न, एवं सत्युक्ताद्धेतोस्तर्कमात्रस्याप्रामाण्याभ्युपगमे सत्यपि प्रमाणसिद्धेऽपि मोक्षे यतोऽन्यथाऽनुमेयं प्रतितर्केण मोक्षवाद्युक्तादन्यथाप्यनुमातुं शक्यमतोऽनिर्मोक्षप्रसङ्गः, अतो न तर्कसिद्धं सर्वं प्रतितर्केण दूषयितुं शक्यमिति सूत्रार्थ उक्तो भवति ।

(११) एवं सर्वतर्केषु विरोधितया प्रतितर्कः प्रसरतीत्यङ्गीकारेऽति प्रसङ्गमभिदधत्सूत्रांशं विवृत्य तदभिप्रेतं विषर्यये पर्यवसानं दर्शयति—अत इति ॥ यावत्तावच्छब्दौ यत्तदित्यर्थौ। वस्तु तर्केणेति शेषः। तथाच यत एवं प्रामाणिकतर्कस्यापि प्रतितर्केण बाधाभ्युपगमेऽतिप्रसङ्गो भवति, अतो यद्वस्तु प्रमाणेन सिद्धं तदेव तर्केण पक्षे साध्यतयाङ्गीकार्यमित्यर्थः । एवकारव्यावर्त्यं दर्शयति—नेति। तर्केण निषेद्धुं साधयितुं वेति शेषः। तथाच 'अतः' प्रमाणसिद्धात् 'अन्यत्' अप्रामाणिकं न तर्केण साधयितुं शक्यम्, एवं 'अतः' प्रमाणासिद्धात् 'अन्यत्' प्रमाणसिद्धं न तर्केण निषेद्धुं शक्यमित्यर्थः । तथाच यः प्रमाणसाहाय्ययुक्तः प्रतितर्कः स

(१२) यावदेव प्रमाणेन सिद्धं तावदहापयन् ।
स्वीकुर्यान्नैव चान्यत्र शक्यं मानमृते क्वचित् ॥
इति वामने ॥ १२ ॥

(१३) सू—ॐ ॥ एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः ॥ ॐ ॥ १३ ॥

एवाप्रामाणिकतर्कं बाधते, न त्वप्रामाणिकः प्रामाणिकम् । सदकारणत्वासत्कारणत्वसाधकतर्कौ त्वप्रामाणिकौ । सत्कारणत्वमोक्षादिसाधकः प्रकृततर्कश्च प्रामाणिकः । अतो न ताभ्यां निषेद्धुं शक्यत इति भावः ॥

(१२) अत्रार्थेऽपिशब्दसूचितां स्मृतिं सम्मतित्वेनाह – यावदिति ॥ अत्रापि यावत्तावच्छब्दौ यत्तदित्यर्थौ । अतएव पूर्वं तथैवोक्तम् । वस्त्विति तर्केणेति च शेषः । चस्त्वर्थः । तथाच यत्प्रमाणेन सिद्धं वस्तु तदेवाहापयन् तर्केण 'स्वीकुर्यात्' तर्केण साधयेत्, न तु प्रामाणिकादन्यत्रान्यदप्रामाणिकम् । कुतः ? यतो 'मानं' अनुग्राह्यप्रमाणं 'ऋते' विना तर्केण तर्कमात्रेण 'क्वचित्' किञ्चिद्वस्तु साधयितुं निषेद्धुं वा न शक्यमत इत्यर्थः । शक्यमिति पाठे शंकार्हमपि नेत्यर्थः । इति वामने इत्यस्योक्तत्वात् 'यावत्' इत्यादिनोक्तं युक्तमित्युपस्कृतेनान्वयः ॥

(१३) ननु मास्त्वसच्छब्दिताभावतत्त्वं जगतः कारणं, तथापि न विष्णोर्जगत्कारणत्वं सम्भवति, विप्रतिपन्नं जगन्निष्कारणकं, अचेतनकारणकं, जीवकारणकं वा, कार्यत्वात्कूलपतननवत् दध्यादिवदिति निष्कारणत्वादिसाधकयुक्तिविरोधात् । न च निर्मूलयुक्तेरसाधकत्वमिति वाच्यम् । 'अकस्मात' इत्यादिश्रुतिमूलत्वादित्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—एतेनेति । एतेनेति पदमनूद्य तेनातिदिष्टो हेतुः विवृतो—दृष्टान्तभावेनाभावेन चेति । तत्रासत्कारणत्वादौ निष्कारणत्वादाविति पदद्वयमादावुपस्कार्यं यथाक्रममस्यान्वयः । चः समुच्चये । दृष्टान्तभावेनेत्यनेन तन्मूलकानुमानसद्भावः, तदभावेनेत्यनेन तन्निमित्तानुमानाभावश्चोक्तः । कूलपतनादीनामपि ईश्वरकारणकत्वेन निष्कारणत्वादि न सम्मतमिति न दृष्टान्तत्वमिति भावः । शिष्टा इत्यस्य व्याख्यानमवशिष्टा

एतेन दृष्टान्तभावेनाभावेन चावशिष्टा अप्यपरिग्रहा
विरुद्धसिद्धान्ता अकर्तृकत्वाचेतनकर्तृकत्व-
जीवकर्तृकत्वादयोऽपि ।

(१४) अकस्माद्धीदमाविरासीदकस्मात्तिष्ठत्यकस्माल्लयमभ्युपैति ।

इति। प्राङ्निराकृतादवशिष्टास्तथा प्रतीता इत्यर्थः। इदं च प्राङ्निरस्ता-सत्कर्तृत्वसिद्धान्तव्युदासायोक्तम्। अपरिग्रहा इत्येतदनूद्य नञो विरुद्धार्थत्वं परिग्रहशब्दस्य सिद्धान्तार्थत्वं परिगृह्यते इति परिग्रहः इति कर्मव्युत्पत्तिं चाश्रित्य व्याचष्टे—विरुद्धेति। वेदोक्तपक्षविरुद्धपक्षा इत्यर्थः। यद्वा—'वेदापरिगृहीताः' इति सुधोक्तेः पर्युदासार्थो नञ्, तस्य फलितार्थकथनं विरुद्धेति। इदं च विशेषणं ब्रह्मकर्तृत्वसिद्धान्तव्युदासायोक्तम्। अकर्तृकत्वमकारणकत्वम्। अतएव सुधायां 'अत्र कर्तृशब्दः कारणमात्रपरो द्रष्टव्यः' इत्युक्तम्। अत्रापि टीकायां 'विप्रतिपन्नं निष्कारणम्' इत्युक्तम्। अन्यथा निष्कारणत्वपक्षानुवादत्वानुपपत्तेरिति द्रष्टव्यम्। अचेतनकर्तृकत्वमित्येतत् अचेतनमात्रकारणकत्वमिति व्याख्येयम्, अन्यथा सिद्धान्ते प्रधानकारणकत्वस्य संमतत्वेन तन्निराकरणानुपपत्तेः। एवं जीवकर्तृकत्वमित्येतदपि तन्मात्रपरतया व्याख्येयम्। आदिशब्देन तत्त्वप्रदीपरीत्या 'यतो वा' इत्यादिश्रुतिप्रापितं मायिब्रह्मकर्तृकत्वं गृह्यते। यद्वा—'कालस्वभावादिवादाः' इति सुधोक्तेः कालस्वभावकारणत्वादि गृह्यते। तस्यापि 'कालाद्भवन्ति भूतानि' इत्यादिभाष्यस्थद्वितीयादिशब्दगृहीतश्रुतिप्रापितत्वात्। 'अवशिष्टा अपि आदयोऽपि' इत्यपेरुभयत्र संयोगः सूत्रे परेषामिव शिष्टापरिग्रहा इत्येकं पदमिति भ्रमं वारयितुम्। अयं चापिः सर्वेऽप्यपरिग्रहा इत्यभिव्याप्तयर्थकः। यद्वा—बहुकोशेषु समासपाठदर्शनादेकपद्यमेव। तथापि न परेषामिव तत्पुरुषः, किन्तु कर्मधारयसमासः प्रावल्यादिति समासस्य स्पष्टप्रतीत्यर्थं मध्ये भिन्नक्रमेणापिशब्दसंयोगः। अस्मिन् पक्षे शिष्टाश्च तेऽपरिग्रहाश्चेति विग्रहः। अत्र बुद्ध्या विवेकेनाभिव्याप्तयर्थकापेः सम्बन्धः आवृत्त्यभिप्रायेणापेः द्विः प्रयोगः। द्वितीयस्यापेः यद्यपितथापीत्यर्थकस्य श्रुतिप्राप्ता अपीत्यध्याहृतेनान्वयः॥

(१४) श्रुतिप्राप्ता इत्युक्ते कास्ताश्श्रुतय इत्याकांक्षायां तत्र प्रथमं

(१५) प्रधानादिदमुत्पन्नं प्रधानमधितिष्ठति ।
प्रधाने लयमभ्येति न ह्यन्यत्कारणं मतम् ॥
(१६) जीवाद्भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः ।
जीवे तु लयमृच्छन्ति न जीवात्कारणं परम् ।
इत्यादिश्रुतिप्राप्ता निराकृताः ।

निष्कारणत्वप्रापिकां श्रुतिमाह—अकस्मादिति ॥ 'इदं' जगत् 'अकस्मात्' अकारणकमेव 'आविरासीत्' उत्पन्नमभूत् अकस्मादेव स्थितिमद्भवति लयं च प्राप्नोतीत्यर्थः ॥

(१५) अचेतनकारणत्वे श्रुतिमाह—प्रधानेति ॥ 'इदं' जगत् 'प्रधानात्' अचेतनप्रकृतेरुत्पन्नम् प्रधानमधितिष्ठति, तत्र प्रधाने लयं च प्राप्नोतीत्यर्थः । पुनः पुनः प्रधानशब्दप्रयोगस्तात्पर्यार्थः । एवं पूर्वत्रोत्तरत्र च द्रष्टव्यम् । ननु कार्यस्य कारण एव लयौचित्यात्प्रधानादन्यस्यैव कारणत्वात्कथं जगतः प्रधाने लयः । न चोत्पत्यादिकर्तृत्वात्कारणत्वमिति वाच्यम् । उत्पत्त्यादिकर्तुरन्यस्यैव कारणत्वोपपत्तेरित्यत आह—न हीति । 'हि' यस्मात्प्रधानादन्यत्कारणं न प्रमाणप्रमितमेवं यस्मादुत्पत्त्यादिकर्तुरन्यत्कारणं न मतं, तस्मात्तस्यैवोत्पत्त्यादिकर्तृत्वात्कारणत्वं लयाधिकरणत्वं च युक्तमित्यर्थः । प्रसिद्ध्यर्थं हिशब्दः ॥

(१६) जीवकारणत्वे श्रुतिमाह—जीवादिति ॥ 'भूतानि' पृथिव्याद्युपलक्षितकार्याणि भवन्ति जायन्ते 'अचञ्चलाः' अचञ्चलानि 'तिष्ठन्ति' जीवेन धार्यन्त इति यावत् । 'ऋच्छन्ति' प्राप्नुवन्ति । न जीवादित्येतत् पूर्ववदवतार्य व्याख्येयम् । 'परं' अन्यत् । अवधारणार्थस्य तुशब्दस्य न त्विति सम्बन्धः । नन्वत्रैव पादे निष्कारणत्वादिनिरासे समयपादे वक्ष्यमाणचार्वाकसाङ्ख्यपक्षनिषेधस्य पौनरुक्त्यं प्रसज्यत इत्यत उक्तं—इत्यादिश्रुतिप्राप्ता इति । श्रुतिमुख्यार्थापरिज्ञानमूलककार्यत्वादियुक्तिप्रापिता इत्यर्थः । तथाच तत्र समयप्राप्तस्यैव निराकरणान्न पौनरुक्त्यमिति भावः । न चैवमस्य तृतीयपादनिवेशापत्तिरिति शङ्कातु 'अर्थाद्युक्तिविरोधो निराक्रियते' इत्युक्तरीत्या परिहरणीया । निराकृता इत्यनेन व्याख्याता इत्यस्य प्रत्याख्याता इत्यर्थ इति सूचितम् ॥

(१७) यथा दुःखादिषु जीवस्यास्वातन्त्र्यमेवमन्येष्वपीति दृष्टान्तः ।

(१८) श्रुतिगतिस्तु ब्रह्मवाचकत्वेन प्रदर्शिता ।

---

(१७) नन्वस्तु सत्कारणत्वादौ घटादिदृष्टान्तभावः, निष्कारणत्वादौ दृष्टान्ताभावश्च । तथापि जीवकर्तृत्वपक्षनिरासाय कथमजीवकर्तृत्वे एतेनेत्यतिदिष्टो दृष्टान्तभावाख्यो हेतुरसिद्धः, दृष्टान्तस्यादर्शनात् । नापि जीवकर्तृत्वे दृष्टान्ताभावाख्यो हेतुरसिद्धः, घटादीनां कुलालादिकर्तृकत्व-दर्शनेन तेषामेव तत्र दृष्टान्तत्वसम्भवादित्यत आह—यथेति । कार्येषु साध्यमिति च शेषः । इतिशब्दो हेतौ । दृष्टान्त इत्युपलक्षणं, तदभाव-श्चेत्यपि द्रष्टव्यम् । तथाच यथा दुःखादिषु कार्येषु जीवस्य 'अस्वातन्त्र्यं' कर्तृत्वाभावः किं त्वीश्वरस्यैव एवं दुःखादिभ्य आन्तरेभ्योऽन्येषु घटादि-बाह्यकार्येष्वप्यकर्तृत्वं जीवस्याकर्तृत्वं जीवस्य साध्यमनुमेयमिति हेतोर-सिद्धिरतो जगतोऽजीवकर्तृकत्वे दुःखादिरूपो दृष्टान्तः । एवं जीवकर्तृकत्वे दृष्टान्ताभावश्चेत्यर्थः । तथाचाजीवकर्तृकत्वपक्षे दृष्टान्तभावाख्यो हेतुः तथा जीवकर्तृत्वपक्षे तदभावाख्यो हेतुश्च नासिद्ध इति भावः । ननु दुःखादिदृष्टान्तेन घटादिष्वपि जीवकर्तृकत्वाभावसाधने महदादिकमचेतन-कर्तृकं न, किंतु चेतनकर्तृकं कार्यत्वादिति सिद्धान्त्युपन्यस्तानुमाने घटादेः दृष्टान्तत्वोक्त्यनुपपत्तिरित्याशङ्कानिरासायाकर्तृत्वमित्यनुक्त्वाऽस्वातन्त्र्य-मित्युक्तम् । तथाचोक्तसामान्यप्रतिज्ञायां घटादेर्दृष्टान्तत्वोक्तावपि न मह-दादिकं स्वातन्त्र्येण जीवकर्तृकमित्यत्र तेषां दृष्टान्तत्वप्रत्याशा कार्या । चेतनकर्तृकत्वे घटादीनां दृष्टान्तत्वोक्तेरचेतनकर्तृकत्वनिषेधमात्राभिप्राय-कत्वेन घटादिषु स्वातन्त्र्येण जीवकर्तृकत्वास्तित्वेऽपि तात्पर्याभावात्, परस्य तु स्वातन्त्र्येण जीवकर्तृकत्वस्यैव साध्यतयाऽभिमतत्वात् तत्र च घटादेर्दृष्टान्तत्वासम्मतेः नोक्तानुपपत्तिरिति भावः ॥

(१८) नन्वसतः कारणत्वाभावे 'असदेव' इत्यादिश्रुतीनां का गति-रित्यत आह—श्रुतिगतिरिति । गम्यत इति गतिर्विषयः । तुशब्दः उक्ता-शङ्काव्यवच्छेदकः । 'ब्रह्मवाचकत्वेन' असदादिशब्दानां ब्रह्मवाचित्व-वचनेन 'प्रदर्शिता' 'एतेन सर्वे' इत्यत्र सूत्रकृतेति शेषः ॥

(१९) यत्रान्यवाचकत्वेप्यविरोधस्तत्र अन्यदप्यमुख्यतया उच्यते ।
यत्र विरोधस्तत्र ब्रह्मैवोच्यत इति नियमः ॥ १३ ॥

॥ इति असदधिकरणम् ॥ ४ ॥

---

(१९) ननु श्रुतीनां परमुख्यवृत्त्या ब्रह्मवाचित्वेऽपि मुख्यवृत्त्याऽसदादेरपि तद्वाच्यत्वाद्विष्णुकारणताश्रुतेस्तद्विरोधः स्यादित्यत आह—यत्रेति ॥ अपिः समुच्चये। तथाच न केवलं ब्रह्मवाचकत्वे किंतु यस्यां श्रुतौ ब्रह्मान्यप्रकृत्यादिवाचकत्वे अङ्गीकृतेऽपि 'अविरोधः' अबाधः। विष्णुकारणताया इति शेषः। यद्वा—मानान्तरविरोध उपक्रमोपसंहारादिविरोधो वा पूर्वोत्तरवाक्यविरोधो वा नास्ति, 'तत्र ब्रह्मणोऽन्यत् 'अमुख्यतया' परममुख्यान्यमुख्यवृत्त्योच्यत इत्यर्थः। न केवलं ब्रह्मेत्यपेरर्थः। यथाऽत्रैव 'प्रधानादिदमुत्पन्नम्' इत्यादौ सिद्धान्ते ब्रह्मवाचकेनापि प्रधानशब्देनोपादानत्वेन प्रकृतिरुच्यते, यथा 'वायुर्भूतानामधिपतिः' ( ) इत्यादौ वायुः, 'वसन्ते वसन्ते ज्योतिषा' ( ) इत्यादौ कालकर्मादि, 'सोऽरोदीत्' (तै.सं-१-५-१.) इत्यादौ रुद्रादि। अत्र 'सः' रुद्रोऽरोदीदिति यत् तदेव रुद्रशब्दस्य प्रवृत्तिनिमित्तमित्यर्थाश्रयणेन रुद्रमात्रस्य वाच्यत्वप्रतीतावपि व्यर्थाश्रयणे ब्रह्मणोऽप्येतद्वाच्यत्वात्। 'ब्रह्मैव' विष्णुरेवेत्येवकारोऽन्यव्यवच्छेदार्थः। यथा 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २-१-१.) 'विश्वस्मादिन्द्र उत्तरः' ( ) 'न किरिन्द्र त्वदुत्तरः' (ऋ. ४-३०-१.) 'निषुसीद गणपते' (ऋ १०-११२-९.) इत्यादौ। 'विश्वस्मात्' सर्वस्मात्। हे इन्द्र त्वदुत्तरः त्वत्तः परो 'न किः' न कोपीति तत्त्वप्रदीपविश्वेश्वरतीर्थीयचन्द्रिकादिशा श्रुत्यर्थः। यद्यपि 'न किर्माकिस्मसीत्यादिप्रोक्ताधिक्यविवक्षया' इति ऋग्भाष्येऽभिहितम्। तथापि व्याख्यानान्तरमेतत्। यथा अहंशब्दस्यानेकविधव्युत्पत्तिमाश्रित्य अनेकधा व्याख्यानमित्यविरोधः। निषुसीद, इत्येतद्व्याख्यास्यते। नियम इत्यनन्तरं 'अस्तियतः' इति शेषः। अस्यातो विरोध इति पूर्वेणान्वयः। तथाचात्रापि जगत्कारणतापरे 'असदेव' 'प्रधानादिदम्' 'जीवाद्भवन्ति भूतानि' ( ) इत्यादावन्यस्यापि वाच्यत्वे बहुमानविरोधाद्विष्णुरेवोच्यते, न प्रागभावादिकमिति न विष्णुजगत्कारणत्वश्रुतेस्तद्विरोध इति भावः ॥

॥ इति असदधिकरणम् ॥ ४ ॥

॥ ५. भोक्त्राधिकरणम् ॥

(१) सू—ॐ॥ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥

॥ ॐ ॥ १४ ॥

'कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति

॥ ५. भोक्त्राधिकरणम् ॥

(१) अत्राधिकरणे बहुश्रुतिसिद्धत्वेन प्रबलया दृढयुक्त्या विरोधः परिह्रियते । पूर्वपक्षस्य सूत्र एवोक्तत्वात् तदुपन्यस्य पूर्वपक्षांशं तावद्व्याचष्टे—भोक्त्रापत्तेरिति ॥ भोक्त्रापत्तेरिति हेतोरसिद्धिपरिहाराय तत्र श्रुतिमाह—कर्माणीति । इतीति एवंरूपार्थवर्णश्रुतावित्यर्थः । भोक्त्रापत्तेरित्यस्य सुखदुःखभोक्तुः जीवस्य आपत्तेः परमात्मत्वप्राप्तेः श्रुतत्वादित्यर्थमभिप्रेत्याह—मुक्तजीवस्येति । यद्यपि जीवस्येत्येव वक्तुमुचितम् । तथापि सूत्रे मुक्तावित्यध्याहर्तव्यपदलब्धार्थकथनमेतदित्यदोषः । 'उच्यते' श्रूयते । किञ्चात इत्यत आह—अत इति । मुक्तजीवस्य परमात्मत्वप्राप्तिश्रवणादित्यर्थः । 'तयोः' मुक्तजीवेश्वरयोः 'अविभागः' अभेदः सिद्ध इति शेषः । यो यथा श्रूयते स तथेति व्याप्तेरिति भावः । नन्वस्तु ब्रह्मणो मुक्तजीवाभेदः, तथापि नास्माकमनिष्टं संसारिण इव मुक्तस्य सर्वकर्तृत्वे प्रत्यक्षविरोधाभावेन पूर्वमसतोऽपि जीवे कर्तृत्वस्य ज्ञानान्मुक्तेरिव मुक्तावुदयसम्भवेन मुक्ताभिन्नस्यापि ब्रह्मणः कारणत्वसम्भवादित्यतः तदुत्तरत्वेनापि अविभाग इत्यंशं योजयति—अत इति । यतो मुक्तावीशाभिन्नो जीवः अतः 'पूर्वं' संसारेऽपि 'स एव' ईश्वराभिन्न एव, न तु भिन्न इत्यर्थः । न केवलं मुक्तौ, किंतु पूर्वमपीति समुच्चयेऽपिशब्दः । ननु मुक्तावभेदेऽपि संसारे भेद एवास्तु च्विप्रत्ययस्वारस्यात् । तथाच मुक्तावभिन्नत्वादिति हेतुरप्रयोजक इत्यत आह—न हीति । पूर्वमिति वर्तते । तथाच 'हि' यतः 'पूर्वं' संसारे ब्रह्माभिन्नस्य मुक्तौ 'अन्यत्वं' तदभेदो न युज्यते । अन्यथा पूर्वमन्यत्वादिति युक्तिविरोधस्स्यादिति भावः । अतः पूर्वमपि स एवेत्यनेनास्यान्वयः । एवं 'अन्यस्य' घटादिभिन्नस्य पटादेः 'अन्यत्वं' अन्यभावो घटादित्वं 'न युज्यते' न दृश्यते हि खलु इति

(मु. ३-२-७.) इति मुक्तजीवस्य परापत्तिरुच्यते ।
अतस्तयोरविभागः । अतः पूर्वमपि स एव ।
न ह्यन्यस्यान्यत्वं युज्यत इति चेत्—
(२) न, स्याल्लोकवत् यथा लोके उदके उदकान्तरस्यैकीभाव-

व्याप्तिप्रदर्शनपरत्वेनापि इदं भाष्यं व्याख्येयम् । पूर्वमप्यभेदे च्विप्रत्ययानुपपत्तिशङ्का तु मुक्तावेव भेदभ्रमनिवर्तकाभेदप्रतीत्यपेक्षया तदुपपत्तेरिति सुधायामेव परिहृता । न च कदाचिदन्यत्वस्य पूर्वपक्षयुक्तित्वाभिधाने 'नान्यदन्यत्वमापन्नम्' इत्यनुव्याख्यानविरोधः, तत्रास्य सिद्धान्तयुक्तित्वाभिधानादिति वाच्यम् । मुक्तौ संसारेच अभेदो, न मुक्तिमात्रे । कुतो? न हीत्युक्तयुक्तेरित्युभयत्राभेदपूर्वपक्षविवक्षया भाष्यस्य प्रवृत्तत्वात्, अत एवात्र पूर्वमपीत्युक्तम् । च्विप्रत्ययस्वारस्यात्पूर्वं भेदो मुक्तौ त्वभेद इति पूर्वपक्षविवक्षया अनुव्याख्यानस्य प्रवृत्तत्वेन विरोधाभावात् । इतीति सूत्रे पूर्वपक्षांशे शेषोक्तिः । श्रुतिस्तु 'गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु' (मुं. ३-२-७.) इति पूर्ववाक्येन सह व्याख्येया । तत्प्रकारस्तु—'गताः' मुक्ताः 'कलाः' प्राणादिपञ्चदशकलारूपाः देवताः अन्ये च 'प्रतिदेवतासु' देवताप्रतिबिम्बभूतासु प्रजासु 'प्रतिष्ठाः' स्थितिहेतवः सर्वे देवाः मुक्ताः । 'कर्माणि' पुष्कराख्या कर्माभिमानिनी देवता मुक्ता । तथा मुक्तो 'विज्ञानमय आत्मा' जीवश्चेत्येते सर्वे 'अव्यये' देहतोऽपि नाशशून्ये 'परे' परमात्मनि एकीभवन्ति । लक्षितलक्षणेऽयमुपचारो वा । तथाच परमात्मानं प्राप्य तस्मिन्नेव स्थिताः 'एकीभवन्ति' प्राग्भिन्नमतयोऽधुनेश्वरेणैकमत्यं भवन्ति प्राप्नुवन्ति । एकविषयमतिमन्तो भवन्तीति यावत् । अथवा—'प्रागीश्वरव्यक्तिस्थानापेक्षयाऽन्यत्रेतस्ततः स्थितास्तत्र श्वेतद्वीपादौ मिलिता भवन्ति' इति तत्त्वनिर्णयटीकायामुक्तः । तत्त्वप्रदीपे तु—'न ह्यस्य कर्म क्षीयते' (बृ. ३-४-१५.) इति ज्ञानोत्तरकालीनकर्मणां फलतोऽक्षयत्वोक्तेर्ज्ञानोत्तरकृतकर्मभिः सह मुक्तजीवस्य परब्रह्मणि स्थितिस्तद्बुद्धिसारूप्यं चेह विवक्षितमित्युक्तम् । पूर्वपक्षी ह्येकीभवन्तीत्यस्य परब्रह्मीभवन्तीत्यैक्यमुच्यत इति मन्यते ।

(२) अथ सिद्धान्तांशं नञध्याहारेणाविभाग इति पदानुषङ्गाभिप्रायेण

व्यवहारेऽप्यन्तर्भेदोऽस्त्येव, एवं स्यादत्रापि ।

(३) तथा च श्रुतिः—

च व्याचष्टे—नेति ॥ नेश्वरस्य जगत्कारणत्वादिविरुद्धमित्यर्थः । कुत इत्यतो यतो 'नाविभागः' अभेदाभावः इति नञावृत्त्यविभागपदानुषङ्गाभ्यां लब्धो हेतुर्योज्य इत्याशयेन परेण अभेदसाधकतयोक्तस्य भोक्रापत्तेरिति हेतोः व्यभिचारान्यथासिद्ध्युक्तिपरतया स्याल्लोकवदित्यंशमनूद्य व्याचष्टे —स्यादिति । आद्योऽपिर्यद्यपितथापीत्यर्थे । द्वितीयोऽपिशब्दो दृष्टान्त-दार्ष्टान्तिकसमुच्चये । लोक इत्युदक इति चाधिकरणसप्तम्यौ, लोकशब्दो-क्तस्य जनस्य वचनाधिकरणत्वात्, उदकस्य चैक्याधिकरणत्वात् । लोक-पदोक्तस्य जनस्य व्यवहारविषयत्वादुदक इति विषयसप्तमी वा । तथाच 'उदके' एकपात्रस्थितोदके 'उदकान्तरस्य' पात्रान्तरस्थितोदकस्य 'एकीभावव्यवहारेऽपि' तेनेदमैक्यमापन्नमिति लोककर्तृकाभेदोक्ति-सत्त्वेऽपि यथा जलयोः 'अन्तर्भेदः' अन्योन्यं भेदोऽस्त्येव 'एवं' तथात्रापि जीवस्येश्वरैक्योक्तावप्यन्तः परस्परं भेदः स्यात् । न चैक्योक्तिविरोधः । यतश्चोदके उदकान्तरस्येकीभावोक्तिवदुपचरिता स्यादिति योजना । अनेन सूत्रे लोकवदिति लोकसिद्धजलैकीभावोक्तिवदिति प्रथमान्तात्प्राति-पदिकात् लोके जलादाविति सप्तम्यन्ताद्वा वतिरित्युक्तं भवति । एवं भोक्त्रापत्तिरिति विपरिणामेन पूर्वपदानुवृत्तिश्च सूचिता ॥ तथाचायं सूत्रार्थः— भोक्तुः जीवस्य आपत्तेः मुक्तौ परब्रह्मत्वप्राप्तेरुक्तत्वात्तयोः 'अविभागः' अभेदसिद्धः । यतो भोक्तुर्मुक्तौ परमात्माभेदोऽतः संसारेऽपि तस्य तदभेदः प्राप्नोति, अतः असर्वकर्तृसंसारिजीवाभिन्नत्वा-द्ब्रह्मणो न जगत्कर्तृत्वं युक्तमिति चेत्—नेश्वरस्य जगत्कारणत्वादि विरुद्धम् । कुतः ? यतो 'नाविभागो' जीवेशयोरभेदाभावः । न च भोक्त्रापत्तिश्रुतिविरोधः, यतः 'स्याल्लोकवत्' स्याज्जले जलान्तरस्यैकी-भावोक्तिवद्भेदेऽपि स्याद्युज्यते । न च भेदेऽप्यैक्योक्तौ निमित्ताभावः । यतः 'स्याल्लोकवत्' लोके जले जलान्तरस्यैकीभावोक्तिवत्स्थानैक्याद्या-लम्बनत्वेनोपचरिता स्यादत इति ।

(३) न श्रुतेः स्वातन्त्र्येणोपचरितार्थत्वकल्पनं क्रियते, किन्तु श्रुत्याऽपि

'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति'
(कठ. ४-१५.) इति ॥

(४) स्कान्दे च—उदकं तूदके सिक्तं मिश्रमेव यथा भवेत् ।
न चैतदेव भवति यतो वृद्धिः प्रदृश्यते ।

तदुक्तमित्याह—तथाचेति ॥ यथा सूत्रकृदाह, तथा श्रुतिश्चाहेत्यर्थः । 'निरञ्जनः परमं साम्यम्' (मुं. ३-१-३.) इत्याद्यैक्यविरोधश्रुतिरपिच-शब्देन गृहीता । 'एवं मुनेर्विजानत आत्मा भवति गौतम' (कठ. ४-१५.) इति श्रुतिवाक्यशेषः । कठवल्ल्यां नचिकेतसं प्रति यमवचनमेतत्—'हे गौतम तद्बोधोद्भव नचिकेतः' यथा 'शुद्धे' एकपात्रस्थितोदके यथेष्टं प्रक्षिप्तशुद्धोदकं तादृगेव भवति, न तु तदेव, एवं ब्रह्म विजानतो 'मुनेः' मुनिवर्गस्य 'आत्मा' स्वामी मुख्यवायुरपि मुक्तः सन् 'तादृगेव भवति' परमात्मसदृश एव भवति, न तु स एव, किमु अन्ये जीवा इति काठक-भाष्यदिशा श्रुत्यर्थः । विष्णुतत्त्वनिर्णयटीकायां तु—'विजानतो मुनेः' विजानतां मुनीनां 'आत्मा' अधिपतिः हिरण्यगर्भोऽपि मुक्तः परमात्मानं प्राप्य तादृगेव भवति, किमुतान्ये इत्ययमेवार्थो विवृतः । छान्दोग्यभाष्य-व्यासतीर्थीये तु—'एवं मुनेः' मननादिमतो 'विजानतः' अपरोक्षज्ञानिनः 'आत्मा' परमात्मनि प्रविष्टस्वरूपो भवतीति व्याख्यातम् । अयमेवार्थोऽत्र विवक्षितः अन्यथा 'एवमेव हि जीवोऽपि' इति हि स्मृतौ जीवसामान्योक्तिः, ब्रह्मार्थग्रहणेऽल्पमुक्तानामिति टीका, ब्रह्मेति भाष्योक्तिश्चायुक्तास्यात् ॥

(४) ननु जलयोरप्यैक्यान्न व्यभिचारो नवोपन्यरितार्थत्वेन अन्यथा-सिद्धिकल्पनेत्यत उक्तार्थे स्मृतिं चाह—स्कान्दे चेति ॥ अयमर्थ उक्त इति शेषः । किमुक्तमित्यतस्तत्पठति—उदकमिति । तुशब्दः पात्रान्तरस्थत्व-शुद्धत्वरूपविशेषार्थः । यथेत्यादौ संयोज्यम् । एवशब्दव्यावर्त्यं दर्शयति—न चेति । चस्त्वर्थः । 'एतत्' एतत्स्वरूपम् । कुत इत्यतो युक्तिमाह—यत इति । अवृद्धिरित्यपि छेदः । तथाच मिश्रणात्पूर्वं अवृद्धिस्तदनन्तरं वृद्धिश्च यतः प्रदृश्यते अत इत्यर्थः । दार्ष्टान्तिकमाह—एवमिति । हिशब्दः प्रसिद्धौ 'जीवो' ज्ञानिजीवो मुक्तश्च । दृष्टान्तसमुच्चयेऽपिः । परमात्मना तादात्म्य प्राप्तोऽपीति परमात्मना निरूपकेण तादात्म्यं तत्स्वरूपत्वेनैक्यं

एवमेव हि जीवोऽपि तादात्म्यं परमात्मना ।
प्राप्तोऽपि नासौ भवति स्वातन्त्र्यादिविशेषणात् ॥ इति ।

(५) ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते ।
तद्यत्स्वभावः कैवल्यं स भवान् केवलो हरे ॥ इति च ।

(६) 'न ते महित्वमन्वश्नुवन्ति' (ऋ. ७-९९-१.) 'न ते

प्राप्त इत्युक्तोऽपीत्यर्थः। वस्तुतस्तदैक्याभावात्। 'परमात्मना' तत्प्रसादेन 'तादात्म्यं' नियततन्मनस्कत्वादिरूपं मोक्षं 'प्राप्तो' मुक्तोऽपीति वा,

हरौ नियतचित्तत्वाद्ग्रहवत्तत्प्रवेशनात्।
मोक्षं तादात्म्यमित्याहुः न तु तद्रूपतः क्वचित्॥

इति वचनात्। यद्यपि तथाऽपीत्यर्थेऽपिशब्दः। 'असौ' परमात्मा। कुतो नेत्यतस्तत्र हेतुमाह—स्वातन्त्र्यादीति। परमात्मनः स्वातन्त्र्यादिभिः जीवभेदकधर्मैर्विशेषितत्वादित्यर्थः। सार्वज्ञ्यादिरादिपदार्थः। उपलक्षणमेतत्। जीवस्य च अनेवंभूतत्वादित्यपि द्रष्टव्यम्। अत्र पूर्वश्लोके विपक्षे सयुक्तिकं साध्याभावोपपादनेन व्यभिचारो दृढीकृतः। उत्तरश्लोके तु पूर्वपक्षयुक्तहेतोरन्यथासिद्ध्युपपादनायैक्यविरोधिविरुद्धधर्मोपन्यास इति विवेकः। इति स्कान्द इत्यन्वयः॥

(५) ननु 'नासौ भवति' इति वचनमल्पानसायुज्यभाजोऽपेक्ष्यैव प्रवृत्तम्, न तु ब्रह्मादीन् सायुज्यभाजोऽतो न तद्विरोधीत्यत आह—ब्रह्मेति॥ मुक्तामुक्तैरित्यर्थः। उभयत्राप्यभेदाभावस्येह साधनीयत्वात्। अतएव तत्त्वोद्योतटीकायां ब्रह्मेशानशब्देन मुक्तामुक्ता गृह्यन्ते, सङ्कोचे कारणाभावादित्युक्तम्। यद्वा—अल्पमुक्तानामिति टीकाबलादत्र मुक्तमात्रपरो ब्रह्मेशानशब्दः। हे हरे ब्रह्मादिमुक्तामुक्तैः 'यत्कैवल्यं' सर्वोत्तमत्वं प्राप्तुं नैव शक्यते 'तद्यस्य स्वभावो' नैसर्गिकः 'स केवलः' सर्वोत्तमो भवानित्यर्थः। यद्वा—भवान् सः। कुतः यतः 'केवलः' जडामिश्र इत्यर्थः। इतीति। स्कान्दे उक्तमित्यन्वयः। यद्वा—इति स्मृतिरपि सूत्रकारोक्तं वदतीत्यर्थः।

(६) नासौ भवतीत्युक्तप्रमेये श्रुतिं चाह—न त इति॥ नान्वश्नुवन्तीति वर्तमाननिषेधात्स्यादुत्तरत्र जीवस्येश्वरभाव इत्यत आह—न त

विष्णो जायमानो न जातः' (ऋ. ७-९९-२.) इत्यादि च ।

(७) फलत्वेऽपि युक्तिविरोधेऽन्तर्भावादत्रोक्तम् ॥ १४ ॥

॥ इति भोक्रधिकरणम् ॥ ५ ॥

॥ ६. आरम्भणाधिकरणम् ॥

(१) सू—ॐ ॥ तदनन्यत्वमारम्भणशब्दादिभ्यः ॥

॥ ॐ ॥ १५ ॥

इति । श्रुतिद्वयमपि जन्माधिकरणे व्याख्यातम् । इत्यादि चेति । एवमादि रूपा श्रुतिः उक्तार्थे प्रमाणमित्यर्थः । चः पूर्वप्रमाणसमुच्चये । आदिशब्देनैवजातीयका श्रुतिर्गृह्यते । अत्र प्रथमान्तानामतो लोकवदित्युक्तं युक्तमित्युपस्कृतेनान्वयः ।

(७) ननु मुक्तेश्वरयोर्भेदसमर्थनं फलाध्याये सङ्गतमतो नेतत्सूत्रार्थः । न च मुक्तामुक्तयोरुभयोरत्रेश्वरभेदसाधनात्सङ्गतिः । एवमपि मुक्तभेदस्यापि साध्यत्वेन तस्य चोत्तरत्रैव सङ्गतत्वेनेहासङ्गतत्वादतोऽन्यथैव सूत्रार्थो वर्णनीय इत्यद्वैतिशङ्कां परिहरति—फलत्वेऽपीति ॥ अपिरुभयत्रान्वेतव्यः। तत्राद्यो यद्यपितथाऽपीत्यर्थे। द्वितीयोऽत्रापीत्यन्वितस्समुच्चये। अस्येति शेषः । अत्रेत्यावर्तते । तथाचाम्याधिकरणस्य फलाध्यायसङ्गतत्वेऽपि 'युक्तिविरोधे' न ह्यन्यस्येत्युक्तयुक्तिविरोधपरिहारात्मके 'अत्रापि' पादेऽन्तर्भूतत्वादत्रेदमधिकरणं 'उक्तं' निवेशितमित्यर्थः । अन्यथोभयान्तर्गतस्य एकत्राप्यनुक्तिप्रसङ्गः । तस्मादुक्तरीत्या सङ्गतिसद्भावादस्मदीयव्याख्यानमेव युक्तमिति भावः ॥ ५ ॥

॥ इति भोक्रधिकरणम् ॥

॥ ६. आरम्भणाधिकरणम् ॥

(१) अत्राधिकरणे विष्णोर्जगत्कर्तृत्वे बहुयुक्तिविरोधः परिह्रियते । पूर्वपक्षसिद्धान्तादिप्रदर्शनाय सूत्रमेव आदौ पठति—तदिति ॥ स्वतन्त्रबहुसाधनेति । कर्तृव्यतिरिक्तस्वतन्त्रसत्ताशक्तिप्रवृत्तिमदधिष्ठानकरणादिरूपबहुसाधनसापेक्षेत्यर्थः । स्वातन्त्र्यं च कर्त्रनधीनत्वं 'सृष्टिः' घटादेः ।

स्वतन्त्रबहुसाधना सृष्टिर्लोके दृष्टा । नैवं ब्रह्मणः ।
स्वरूपसामर्थ्यादेव तस्य सृष्टिः ।

स्थित्यादेरप्युपलक्षकमेतत् । एवमित्युक्तेर्यथेति लभ्यते । नेत्यावर्तते । तथाच यतो लोके यथा घटादेः सृष्टिः स्वतन्त्रबहुसाधना दृष्टा, एवं ब्रह्मणः सकाशाज्जगत्सृष्टिरपि स्वव्यतिरिक्तबहुसाधना स्यात् । तथाऽनुमेया स्यात् । अत एव तद्युक्तिविरोधान्न ब्रह्मणो जगत्कर्तृत्वं युक्तमिति योजना । अनेन ब्रह्मणः न जगत्कर्तृत्वं युज्यते । कुतः ? महदादिसृष्ट्यादिकं प्रत्येकं कर्तृव्यतिरिक्तबहुसाधनसापेक्षं, सृष्टित्वात्, स्थितित्वात्, संहतित्वाद्घटादिसृष्ट्यादिवदिति बहुयुक्तिविरोधादिति सयुक्तिकः पूर्वपक्षः प्रदर्शितो भवति । ईश्वरसृष्टेः साधनसापेक्षत्वमात्रसाधने कर्तारं कर्तृत्वान्तर्गतं ज्ञानेच्छादिकं परतन्त्रसाधनमेकं साधनं चादाय सिद्धसाधनता स्यादिति कर्तृभिन्नेत्याद्युक्तम् । एवं यथा घटादिसृष्टिः केवलकुलालादेरशक्या तद्व्यतिरिक्तस्वतन्त्रमृत्पिण्डदण्डादिसाधनसापेक्षा, एवं ब्रह्मणो जगत्सृष्टिरपीति न कल्प्यमिति योजनायां सिद्धान्तप्रतिज्ञा च दर्शिता भवति । तर्हि कीदृशी तस्य सृष्टिरित्यतस्तदुत्तरत्वेन प्रवृत्तस्य तदनन्यत्वमित्यस्याभिप्रायमाह—स्वरूपेति । किन्त्वित्यादावुपस्कार्यम् । सामर्थ्यं प्रयत्नादि सामर्थ्यापरपर्यायप्रयत्नादिरूपमिति सुधोक्तेः । तथाच किंतु 'तस्य' ब्रह्मणः 'तस्य' जगतस्सृष्टिः 'स्वरूपसामर्थ्यात्' अनन्यप्रयत्नादेरेव भवतीत्यर्थः, न तु साधनान्तरसामर्थ्यसहकृतादित्येवकारार्थः । यद्वा—यद्यपि लोके घटादिसृष्टिः स्वतन्त्रबहुसाधना दृष्टा । तथापि 'नैवं ब्रह्मणः' न तद्दृष्टान्तेन ब्रह्मणो जगत्सृष्टिस्तथा कल्प्या । किन्तु स्वतन्त्रसाधनस्य तदनन्यत्वं, कोऽर्थः ? स्वरूपसामर्थ्यादेव तस्य सृष्टिरिति एकैव योजना । अस्मिन् पक्षे यद्यपितथाऽपीत्यनयोः किं त्वित्यस्य शेषः । स्ववाक्यगतस्य स्वतन्त्रसाधनेत्यस्य विपरिणतस्य सौत्रतदनन्यत्वमित्यनेनान्वयः । अनेन सूत्रे तदिति तन्त्रेणावर्तते । तथा च महदादिसृष्टौ यत्स्वतन्त्रकारणं तस्य 'तदनन्यत्वं' ब्रह्माभिन्नत्वमिति सौत्रप्रतिज्ञाभागस्यार्थ उक्तो भवति । चन्द्रिकायां तु—'सत्त्वाच्चावरस्य' इत्युत्तरसूत्रानुसारादत्र स्वतन्त्रसाधनस्येत्यध्याहार्यमित्युक्तम् ।

(२) किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथाऽऽसीत्, इति (ऋ. १०-८१-२.) ह्याक्षेपः ।

---

(२) कुत इत्यतस्तत्र हेतुत्वेनारम्भणेत्याद्यंशं व्याचष्टे—किं स्विदासीदिति ॥ इतिश्रुतौ 'हि' यतोऽधिष्ठानादेराक्षेपः क्रियते अत इत्यर्थः । अस्योक्तप्रतिज्ञया अन्वयः । आक्षेप इत्यनेन सूत्रे आरम्भणशब्दोऽधिष्ठानाद्युपलक्षकः, तेन च तदाक्षेपो लक्ष्यते । लक्षितलक्षणयैवार्थः प्रतिपाद्यत इति सुधोक्तेः । तस्य शब्दः किंशब्दः, तद्ग्रहणेन च तद्घटितं वाक्यं गृह्यते । 'प्रतीकतया किं स्विदासीदधिष्ठानमित्याद्याक्षेपवाक्यं गृह्यते' इति चन्द्रिकोक्तेरित्युक्तं भवति । तथा चाक्षेपस्य नास्त्यधिष्ठानादिकं किमपि, अतः स्वरूपसामर्थ्यादेव तस्य सृष्टिरिति विपर्ययपर्यवसाने सति वक्ष्यमाणपर्यालोचनयाऽर्थादीश्वरस्य जगत्सृष्टौ स्वतन्त्रसाधनान्तरानपेक्षा सिद्ध्यति । पूर्ववाद्युक्तानुमानं तु 'प्रावल्यमागमस्य' इति वचनात् श्रुतिविरोधादप्रमाणमेवेति भावः । श्रुतावधिष्ठानशब्दस्य प्राथम्येऽपि साधनेषु कारणस्य प्राधान्यात्तद्विवक्षया साधनमात्रपरस्यारम्भणशब्दस्य अधिष्ठानरूपसाधनपरत्वस्यापि सम्भवाद्वा सूत्रे करणवाचकारम्भणशब्दः प्रथमं प्रयुक्त इति ध्येयम् । श्रुतौ किंशब्दावाक्षेपे । स्विच्छब्दावाक्षेपाणां भिन्नविषयत्वद्योतकौ । 'यतो भूमिं जनयन् विश्वकर्मा विद्यामौर्णोन्महिना विश्वचक्षाः' (ऋ. १०-८१-२.) इति वाक्यशेषः । अत्र बभूवेत्यध्याहारः । तथा च 'विश्वकर्मा' जगत्कर्ता हरिः सृष्टिकाले 'यतो' येनाधिष्ठानादिना भूमिं द्यां च जनयन् विशेषेण बभूव । येन चाधिष्ठानादिना 'महिना' स्वमहिम्ना विश्वचक्षाः सर्वावयवैः सर्वेन्द्रियैर्वा दर्शनशक्तिमान् हरिः भूमिं द्यां च 'और्णोत्' प्रलये आवृणोत् । 'तदधिष्ठानं' अधिकरणं 'किं स्विदासीत्' किमासीत् न किमपि । आरभ्यते अनेनेत्यारम्भणं करणं वा 'कतमत्स्वित्' कतमदासीत् । 'कथा' कथंरूपमासीत्, न किञ्चिन्न कथमपीत्यर्थः । सत्तर्कदीपावल्यां तु—येन करणादिना भूमिं जनयन् विश्वकर्मा 'विश्वचक्षाः' विश्वद्रष्टा 'महिना' माहात्म्येन द्यां 'और्णोत्' निर्मितवान् तदधिष्ठानादिकं प्रलये 'किमासीत्' न किमपि, पार्थिवाप्यतैजसवायवीयानां वस्तूनां प्रलयेऽभावादिति श्रुत्यर्थ उक्तः ।

(३) अधिष्ठानाद्यनुक्तेः, आदिशब्दाद्युक्तिभिश्च ।

(४) परतन्त्रो ह्यपेक्षेत स्वतन्त्रः किमपेक्षते ।
साधनानां साधनत्वं यतः किं तस्य साधनैः ।
इत्यादिभिः ॥ १५ ॥

(५) सू—ॐ ॥ भावे चोपलब्धेः ॥ॐ॥ १६ ॥

---

(३) किं शब्दस्य प्रश्नाक्षेपयोः समत्वात्प्रश्नोऽयं किं न स्यादित्यत आह—अधिष्ठानाद्यनुक्तेरिति ॥ परिहारायेति नायं प्रश्न इति च शेषः । आदिपदेनारम्भणादिकं गृह्यते । तथा च परिहारायाधिष्ठानाद्यनुक्तेर्नायं प्रश्नः, किं त्वाक्षेप इति योजना । प्रश्नस्य तैत्तिरीये 'किं स्विद्भिषस्य भेषजम्' (तै. सं. ७-४-१८.) इति प्रश्नस्य 'अग्निर्भिषस्य भेषजम्' (तै. सं. ७-४-१८.) इति परिहारवदत्रापि परिहारो वक्तव्यः स्यादिति भावः । न केवलं पूर्वोद्युक्तमनुमानमागमविरुद्धं, अपि तु युक्तिभिश्चेति प्रतिपादयितुं प्रवृत्तस्यादिशब्दस्य तात्पर्यमाह—आदिशब्दादिति—गृहीताभिरिति शेषः । युक्तिभिरिति । अपरतन्त्रत्वात्स्वतन्त्रत्वात्साधनसत्तादत्वादिति व्यतिरेकहेतुभिरित्यर्थः । युक्तिभिश्चेत्यस्य स्वरूपसामर्थ्यादेव तस्य सृष्टिरिति शायत इत्यनेनान्वयः ।

(४) युक्तीनामाभासत्वशङ्कानिरासाय तासां स्मृतिसिद्धतामाह—परतन्त्र इति ॥ हिशब्दः प्रसिद्धौ । अपेक्षेत साधनादिकमिति शेषः । अनेनापरतन्त्रत्वयुक्तिः सूचिता । 'अपेक्षते किं' नापेक्षत इत्यर्थः । अनेन स्वतन्त्रत्वयुक्तिः सूचिता । कुतो नापेक्षत इत्यत आह—साधनानामिति । 'साधनत्वं' साधनशक्तिः यतो भवतीति शेषः । 'तस्य' विष्णोः 'साधनैः' अधिष्ठानादिभिः 'किं' कृत्यमित्यर्थः ॥ अनेन तृतीययुक्तिरुक्ता । इत्यादिभिरिति । आदीयन्ते उपादीयन्ते इत्यादयः । तथा च इतिश्रुतिज्ञापिताभिरित्यर्थः । यद्वा—युक्त्यन्तरसूचकस्मृत्यन्तरसङ्ग्राहक आदिशब्दः । इत्यादिभिरित्यस्य युक्तिभिरित्यनेनान्वयः ।

(५) युक्त्यन्तरेण स्वतन्त्रसाधनं प्रतिक्षिपत्सूत्रमुपन्यस्य व्याचष्टे—भावे चेति ॥ स्वतन्त्रेति । स्वतन्त्रसाधनान्तरसत्त्व इत्यर्थः । तदङ्गीकारोप-

स्वतन्त्रसाधनभावे प्रमाणैरुपलभ्येत ।

(६) अनुक्तं पञ्चभिर्वेदैर्न वस्त्वस्ति कुतश्चन ।
अतो वेदत्वमेतेषां यतस्ते सर्ववेदकाः ।
इति स्कान्दे ॥ १६ ॥

(७) 'अद्भ्यः सम्भूतः पृथिव्यै रसाच्च' (तै.आ. ३-१३)
इत्यादिना साधनान्तरप्रतीतेः कथमनुपलब्धिरित्यत आह—

लक्षकमेतत्। उपलब्धेः करणसापेक्षत्वात्तदाह—प्रमाणैरिति। वेदादिप्रमाणैरित्यर्थः। उपलभ्येत प्रतीयेत इति लिङ्प्रयोगेन सूत्रे प्रसङ्गादिति शेषः। उपलब्धेरिति षष्ठी, न परमत इव पञ्चमी। चशब्दः प्रसङ्गाच्चेत्यन्वितो बाधकतर्करूपयुक्त्यन्तरसमुच्चायक इति सूचितम्। तथा चास्य तर्कत्वान् न चोपलभ्यते तस्मान्नास्तीति विपर्ययपर्यवसाने सृष्टौ स्वतन्त्रसाधनान्तराभावः सिद्ध्यतीति भावः।

(६) ननु प्रमाणानुपलब्धमपि वस्तु किं न स्यादित्यत आह—अनुक्तमिति॥ इतिहासपुराणयोः पञ्चमवेदत्वं प्रसिद्धमिति पञ्चभिरित्युक्तम्। 'च न' अपि। तथा च पञ्चभिरपि वेदैरनुक्तमपि वस्तु नास्ति, कुतः प्रमाणमात्रासिद्धमस्तीति कैमुत्यपरतयेदं योज्यम्। अन्यथा प्रमाणानुपलब्धमपीति टीका प्रमाणैरिति भाष्यं च अनुपपन्नं स्यात्। 'कुतश्चन' किञ्चिदपीति वा। 'एतेषां' पञ्चानाम्। अत इत्युक्तं विवृणोति—यत इति। 'ते' पञ्च वेदाः 'सर्ववेदकाः' सर्ववस्तुप्रतिपादकाः। न च वेदानुक्तानां भगवद्गुणानां सत्त्वात् कथं तदनुक्तवस्तुमात्रनिषेध इति वाच्यम्। कुतश्चनेत्यस्य केनापि प्रकारेणेत्यर्थाश्रयणात् सामान्यतस्तेषामपि वेदोक्तत्वेन तदनुक्तत्वाभावात्। अत एव न 'सन्त्यश्रुताः' (सौपर्णश्रुतिः.) इति श्रुतिविरोधः। विशेषतोऽश्रुता इत्यर्थाश्रयणात्। स्कान्द इत्यनन्तरं उक्तवान्सूत्रकृदुक्तं युक्तमिति वाक्यशेषः। सूत्रयोजना तु—तस्य स्वतन्त्रसाधनान्तरस्य भावे वेदादिप्रमाणैरुपलब्धेः प्रसङ्गाच्च तदनन्यत्वमिति। न केवलमारम्भणशब्दादिभ्य इति चार्थः।

(७) ननु 'अद्भ्यः सम्भूतः' इति श्रुतौ 'प्रकृतिं स्वामवष्टभ्य विसृजामि युगेयुगे' इति गीतास्मृतौ च भगवदितरप्रकृत्यवादिस्वतन्त्रसाधनसत्त्व-

सू—ॐ ॥ सत्त्वाच्चावरस्य ॥ ॐ ॥ १७ ॥

अवरस्य तदधीनस्य साधनस्य सत्त्वात् ।

(८) ' काल आसीत्पुरुष आसीत्परम आसीत्तद्यदासीत्तदावृत-

प्रतीतेर्न तदनुपलब्धिरित्याशङ्क्य तत्परिहारत्वेन सूत्रमवतार्य व्याचष्टे—अद्भ्य इति ॥ आदिशब्देन 'अद्भ्यः सम्भूतो हिरण्यगर्भः' (महाना.१-११.) इति श्रुतिः। ' प्रकृतिं स्वाम् ' इति स्मृतिश्च गृह्यते। वाक्येनेति शेषः। साधनान्तरेति। भगवदितरस्वतन्त्रसाधनसत्वप्रतीतेरित्यर्थः। पारतन्त्र्यानुक्त्यैवात्रोक्तसाधनस्यापि स्वातन्त्र्यं सिद्ध्यतीति भावः। कथमित्याक्षेपे। ' अनुपलब्धिः ' उपलब्ध्यभावः। अवरस्येत्यनुवादेन तदधीनस्येति तात्पर्यार्थोक्तिः। आरम्भणस्येत्यनुवृत्तपदस्यार्थमाह—साधनस्येति। ' सत्त्वात् ' सत्त्वाभ्युपगमात्। अनेन सूत्रे वरस्य चासत्त्वात् अवरस्य च सत्त्वादिति च नञोरुभयत्रान्वयः। चोऽवधारणे। नञ्कर्मकथ। तथा च 'वरस्य' स्वतन्त्रस्यैव साधनस्यासत्त्वाभ्युपगमात् 'अवरस्य' अस्वतन्त्रस्य तु सत्त्वाभ्युपगमात् 'अद्भ्यः' इति वाक्यं तद्विषयं इति नोक्तस्य तद्विरोध इति सूत्रार्थ उक्तो भवति। ' अद्भ्यस्सम्भूतः पृथिव्यै रसाच्च। विश्वकर्मणस्समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे ' (तै. आ. ३-१३.) इति तैत्तिरीयश्रुतौ तृतीयार्थे पञ्चमीचतुर्थ्यौ। आङ्ग्वार्थे। तथा च यस्तत्पुरुषाख्यो हिरण्यगर्भो 'विश्वकर्मणो' विश्वकर्तुः हरेस्सकाशात् ' अद्भ्यः पृथिव्यै ' अवाद्युपलक्षितपञ्चमहाभूतैः ' रसात् ' तदुपलक्षिततन्मात्राभिश्च ' सम्भूतः ' उत्पन्नः सन् 'अधि' सर्वस्मादधिकत्वेन समवर्तत। 'तस्य' तत्पुरुषस्य 'अग्रे' तदुत्पत्तेः पूर्वमेव ' जानं ' जातं 'विश्वं' ब्रह्माण्डाख्यं ' रूपं ' चतुर्मुखविग्रहं ' त्वष्टा ' महादीप्तिर्भगवान् 'विदधत्' धारयन् 'एति' वर्तत इत्यर्थः। तत्त्वप्रदीपे तु—आपीयन्ते अनुभूयन्ते इत्यापः कर्माणि, पृथुत्वात्पृथिवी प्रकृतिः, रसो रक्तिरिति पदत्रयमन्यथा व्याख्यातम्। 'स्वां' स्वाधीनां प्रकृतिमवष्टभ्य ' अवलम्ब्य ' उपादानीकृत्य विविधं जगत्सृजामीति गीतायां भगवद्वचनस्यार्थः।

(८) नन्वस्यां श्रुतौ साधनमात्रं प्रतीयते, न तु तस्य भगवदधीनत्वम्। तच्च लोकानुसारात् स्वतन्त्रमेव किं न स्यादित्यतश्चशब्दसूचितां श्रुति-

मासीत्तदधीनमासीदथैक एव परम आसीद्यस्यैतदासीन्न ह्येतदासीत् ' इति हि कापायणश्रुतिः ॥ १७ ॥

(९) सू—ॐ ॥ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॥ ॐ ॥ १८ ॥

' नासदासीत् ' (ऋ. १०-१२९-१.) इति सर्वस्यासत्त्वव्यपदेशान्नेति चेत् ।

मुदाहरति—काल इति ॥ यत्तदोरावृत्तिः । तदिति व्यस्तं समस्तं च । तथा चास्य जगतोऽग्रे प्रलये कालः 'पुरुषो' जीवः 'परमः' परमात्माऽप्यासीत् । यद्यप्येवं तथापि 'यत्' यस्मात् 'तत्' तदा प्रलये यद्वस्त्वासीत् 'तत्' तेन भगवता 'आवृतम्' तदधीनमासीत् । अथ तस्मादेक एव परमः आसीदित्युच्यते । अस्वतन्त्रेऽभावशब्दः । प्रसिद्ध इति हिशब्दार्थः । कीदृशोऽसौ परमः इत्यतो जगत्कर्तेत्याह—यस्येति । ' यस्य ' एतस्य परमस्य सकाशात् 'एतत्' जगदासीदित्यर्थः । परमस्य सकाशाज्जगदुत्पत्तिः कुत इत्यत आह—न हीति । ' हि ' यस्मात् जगत् सृष्टेः पूर्वं नासीत्तस्मादित्यर्थः । प्रागभावेनोत्पत्तौ सिद्धायां सत्यां तदुत्पादकस्यान्यस्य अभावाद्धरिरेव जगत्कर्तेति सिद्ध्यतीति भावः । तत्त्वप्रदीपे तु—' स एकः परम एवासीत् ' यदधीनमेतदासीन्न स्वतन्त्रं न ह्येतदासीदिति वक्तुं शक्यते । परतन्त्रत्वादेव । अथ वा—अथेति विशेषद्योतकः । एको भगवानेव 'परमः' प्रधान आसीन्न ह्यन्यत्परममासीत्, किन्तु तदधीनमेवेत्यर्थ उक्तः । श्रुतिरित्यनन्तरं यत इति शेषः । अस्यातोऽवरस्येत्युक्तं युक्तमित्युपस्कृतेनान्वयः ।

(९) उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याक्षेपांशं तावद्व्याचष्टे-असदिति ॥ इतीत्यनन्तरं श्रुताविति शेषः । 'सर्वस्य ' साधनान्तरस्येति सूत्रे शेषोक्तिः । 'असत्त्वव्यपदेशात् ' असत्त्वस्योक्तत्वादिति । अनेन सूत्रेऽसदिति भावनिर्देश इति सूचितम् । नेति । 'सत्त्वाच्चावरस्य ' इत्यनेनोक्तं साधनान्तरस्य सत्त्वं तस्येश्वराधीनत्वं च नेत्यर्थः ।

(१०) न, अव्यक्तत्वपारतन्त्र्यादिधर्मान्तरेण हि तदुच्यते ।

'नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योम परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥
न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास' ॥

(ऋ. १०·१२९-२.)

इति ऋङ्मन्त्रस्यायमर्थः—'तदानीं' प्रलये 'असत्' वाय्वन्तरिक्षरूपं भूतं नासीत् । 'सत्' पृथिव्यप्तेजोरूपं भूतं नो आसीत् । कार्यं सर्वात्मना नासीत् । कारणं चेष्टमानं नासीदिति वा । एवं तदा 'रजः' तदुपलक्षितं गुणत्रयं नो आसीत् । यच्च 'परः' परं सर्वगतं व्योम जडप्रकृतिस्तदपि मूर्तसम्बन्धाभावान्नो आसीत् । 'परं व्योम' अव्याकृताकाशमित्यन्यत्र व्याख्यानेऽपीह साधनसत्त्वाक्षेपप्रकरणादेवं व्याख्यातम् । एवं 'मृत्युः' मरणं तत्साधनं वा नासीत् । 'अमृतं' गौणमोक्षः स्वर्गादिर्नासीत् । प्रलये अह्नो रात्र्याश्च 'प्रकेतः' सामर्थ्यं नासीत् । तथा च किमित्यत आह—किमिति । एतेषां अभावात् 'कुह' कुत्र कस्य 'शर्मन्' शर्मणि । तादर्थ्ये सप्तमी । सुखार्थं 'किमावरीवः' किमवर्तत, न किमपि । यद्वा—किमावृणोत्, न किमपि । आद्यपक्षे वृतु वर्तन इत्यस्येदं रूपं, द्वितीये वृणोतेः यङ्लुकि रूपम् । नन्वस्तु—जडरूपाणामेतेषां अभावः, तथाऽपि चेनतरूपं किञ्चिदासीत्किमित्यतो नेत्याह—अम्भ इति । यत् 'गहनं' अतिगम्भीरं चेतनप्रकृतिरूपं 'अम्भो' जलं तदप्यासीत्किं, नैवासीत् । तर्हि किमासीदित्यत आह—आनीदिति । 'तर्हि' तदा 'तत्' ब्रह्मैकमेव 'अवातं' वायुप्रेरणारहितं यथा भवति तथा 'स्वधया' स्वसामर्थ्येनैव 'आनीत्' अचेष्टत । कालादिकं प्रेरयति स्मेति न्यायदीपिकायामुक्तम् । 'तस्मात्' परब्रह्मणः 'अन्यत्' परः परमुत्तमं वस्तु 'किञ्चन' स्वातन्त्र्यादि-धर्मोपेतमिति यावत् । 'नास' न बभूव । अपि तु तदेवोद्रिक्तमास । ह प्रसिद्धमिति । तत्त्वोद्योतटीकायां तु—'स्वधया' सुखेनैव । न तु सुख-प्राप्त्याद्यर्थमिति व्याख्यातम् ।

(१०) परिहारांशं व्याचष्टे—नेति ॥ नात्र स्वरूपासत्वाभिप्रायेण साधनानामसत्त्वोक्तिरित्यर्थः । कुत इत्यतस्तत्र धर्मान्तरेणेत्यंशमावृत्त्या

(११) 'तम आसीत्' (ऋ. १०-१२९-३.) इत्यादिवाक्यशेषात् ।

असद्व्यपदेशादित्यनेनान्वितं हेतुत्वेन योजयति—अव्यक्तत्वेति । अवरत्वावृतत्वकार्यानभिमुखत्वादिकमादिपदार्थः । अन्यो धर्मो धर्मान्तरम् । तथाच स्वरूपासत्त्वादन्येन धर्मजातेन तदपेक्षयेत्यर्थः । यद्वा—अन्तरशब्दो विशेषपरः । तथाच धर्मविशेषाभिप्रायेणेत्यर्थः । 'हि' यतः 'तत्' असत्त्वं उच्यते श्रुतावतो नेति सम्बन्धः ।

(११) ननु धर्मान्तरेणासत्त्वोक्तिः कुतः ? स्वरूपासत्त्वाभिप्रायेणैव असत्त्वोक्तिः किं न स्यादित्यतस्तत्रोत्तरत्वेन वाक्यशेषादित्यंशं योजयति—तम आसीदिति । आदिशब्देन परशब्दघटितानीदृशानीति वाक्यशेषो गृह्यते । तथाच 'नासदासीत्' इति निषेधवचनस्य साधनस्वरूपासत्त्वाभिप्रायकत्वे 'तम आसीत्' इति वाक्यशेषविरोधस्तावदेकः, 'तस्माद्धान्यत्' इति वाक्यशेषे परशब्देन प्रलये सतोऽपि ब्रह्मान्यस्य प्रकृत्यादेः स्वातन्त्र्यनिषेधान्यथानुपपत्तिश्चापरो दोषःस्यादिति तस्य 'सविशेषणे हि' इति न्यायेन व्यक्तत्वस्वातन्त्र्यादिरूपधर्मान्तरनिषेधपरत्वमेवाङ्गीकार्यम् । अव्यक्तादावसत्त्वव्यपदेशस्य लोके पिशाचादौ दृष्टत्वात् न तु स्वरूपसत्त्वनिषेधपरत्वमिति न तद्बलात्प्रलये साधनान्तरस्याभावस्तन्निमित्तं तस्येश्वराधीनत्वाभावश्च वाच्य इति भावः । 'तम आसीत् तमसा गूळ्हमग्रे प्रकेतं सलिलं सर्वमा इदं' (ऋ. १०-१२९-३.) इति ऋङ्मन्त्रे भूत्वेति शेषः । आ इति पदच्छेदः, अस्तेर्लङि रूपमिदम् । तथाच 'अग्रे' प्रलये 'यत्तमः' चित्प्रकृत्याख्यमपरतत्त्वं, अपरं तमः प्रकृतिरिति न्यायदीपिकोक्तेः, 'जीवानां ग्लपनाद्दुर्गा तम इत्येव कीर्त्यते' इति गीतातात्पर्ये दुर्गाख्यायां चित्प्रकृतौ तमःशब्दस्य निरुक्तत्वाच्च, सर्वाधिकत्वेन तमो हि दुर्गेत्यन्यत्रोक्तेश्च । 'अप्रकेतं' अपरिमितं अत एव अस्मिन् सर्वस्मिन् देशे अविज्ञातं सलिलं भूत्वा आसीत् । तेन 'तमसा' सलिलेन 'इदं' जगत् गूळ्हं 'गूढं' गूहितमासीदिति श्रुत्यर्थः । भावबोधे तु—टीकायामपरिमितमित्येतत् आङोऽर्थकथनं, अप्रकेतं प्रभावरहितमिति व्याख्यातम् । तन्मूलं चिन्त्यम् । प्रलये जडचेतनप्रकृतिभावमभिधाय अगाधत्वेनाप्रकेतेऽविज्ञाते सलिले इति व्यासतीर्थीयविरोधश्च ।

(१२) न चान्यत्र प्रमाणमस्ति ।

(१३) अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ।
(महाना. १०-५.)

(१४) अनाद्यनन्तं जगदेतदीदृक्प्रवर्तते नात्र विचार्यमस्ति ।

---

(१२) अथ परकृतापव्याख्यां निराचष्टे—न चेति ॥ अस्मिन्नधिकरणे चेतनाचेतनप्रपञ्चस्य परमार्थतो ब्रह्मानन्यत्वमुच्यते । कुतो ? वाचारम्भणमित्यादिश्रुतेरिति यत् परेषां व्याख्यानम् । तन्न युक्तम् । कुतः ? यतः 'अन्यत्र' चेतनाचेतनप्रपञ्चस्य ब्रह्मानन्यत्वे प्रमाणं नास्त्यत इति नञावृत्त्या योजना । न केवलं प्रमाणाभावोऽन्यत्र, किन्तु प्रमाणविरोधश्चेत्याशयेन चशब्दः प्रायोजि ।

(१३) तदुपपादनाय विरोधिप्रमाणान्याह—अजो हीति ॥ श्रुतिस्मृतिभ्य इत्यनन्तरं ब्रह्मान्यत्वाद्यवगमादिति वाक्यशेषः । 'अजो हि' इति नारायणानुवाके श्रुतम् । 'अजामेकां लोहितशुक्लकृष्णां वह्वीं प्रजां जनयन्तीं सरूपाम्' (महाना. ९-२.) इति पूर्वार्धे श्रुतां 'लोहितशुक्लकृष्णां' रजःसत्त्वतमोगुणात्मिकां 'वह्वीः प्रजाः सृजमानां सरूपाः' इति सुधागृहीतवाक्यान्तरे बहुवचनश्रवणात् सरूपां स्वसदृशानि वह्वीं प्रजां महदादिबहुकार्याणि जनयन्तीमेकां न जायत इत्यजां प्रकृतिं एको न जायत इति 'अजः' संसारिजीवो 'जुषमाणः' सेवमानः 'अनुशेते' अनुवर्तते । 'अन्यः' कश्चिन्मुच्यमानोऽस्यां प्रकृतौ भोगान् भुक्त्वा अथ भुक्तो भोगो यस्यां सा तां 'भुक्तभोगां' एनां प्रकृतिं 'जहाति' प्रलये परित्यजतीत्यर्थः । अत्र मुक्तामुक्तयोर्भेदोक्त्या परमात्मनोऽपि संसारिभ्यो भेदोऽभिहितः, अद्वैतिमते मुक्तपरमात्मनोरभेदात् अस्मन्मतेऽपि 'एनां जहाति' इत्यनेन परमात्मनोऽप्युक्तत्वात् । न च तस्य प्रकृतिभोगत्यागयोरयोग इति वाच्यम् । 'ऋतं पिबन्तौ' (कठ. १-३-१.) 'श्रोत्रं चक्षुः स्पर्शनं च' इत्याद्युक्तरीत्या प्रकृतिभोगस्य क्रियाप्रबन्धे लटं स्वीकृत्य सर्वदा प्रकृत्यधद्धत्वरूपप्रकृतित्यागस्य च वक्तुं शक्यत्वात् ।

(१४) एवं परोक्ते चेतनस्य ब्रह्मानन्यत्वे विरोधिप्रमाणमभिधाय इदानीमचेतनप्रपञ्चस्यापि पराभिसंहिते बाध्यत्वरूपब्रह्मानन्यत्वे तदाह—

न चान्यथा क्वापि च कस्य चेदमभूत्पुरा नापि तथाभविष्यत् ॥

(१५) असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । (गी. १६-८.)

अनादीति ॥ स्मृतिवाक्यमेतत् । 'अनाद्यनन्तं' प्रवाहत उत्पत्तिनाशशून्यं 'ईदृक्' नानाविधं व्रीह्यादिवत् प्रवाहरूपेण वर्तमानं जगत्प्रवर्तने प्रतिकल्पमिति शेषः । 'अत्र' अनादित्वानन्तत्वेदृक्त्यरूपार्थेषु विचार्यं निर्णेतव्यं न किमप्यस्ति । सर्वं निर्णीतमेवेति भावः । विचार्यं संशेतव्यमिति वा । ननु रज्जौ सर्पवद्विश्वस्यापि क्वचित्कस्यचिद्बाधोऽस्ति किमित्यतो नेत्याह—न चेति । 'इदं' विश्वं 'क्वापि' देशे काले च 'कस्यापि' पुरुषस्य 'अन्यथा' बाधितं 'पुरा' पूर्वं नाभूत्, उत्तरत्रापि 'तथा' बाध्यं नाभविष्यदित्यर्थः । भविष्यच्च नेति सुबन्तपदं वा ।

(१५) विश्वमिथ्यात्वमतमासुरत्वादयुक्तमिति गीतास्मृत्या दर्शयति—असत्यमिति ॥

अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ।
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ॥
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ इति वाक्यशेषः ॥
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ॥

इति पूर्ववाक्ये प्रकृता आसुराः जगत् असत्यत्वादप्रतिष्ठं ज्ञानबाध्यं तत एवानीश्वरमित्याहुः । ननु यतो यतो जातमसावसावीश्वरोऽस्तु इत्यत उक्तं—अपरस्परसम्भूतमिति । परमेश्वराधिष्ठितायाः प्रकृतेः महान्, महतोऽहंकार इत्यादिक्रमेण परस्परसम्भूतं न भवतीत्यर्थः । ननु सत्यं न चेत् किमसत्? एवं परस्परसम्भूतं न चेत् किं नित्यम्? स्वतो वा जातम्? आद्यस्योत्तरं—अन्यदिति । सदसद्भ्यामिति शेषः । द्वितीयस्योत्तरं—कामहैतुकमिति । काम इति तत्कारणमविद्या मिथ्याज्ञानं चोपलक्ष्यते । तथा चाविद्यादिकल्पितमित्यर्थः । 'एतां दृष्टिं' बुद्धिमवष्टभ्य 'नष्टात्मानो' दुष्टचित्ताः, अतएव 'अल्पबुद्धयः' अल्पज्ञानाः 'जगतोऽहिताः' विरोधिनोऽहितकरा वा । जगतः 'क्षयाय' अनिष्टप्राप्तये विनाशाय वा 'उग्रकर्माणः' क्रूरकर्माणस्सन्तः 'प्रभवन्ति' कलियुगादावुत्पद्यन्त इत्यर्थः । अत्र जगदसत्यतावादिनामासुरत्वाद्युक्त्या तत्सत्यताऽवगम्यत

(१६) असत्यमाहुर्जगदेतदज्ञाः शक्तिं हरेर्ये न विदुः परां हि ।
यस्मात्स्वरूपं जगदेतदीदृक्सृष्ट्वा त्वभूत्सत्यकर्मा महात्मा ।

(१७) अथैनमाहुस्सत्यकर्मेति सत्यं ह्येवेदं विश्वममौ सृजते ।
अथैनमाहुर्नित्यकर्मेति नित्यं ह्येवासौ कुरुते ।

(१८) 'यच्चिकेत सत्यमित्तन्न मोघम्' (ऋ. १०-५५-६.)
इत्यादिश्रुतिस्मृतिभ्यः ।

इति प्रकृतसङ्गतिः । गीताभाष्ये तु—न केवलं जगतो मिथ्यात्वादि वदतामासुरत्वं 'असत्यमप्रतिष्ठन्ते' इत्यनेनोच्यते, किन्तु जगज्जन्मादिकारणं विष्णुं ये न मन्यन्ते तेषां सर्वेषामपीति भावेन न विद्यते सत्यमस्येत्यसत्यं विष्ण्वाख्योत्पादकरहितं, एवं न विद्यते प्रतिष्ठा प्रतिष्ठापक ईश्वरश्च विष्णुर्यस्य तदप्रतिष्ठमनीश्वरमिति चोक्तम् । 'अन्नाद्भवन्ति भूतानि' इत्यादिक्रमेण परस्परसम्भूतं न भवतीत्यपरस्परसम्भूतमेतादृशं जगद्ये आहुः, ते आसुरा इति व्याख्यातम् ।

(१६) विश्वमिथ्यात्वमतस्यासुरत्वं युक्तं, विष्णुमाहात्म्यविरुद्धत्वादित्येतदुच्यते - असत्यमाहुरिति ॥ स्मृतिवाक्यमिदम् । ये एतज्जगदसत्यमाहुस्तेऽज्ञाः । कुतो ? 'हि' यतो हरेः 'परां' सर्वोत्कृष्टां शक्तिं 'न विदुः' न जानन्त्यतः । तामेव शक्तिं दर्शयति यस्मात्स्वरूपमिति । तुशब्दोऽवधारणे । तथा च यो महात्मा सत्यरूपमेवेदं नानाविधमेतज्जगत्सृष्ट्वा सत्यकर्मनामाऽभूत् तस्य हरेरिति सम्बन्धः । विषयसत्यतामन्तरेण सृष्ट्यादिक्रियायाः सत्यत्वानुपपत्त्या सत्यकर्मसंज्ञकत्वानुपपत्तेरित्यभिप्रायः । अनेनापि जगतः सत्यत्वं सिद्ध्यतीति प्रकृतसङ्गतिः ।

(१७) अथेति च श्रुतिः ॥ 'अथ' तस्मात् 'एनं' विष्णुं, तत्र हेतुः—सत्यं हीति । 'हि' यस्मात् 'इदं' प्रमितं 'असौ' हरिः, अत्राप्युक्त एवाभिप्रायः । अथैनमाहुर्नित्यकर्मेत्यपि श्रुतिवाक्यम् । 'नित्यकर्मा' अबाधितकर्मा नित्यमवाध्यम् ।

(१८) पुनरपि विश्वसत्यत्वं श्रुत्या दृढीकरोति—यदिति ॥ उतशब्दोऽप्यर्थे । तथाच 'स्पार्हं' स्पृहणीयं हविरादिकं वसु भक्तेभ्यो 'जेता' प्राप्ता, तथाऽपि तेभ्यः स्पार्हं वसु यज्ञादिफलं दाताऽपि परमेश्वरः

(१९) परस्परविरोधेतु वाक्यानां यत्र युक्तता ।
तथैवार्थः परिज्ञेयो नावाक्या युक्तिरिष्यते ॥
इति बृहत्संहितायाम् ॥

इन्द्रादिनामा 'यत्' विश्वं 'चिकेत' चकार। कित करणे। तत् 'सत्यमित्' सत्यमेव, न मिथ्या। कुतो? यतः तत् 'न मोघं अर्थक्रियाद्यनुपयुक्तं न भवतीत्यर्थः। यद्वा—'स्पार्हं' स्पृहणीयं 'वसु' स्वर्गभूम्यादिकं यज्ञादिभ्यो जेता इन्द्रादिभ्यो दाताऽपीत्यर्थः। आदिपदेन

'कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यस्समाभ्यः' (ईशा. ८.)।

इतीशावास्यवाक्यम्,

विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वाम्।
प्रयान्वस्य महतो महानि सत्यासत्यस्य करणानि वोचम् ॥
(ऋ. २-२४-१२.)

इति ऋग्वेदवाक्यं च गृह्यते, अन्यानि च। 'कविः' सर्वज्ञः 'मनीषी' ब्रह्मादिसर्वमनसामीशिता प्रेरकः णिनिप्रत्ययान्तोऽयं शब्दः। परिभवति सर्वानिति 'परिभूः' सर्वोत्तमः परमनपेक्ष्य स्वयमेव भवतीति 'स्वयम्भूः' अनन्याश्रयः स्वतन्त्रः परमेश्वरः 'अर्थान्' महदादीन् 'शाश्वतीभ्यः समाभ्यः' सप्तम्यर्थे पञ्चमी सर्वेष्वपि कालेषु 'याथातथ्यतः' तथाभावमनतिक्रान्तं यथातथं तस्य भावो याथातथ्यं ततो याथातथ्येनैव अबाधितत्वेव सत्यानेव 'व्यदधात्' निर्मितवानित्यर्थः। निर्माणशक्तिप्रदर्शनाय कविरित्यादि। हे मघवानौ यशस्विनौ धनवन्तौ चेन्द्रावृहस्पती 'युवोः' युवयोरधीनं विश्वं 'सत्यमित्' सत्यमेव। कुतः? 'वां' युवयोः सत्यजगत्सर्जनादिरूपं 'व्रतं' कर्म 'आपश्चन' सर्वदेवता आपि 'प्रमिनन्ति' जानन्ति यतः, न केवलमहमेव प्रतिपन्न इति मन्त्रद्रष्टा द्विरूपमिन्द्रबृहस्पतिशब्दवाच्यं परमेश्वरं प्रत्याह।

(१९) ननु न जीवो ब्रह्मणो भिद्यते चेतनत्वात्, ब्रह्मवत्, प्रपञ्चो वा बाध्यो दृश्यत्वाच्छुक्तिरजतवदित्यादियुक्तिसद्भावात्कथमन्यत्र प्रमाणाभाव इत्यत आह—परस्परेति॥ तुरेवार्थोऽप्यर्थः। तथाच वाक्यानां

(२०) विरुद्धवत्प्रतीयन्ते आगमा यत्र वै मिथः ।
तत्र दृष्टानुसारेण तेषामर्थोऽन्ववेक्ष्यते ॥ इति च ।

(२१) ईशोऽनीशो जगन्मिथ्या न पूज्यो गुरुरित्यपि ।

परस्परं विरोधे सत्येव 'यत्र' यस्मिन्नर्थे 'तथैव युक्तता' एकवाक्यानुसारेणैव युक्तिसिद्धताऽस्ति सोऽर्थो विज्ञेयस्स्यात् । एतावता 'अवाक्या' श्रुतिस्मृत्यानुकूल्यहीना केवला युक्तिरपि न प्रमाणं 'इष्यते' अङ्गीक्रियते प्रामाणिकैः । शुष्कयुक्तिसिद्धार्थोऽपि न विज्ञेय इत्यर्थः । बृहत्संहितायामित्यनन्तरं न केवलयुक्तिः प्रमाणमित्युक्तमिति शेषः ।

(२०) ननु यथोदाहृतश्रुत्यादिकं सत्यते प्रमाणं, तथा चेतनप्रपञ्चस्य मिथ्यात्वरूप ब्रह्मानन्यत्वेऽपि 'वाचारम्भणं' इत्यादिश्रुतिस्मृतयः प्रमाणं सन्त्वित्यत आह—विरुद्धवदिति ॥ पारमार्थिकविरोधे त्याज्यत्वमेव स्यात्, न तु व्याख्येयत्वमित्यतो विरुद्धवदित्युक्तम् । यदि तर्हीत्यर्थे यत्र तत्रेति निपातौ । वैशब्दः प्रसिद्धौ । दृष्टं प्रत्यक्षं अतिबलबहुप्रमाणदर्शनं वा । तथाच ये मिथ्यात्वसत्यत्वादिरूपार्थद्वयबोधका आगमा यदि 'मिथः' परस्परं विरुद्धवत्प्रतीयन्ते । तर्हि दृष्टानुसारेण तेषामापाततः प्रतीतादन्योऽर्थः 'अन्ववेक्ष्यते' मुख्यवृत्त्याऽवगम्यत इत्यर्थः । इति चेति । ब्रह्मतर्के उक्तमिति शेषः । चः पूर्वप्रमाणसमुच्चये । तथाच प्रकृते साक्षिप्रत्यक्षानुसारेण अनन्यत्वश्रुत्यादीनामन्यथा व्याख्येयत्वान्न तेऽन्यत्र प्रमाणमिति भावः ।

(२१) स्मर्यते च प्रपञ्चमिथ्यात्वबादिश्रुत्यादेरन्यार्थवर्णनं इति भावेनाह—ईश इति ॥ इतिशब्दः प्रत्येकमभिसम्बध्यते । एवमपिशब्दोऽपि । अत एव द्विर्ग्रहणमिति तत्त्वोद्योतटीकोक्तिः । इत्यादिवदितिवतिः । इत्याद्यर्थसाधकवचनयुक्तिवदित्यर्थः । अत्रेशोऽप्यनीश इत्येकं मतं, जगन्मिथ्येत्यपरं, गुरुरपूज्य इत्यन्यत् । आदिशब्देनैकः चेतनः परब्रह्मभावो मोक्ष इत्यादिमतं गृह्यते । तथा चेशोऽप्यनीश इत्यादिवचनवत् 'प्रमाणानि' तथा प्रतीतानि वचनानि यतो बहुभिर्वैदिकैः प्रमाणैर्विरुद्धान्यत आभासाः आभासानीति 'वैदिकैः' वेदार्थज्ञैर्ज्ञेयानीत्यर्थः । अथेति समुच्चये । एवमादयो युक्तयोऽपि यस्माद्वैदिकैर्बहुभिः प्रमाणैः विरुद्धास्तस्मादाभासा इति

इत्यादिवद्विरुद्धानि वचनान्यथ युक्तयः ।
प्रमाणैर्बहुभिर्ज्ञेया आभासा इति वैदिकैः ॥

(२२) वेदवेदानुसारेषु विरोधेऽन्यार्थकल्पना ।
अन्येषां तु विरुद्धानां विप्रलम्भोऽथवा भ्रमः ॥
इति च भागवततन्त्रे ।

(२३) शास्त्रार्थयुक्तोऽनुभवः प्रमाणं तूत्तमं मतम् ।

ज्ञेया इत्यर्थः । वचनापेक्षया विरोधिप्रमाणानां प्राबल्यसमर्थनाय बहुभिरित्युक्तम् । निरवकाशत्वादेरप्युपलक्षकमेतत् । अवैदिकवचनापेक्षया युक्त्यपेक्षया च प्राबल्यसूचनाय बहुभिरिति वैदिकैरिति चोक्तम् ।

(२२) यथा प्रमाणविरुद्धानां दृश्यत्वादियुक्तीनामविषयवृत्तित्वेन व्याप्तिशून्यत्वेन च आभासत्वात् सर्वथा हेयत्वम् किं तथा वचनानामपीत्यपेक्षायामाभासत्वमेव विभज्याह—वेदेति ॥ वेदमनुसरन्तीति वेदानुसाराणि, वेदश्च वेदानुसाराणि च वेदवेदानुसाराणीति विग्रहः । वचनेषु कार्यैवेति च शेषः । तुशब्दः पूर्वविशेषार्थः । प्रयोजनमित्यध्याहारः । अथवेति निपातसमुदायः । तथा च वेदवेदानुसारेषु वचनेषु 'विरोधे' प्रबलप्रमाणविरोधे सति तेषां विरुद्धमर्थं परित्यज्यान्यार्थकल्पना 'अविरुद्धार्थकल्पना' कार्यैवेत्यर्थः । आभासत्वं तु विरुद्धार्थ एवेति भावः । 'अन्येषां' वेदवेदानुसारेभ्यः इतरेषां तु प्रमाणविरुद्धानां वचनानां विप्रलम्भः वञ्चनं प्रयोजनम् अथ वा भ्रमः कारणं कल्प्यमित्यर्थः । विप्रलम्भः प्रयोजनमथ वा भ्रमः कारणं कल्प्यमिति तत्त्वप्रदीपोक्तिः । तत्त्वद्योतटीकायामिवेह टीकायां च 'इतराणि विरुद्धानि प्रलम्भभ्रमजान्यपि' इति व्यासस्मृतिवाक्यानुसारेण विप्रलम्भभ्रमयोरुभयोः कारणत्वोक्तिः एकस्य प्रयोजनाभिप्राया । न तु सर्वथा तानि प्रमाणानीति ज्ञातव्यानीति भावः । अनेन विप्रलम्भादिमूलत्वे विरोधः कारणमित्युक्तं भवति । यद्यपि न प्रमाणानीत्येव वक्तव्यं, न तु विप्रलम्भादिमूलानीति । तथाऽप्यप्रामाण्यकारणदोषोपन्यासाय तथोक्तमिति ज्ञेयम् । इति भागवततन्त्रे आभासत्वं विभज्योक्तमिति शेषः ।

(२३) ननु प्रमाणत्वाविशेषात् कुतो न युक्तेरसाधकत्वमित्यत आह—

मध्यमं त्वागमो ज्ञेयः प्रत्यक्षमधमं स्मृतम् ॥

(२४) प्रत्यक्षयोरागमयोर्विरोधे निश्चयाय तु ।
अनुमाद्या न स्वतन्त्राः प्रमाणपदवीं ययुः ॥
इति पुरुषोत्तमतन्त्रे ॥ १८ ॥

(२५) सू—ॐ ॥ युक्तेः शब्दान्तराच्च ॥ ॐ ॥ १९ ॥

शास्त्रेति ॥ आद्यस्तुरवधारणे । द्वितीयो विशेषे । तृतीयः पूर्ववत् । तथाच 'शास्त्रार्थयुक्तः' शास्त्रार्थविषयतया शास्त्रानुकूलः 'अनुभवो' यथार्थज्ञानरूपं केवलमेवोत्तमं प्रमाणं 'मतं' प्रमितमित्यर्थः । साक्षात् ज्ञेयविषयीकारित्वादिति भावः । मध्यमं प्रमाणं त्वागमः, केवलप्रमाणसाधनत्वेन ततोऽस्यावरत्वात् । दृष्टादृष्टसर्वविषयकत्वेन दृष्टमात्रविषयकप्रत्यक्षात्पूर्वभावित्वाच्च मध्यमत्वमिति भावः । अधमप्रमाणं त्वसर्वविषयत्वात्प्रत्यक्षरूपानुप्रमाणं स्मृतमित्यर्थः ।

(२४) ततः किमित्यतो 'नावाक्या युक्तिरिष्यते' इत्युक्तं प्रपञ्चयति—प्रत्यक्षयोरिति ॥ अपेक्ष्यन्ते इति शेषः । आद्यशब्देनानुमानविशेषार्थापत्त्यादिकं गृह्यते । तथा चानुप्रमाणरूपानुमाद्यास्तु यतः प्रत्यक्षयोरागमयोर्विरोधे सति तत्रैकार्थनिश्चयाय सहायत्वेनापेक्ष्यन्ते अतः 'स्वतन्त्राः' केवलाः 'प्रमाणपदवीं' प्रमाणभावं न ययुरतः सर्वावरा इत्यध्याहारेण योजना । अतो न केवलाया दृश्यत्वादियुक्तेरसाधकत्वमिति भावः । पुरुषोत्तमतन्त्र इत्यनन्तरं केवलयुक्तेरसाधकत्वं उक्तमिति शेषः । अतो न चान्यत्र प्रमाणमस्तीत्युक्तं युक्तमिति भावः ।

(२५) ननु साधनान्तरमभ्युपगम्य तस्येश्वराधीनत्वकथनापेक्षया साधनाभावकथनमेव वरं, साधनादिशून्यस्य सृष्ट्यादिकर्तृत्वाभ्युपगमे महिमाधिक्यलाभादित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति—युक्तेरिति ॥ अत्र नेत्यस्यानुवृत्त्या न महिमाधिक्यलाभाय भगवतः साधनान्तरविधुरत्वमुररीकर्तव्यमिति साध्यलाभात् तत्रोपपत्तित्वेन युक्तेरिति या घटनालक्षणा साधनान्तरेण सृष्टेरपि महिमाविरोधितोक्ता तस्यासिद्धिपरिहारायागमसिद्धतामाह—साधनानामिति । 'साधनत्वं' कार्यजननसामर्थ्यं

साधनानां साधनत्वं यदाऽऽत्माधीनमिष्यते ।
तदा साधनसम्पत्तिरैश्वर्यद्योतिका भवेत् ॥
इत्यादेस्साधनान्तरेण सृष्टिर्युक्ता । 'अद्भ्यस्सम्भूतो हिरण्यगर्भ इत्यष्टौ' (महाना. १-१२.) इत्यादिशब्दान्तराच्च ॥ १९ ॥

(२६) सू—ॐ ॥ पटवच्च ॥ ॐ ॥ २० ॥

यदाऽऽत्माधीनं स्वाधीनं 'इष्यते' अङ्गीक्रियते तदा 'साधनसम्पत्तिः' ईशितव्यसिद्धये साधनसम्पादनं आत्मनः 'ऐश्वर्यद्योतिका' तज्ज्ञापिका तदविरोधिनीत्यर्थः । इत्यादिराख्यात्साधनान्तरेण सृष्टिरपीश्वरस्य 'युक्ता' महिमाविरोधिनीत्यर्थः । इति ज्ञायत इति शेषः । आदिशब्देनैवञ्जातीयकानि वचनानि ग्राह्याणि । लोकप्रसिद्धेरपि ग्राहकमेतत् । इत्यादीति लुप्तविभक्तिकं शक्तोऽपि इति विलक्षणशब्दादिति सुधायामुक्तिः । यद्वा—अन्यशब्दः शब्दान्तरं 'अद्भ्यः सम्भूतः पृथिव्यै' (तै. आ. ३-१३.) इति प्रागुदाहृतश्रुत्यपेक्षया अस्या अन्यत्वात् । अत एव सूत्रे भाष्ये च प्राचीनश्रुतिसङ्ग्रहार्थं शब्दान्तरशब्दः । न केवलं युक्तेर्युक्तत्वेनागमसिद्धत्वात्, किन्तु अद्भ्यस्सम्भूतो हिरण्यगर्भः' इत्यादिशब्दान्तरादपीति चशब्दार्थः । शब्दान्तरबोध्यश्रुत्योः समुच्चय एव चशब्दः । आदिशब्देनैवंजातीयकवाक्यं गृह्यते । नारायणानुवाके श्रुतमिदं—हिरण्यगर्भः 'अद्भ्यः' अद्भिः अवाग्युपलक्षितपञ्चमहाभूतैः 'सम्भूतः' उत्पन्नः 'इति' एवं 'अष्टौ' इन्द्रादिलोकपालाश्च सम्भूता इति तत्त्वप्रदीपदिशा श्रुत्यर्थः । तैत्तिरीये 'अष्टौ पुत्रासोऽदितेः' (तै.आ. १-१३.) इत्युक्त्वा 'मित्रश्च वरुणश्च धाता चार्यमा चांशुश्च भगश्चेन्द्रश्च विवस्वांश्च' (तै. आ. १-१३.) इति ये अष्टावन्ये गृहीतास्ते वाऽत्र ग्राह्याः । अनेन— न विष्णोर्महिमाधिक्यलाभाय प्रलये अवरसाधनासत्त्वमुपेयम्, किन्तु तत्सत्त्वमेव । कुतः ? साधनासत्त्वमन्तरा लीलया दण्डमवष्टभ्य गमनवत्साधनान्तरेण सृष्टेरपि युक्तेर्युक्तत्वाद्भगवन्महिमाविरोधित्वेनागमसिद्धत्वात् 'अद्भ्यः' इत्यादिशब्दात् शब्दान्तराच्च तत्सत्त्वपक्षाग्रह इति सूत्रार्थ उक्तो भवति ।

(२६) न केवलं श्रुतिसिद्धत्वात्, किन्तु साधनसत्त्वस्य युक्तिसिद्ध-

साधनान्तरेण हि पटादिसृष्टिर्दृष्टा ॥ २० ॥

(२७) सू—ॐ ॥ यथा प्राणादिः ॥ ॐ ॥ २१ ॥

तच्च साधनजातं तेनानुप्रविष्टमेव यथा शरीरेन्द्रियादिः ।

(२८) प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः ।

त्वाच्च तत्राग्रह इत्याह सत्रकृत्—पटवच्चेति ॥ अत्र पटपदं सम्प्रतिपन्न-कार्यपरं सत्तत्सृष्टिलक्षकमित्याशयेन सूत्रं व्याचष्टे—साधनान्तरेणेति । कर्तृव्यतिरिक्तसाधनेनेत्यर्थः । दृष्टान्तेन दृष्टान्ते हेतुसाध्यसम्प्रतिपत्ति-रुक्ता । अनेन—न केवलं श्रुतेः, किन्तु विप्रतिपन्ना सृष्टिः कर्तृव्यतिरिक्त-साधनसाध्या सृष्टित्वात्पटादिसृष्टिवदित्यनुमानाच्चावरस्य सत्त्वं सिद्ध्य-तीति सूत्रार्थ उक्तो भवति ।

(२७) ननु तर्हि साध्ये स्वतन्त्रपदप्रवेशेन कर्तृव्यतिरिक्तस्वतन्त्र-साधनसिद्धिरपि स्यादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—यथेति ॥ तच्चेति । प्रलये सदपीत्यर्थः । यत इत्यर्थे वा चशब्दः । 'साधनजातं' साधनसमूहः 'तेन' भगवता । न त्वननुप्रविष्टं 'यः प्राणे तिष्ठन्' (बृ. ५-७-२६.) इत्यादिश्रुतेरित्येवकारार्थः । अतो न स्वतन्त्रमिति वाक्य-शेषः । अन्यथाऽनुप्रवेशवैयर्थ्यादिति भावः । प्राणपदस्य वाच्यर्थतया प्रसिद्धत्वादादिपदार्थमाह—शरीरेति । आदिशब्देन प्राणो गृह्यते । सूत्रे प्राणस्य स्वशब्देन ग्रहणेऽपि तस्य ज्ञानादिकार्यसाधनत्वेनासिद्धत्वात्, सम्प्रतिपन्नसाधनस्यैवेह दृष्टान्तत्वेन ग्राह्यत्वात्, शरीरेन्द्रिययोश्च तथा-त्वेन सिद्धत्वात् इन्द्रियाणां करणत्वेन तद्विवक्षया भाष्ये शरीरेन्द्रिययोः स्वशब्देन ग्रहणं कृतमिति ध्येयम् । अनेन—विप्रतिपन्नं साधनजातं न स्वतन्त्रं, प्रेरणार्थमीश्वरेणानुप्रविष्टत्वात्, यथा शरीरेन्द्रियप्राणादिरिति सूत्रार्थ उक्तो भवति । पूर्ववाद्युपन्यस्तानुमानं तु प्रत्यूहतदनुमानविरुद्धत्वान्न साधकमिति भावः ।

(२७) साधनानां भगवदनुप्रविष्टत्वमेव कुत इत्यत आह—प्रकृतिमिति ॥ चः समुच्चये । 'प्रभुः' समर्थः । 'पुरुषोत्तमः' भगवान् 'प्रकृतिं' प्रकृत्य-वान्तराभिमानिनीं सरस्वतीं 'पुरुषं' चतुर्मुखं, यद्वा—'प्रकृतिं' जडात्मिकां

क्षोभयामास भगवान् सृष्ट्यर्थं जगतःप्रभुः ॥
इति कौर्मे ॥ २१ ॥

॥ इति आरम्भणाधिकरणम् ॥ ६ ॥

॥ ७. इतरव्यपदेशाधिकरणम् ॥

(१) जीवकर्तृत्वपक्षः श्रुतिप्राप्तो विस्तरान्निराक्रियते—

(२) सू—ॐ ॥ इतरव्यपदेशाद्धिताकरणादिदोष-प्रसक्तिः ॥ ॐ ॥ २२ ॥

'पुरुषं' जीवम्। अथ वा—स्त्रीपुरुषाख्यमिथुनं प्रविश्यैव जगतः सृष्ट्यर्थं तौ 'क्षोभयामास' सृष्टावुन्मुखीचकारेत्यर्थः। इति कौर्मे उक्तत्वादिति शेषः। अस्य साधनजातमिति पूर्ववाक्येनान्वयः।

॥ इति आरम्भणाधिकरणम् ॥

७. इतरव्यपदेशाधिकरणम् ॥

(१) एतदधिकरणार्थमाह—जीवेति ॥ ननु समयपादे 'अन्यथाऽनुमितौ च' इत्यत्र जीवानामेव जगत्कर्तृत्वमिति सिद्धान्तस्य निराकरिष्यमाणत्वात्तेन गतार्थमेतदित्यत उक्तम—श्रुतिप्राप्त इति। 'जीवाद्भवन्ति' इति श्रुत्याऽऽपाततः प्राप्त इत्यर्थः। तथा चात्र श्रुतिमूलयुक्तिसिद्धो जीवकर्तृत्वपक्षो निराक्रियते, उत्तरत्र तु समयप्राप्त इति भेद इति न गतार्थतेति भावः। श्रुतिप्राप्त इत्युपलक्षणं—साक्ष्यनुभवप्राप्तश्चेत्यपि द्रष्टव्यम्। तथापि 'एतेन शिष्टा' इत्यत्रास्य पक्षस्य निराकृतत्वात्तेन गतार्थतेत्यत आह—विस्तरादिति। तथाच पूर्वत्र संक्षेपतो निरस्तोऽपि अत्र विस्तरान्निराक्रियत इति न गतार्थतेति भावः।

(२) लोके घटादिकार्येषु जीवस्यैव कर्तृत्वेन अनुभवसिद्धत्वाल्लाघवात्तस्यैव समस्तजगत्कर्तृत्वौचित्यात् 'जीवाद्भवन्ति' इति श्रुत्यानुकूल्याच्च जीवस्यैव स्वतन्त्रकर्तृत्वान्न विष्णोर्जगत्कर्तृत्वमिति प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे—इतरेति ॥ जीवेति। ईश्वर एव नास्ति सर्वत्र

जीवकर्तृत्वपक्षे हिताकरणमहितकरणं च न स्यात् ॥ २२ ॥

जीवः स्वतन्त्रकर्तेति जीवस्य स्वतन्त्रकर्तृत्वपक्ष इत्यर्थः। समस्तकार्येष्विति शेषः। अनेन 'इतरव्यपदेशात्' इत्यस्य तात्पर्यतो व्याख्यानं कृतं भवति। न चैवं न हि अत्राधिकरणे पूर्वपक्षिणा महदादिसकलकार्यकर्तृत्वं जीवस्याशङ्कितं, किन्तु घटादिकर्तृत्वं तावदनुभवसिद्धत्वात् कुलालादीनां वक्तुं शक्यं, तत्रेश्वरस्यापि कर्तृत्वाङ्गीकारे कल्पनागौरवं स्यादित्यतो नेश्वरस्य सर्वकर्तृत्वमिति सुधाविरोधः। घटादिकार्येष्विव महदादिकार्येष्वप्यदृष्टद्वारा जीव एव कर्ता नेश्वरः, तस्याप्रामाणिकत्वात्तादृशस्य कल्पने च कल्पनागौरवप्रसङ्गादित्याशयेनात्र पूर्वपक्षप्रवृत्तेः। सुधायां तु अस्तु वा ईश्वरः प्रामाणिकः। तथापि न तस्य सकलकार्यकर्तृत्वं, किन्तु महदादिकार्यकर्तृत्वमेव, न घटादिकर्तृत्वमपि, उभयत्रापि कर्तृत्वाङ्गीकारे कल्पनागौरवप्रसङ्गादित्यभ्युपगमवादेन पूर्वपक्षस्य प्रवृत्तत्वेन विरोधाभावात्। हिताकरणादीत्यनेन नञ्शिरस्केनावृत्तेन भिन्नपदेन ज्ञापितं साक्षादापाद्यं दर्शयति—हितेति। आदिशब्दार्थमाह—अहितेति। चः समुच्चये। हिताकरणादयो दोषाः प्रसज्येरन्निति तत्त्वप्रदीपोक्तदोषान्तरोपलक्षणमेतत्। यद्वा—चशब्देनैव दुःखप्राप्तिसुखाप्राप्त्यादयो दोषाः गृह्यन्ते। केचित्तु—दोषपदमभावाख्यदोषपरं, प्रसङ्गत्वज्ञापनाय स्युरित्युक्तं भाष्ये इत्यङ्गीकृत्य साक्षादापाद्यवाक्यानुवृत्तिं विनैव हिताकरणादेरभावाख्यदोषप्रसङ्ग इति व्याचख्युः। अत्र पक्षे यद्यपि भाष्यटीकयोरानुगुण्यमस्ति, प्रामाणिकपरित्यागरूपत्वादनिष्टा च। तथापि अन्यथा हिताकरणादयो दोषाः प्रसज्येरन्निति तत्त्वप्रदीपो विरुद्ध्यत इति ध्येयम्। अनेन—सूत्रे 'असद्व्यपदेशात्' इति सूत्राच्चेदित्यनुवर्तते। स च यद्यर्थे। तत एव नहीति लभ्यते। तथोऽच्यत इति तस्येति शेषः। इतरशब्दश्च प्रस्तुतब्रह्मकर्तृत्वान्यजीवकर्तृत्वार्थकः। अनुपक्तनञ्शिरस्केन हितेत्यादिना भिन्नपदेनोक्तस्य हिताकरणमहितकरणं च न स्यादित्यापाद्यस्य विपक्षे बाधकापाद्यान्तरसमर्पणाय हितेत्यादिसमस्तम्। नञापाद्यस्यानिष्टत्वज्ञापनाय दोषपदम्। हिताकरणादयश्च ते दोषाश्च तेषां प्रसक्तिरिति विग्रहः। हितशब्देनात्मनः सौमनस्यकरं गृह्यते। अहितशब्देन जन्ममरणाद्यनर्थजालं गृह्यते। तथाच 'इतरव्यपदेशात्' इतरस्य जीवकर्तृत्वस्य 'जीवाद्भवन्ति' इत्यादिश्रुतावुक्त्या-

(३) सू—ॐ॥ अधिकं तु भेदनिर्देशात् ॥ ॐ ॥२३॥

न च ब्रह्मणः श्रमचिन्तादिदोषप्राप्तिः, अधिकशक्तित्वात्, 'श्रोता मन्ता द्रष्टाऽऽदेष्टाऽऽघोष्टा विज्ञाता सर्वेषां भूतानामन्तरपुरुषः' (ते. आ. ३-२-४.) 'एष त आत्मा सर्वान्तरः'

त्साक्ष्यनुभवसिद्धत्वाच्चेद्यदि 'तथोच्यते' जीवः स्वतन्त्रकर्तेत्युच्यते तर्हि तस्य न हिताकरणादिस्स्यात् हिताकरणमहितकरणं च न स्यादन्यथाऽपरिहार्यत्वात्तस्मिन् हिताकरणादिदोषाः प्रसज्येरन् स्वतन्त्रकर्तरि तेषामयोगादिति भावः. विद्यन्ते च ते जीवे अतो न जीवः स्वतन्त्रकर्ता, किंतु परमेश्वर एवेति सूत्रार्थ उक्तो भवति।

(३) यदि यत्किञ्चिद्दोषमात्रेण जीवकर्तृता निराक्रियते, तर्हि ब्रह्मणोऽपि कर्तृत्वं न प्राप्नोति, तस्यापि श्रमादिदोषनियमात्। एवं च पक्षयोः साम्ये सत्यनुभवश्रुतिसिद्धजीवकर्तृत्वमेवाश्रयणीयमित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—अधिकमिति॥ न चेत्यनेन सूत्र नेत्यस्य तस्येत्यस्य दोषप्रसक्तिरित्यस्य चानुषङ्गः सूचितः। श्रमचिन्तादीत्यादिपदेन साधनास्मरणदुःखादिदोषाः गृह्यन्ते। हिताक्रियादेः ब्रह्मण्यनुभवसिद्धत्वाभावादग्रहणम्। यद्वा—ब्रह्मणो जीवसाम्यव्यावर्तकेन तुशब्देनायमर्थः सूचित इति नानुषङ्गादि। कुतो न दोषप्राप्तिरित्यतस्तत्र हेतुत्वेन अधिकमित्येतद्व्याचष्टे—अधिकेति। अस्य तात्पर्यार्थो निर्दोषगुणपरिपूर्णहेयोपादेयरहितत्वादित्यत्र तत्त्वप्रदीपे अभिहितः। न च हेत्वसिद्धिरित्यत्र हेतुः—भेदनिर्देशादिति, तद्व्याचष्टे—श्रोतेति। इत्यादीत्यविभक्तिको निर्देशः। इत्यादिष्वित्यर्थः। आदिशब्देन 'य आत्माऽपहतपाप्मा' (छां. ८-१-५.) इत्यादि गृह्यते। विशेषोऽतिशय इति भेदशब्दार्थोक्तिः। स च विशेषोऽखिलश्रोतृत्वान्तर्यामित्वाशनायाद्यतीतत्वादिरूपः। 'श्रोता' इत्यैतरेयश्रुतिः सर्वत्राधिकरणे व्याख्याता। 'एष त आत्मा सर्वान्तरः' इत्येतद्बृहदारण्यके कहोलं प्रति याज्ञवल्क्यवचनम्। यः 'ते' तवान्तर्यामी 'एष एव' सर्वान्तर्यामीत्यर्थः। 'योऽशनाया' इत्यपि बृहदारण्यकस्थं, 'य आत्मा' इति छन्दोगस्थं। द्वयमपि वाक्यं दहरनये व्याकृतम्। अनेन—तस्य ब्रह्मणस्तु न दोषप्रसक्तिर्न श्रमचिन्तादिदोषप्राप्तिः। कुतो? यत-

(बृ. ५-५-१.) 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति' (बृ. ५-५-१.) इत्यादिविशेषनिर्देशात् ॥ २३ ॥

(४) सू—ॐ ॥ अश्मादिवच्च तदनुपपत्तिः ॥ ॐ ॥२४॥

चेतनत्वेऽप्यश्मादिवदस्वतन्त्रत्वात् स्वतः कर्तृत्वानुपपत्तिर्जीवस्य ।

(५) यथा दारुमयीं योषां नरः स्थिरसमाहितः ।
इङ्गयत्यङ्गमङ्गानि तथा राजन्निमाः प्रजाः ॥
इति च भारते ॥ २४ ॥

स्तत्सामर्थ्येन जीवात् 'अधिकं' अधिकशक्ति । आधिक्यमपि कुतः ? 'श्रोता' इत्यादिषु भेदनिर्देशात्, न ह्यैक्यविधस्य ते दोषाः शङ्कितुमपि शक्यन्त इति सूत्रवृत्तिर्दर्शिता भवति ।

(४) ननु चेतनत्वात्परसिद्धेश्वरवज्जीवोऽप्यन्यनिरपेक्ष एव कर्ता किं न स्यादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—अश्मादिवच्चेति ॥ चेतनत्वेऽपीत्यनेन चशब्दोऽप्यर्थतया व्याख्यातः । यद्यपितथाऽपीत्यर्थेऽपिः । 'अश्मादिवत्' पाषाणादिवत् । स्तम्भादिकमादिपदार्थः दृष्टान्तोक्तया लब्धं हेतुं दर्शयति—अस्वतन्त्रत्वादिति । तदनुपपत्तिरिति प्रतिज्ञांशस्यार्थमाह—स्वत इति । अन्यानपेक्षयेत्यर्थः । जीवस्येत्यनेन तस्य तदनुपपत्तिरिति तत्पदावृत्तिर्वा जीवपरामर्शकस्येतरस्येत्यस्यानुषङ्गो वा सूचितः । तथाच जीवे चेतनत्वास्वातन्त्र्ययोरुभयोः सत्त्वेऽपि न चेतनत्वेन जीवस्य स्वतः कर्तृतासाधनमुपपद्यते तत्र तस्याप्रयोजकत्वादस्वातन्त्र्येण प्रतिपक्षितत्वाच्च । अस्वातन्त्र्यं तु भवत्येव स्वतःकर्तृत्वाभावसाधकं, तत्र तस्य प्रयोजकत्वेन लोकसिद्धतया वैपरीत्यानुपपत्तेरिति भावः ।

(५) अस्वातन्त्र्यहेतोरसिद्धिमाशङ्क्याह—यथेति ॥ तद्वा—सूत्रार्थे स्मृतिसम्मतिमाह—यथेति । स्थिरसमाहित इति बहुव्रीहिः, भावे क्तः । स्थिरशब्देनाचाञ्चल्यमुच्यते । समाधानं मनःप्रणिधानम् । इङ्गनसाधनविषयकयथार्थज्ञानं कर्तरि क्तः कर्मधारयो वा । तथाच यथा 'स्थिरसमाहितो' मनश्चाञ्चल्यं विना स्वकार्यसमाधानवान् नरो 'दारुमयीं योषां' दार्वात्मकस्त्रीप्रतिमां 'इङ्गयति' चेष्टयति । यथा च नरः 'अङ्गं' हस्तादि

(६) सू—ॐ ॥ उपसंहारदर्शनान्नेति चेत्क्षीरवद्धि ॥

॥ ॐ ॥ २५ ॥

जीवेन कार्योपसंहारदर्शनात्तस्य कर्तृत्वमिति चेत्—न, यथा गोषु क्षीरं दृश्यमानमपि प्राणादेव जायते ।

(७) अन्नं रसादिरूपेण प्राणः परिणयत्यसौ । इति वचनात् । एवं जीवे दृश्यमानोऽपि कार्योपसंहारोऽस्वातन्त्र्यात्परकृत एव ।

'अङ्गानि' अङ्गुल्यादीनि चेङ्गयति, तथेमाः प्रजाः भगवानिङ्गयतीत्यर्थः । राजन्निति जनमेजयस्य सम्बुद्धिः । भाष्ये प्रजाशब्दितानां जीवानामस्वातन्त्र्यमुक्तमिति सूत्रोक्तमिति वा शेषः । तथाच न हेत्वसिद्धिरिति भावः ।

(६) जीवस्य स्वतःकर्तृत्वाभावमाक्षिप्य आक्षेपांशं तावद्व्याचष्टे—उपसंहारेति ॥ जीवेनेत्यनेन इतरेणेति पदानुवृत्तिस्सूचिता । कार्येति योग्यपदाध्याहारोक्तिः । उपसंहारो नामावसानं तस्य दर्शनाज्जीवेनेदं कार्यमुपसंहरिष्यामीति बुद्ध्या निरूप्यमाणत्वात् तथा जीवकर्तृककार्योपसंहारस्य तत्समापनस्यान्यैर्दर्शनादित्यर्थः । पूर्वसूत्रादनुवृत्तस्य तदनुपपत्तिरिति पदस्य नञाऽन्वितस्य साध्यसमर्पकस्य पर्यवसितार्थमाह—तस्य जीवस्य कर्तृत्वमिति । स्वत इत्यस्ति । यद्वा—नञाऽन्वयं विनैव पूर्वसादनुवृत्तस्य तदित्यस्यार्थमाह—कर्तृत्वमिति । अत्र जीवस्येति प्रकरणलब्धं पदम् । परिहारांशं व्याचष्टे—नेति । न जीवस्याकर्तृत्वाभावो वक्तव्य इत्यर्थः । प्रथमव्याख्याने नञावृत्तिः । द्वितीये तु नावृत्तिः । किन्तु परिहारांशमात्रे अन्वय इति ध्येयम् । कुतो नेत्यतः प्रवृत्तेन क्षीरवदुपपद्यते हि यत इत्यनेनोक्तं हेतुं विवृणोति—यथेति । अपिशब्दो यद्यपितथाऽपीत्यर्थे । एवमुत्तरत्रापि । क्षीरमित्यस्यापीत्यनन्तरमन्वयः । 'प्राणात्' मुख्यप्राणात्, न तु गोरित्येवकारार्थः ।

(७) कुतः प्राणाधारत्वं क्षीरस्येत्यतो हीति सूचितां स्मृतिं दर्शयति—अन्नमिति ॥ भुक्तं वस्त्वित्यर्थः । 'असौ' सर्वशरीरप्रेरकत्वेन प्रसिद्धः । क्षीरवदित्यनेन लब्धं दार्ष्टान्तिकं दर्शयति—एवमिति । दृश्यमान इति । स्वेनानुभूयमानोऽन्यैर्दृश्यमानश्च कार्योपसंहारः 'परमेश्वरकृतः' तन्निमित्त एव, न जीवकृतः । कुतः ? तत्र तस्यास्वातन्त्र्यादित्यर्थः ।

(८) य आत्मानमन्तरो यमयति । नाहं कर्ता न कर्ता त्वं कर्ता यस्तु सदा प्रभुः । इत्यादेः ॥ २५ ॥

(९) सू—ॐ ॥ देवादिवदपि लोके॥ ॐ ॥ २६ ॥

न च कर्तुरीश्वरस्यादृष्टविरोधः । देवादिवददृश्यत्वशक्तियोगात् ।

---

(८) ननु जीवस्यास्वातन्त्र्यात्कार्योपसंहारकर्तृत्वाभावेऽपि कुतोऽसावीश्वरकृत इति ज्ञायते इत्यतोऽत्रापि हीतिसूचितां श्रुतिमाह—य इति ॥ व्याख्यातेयमन्तर्यामिनये । स्मृतानहंत्वमिति शब्दौ तत्र प्रकृतिर्जीवपरौ । तुरेव । तथाच 'यस्सदा प्रभुः' नित्यस्वतन्त्र ईश्वरः स एव जगत्कर्ता, न त्वहं त्वं चेत्यर्थः । इत्यादेरित्यनन्तरं वचनादित्यनुषज्यते । आदिशब्देनैवंजातीयकं गृह्यते ।

(९) न जीवस्येश्वराधीनकर्तृत्वं वाच्यम्, तस्यैवाभावात् । न च 'स हि सर्वस्य' 'द्यावाभूमी जनयन्' (श्वेत. ३-३.) इत्यादिश्रुत्येश्वरसिद्धिः । तस्यानुपलब्धिलिङ्गयाधितत्वात् । अथापि तत्कल्पने गौरवं स्यात्, अतो लाघवात् क्लृप्तो जीव एव कर्तेत्याशङ्कां परिहरत्सूत्रमुपन्यस्यति—देवेति ॥ अत्र सूत्रनिरसनीयशङ्कां दर्शयन् देवादिवदित्यनेन सूचितहेतोरन्वययोग्यप्रतिज्ञां दर्शयति—न चेति । 'कर्तुः' जीवेन क्रियमाणकार्यकर्तुः जीवनियन्तुरिति यावत् । 'ईश्वरस्य' ईश्वरास्तित्ववचनस्येश्वरस्य अदृष्ट्याऽनुपलब्ध्या विरोधस्तु नेत्यर्थः । यद्वा—ईश्वरस्य तत्प्रत्यक्षतोऽनुपलब्ध्या 'विरोधः' अभावस्तन्निश्चयस्तु नेत्यर्थः । कुतो नेतिचेत् देवादिवद्योगात् । अदृष्टदेवोपदेवादिवत्सत्त्वोपपत्तेरनुपलब्धेरप्रयोजकत्वात् । देवादीनामदृश्यत्वशक्तियोगाद्युक्तानुपलब्धिरितिचेन्न । ईश्वरस्यापि देवादिवददृश्यत्वशक्तियोगात् । अदर्शनानुकूलान्तर्धानशक्तियुक्तत्वात्सतोऽप्यदृष्टियोगादित्यावृत्त्या योजना । ईश्वरस्यादृश्यत्वशक्तिमत्त्वमेव कुत इत्यतः प्रवृत्तेन 'अपि लोके' इत्यनेन सूचितं कैमुत्तिकन्यायं दर्शयति—लोकेऽपीति । अपिशब्दः पिशाचादीनामपीति भिन्नक्रमः कैमुत्यार्थो विशेषणान्तरसमुच्चयार्थश्च । तथाच 'लोके' जगत्यनीश्वराणां लौकिकानामपि पिशाचादीनां 'एतादृशी' अदृश्यत्वानुकूला 'शक्तिः' अन्तर्धानसामर्थ्यं दृष्टं, ईश्वरस्य तादृशी शक्तिरस्तीति किमु वक्तव्यमित्यर्थः । तथाच नोक्तहेत्वसिद्धिरिति भावः ।

लोकेऽपि पिशाचादीनां तादृशी शक्तिर्दृष्टा किम्वीश्वरस्य ।

(१०) न युक्तियोगाद्वाक्यानि निराकार्याण्यपि क्वचित् ।
विरोध एव वाक्यानां युक्तयो न तु युक्तयः ॥
इति बृहत्संहितायाम् ॥ २६ ॥

(११) सू—ॐ ॥ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॐ ॥ २७ ॥

---

(१०) यदभिप्रेतं श्रुतिसिद्धः परमेश्वरो नानुपलब्ध्या निराकार्य इति तत्रार्थे स्मृतिं चाह—नेति ॥ 'वाक्यानि' श्रुतिस्मृतिरूपाणि 'युक्तियोगात्' युक्तिलक्षणोपायात् 'क्वचिदपि' विषये न प्रमाणतयाऽसाधकतया वा निराकार्याणीत्यर्थः। विरोधे सति कथं निर्णय इत्यत आह—विरोध इति। युक्तीनां जात इति शेषः। तथाच 'वाक्यानां विरोधे' तन्निरूपितविरोधे युक्तीनां 'जाते' प्रतीते सति ता युक्तय एव 'न युक्तयो' न सद्युक्तयः किं त्वाभासा एवेत्यर्थः। यद्वा—वाक्यानां परस्परविरोधे सति ता युक्तयः एकवाक्यानुसारिन्याया एवार्थसाधकाः, न तु शुष्कयुक्तय इत्यध्याहारेणान्वयः। बृहत्संहितायामित्यस्योक्तत्वाच्च न विरोध इति शेषेण पूर्वेणान्वयः।

(११) युक्त्यन्तरेण जीवस्य स्वतः कर्तृत्वं निराकुर्वत्सूत्रमुपन्यस्यति—कृत्स्नेति। अत्र कस्मिन् पक्षेऽयं दोष उच्यते इति न ज्ञायते, गुणसूत्रत्वात् जीवकर्तृत्वपक्ष इति सिद्धेऽपि तत्र हिताक्रियादिदोषस्योक्तत्वाद्दोषान्तरत्वज्ञापकचशब्दाभावाच्च अनुपपत्तिरेवेत्याशङ्कां परिहरत्सूत्रं व्याचष्टे—अयं चेति। न केवलं हिताक्रियादिदोषो जीवस्य स्वतःकर्तृत्वपक्षे, किन्त्वयं वक्ष्यमाणश्च प्रसज्यत इति समुच्चये च शब्दः। अनेन सूत्रे इतरव्यपदेशादिति चेत्तर्हि न केवलं हिताकरणादिदोषप्रसक्तिः, किन्तु कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेति दोषस्य च प्रसक्तिरिति प्रधानसूत्रगतापादकानुवृत्त्या चशब्दानुषङ्गेण च सूत्रयोजना कार्येति सूचितम्। यद्यपि जीवकर्तृत्वपक्षे इति प्रागुक्तत्वादत्र न वाच्यम्। तथापि बहुव्यवहितत्वात्तत्स्मारणाय पुनरुक्तिः। सूत्रे वाशब्देन किं जीवः सर्वकार्येषु सर्वसामर्थ्येन

अयं च दोषो जीवकर्तृत्वपक्षे । एकेनाङ्गुलिमात्रेण प्रवर्तमानोऽपि पूर्णप्रवृत्तिस्स्यात् । न च तद्युज्यते, सामर्थ्यैकदेशदर्शनात् ।

(१२) न चैकदेशेन, निरवयवत्वात् । 'अथ यस्स जीवः स नित्यो निरवयवो ज्ञाताऽज्ञाता सुखी दुःखी शरीरेन्द्रियस्थः' इति भाल्लवेयश्रुतिः ।

(१३) न चोपाधिकृतांशः स एवांश उपहित इति, द्वित्वापेक्षत्वात् ॥

प्रवर्तते, उतांशेनेति विकल्पमुखेन दोषापादनस्य सूचितत्वात्तदनुसारेणाद्यपक्षे कृत्स्नप्रसक्तिरित्यनेनोक्तं दोषं विवृणोति—एकेनेति । सजातीयाङ्गुल्यन्तरव्यावृत्त्यर्थमेतत् । विजातीयहस्तादिव्यावर्तनाय मात्रपदम् । प्रवर्तमानस्तृणादानादाविति शेषः । तेनापेरन्वयः । अल्पकार्येऽपीति वा न केवलं सर्वाकारेण प्रवर्तमान इति वा अपेरर्थः । जीव इति बुद्ध्या विवेकेनात्र सम्बध्यते । 'पूर्णप्रवृत्तिः' पूर्णशक्त्या प्रवृत्तिमान् स्यादित्यर्थः । प्रसङ्गत्वद्योतनाय स्यादिति । न च स्यादेवमित्याह—न चेति । तत् पूर्णशक्त्याऽप्रवर्तनं कुत इत्यत आह—सामर्थ्येति । जीवस्य कार्येषु स्वरूपसामर्थ्यांशेन प्रवृत्त्यनुभवादित्यर्थः । तथा चापाद्याभ्युपगमेऽनुभवविरोधः स्यादिति भावः ।

(१२) अथ द्वितीयपक्षमनूद्य दूषयति—न चेति ॥ नापि जीवः स्वरूपसामर्थ्यैकदेशेन तत्तत्कार्येषु प्रवर्तत इत्यर्थः । कुतो नेत्यतस्तत्र निरवयवत्वादिति हेतुमध्याहृत्य योजयति—निरवयवत्वादिति । निरंशत्वादित्यर्थः । जीवस्येति शेषः । निरवयवत्वानङ्गीकारे बाधकोपन्यासाय प्राप्तं निरवयवत्वशब्दकोप इत्यंशं तच्छ्रुत्युदाहरणेन विवृणोति—अथेति । अथेत्यतः प्राक् तदनङ्गीकार इति ग्राह्यम् । श्रुतिरित्यनन्तरं व्याकुर्वत इति शेषः । श्रुतावथेत्यर्थान्तरे । य एवंभूतः स जीव इत्युच्यते । 'सः' जीवो नित्यो निरवयव इत्यादिका योजना, तच्छब्दद्वयश्रवणात् । यो जीवः स नित्यः सः निरवयव इति सर्वत्र तच्छब्दान्वयेन वा योजना । 'शरीरेन्द्रियस्थः' तदधिष्ठाता ।

(१३) ननु एकदेशेनेति द्वितीयपक्ष एवाश्रीयते । न च निरवयव-

(१४) न चान्यत्कल्प्यम्। 'यद्धि युक्त्या विरुद्धयेत तदीशकृतमेव

त्वोक्तिविरोधः। अंशानामौपाधिकत्वाभ्युपगमात्, श्रुतेश्च स्वाभाविकांश-निषेधविषयत्वादित्याशङ्क्यासम्बद्धोपाधेरंशकारकत्वे अतिप्रसङ्गात् सम्बद्धस्यैव तत्त्वे वाच्ये उपाधिसम्बद्धत्वं किं समग्रजीवस्योत तदंशस्येति विकल्प्य नाद्य इत्याह—न चेति ॥ उपाधिकृतांश इति बहुव्रीहिः। उपाधिकृतोऽशो यस्येति। उपहित इत्यावर्तते नेति च। तथाच यः श्रुत्युक्तः सः समग्र एव जीवः 'उपहितः' उपाधिना ग्रस्तः न त्वंश इति न। कुतो? यतस्तर्हि स उपाधिकृतांशो न भवेदिति योजना। सर्वस्य जीवस्योपाधिना ग्रस्तत्वेन पुनस्तस्य तत्कृतांशत्वासम्भवादिति भावः। द्वितीयं निराकरोति—अंश इति। न चेत्यनुवर्तते। 'अंश उपहितः' उपाधिना ग्रस्त इत्यपि पक्षो नेत्यर्थः। कुत इत्यत आह—द्वित्वेति। उपाधिसम्बन्धार्थं स्वाभाविकांशद्वित्वस्यापेक्षितत्वादिति भावः। सर्वत्रोपहितानुपहितद्विरूपमपेक्ष्यैवोपाधेः प्रवृत्तेस्तदर्थं स्वाभाविकांशद्वयाभ्युपगमे निरंशत्वश्रुतिविरोधः। तस्याप्यौपाधिकत्वेऽनवस्था स्यादिति भावः। अनेन—किं जीवः सर्वकार्येषु सर्वसामर्थ्येन प्रवर्तते? उतांशेन? नाद्यः, यतः 'कृत्स्नप्रसक्तिः' तथा सति जीवस्य सर्वत्रापि पूर्णशक्त्या प्रवृत्तिप्रसङ्गः। न द्वितीयः निरवयवत्वात्। अंशाङ्गीकारे च निरवयवत्वशब्दकोपो वेति निरंशत्वश्रुतिविरोधः स्यात्। तथाच कर्तृत्वस्य कृत्स्नैकदेशाभ्यां व्याप्ततया व्यापकयोस्तयोर्निवृत्त्या व्याप्यं कर्तृत्वमपि जीवाद्व्यावर्तत इति न जीवः स्वतन्त्रकर्तेति भावः। न च सामर्थ्यस्य विचित्रत्वेऽपि न जीवस्य निरवयवत्वोक्तिर्विरुध्यते। तस्य तद्भिन्नत्वादिति वाच्यम्। तत्सामर्थ्यस्य तदभिन्नत्वात्। उक्तं हि सुधायाम्—न हि सामर्थ्यापरपर्यायं कर्तृत्वं जीवाद्भिन्नमिति। एवं जीवस्योपाधिकृतांशाभ्युपगमे 'कृत्स्नप्रसक्तिः' उपाधेः सर्वजीवसम्बन्धः स्यात्। तथाचोपाधिना ग्रस्तस्योपाधिकृतांशस्य च भेदो न स्यात्। अंशसम्बन्धेऽपि निरवयवत्वश्रुतिविरोध इति द्वेधा सूत्रवृत्तिर्दर्शिता भवति। यद्यपि कृत्स्नप्रसक्त्यादिदोषोऽप्यादिशब्देन ग्रहीतुं शक्यत इति नेदं सूत्रं पृथक्कर्तव्यम्। तथापि हितार्क्यादिदोषापेक्षया बहूपपत्त्या निराकार्यत्वात् पृथक्करणं युक्तम्। अत एव भाष्ये न चेत्यादिग्रन्थः प्रवृत्तः।

(१४) तर्हि पतज्जीवस्य कर्तृत्वं युक्तिविरुद्धत्वादविचारितरमणीयाविद्यानिमित्तमस्तु इत्यत आह—न चेति ॥ 'अन्यत्' अनिर्वाच्याविद्या-

हि ' इति गत्यन्तरोक्तेः ॥ २७ ॥

॥ इति इतरव्यपदेशाधिकरणम् ॥ ७ ॥

॥ ८. श्रुतेस्तु शब्दमूलत्वाधिकरणम् ॥

(१) सू—ॐ ॥ श्रुतेस्तु शब्दमूलत्वात् ॥ ॐ ॥२८॥

निमित्तं जीवकर्तृत्वं न कल्प्यमेवेत्यर्थः । अप्रामाणिकत्वात्तेन निर्वाहाभावाच्चेति भावः । तर्हि युक्तिविरोधपरिहारोपायाभावान्न जीवकर्तृत्वमित्यत आह—यद्धीति । आद्यो हिशब्दो वस्तुनः प्रतीतत्वमाह । द्वितीयोऽस्यार्थस्य न्यायसिद्धतां वक्ति । तथाच यत्प्रतीतमपि गुणादिकं वस्तु युक्तया ' विरुद्ध्येत ' विरुद्ध्यते । ' तदीशकृतं ' ईशाधीनमेव कल्प्यं, न त्वप्रामाणिकाविद्यानिमित्तमित्यर्थः । इतीति । इति न्यायसूचकवचनेनेत्यर्थः । गत्यन्तरोक्तेरिति । अन्या गतिर्गत्यन्तरम् । तथाच जीवकर्तृत्वे प्रमिते तत्र युक्तिविरोधपरिहारस्य ईश्वराधीनत्वाख्योपायान्तरोक्तेरित्यर्थः । उक्तेरित्यस्य न चेत्यनेनान्वयः । न चेश्वराधीनत्वमात्रेण कथं जीवकर्तृत्वस्य युक्तिविरुद्धतापरिहार इति वाच्यम् । तस्माद्भगवानेव स्वरूपस्वभावविशेषाणां नियामकः चैतन्यमवच्छेदकं विधाय विशेषान्निमित्तीकृत्य विरुद्धेऽप्यभेदबहुत्वे एकत्र समावेश्याभेदेन निरवयवत्वशब्दकोपमपास्य बहुत्वेन कृत्स्नप्रसक्तिं न्यक्कृत्य जीवस्य कार्यानुरूपसामर्थ्यविशेषं योजयन् जीवेन कार्यं कारयतीति सुधारीत्येति गृहाण ।

॥ इति इतरव्यपदेशाधिकरणम् ॥ ७ ॥

॥ ८. श्रुतेस्तु शब्दमूलत्वाधिकरणम् ॥

(१) अत्राधिकरणे विष्णोः सर्वकर्तृत्वे प्रबलयुक्तिविरोधः परिहियते। जीवकर्तृत्वपक्षे ये कृत्स्नप्रसक्त्यादयो दोषाः उक्ताः ते ईश्वरपक्षेऽपि समाः तत्र विशेषादर्शनादतो न तस्य जगत्कर्तृत्वं युक्तमिति प्राप्ते सिद्धान्तयन्सूत्र मुपन्यस्यति—श्रुतेस्त्विति ॥ अत्र सूत्रे निरसनीयशङ्कां प्रदर्शयन् श्रुतेरिति सौत्रहेतोः प्रतिज्ञां दर्शयति—न चेति । चस्त्वर्थो जीवसाम्यव्यावर्तकः । ' ईश्वरपक्षे ' ईश्वरकर्तृत्वपक्षे ' अयं ' बुद्धिसन्निहितो जीवकर्तृत्वपक्षोक्तो ' विरोधो ' कृत्स्नप्रसक्त्यादिरूपो दोषः नेत्यर्थः । कुतो नेत्यतस्तत्र हेतुत्वेन श्रुतेस्त्विति सूत्रांशं योजयति—योऽसाविति । इति पैङ्गयादिश्रुतेरेवेति ।

न चेश्वरपक्षेऽयं विरोधः। 'योऽसौ विरुद्धोऽविरुद्धो मनुरमनुरवाग्वागिन्द्रोऽनिन्द्रः प्रवृत्तिरप्रवृत्तिः सपरः परमात्मा' इति पैङ्ग्यादिश्रुतेरेव।

(२) शब्दमूलत्वाच्च न युक्तिविरोधः।

श्रुतावेवोक्तेरिति यावत्। तथाचादिशब्देन शाखान्तरवाक्यं गृह्यत इति तत्त्वप्रदीपोक्तेः एवमादिरूपायां पैङ्गिनामन्येषां च शाखिनां निर्दोषतयाऽवगतश्रुतावेवेत्यादिना मनुत्वामनुत्वादिरूपाणां लोकविरुद्धधर्माणामित्येवमीश्वरे अविरुद्धतयाऽवस्थानोक्तेरित्यर्थः। न पुनर्जीव इव प्रत्यक्षादिसिद्धत्वादित्येवशब्दार्थः। एवेत्यनेन तुशब्दार्थ उक्तो भवति। श्रुत्यर्थस्तु यो लोकदृष्ट्या 'विरुद्धः' लौकिककर्तृविरुद्धलक्षण इति यावत्। 'अविरुद्धः' प्रमाणैः वस्तुतो अविरुद्ध इति वा। तथात्वे प्रमाणैरिति टीकापदस्य उत्तरत्रान्वयः। अत एव प्रमाणतोऽस्यान्यो मन्ता नास्तीति तत्त्वप्रदीपोक्तिः। 'मनुः' सर्वमन्ता। स्वतन्त्रवक्त्रन्तररहितः 'अवाक्'। 'वाक्' वक्ता। 'इन्द्रः' परमेश्वरः। न विद्यते अन्य इन्द्र ईश्वरः स्वामी यस्य सः 'अनिन्द्रः'। 'प्रवृत्तिः' प्रवर्तकः। 'अप्रवृत्तिः' प्रवर्तकशून्यः परा लक्ष्मीः तया सहितः सपरः असौ परमात्मेति। यद्वा—परो लोकविलक्षणः। तथाच योऽसावेवंभूतः स परमात्मेति योजना।

(२) ननु श्रुत्युक्तमपि निरवयवस्यैकदेशेन प्रवृत्त्यादिधर्मजातं युक्तिविरुद्धत्वात्कथमीशेऽङ्गीकर्तुं शक्यम्। अन्यथा जीवेऽपि प्रत्यक्षबलादभ्युपगन्तव्यं स्यात्, अविशेषादित्याशङ्क्याविशेषोऽसिद्धः, शब्दमूलत्वाख्यविशेषसत्त्वादित्याह—शब्दमूलत्वादिति॥ परमेश्वरस्येति वा परमेश्वरधर्मजातस्येति वा प्रकृतमस्ति। शब्द आगम एव मूलं प्रापकं यस्य स तयोक्तः, तस्य भावस्तत्त्वं तस्मादित्यर्थः। चशब्दो वक्ष्यमाणविचित्रशक्तिरूपहेतुसमुच्चयेऽवधारणेऽपि। तेन सूत्रे तुश्चार्थेऽपीत्युक्तं भवति। ईश्वरे जीववच्छब्दमूलत्वाख्यो विशेषोऽसिद्ध इत्यतोऽप्याह—शब्दमूलत्वादिति। शब्दमूलत्वस्य 'नावेदवित्' इत्यादि शब्दमूलत्वादित्यर्थः। यद्वा—श्रुतेरित्यस्यावृत्त्याऽत्र सम्बन्धः। तथाच शब्दमूलत्वस्य श्रुतेरित्यर्थः। अस्त्वीश्वरेऽयं विशेषः, ततः किमित्यतस्तथात्र नेश्वरे युक्ति-

(३) यद्वाक्योक्तं न तद्युक्तिर्विरोद्धुं शक्नुयात्क्वचित् ।
विरोधे वाक्ययोः क्वापि किञ्चित्साहाय्यकारणम् ॥
इति पुरुषोत्तमतन्त्रे ॥ २८ ॥

विरोधोऽवतरतीत्याह—नेति। तत्रेति शेषः। तथाच 'तत्र' परमेश्वरे न जीव इव कृत्स्नप्रसक्त्यादिकेवलयुक्तिविरोधोऽवतरतीत्यर्थः। युक्त्यविषयत्वात्, यथा प्रत्यक्षाविषये प्रत्यक्षविरोध इति भावः। यद्यपि न विरोध इति प्रागुक्तत्वादिह पुनर्न वाच्यं, तेनैवास्याप्यन्वयसम्भवात्। तथापि तत्र लोके विरुद्धानां परमेश्वरे विरोधो नास्ति, तथा श्रुतेरित्युक्तम्। अत्र तु युक्तिविरोधो नास्ति, तत्परिहारोपायस्य शब्दमूलत्वाख्यस्य विशेषस्य सत्त्वादित्युच्यते, अतो नावक्तव्यता। अतएव तत्र विरोध इत्येवोक्तम्, अत्र तु युक्तिविरोध इति ज्ञातव्यम्। अनेन—ईश्वरकर्तृत्वपक्षे कृत्स्नप्रसक्त्यादियुक्तिविरोधः न, कुतो? 'योऽसौ' इति निर्दोषश्रुतावेव परमेश्वरे लोकविरुद्धस्यापि भिन्नांशरहितस्याप्येकदेशेन प्रवृत्तिरूपस्य स्वरूपांशस्य बाहुल्येऽपि भेदाभावस्यांशतः कार्यकरणेऽपि निरवयवत्वस्य प्राकृतदेहादिरहितत्वेऽपि कर्तृत्वस्याविरुद्धतयाऽवस्थानोक्तेर्न जीवपक्ष इव सम्भावितदोषः प्रत्यक्षासिद्धत्वात्। श्रुत्युक्तमपि विरुद्धधर्मजातं युक्तिविरुद्धत्वात्कथमीशेऽङ्गीकर्तुं शक्यम्, अन्यथा जीवेऽपि प्रत्यक्षबलादङ्गीकार्यं स्यादविशेषादिति चेत्—न, अत्र 'शब्दमूलत्वात्' युक्तिविरोधपरिहारोपयोगिनः शब्दमूलत्वस्य शब्दैकसमधिगम्यत्वस्यात्र परमेश्वरे सत्त्वादविशेषासिद्धेः। न च तदसिद्धिः तस्य शब्दमूलत्वस्य 'शब्दमूलत्वात्' 'नावेदवित्' इत्यादिशब्दसिद्धत्वादिति सूत्रार्थ उक्तो भवति।

(३) न केवलं शब्दैकसमधिगम्यत्वेन युक्त्यविषयत्वादीश्वरे युक्तिविरोधाप्रसक्तिः किन्तु शब्दैकसमधिगम्ये युक्तिविरोधो नास्तीति स्मृत्युक्तत्वाच्चेत्याह—यदिति॥ 'युक्तिः' शुष्कानुमा 'वाक्योक्तं' आगमेनोक्तं 'यत्' प्रमेयं न तत् 'विरोद्धुं' निषेद्धुं शक्नुयादित्यर्थः। किं तर्ह्यस्याः कृत्यमित्यत आह—विरोध इति। 'क्वापि' क्वचिद्विषये वाक्ययोः परस्परविरोधे प्रतीते सति एकवाक्यानुकूला युक्तिः 'किञ्चित्साहाय्यकारणं' आगमेनार्थसाधने तस्य विरोधपरिहारमुखेन किञ्चित्साहाय्यकृत् तदनु-

(४) सू—ॐ ॥ आत्मनि चैवं विचित्राश्च हि ॥ ॐ ॥ ॥ २९ ॥

परमात्मनो विचित्राश्च शक्तयस्सन्ति नान्येषाम् ।

(५) विचित्रशक्तिः पुरुषः पुराणो न चान्येषां शक्तयस्तादृशास्स्युः ।
एको वशी सर्वभूतान्तरात्मा सर्वान् देवानेक एवानुविष्टः । ( )

ग्राहिका तद्विषयव्यवस्थापिकेत्यर्थः । इतीत्यनन्तरमुक्तमिति तन्त्र इत्यनन्तरं ग्रन्थ इति च शेषः । अतः शब्दमूलत्वादित्यादिनान्वयः ।

(४) जीवपक्ष एव युक्तिविरोधो, नेश्वरपक्ष इत्येतमर्थं युक्त्यन्तरेण प्रतिपादयत्सूत्रमुपन्यस्य व्याचष्टे—आत्मनीति ॥ आत्मनीति सप्तमीबोधिताधिकरणत्वस्येहानुपयुक्तत्वात्तां विपरिणम्य योजयति—परमात्मन इति । चशब्दस्य परमात्मन इत्यनेन शक्तय इत्यनेन च सम्बन्धः । तत्राद्यस्सौत्राश्चशब्दानुवादरूपोऽवधारणे । अत एव तद्व्यावर्त्यमाह—नान्येषामिति । तेषां न युक्तिविरोधः शब्दमूलत्वादविरोधः, किन्त्वीश्वरे यतो विचित्रशक्तयश्च सन्तीति समुच्चयार्थकाद्वितीयचशब्दानुवादः । शक्तय इत्यध्याहृतं पदम् । अस्यानोऽपि न युक्तिविरोध इति पूर्वेणान्वयः ।

(५) ईश्वरस्यैव विचित्रशक्तित्वं नान्येषामित्येतत्कुत इत्यतो ह्रीति सूचितां श्रुतिं दर्शयति—विचित्रशक्तिरिति ॥ चोऽवधारणे । तथाच 'पुराणः' पुरातनः 'पुरुषो' भगवानेव । विचित्रशक्तिरेवेत्यस्य व्यावर्त्यमाह—न चेति । 'अन्येषां' जीवानां 'तादृशाः' तादृश्यः परमात्मशक्तिसमाः अनेन सौत्रेवशब्दस्य एवंविधा अन्यनिरपेक्षा एवमेवानुक्तविषयाश्चेत्यर्थ उक्तो भवति तथैव तत्त्वप्रदीपोक्तेः । अर्थान्तरं तु शब्दमूलत्वाच्च न युक्तिविरोध इति भाष्येण एवं एवंविधा युक्तिविरोधनिरासका इति टीकायां च सूचितम । 'एकः' प्रधानः, सर्वे वशे यस्यासौ वशी 'सर्वभूतान्तरात्मा' ब्रह्मादिसर्वचेतनानां भूम्यादिसर्वजडानामन्तर्नियामकः, सर्वान् देवान् 'एक एव' अभिन्नरूपेणैव 'अनुप्रविष्टः' प्रेरणायेत्यर्थः । अन्यादृग्विचित्रशक्तिसम्भावनाय वाक्यशेषोपन्यासः । श्रुतिर्यत इति शेषः । अस्य परमात्मन इति पूर्वेणान्वयः । शक्तेः विचित्रत्वं तु भिन्नावयवशून्यानां जीवानामीश्वरस्य चैकदेशेन प्रवृत्त्यादिरूपाघटितविचित्र-

इति श्वेताश्वतरश्रुतिः ॥ २९ ॥

(६) सू—ॐ ॥ स्वपक्षदोषाच्च ॥ ॐ ॥ ३० ॥

ये दोषा इतरत्रापि ते गुणाः परमे मताः ।
न दोषः परमे कश्चिद्गुणा एव निरन्तराः ॥
इति वचनाज्जीवपक्ष एव दोषो न परपक्षे ।

कार्यकरत्वम् । तथा श्वेताश्वतरेऽन्यत्र वानुक्तकार्यविषयकत्वमित्यादि-तत्त्वप्रदीपोक्तं द्रष्टव्यम् । सूत्रार्थस्तु—स्पष्टः ।

(६) ननु यथा विष्णोः शब्दमूलत्वात् विचित्रशक्तित्वाच्च न तत्र युक्तिविरोधो दोष इत्युच्यते तथा जीवेऽपि किं नोच्यते तत्रापि चेतनत्वादिलिङ्गेन युक्तिविरोधस्याविरोधतासाधनसम्भवादित्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे—स्वपक्षेति । 'इति वचनात्' एवं रूपात् सयुक्तिकागमादित्यर्थः । 'जीवपक्षे' जीवकर्तृत्वपक्ष इत्यनेन स्वपक्ष इत्यस्य एवेत्यनेन चशब्दस्य चार्थ उक्तो भवति । अयं कृत्स्नप्रसक्त्यादियुक्तिविरोधः । एवशब्दव्यावर्त्यं दर्शयति—नेति । परमात्मकर्तृकत्वं जगत इति पक्ष इत्यर्थः । इति ज्ञायत इति शेषः । जीवपक्षे दोष एवेत्यप्येवकारान्वयः न त्वदोषतां नेतव्य इति तदर्थः । नेश्वरपक्ष इत्यनुक्त्वा न परपक्ष इत्युक्त्या 'स्वयमेव जीवः कर्ता न स्वस्मादन्य ईश्वर इति वादिनां पक्षे' इति तत्त्वप्रदीपोक्तं सूत्रगतस्वपक्षेत्युक्तिप्रयोजनं सूचितं भवति । वचने यत्तदोर्दोष इत्यस्य चावृत्तिः । अपिः यद्यपीत्यर्थे । प्रतीता इति शेषः । तथा चेश्वरात् 'इतरत्र' जीवे ये दोषाः प्रतीताः ते दोषा एव, न तु 'अपि' कयाऽपि विधया तत्रादोषतां नेतव्याः । जीवे दोषाणां सम्भवेन तत्कल्पकाभावादिति भावः । न एव दोषाः विष्णौ 'मताः' प्रतीताश्चेत्तर्हि तेऽप्यचिन्त्यशक्तिशब्दमूलत्वाभ्यां गुणा एव 'मताः' कल्पनीयाः, न दोषाः । यथा सर्वोत्पादकत्वसर्वभुक्त्वादयः । कुत इत्यतोऽत्र कल्पकसद्भावादित्यत आह—न दोष इति । यतः परमेश्वरे कश्चिद्दोषो नास्ति, प्रत्युत गुणा एव सन्ति अत इत्यर्थः । ननु दुष्टधर्माश्रयत्वात् जीववत् न भगवतो निर्दोषत्वमित्याशङ्क्याह—निरन्तरा इति । ईश्वराद्भेदशून्या इत्यर्थः । यद्वा—ननु

(७) 'अथ यस्स दोषः साञ्जनः सजनिः स जीवोऽथ यः स निर्दोषो निष्कलः सगुणः परः परमात्मा' इति कापायणश्रुतिः ॥ ३० ॥

(८) सू—ॐ ॥ सर्वोपेता च तद्दर्शनात् ॥ ॐ ॥ ३१ ॥

यदा गुणानां नाशो भविष्यति तदा दोषा भविष्यन्तीत्यत आह—निरन्तरा इति। तथा चेश्वरवत् तदभिन्नगुणेष्वपि न दोषनाशो दाङ्क्याविति भावः। न च भगवतो निर्दोषत्वे निर्भेदगुणत्वे च प्रमाणाभाव इति वाच्यम्। 'निरनिष्टो निरवद्यः' ( ) 'नेह नानाऽस्ति किञ्चन' (कठ.२-४-११.) 'एवं धर्मान् पृथक्पश्यन्' (कठ. ४-१४.) इत्यादिश्रुतिसद्भावादित्याह—यतो निरन्तराः गुणाः विष्णौ मताः प्रमिता इति श्रुत्यर्थः। 'ये दोषाः' इत्येतत् श्रुतिरिति भाति। स्मृतिरित्यपि केचित्। अत एव भाष्यटीकयोर्वचनशब्दप्रयोगः।

(७) ननु ईश्वरवत् जीवस्यापि निर्दोषत्वात्तत्र प्रतीतदोषोऽप्यन्यथा नीयतामित्याशङ्क्य 'स्वपक्षे' जीवेशयोः सदोषत्वनिर्दोषत्वपक्षे श्रुतिविरोधदोषाच्च स नेति सूत्रस्य वृत्त्यन्तरमाश्रित्य परिहरति—अथेति। प्रकरणान्तरारम्भेऽथशब्दः। यो दुःखाल्पज्ञत्वादिना रागादिना वा सदोषः 'साञ्जनः' पुण्यपापादिसङ्गी तत्फलभोक्तेति यावत्। 'सजनिः' उत्पत्तियुक् स जीवः। यो निर्दोषो 'निष्कलो' भिन्नांशशून्यः षोडशकलाशून्यो वा 'सगुणः' ज्ञानानन्दादिगुणयुक्। 'परः' उत्तमः स परमात्मेति वा, यो जीवः सः उक्तगुणकः, यः परमात्मा स एवमादिगुण इति वा श्रुत्यर्थः। श्रुतिरित्यनन्तरं यतः इति शेषः। अस्य जीवपक्षे दोष एव न परपक्ष इति पूर्वेणान्वयः। अनेन—सूत्रे चशब्दस्योभयत्रान्वयः। युक्तिविरोधस्येति योग्यतयाऽन्वेति। दोषपदं च भावप्रधानं तदुक्तिलक्षकम्। तथाच कृत्स्नप्रसक्त्यादियुक्तिविरोधस्य जीवपक्षे दोषत्वस्यैवोक्तत्वात् नासौ तत्रादोषतां नेतव्यः। तथा जीवपक्ष एवास्य दोषत्ववचनात् न परमात्मपक्षेऽयं दोषः। एवं जीवस्य निर्दोषत्वपक्षे जीवेशयोः सदोषत्वनिर्दोषत्ववचनविरोधाख्यदोषात्स न युक्त इति त्रेधा सूत्रार्थ उक्तो भवति।

(८) ननु सा शक्तिर्यद्विषयिणी न भवति, यदा च नश्यति, तदा तत्र विरोधनियमान्न तया तत्परिहारो युक्त इत्याशङ्क्य परिहरत्सूत्रमुपन्यस्य

सर्वैर्युक्ता शक्तिभिर्देवता सा परेति यां प्राहुरजस्रशक्तिम् ।
नित्यानन्दा नित्यरूपाऽजरा च या शाश्वतात्मेति च यां वदन्ति ॥
इति चतुर्वेदशिखायाम् । अतो न केवलं विचित्रशक्तिः, किन्तु सर्वशक्तिरेव ॥ ३१ ॥

(९) सू—ॐ॥ विकरणत्वान्नेति चेत्तदुक्तम् ॥ॐ॥३२॥

न च करणाभावादनुपपत्तिरिति युक्तम् ।

व्याचष्टे—सर्वैति ॥ चतुर्वेदशिखायामुक्तमिति शेषः । ततः किमित्यत आह—अत इति ॥ उक्तत्वादित्यर्थः । अनेन तद्दर्शनादिति हेत्वंशस्य तस्यां श्रुतौ तथोक्तत्वादित्यर्थ उक्तो भवति । न केवलमित्यनेन सौत्रचशब्दः समुच्चयार्थतया व्याख्यातः । सर्वशक्तिरिति । सर्वदा सर्वविषयिणी सार्वकालिकी शक्तिर्यस्याः सा तथोक्ता । अनेन सर्वोपेतेति साध्यभागो व्याकृतो भवति । एवेति चशब्दस्यार्थान्तरोक्तिः । सा परमात्माख्यदेवतेति शेषः । न त्वसर्वशक्तिर्नापि कदाचिन्नष्टशक्तिरित्येवार्थः । अतः शक्त्या युक्तिविरोधपरिहारो युक्त इति भावः । स्पष्टः सूत्रार्थः । स्त्रीलिङ्गप्रयोगस्तु श्रुत्यनुसारेण । कवयो 'यामजस्रशक्तिं' नित्यशक्तियुतां प्राहुः । यां च 'शाश्वतात्मेति' निर्विकारस्वरूपिणीति वदन्ति । या च 'नित्यानन्दा' बहुव्रीहिरयम् । 'नित्यरूपा' नित्याऽऽकृतिरित्यपि तद्वदेव । न विद्यते जरा यस्याः सा तथोक्ता 'सा परा देवता' परमात्माख्या देवता, सा 'सर्वैः शक्तिभिः' लिङ्गव्यत्ययः । सर्वविषयिणीभिः सार्वकालिकीभिः शक्तिभिर्युक्तेति श्रुत्यर्थः । विषयबाहुल्याच्छक्तिभिरिति बहुवचनम् ।

(९) विष्णोर्जगत्कारणत्वमाक्षिप्य समाधत्तसूत्रमुपन्यस्य व्याचष्टे—विकरणत्वादिति ॥ न चेत्यारभ्य युक्तमित्यन्तेन आक्षेपांशो विवृतः । चः समुच्चये, एतच्छङ्कापरिहारसमुचितस्यैवोक्तन्यायस्य साध्यसाधकत्वात् । ईश्वरस्य करणाभावादित्यनेन विकरणत्वादित्यस्य विगतं करणं यस्मादिति विग्रहेण फलितार्थ उक्तो भवति । करणमिन्द्रियं करादि । अनुपपत्तिः । जगत्कर्तृत्वस्येति । अनेन नेत्यस्य साध्यसमर्पकस्य पूर्वपक्षांशे न च युक्तमित्यनेन सिद्धान्तांशे च आवृत्त्याऽन्वयः सूचितः ।

(१०) अपाणिपादो जवनो गृहीता पश्यत्यचक्षुस्स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥
(श्वे. ३-१९.)
न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते ।
पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥
(श्वे. ६-८.) इत्यादिश्रुतिभ्यः ।

---

(१०) कुतो न युक्तमित्यतस्तत्र हेतुत्वेन प्रवृत्तस्य यतस्तदुक्तमित्यस्य परोक्तहेतोरप्रयोजकत्वमसिद्धिं च प्रदर्शयतो यतस्तस्यां श्रुतौ पाण्यादिविरहिणोऽपि हरेर्ग्रहणादिकमुक्त्वा 'तस्य' करणराहित्यवचनस्य 'तत्' अप्राकृतविषयत्वं 'उक्तं' उपपादितं चेत्यर्थमभिप्रेत्य ननु साक्षादिममर्थं न काऽपि श्रुतिर्वक्ति, नाप्युपपादयति तत्कथमुच्यते तदुक्तमितीत्यसिद्धिशङ्कापरिहाराय सूत्रकृदभिप्रेताः श्रुतीरुदाहरति—अपाणिपाद इति ॥ अपाणिपाद इत्यारभ्य महान्तमित्यन्तमेकं वाक्यम् । 'न तस्य' इत्यन्यत् । 'न तत्समः' इत्यपरम् । 'पराऽस्ये' इति इतरत् । वाक्यचतुष्टयं श्वेताश्वतरश्रुतिगतं 'पराऽस्य' इत्याथर्वणेऽपि श्रुतम् । आदिशब्देन एतज्जातीयकं शाखान्तरवाक्यं गृह्यते । श्रुतिभ्य इति पञ्चमी तृतीयार्थे । तदुक्तमिति सौत्रपदमत्र सम्बध्यते । यत इति शेषः । अस्मातो न च युक्तमिति पूर्वेणान्वयः । तथा च 'अपाणिपादः' इति श्रुतौ पाण्यादिविरहिणोऽपि हरेर्ग्रहणाद्युक्त्याऽर्थादप्राकृतपाणिपादादेरुक्तत्वात् 'न तस्य कार्यम्' इति श्रुत्या च पाण्यादिराहित्यस्य प्राकृतविषयत्वेनोपपादितत्वात् 'न तत्समः' इति वाक्येऽपि सर्वोत्तमत्वोक्त्या प्राकृतपाण्यादिरहितत्वस्योपपादितत्वात् 'पराऽस्य' इत्यत्रापि परमशक्तित्वोक्त्याऽस्योपपादितत्वान्न तदुक्त्यभावो, नापि तदुपपादनाभाव इति भावः । सूत्रार्थस्तु स्पष्टः । श्रुतौ—स भगवान् 'अपाणिपादः' न विद्यते प्राकृतं पाणिपादं यस्य स तथोक्त इति प्राकृतभिन्नाप्राकृतपाण्यादिमानिति च द्वेधा व्याख्येयः । एवमचक्षुरित्याद्यपि व्याख्येयम् । अत एव तत्तदिन्द्रियोचितक्रियाकर्तृत्वमाह—जवन इत्यादिना । अत्रापाणिर्गृहीता अपादो 'जवनो' वेगेनागन्ता अचक्षुः पश्यति अकर्णः शृणोति इति योजना । स इति द्विर्ग्रहणात्स इत्यस्य सर्वत्र सम्बन्धः सूचितः ।

(११) सर्वोपेता चेति सामान्यपरिहारेऽपि विशेषयुक्त्यर्थं पुनराशङ्का॥३२॥

॥ इति श्रुतेस्तु शब्दमूलत्वाधिकरणम् ॥ ८ ॥

॥ ९. नप्रयोजनाधिकरणम् ॥

(१) यत्प्रयोजनार्थं सृष्ट्यादिः तदूनत्वादपूर्णता इति ।

'वेद्यं' ज्ञातव्यं सर्वं भूतं भवत् भविष्यच्च 'वेत्ति' जानाति। 'तस्य' हरेः कश्चन कोऽपि 'वेत्ता' ज्ञाता नास्तीत्यर्थः। नन्वन्यत्रादृष्टमपाण्यादेः गृहीतृत्वादिकं कथमीश्वरे घटते इत्यत आह—तमिति॥ 'तं' उक्तगुणकं 'अग्र्यं' सर्वश्रेष्ठं महान्तं पुरुषमाहुः कवयः अत उक्तं युक्तमित्यन्वयः। 'तस्य' हरेः 'कार्यं' प्रकृतिकार्यं 'करणं' पाण्यादीन्द्रियं नास्त्येवेत्यर्थः। यद्वा—कार्यं प्राकृतग्रहणादिकं तथाविधं करणं च नास्तीत्यर्थः। 'न तत्समश्च' इत्यत्राद्यश्चशब्दोऽवधारणे अन्त्यस्तुशब्दार्थः। तथाच भगवत्समान एव न दृश्यते अधिकस्तु कुतः स्यादित्यर्थः। 'अस्य' हरेः शक्तिः 'परा' उत्कृष्टा 'विविधा' विचित्रा 'स्वाभाविकी' यावद्द्रव्यभावनीति। तथैव सुधोक्तेः। ज्ञानं च बलं च क्रिया च एतद्रूपेति च श्रूयत इत्यर्थः। यद्वा—अस्य 'विविधा' सर्वविषयिणी परा च शक्तिः। श्रूयते ज्ञानं बलं क्रिया च श्रूयत इत्यर्थः। अस्येति भेदोक्तिस्तु विशेषबलाद्युज्यते।

(११) ननु 'सर्वोपेता' इति सूत्र एव विचित्राशेषशक्तिबलेन निखिलविरोधानां परिहृतत्वात्कथं पुनर्विकरणत्वादिति शङ्काऽवकाश इत्यत आह—सर्वेति॥ सूत्रेणेति शेषः। सामान्येति। अपिशब्दार्थात्। साधारण्येन सर्वविरोधानां परिहारे कृतेऽपीत्यर्थः। विशेषेति। विशेषतोऽसाधारण्येन अस्यैव चोद्यस्य परिहारानुकूलयुक्तिबोधनेच्छया पुनः शङ्का दर्शितेत्यर्थः। अतएव सिद्धान्ते प्राकृतशरीराभावेऽपि चिदानन्दाद्यात्मकविग्रहवत्त्वादिरूपा, 'अपाणिपादः' इत्यादिप्रमाणविशेषरूपा वा शङ्कापरिहारोपायभूता विशेषयुक्तिः सूत्रकृता नदुक्तमित्यनेनोक्तेति भावः॥

॥ इति श्रुतेस्तु शब्दमूलत्वाधिकरणम् ॥ ८ ॥

९. ॥ नप्रयोजनाधिकरणम् ॥

(१) अत्राधिकरणे ईश्वरस्य जगत्कर्तृत्वे निष्फलत्वादियुक्तिविरोधः परिहियते। सयुक्तिकं पूर्वपक्षयति—यदिति ॥ अत्र यच्छब्दो यत्रर्थे।

(२) अत आह—

सू—ॐ ॥ न प्रयोजनवत्त्वात् ॥ ॐ ॥ ३३ ॥

'अर्थेष एव परमानन्दः' (बृ. ६-३-३३.) इत्यादिना

यः पर इतिवत् किंशब्दार्थे च। तदूनत्वादिति तच्छब्दोऽपि बुद्ध्या विविक्तः तर्हीत्यर्थे भवति। विष्णोः स्यादिति शेषः। तथा च यदि 'प्रयोजनार्थं' तदुद्देशेन विष्णोः 'सृष्ट्यादिः' जगत्सर्जनविषयकप्रवृत्तिरङ्गीकृता स्यात्, तर्हि 'तदूनत्वात्' सृष्ट्यादेः पूर्वं तेन भाविना प्रयोजनेन 'ऊनत्वात्' तद्रहितत्वात् 'अपूर्णता' अनाप्तकामत्वं स्यात्, ततश्च अपूर्णता अपालकत्वं च स्यात्। पालकत्वोपलक्षितं सर्वकर्तृत्वं न स्याद्यज्ञदत्तवदित्येका योजना। एवं सृष्ट्यादिरीश्वरस्य यत्प्रयोजनार्थं किं प्रयोजनार्थं. न किञ्चित्प्रयोजनायेति यदि, तर्हि 'तदूनत्वात्' प्रवृत्तिमात्रेणैवोनत्वात् 'अपूर्णता' न सर्वकर्तृत्वं स्यात् इत्यपरा योजना। तथा चोभयथाऽपि प्रवृत्त्ययोगात् प्रकारान्तरस्य चाभावान्न विष्णोर्जगत्कर्तृत्वं युक्तमिति भावः।

(२) एवं प्राप्ते फलानुद्देशेनैव प्रवृत्तिरिति द्वितीयपक्षावलम्बनेन सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ इत्यादिना वाक्येन कृतकृत्यत्वावगमात् न प्रयोजनाय सृष्टिः परमेश्वरस्येति योजना। इत्यादिनेत्यनेनासिद्धिः परिहृता। कृतकृत्यत्वादित्यनेन प्रयोजनवत्त्वादित्यस्य नेत्यादिना च न प्रयोजनवत्त्वादित्यस्य विभक्तिविपरिणामेन व्याख्यानं कृतं भवति। परमेश्वरस्येत्यनुकर्षसिद्धत्वात् अनुक्तिः। आदिशब्देन 'निरनिष्टः सत्यकामः' इत्यादिकं गृह्यते। न च श्रुतेरेव साक्षात्प्राप्तप्राप्तव्यत्वापरपर्यायकृतकृत्यत्वसाधकत्वे टीकायां पूर्णानन्दत्वेन तत्साधनानुपपत्तिरिति वाच्यम्। पूर्णानन्दत्वेनेति टीकायाः पूर्णानन्दत्वप्रतिपादकवाक्येनेत्यर्थाश्रयणात्। अतएव सुधायां—न कर्तृत्वेन प्रयोजनवत्त्वं साध्यं, कृतकृत्यत्वेन प्रयोजनाभावस्य निश्चितत्वात्। न चासिद्धो हेतुः। 'अर्थेष एव परम आनन्दः' (बृ. ६-३-३३.) 'निरनिष्टो निरवद्यः' ( ) इति श्रुतेरेव साक्षात्कृतकृत्यत्वबोधकतोच्यते। यद्वा—टीकानुसारात् इत्यादिना सिद्धेन पूर्णानन्दत्वेन कृतकृत्यत्वावगमादिति भाष्यान्वयः। अस्मिन् पक्षे सुधास्थहेतु-

कृतकृत्यत्वान्न प्रयोजनाय सृष्टिः ॥ ३३ ॥

(३) किन्तु—

सू—ॐ ॥ लोकवत्तु लीलाकैवल्यम् ॥ॐ॥३४॥

शब्दो हेतुसाधकहेतुपरो द्रष्टव्यः। सौत्रपदे च प्रयोजनवत्त्वेन प्रयोजनवत्त्वादित्यावृत्या योज्यम्। सृष्ट्यादिरिति प्रकृतेऽपि पुनः सृष्टिरित्युक्तिः सृष्ट्यादिष्वेकैकमुखेनाप्याक्षेपपरिहारौ कर्तव्यावित्याशयेन। श्रुतावथेत्यर्थान्तरारम्भे। तथा च 'एषः' भगवानेव 'परमानन्दः' पूर्णानन्द इत्यर्थः। 'परम आनन्दः' (बृ. ६-३-३३.) इति भिन्नपदत्वेन पाठेऽप्ययमेवार्थो बोध्यः। न प्रयोजनाय सृष्टिरित्यनन्तरं यत इति शेषः। नेति चावर्तते। तथा च यतः परमेश्वरस्य न प्रयोजनाय न प्रयोजनोद्देशेन सृष्टिः सृष्ट्यादिप्रवृत्तिः अतो नापूर्णत्वादिदोषः अतएव न तस्य जगत्कर्तृत्वायोगः तथाऽऽप्तकामत्वेन दयासाध्यफलाभावात् न परप्रयोजनार्थमपि तस्य सृष्ट्यादिप्रवृत्तिर्युज्यते इति योजना।

(३) ननु नेश्वरः फलानुद्देशेन प्रवृत्तिमान्, चेतनत्वाद्यज्ञदत्तवदित्युपपत्तिविरोधात्कथं ईश्वरस्य फलानुद्देशेन प्रवृत्तिरित्याशयेन पृच्छति—किन्त्विति॥ तत्परिहाराय सूत्रमुपन्यस्य व्याचष्टे—लोकवदिति। यथेत्यारभ्य प्रयोजनापेक्षयेत्यन्तेन लोकवदित्यंशो व्याकृतः। 'लोके' भुवने 'मत्तस्य' उन्मत्तजनस्य 'सुखोद्रेकात्' अभिव्यक्तसुखात् नृत्तं नटनं गानं गीतिः। आदिपदेन निष्फलवार्तादिकं गृह्यते। 'लीला' क्रीडा दृश्यत इति शेषः। एवशब्दव्यावर्त्यं दर्शयति—न त्विति। अत्र दृष्टान्ते स्वपरप्रयोजननिषेधः। दार्ष्टान्तिके तु स्वप्रयोजनमात्रनिषेधः, ईश्वरप्रवृत्तेर्लोकानुग्रहार्थत्वाङ्गीकारात्। न चाप्तकामत्वेन तत्साध्यफलाभाव इत्युक्तमिति वाच्यम्। अस्वभावप्रवृत्तेः फलापेक्षितत्वेऽपीश्वरप्रवृत्तेः स्वभावत्वाभ्युपगमेन प्रयोजनानपेक्षत्वात्। न चात्र दृष्टान्ताभावः। दयालुप्रवृत्तेः सत्त्वात्। श्रुत्यादिसिद्धे तदनपेक्षत्वाच्च। लोकवदिति दृष्टान्तोक्त्या लब्धं दार्ष्टान्तिकं दर्शयति—एवमिति। सृष्टेरिति विपरिणम्येहानुवर्तते। एवमित्यावर्तते। तथा चैवं तथा परमेश्वरस्य 'सृष्टेः' तत्सम्बन्धिसर्जनादिप्रवृत्तेः 'एवं लीलाकैवल्यं' केवललीलात्वमेवेति योजना। एवेत्यनेन

यथा लोके मत्तस्य सुखोद्रेकादेव नृत्तगानादिलीला, न तु प्रयोजनापेक्षया, एवमेवेश्वरस्य ।

(४) नारायणसंहितायां च --

सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्ष्य तु ।
कुरुते केवलानन्दाद्यथा मत्तस्य नर्तनम् ॥

सौत्रतुशब्दो व्याकृतः । तथाच पूर्वपक्ष्युक्तानुमानस्योन्मत्तादौ व्यभिचारः । प्रेक्षावत्त्वेन हेतुविशेषणे व्याख्यानादिकाले निष्फलाङ्गुलिचालनकर्तरि व्यभिचारो दुरुद्धर इति भावः । प्रथमसूत्रार्थस्तु—नेश्वरप्रवृत्तिरन्येषामिव स्वप्रयोजनार्था । कुतः ? प्रयोजनवत्त्वेन कृतकृत्यत्वेन आप्तकामत्वेनेश्वरस्य प्रयोजनवत्त्वात् । यदर्थमीश्वरस्य प्रवृत्तिस्तस्य प्रयोजनस्याप्तकामत्वेन प्रागेवसिद्धत्वात् । यद्वा—ईश्वरप्रवृत्तेर्दयालुप्रवृत्ताविव परप्रयोजनवत्त्वात् । अथवा नेश्वरप्रवृत्तिः स्वप्रयोजनार्था, नप्रयोजनवत्त्वात् । नसमासोऽयम् । व्याख्यानादिकाले हस्तचालनादाविव सुखोद्रेकादानादाविव च प्रयोजनवत्त्वराहित्यादिति चन्द्रिकायामुक्तम् । द्वितीयसूत्रे – लोकवत्तिति तुशब्दोऽवधारणे, पक्षान्तराङ्गीकारभूचकः, किं त्वित्यर्थे च । लीलाकैवल्यमिति समस्तपदम् । स्वरूपार्थोऽयं कैवल्यशब्दः । ईश्वरस्य प्रवृत्तिरिति शेषः । तथा च नेश्वरस्य प्रयोजनोद्देशेन प्रवृत्तिः तस्याश्च लीलाकैवल्यं तथा पर्मेश्वरस्य तन्निमित्तप्रवृत्तेरपि 'लीलाकैवल्यं' केवललीलात्वं लीलारूपत्वमेव न तु प्रयोजनान्तरार्थत्वं न वा लीलार्थत्वम । अतः प्रयोजनानुद्देशे तस्य कीदृशी प्रवृत्तिरिति प्रश्नानवकाश इति सूत्रार्थः । न चैवमाद्यसूत्रार्थेनाप्यपि प्रयोजनमीश्वरस्येति तत्त्वप्रदीपविरोधः, अत्र प्रयोजनसामान्यनिषेधादिति वाच्यम् । तस्य लोकानुग्रहाय सृष्ट्यादिक्रियां करोतीति टीकानुसारादप्यपि स्वप्रयोजनं नास्तीति व्याख्यानव्यत्वात् । अत एव भारततात्पर्यनिर्णये 'भूत्यै निजाश्रितजनस्य' इति परप्रयोजनोक्तिः ॥

(४) अत्रैवार्थे स्मृतिमाह--नारायणेति ॥ हरिः सृष्ट्यादिकं न स्वप्रयोजनं 'अपेक्ष्य' उद्दिश्य कुरुते, किन्तु 'केवलानन्दात्' स्वरूपानन्दादेव कुरुत इति योजना । अत्र दृष्टान्तमाह—यथेति । प्रथमार्थे मत्तस्येति षष्ठी । तथाच यथा मत्तस्यानन्दादेव कुरुते तथेत्यर्थः । कुत

पूर्णानन्दस्य तस्येह प्रयोजनमतिः कुतः ।
मुक्ता अप्याप्तकामाः स्युः किमु तस्याखिलात्मनः ॥ इति ।

(५) 'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा'

एवं कल्प्यत इत्यत आह—पूर्णेति । 'तस्य' हरेः 'इह' सृष्ट्यादिविषये 'प्रयोजनमतिः' अनेन मम भविष्यत्प्रयोजनमस्तीति बुद्धिस्तदपेक्षा वा 'कुतो' न कुतोऽपीत्यर्थः । कुतो नेत्यतस्तत्र—आप्तकामत्वादिति हेतुः पूर्णेत्यनेनोक्तः । तस्यासिद्धिमाशङ्क्य कैमुत्तिकन्यायेन तं साधयति—मुक्ता इति । विशेषणसमुच्चयार्थोऽपिशब्दः । तथाच अनीश्वरा अपि 'मुक्ताः' जीवाः यदा आप्तकामाः स्युः तदा अखिलस्वामिनस्तस्य विष्णोराप्तकामता किमु वक्तव्येत्यर्थः । इति नारायणसंहितायामित्यन्वयः । सूत्रकारोक्तमुक्तमिति शेषः ।

(५) विवक्षिताशेषार्थप्रतिपादकत्वात् प्रथमं स्मृतिमुपन्यस्य सौत्रलीलाशब्दार्थविवेकायात्रैवार्थे माण्डूकेयीं श्रुतिमप्याह—देवस्येति ॥ चः समुच्चये । सूत्रकृदुक्तमाहेति शेषः । अत्र हि 'इच्छामात्रं प्रभोस्सृष्टिः' (भा. २-८.) इति पूर्ववाक्येन सृष्टेरीश्वरेच्छाधीनत्वरूपं निश्चितसिद्धान्तमुक्त्वा पुनर्भगवतो जगत्सृष्ट्या प्रयोजनसदसद्भावजिज्ञासायां तमेव सिद्धान्तं 'देवस्य' इत्यनेन सविशेषं विवक्षुः पूर्वपक्षावाह—'भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे' इति । तत्रेश्वरप्रवृत्तेः परोक्तं क्रीडार्थत्वमनङ्गीकृत्य तद्रूपत्वमङ्गीकुर्वाणो वेदपुरुष आह—देवस्येति । 'देवस्य' हरेः 'अयं' सृष्ट्यादिविषये 'एषः' इच्छा । भावे घञ् । तत्पूर्विका प्रवृत्तिरिति यावत् । स्वभाव एव न प्रयोजनाय भवति । कुतः ? यतः 'आप्तकामस्य' पूर्णकामस्य 'का स्पृहा' किं फलेच्छाऽस्ति न काऽप्यत इत्यर्थः । अयं च सुधायामुक्तः । न्यायदीपिकायां तु—'एषः' अवतारादिः देवस्य स्वभावः । सः स्वभावश्च 'अयं' देव एव, न तु ततो भिन्न इत्यर्थविशेष उक्तः । गीताभाष्यप्रमेयदीपयोस्तु—'अयमेषः' इयमिच्छेति व्याख्याय विष्णोः सर्वजनरक्षणायावतारेच्छा लीलारूपा स च स्वभाव इत्यर्थः । का स्पृहेति नेच्छामात्रनिषेधः, 'इच्छामात्रं प्रभोस्सृष्टिः' इति निश्चितसिद्धान्तकथनात् । किन्त्वेतत्साध्यस्वफलेच्छाया एवेति तत्त्व-

(मां. २-९.) इति च श्रुतिः ॥ ३४ ॥

॥ इति नप्रयोजनाधिकरणम् ॥ ९ ॥

॥ १०. वैषम्यनैर्घृण्याधिकरणम् ॥

(१) सर्वकर्तृत्वे वैषम्यनैर्घृण्ये तस्येति ।

(२) अतो वक्ति—

प्रदीपसत्तर्कदीपावल्योरुक्तम् । अत्र क्रीडैव लीला क्रीडा च स्वभाव एवेत्युक्तया सिद्धान्ते तस्याः प्रयोजनत्वं नाभिप्रेतमिति ज्ञायते । यथोक्तं माण्डूकभाष्ये—

तस्यापि विष्णोः सृष्टिं तु केचिदाहुरनैपुणाः ।
अतृप्तस्यैव भोगार्थं क्रीडार्थं तु विपश्चितः ॥
सा च क्रीडा स्वभावोऽस्य कुतोऽतृप्तया स्पृहा विभोः ॥ इति ॥

॥ इति नप्रयोजनाधिकरणम् ॥ ९ ॥

॥ १०. वैषम्यनैर्घृण्याधिकरणम् ॥

(१) अत्राधिकरणे पूर्वोक्तपरप्रयोजनरूपफलविषययुक्तिविरोधः परिह्रियते । सयुक्तिकं पूर्वपक्षयति—सर्वेति ॥ परप्रयोजनाय कर्मानपेक्षयेति शेषः । तथाच 'तस्य' ईश्वरस्य परप्रयोजनाय कर्मानपेक्षया सर्वजगत्कर्तृत्वेऽङ्गीकृते वैषम्यनैर्घृण्ये स्यातामित्यर्थः । अयं भावः—परप्रयोजनाय पारमेश्वरी सृष्टिरिति पूर्वोक्तमयुक्तं, स किं कर्मानपेक्षया परप्रयोजनाय सृष्टिं करोति ? उत तदपेक्षया । नाद्यः, तथासति सर्वेऽपि सर्वदा सुखिनः स्युः, न तु कदाचित्कश्चित् सुखिनः कश्चित् दुःखिनः । अन्यथा निर्निमित्तमीश्वरः कांश्चित्सुखयन् कांश्चिद्दुःखयन्निरये पतितानतिविह्वलानाक्रन्दतोऽनन्यनाथाननुद्विधीर्षुर्विषमो निर्दयश्च स्यात् । कर्मबोधकवेदाप्रामाण्यं च स्यात् । न द्वितीयः, अस्वातन्त्र्यापत्तेः । तथाच उभयथाऽपि दोषित्वान्नेश्वरस्य सर्वकर्तृत्वं युक्तमिति ॥

(२) एवं प्राप्ते सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ फलेति । सुखदुःखरूपेष्टानिष्टाख्यफलदातृत्वादित्यर्थः । अनेन सापेक्षत्वादिति सौत्रहेतोस्तात्पर्यमुक्तं भवति । फलदाने कर्मापेक्षासहितत्वादित्यक्षरार्थः ।

(५) भविष्यत्पुराणे—

पुण्यपापादिकं विष्णुः कारयेत्पूर्वकर्मणा ।
अनादित्वात्कर्मणश्च न विरोधः कथञ्चन ॥ इति ॥ ३६ ॥

(६) सू—ॐ ॥ उपपद्यते चाप्युपलभ्यते च ॥ ॐ ॥

॥ ३७ ॥

न च कर्मापेक्षत्वेन ईश्वरस्यास्वातन्त्र्यम् ।

तस्यैवापेक्ष्यतोपपत्तिरिति भावः । ननु पूर्वतनस्यापीश्वरनिमित्तत्वेन पुनर्वैषम्याद्यापादकत्वादनपेक्ष्यतैवेत्यत आह — तस्यापीति । पूर्वतनकर्मणोऽपि पूर्वं तत्पूर्वतनं कर्म कारणमिति हेतोः, तस्यापि तत्कारितत्वादित्येवार्थः । ननु यत्र कर्मापेक्षाशान्तिरूपं पर्यवसानं तदारभ्य वैषम्यादिरूपो दोषः स्यादित्यत आह—अनादित्वादिति । 'कर्मणः' कर्मपरम्परायास्तत्समुदायस्यानादित्वादिति ।

(५) सूत्रकृदुक्तार्थे पुराणसम्मतिमप्याह—भविष्यदिति ॥ न केवलं सूत्रे, किन्तु पुराणेऽपीति समुच्चये चशब्दः । इदमुक्तमिति शेषः । किमुक्तमित्यतस्तत्पठति—पुण्येति । पुण्यपापपदाभ्यां तत्साधनं कर्मोपलक्ष्यते । आदिशब्दात् तपआदि गृह्यते । जीवेनेति शेषः । 'पूर्वकर्मणा' स्वापेक्ष्येण निमित्तभूतेनेत्यर्थः । 'कर्मणः' स्वापेक्ष्यस्य । चशब्दात्तत्पूर्वतनकर्मण इति सूचितम् । तथाच कर्मपरम्परायाः अनादित्वात् 'कथंचन' केनापि प्रकारेण कार्यमूलकतया कारणकर्ममूलकतया वा 'विरोधो' वैषम्यनैर्घृण्याख्यो दोषो नास्तीत्यर्थः । इति भविष्यत्पुराण इत्यन्वयः ।

(६) नन्वीश्वरस्य कर्मापेक्षासहितत्वात् वैषम्याद्यभावेऽपि नियमेन कर्मापेक्षयैव फलदातृत्वादस्वातन्त्र्यं प्रसज्यत इत्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—उपपद्यत इति ॥ अस्वातन्त्र्यमित्यनन्तरं किन्तूपपद्यते च तदिति शेषः । चशब्दोऽवधारणे । तथाच नेश्वरस्य कर्मापेक्षत्वेन निमित्तेन 'अस्वातन्त्र्यं' स्वातन्त्र्यानुपपत्तिः, किन्तु तत्स्वातन्त्र्यमुपपद्यत एवेति योजना । अनेन उपपद्यते चेति प्रतिज्ञा व्याख्याता ॥

(७) द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
यदनुग्रहतस्सन्ति न सन्ति यदुपेक्षया ॥
इत्यादिना कर्मादीनां सत्त्वस्यापि तदधीनत्वात् ।

(८) न च पुनर्वैषम्याद्यापातेन दोषः । तादृशवैषम्यादेरुपलभ्यमानत्वात् ।

---

(७) ननु सापेक्षस्य कथं तदुपपद्यते इत्यतस्तत्र हेतुत्वेन प्रवृत्तस्य यतस्तदुपलभ्यते इत्यंशस्य तात्पर्यमाह—द्रव्यमित्यादिना॥ 'नर्ते त्वत्क्रियते' इत्यादिरादिशब्दार्थः । कर्मेत्यतः प्रागपेक्षणीयेत्युपस्कार्यम् । कालजीवादिः द्वितीयादिशब्दार्थः । 'सत्त्वस्य' स्वसत्त्वादेः । नकेवलं कर्मादिस्वरूपाणां, किंतु तेषां सत्तादेरपीत्यपिशब्दार्थः । 'तदधीनत्वात्' ईश्वराधीनत्वेनोपलभ्यमानत्वादित्यर्थः । तथाच स्वेच्छया नियमेन स्वाधीनसत्त्वादिमदपेक्षायामपि नास्वातन्त्र्यमिति भावः । अनेन यतस्तत्कर्मादिसत्त्वाद्यपि तदीश्वराधीनमुपलभ्यते स्मृत्यादाविति हेत्वर्थ उक्तो भवति । अत एव तत्त्वप्रदीपे उपपद्यते च तस्य स्वातन्त्र्यं, यत उपलभ्यते कर्मादेस्तदधीनत्वं श्रुतिस्मृत्योरिति प्रतिज्ञाहेत्वोर्योजना दर्शिता । केचित्तु—कर्मादीनामिति भाष्यं सूत्रे अध्याहृतहेतुपरं चशब्दसूचितहेतुपरं वा । द्रव्यमित्यादि च तस्यासिद्धिपरिहारायापिशब्दसूचितभागवतस्मृत्यादिप्रमाणोपन्यासरूपमित्याहुः । तत्तु तत्त्वप्रदीपविरुद्धं द्रव्यमिति स्मृत्युदाहरणेन 'एष ह्येव' इति श्रुत्युक्तकर्मणामीशाधीनत्वमयुक्तमनादित्वादिति चोद्यं च निरस्तं भवति । द्रव्यमित्यादावनादेरपि सत्त्वस्येशाधीनत्वोक्तेः । द्रव्यमिति स्मृतौ द्रव्यशब्देन प्रकृत्यादितत्त्वमुच्यते । कर्मेति धर्माधर्मौ । कालः प्रवाहरूपः प्रसिद्धः । स्वभावः प्रकृत्यादीनां परिणामादि । जीव इत्येतेषामभिमानी गृह्यते । 'यदनुग्रहतः' ईशस्यानुग्रहादेव इति सुधायां स्मृतिर्व्याख्याता ।

(८) ननु यदि कर्मादिसत्ताऽपि भगवदधीना, तर्हि तदपेक्षा नाम अनपेक्षैवेत्यर्थाद्भवति, तथाच पुनर्वैषम्याद्यापातः, तेन चेश्वरस्य दोषित्वं स्यादित्याशङ्कापरिहारायावृत्तमुपलभ्यते चेति सूत्रखण्डं तद्व्यावर्त्यशङ्काप्रदर्शनेन तत्साध्यं दर्शयन् तत्र हेतुत्वेन योजयति—नचेति ॥ यथा कर्मानपेक्षायां वैषम्यादिकमापतितं तथा पुनः पक्षान्तरेऽपि पूर्वमुत्पादित-

सू—ॐ ॥ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॐ ॥ ३५ ॥

कर्मापेक्षया फलदातृत्वान्न तस्य वैषम्यनैर्घृण्ये ।
'पुण्येन पुण्यं लोकं नयति पापेन पापम्' (प्र. ३-७.) इति हि श्रुतिः ॥ ३५॥

(३) सू—ॐ ॥ न कर्माविभागादिति चेन्नानादित्वात् ॥ ॐ ॥ ३६ ॥

तस्येश्वरस्येति हेतुसाध्ययोरन्वेति। वैषम्यनैर्घृण्ये इति । कर्मादिकमनपेक्ष्य निर्निमित्तं विभागेन ईश्वरस्य सुखदुःखप्रदत्वे कर्मादेः सुखदुःखसाधनत्वप्रतिपादकज्योतिष्टोमेनेत्यादिवेदाप्रामाण्यापादकतया दोषभूते ये वैषम्यनैर्घृण्ये प्रसक्ते ते न स्त इत्यर्थः । अनेन साध्यांशो व्याख्यातः । हेत्वसिद्धिपरिहारकतया तथाहीति सूत्रांशं व्याचष्टे—पुण्येनेति । इति हि श्रुतिरिति। हिशब्दो यत इत्यर्थे । अतः न हेत्वसिद्धिरिति वाक्यशेषः । अस्य हेतुवाक्येनान्वयः । षट्प्रश्नश्रुतिरियम् । अत्र जीवमीश्वर इति शेषः । तथा चेश्वरः 'पुण्येन' जीवपुण्यं निमित्तीकृत्य 'पुण्यं लोकं' पुण्यसाध्यं स्वर्गादिलोकं 'नयति' प्रापयति जीवमित्यर्थः । एवं ज्ञानेन मोक्षमिति च द्रष्टव्यम् । पापेन 'पापं' नरकादिकं दुःखबहुललोकं नयति । 'उभाभ्यां' समप्रधानाभ्यां पुण्यपापाभ्यां समदुःखसुखं मनुष्यलोकं नयति इति शिष्टश्रुत्यर्थः । यद्यपि षट्प्रश्नभाष्यटीकयोरियं श्रुतिरुदानाख्यमुख्यवायुपरतया व्याख्याता । तथापि परममुख्यवृत्त्या विष्णुपरत्वात् अत्रोदाहरणं युक्तम् । सूत्रं स्पष्टार्थम् ॥

(३) कर्मापेक्षया फलदातृत्वमाक्षिप्य समादधत्सूत्रमुपन्यस्यति—न कर्मेति ॥ अत्र कर्मेति व्यस्तपदस्य नञाऽन्वयमभिप्रेत्याक्षेपांशं व्याचष्टे—यदपेक्षयेति । 'असौ' ईश्वरो यदपेक्षया फलं ददातीत्युच्यते, तदपेक्षणीयं कर्मैवं नास्तीति प्रतिज्ञा विशिष्टप्रतिषेधपरा । नन्वस्ति पूर्वकर्मैवेत्यतः—अविभागादित्युक्तं सूत्रे । तत् लोके विभक्ते अस्वतन्त्र इति प्रयोगदर्शनात्त-

यदपेक्षयाऽसौ फलं ददाति न तत्कर्म 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषते' (कौ. ३-८.) इतिश्रुतेः कर्मणोऽपि तन्निमित्तत्वादिति चेत्—

(४) न, तस्यापि पूर्वकर्म कारणमित्यनादित्वात्कर्मणः ।

दनुसारेण अस्वतन्त्रत्वादित्यर्थकतया व्याचष्टे—कर्मणोऽपि तन्निमित्तत्वादिति । पूर्वकर्मणोऽपि भगवदधीनत्वादित्यर्थः । दोषपरिहारायापेक्ष्यस्यापीत्यपेरर्थः । न केवलं फलस्येति वाऽर्थः । तथाच कर्मणोऽपि स्वाधीनत्वान्निर्निमित्तं विषमाणां कर्मणां कारयितुः पुनर्वैषम्याद्यापातेन तत्परिहाराय तदपेक्षा सम्भवतीत्यपेक्ष्यं कर्म नास्तीति भावः । अनेन कर्माविभागादिति समस्तपदं चेति सूचितम् । न च हेत्वसिद्धिरित्याह—एष ह्येवेति । श्रुतेरिति । अस्य तन्निमित्तत्वावगमादित्यनेनान्वयः । तेनाविभागादित्यस्य अविभक्ततया परमात्माधीनतया श्रुत्युक्तत्वादित्यर्थ उक्तो भवति । श्रुतौ साधुकर्मेति मोक्षसाधनज्ञानादिकमुपलक्ष्यते । उन्निनीषतिशब्दोक्तमोक्षहेतुप्रसादस्य केवलकर्मासाध्यत्वात् । हिशब्दः प्रसिद्धौ । तथाच 'एषः' भगवान् 'यं' जीवं 'एभ्यो' भूर्भुवस्स्वराख्यलोकेभ्यः 'उन्निनीषते' ऊर्ध्वं नेतुमिच्छति 'तं' योग्यजीवं 'कर्म ज्ञानादिकं कारयति' तेन तत्सम्पादयतीत्यर्थः । अनेन मोक्षस्येच्छाविशेषरूपेश्वरप्रसादसाध्यतोक्ता भवति । उशब्दो विष्णुवाची । असाधुकर्म मिथ्याज्ञानोपलक्षकम् । तथाच एषः यमेभ्यो लोकेभ्यः 'अधो निनीषते' तमो नेतुमिच्छति, तमयोग्यजीवं । तेन असाधुकर्म कारयतीत्यर्थः । अयं च सुधारीत्योक्तः ।

(४) परिहारांशं व्याचष्टे—नेति ॥ कुतो नेत्यतस्तत्रापेक्षितहेतुमुपस्कुर्वन्नादित्वादिति हेतुं क्रमेण योजयति—तस्येति पूर्वकर्मण इत्यर्थः । सत्त्वादिति शेषः, नेत्याद्यावर्तते । तथा चेत्थं योजना—नापेक्ष्यकर्माभावो वक्तव्यः । कुतः ? पूर्वकर्मणस्तादृशस्य सत्त्वात् । ननु पूर्वस्यापि कर्मणो भगवन्निमित्तत्वेन वैषम्यादिपरिहारहेतुत्वान्नापेक्ष्यता सम्भवतीत्यत आह—तस्यापीति । तस्यापेक्ष्यकर्मणस्ततोऽपि पूर्वकर्मकारणमिति हेतोः, तस्यापि तत्पूर्वकर्मकारितत्वादिति यावत् । न केवलं पूर्वकर्मण इत्यपेरर्थः । तथाच

(९) स कारयेत्पुण्यमथापि पापं न तावता दोषवानीशिताऽपि ।
ईशो यतो गुणदोषादिसत्त्वे स्वयं परोऽनादिरादिः प्रजानाम् ॥

कर्मानुकूल्येन कर्मान्तरं कारयतीति कर्मापेक्षायामपि ईश्वरस्य वैषम्याद्यापातेन 'दोषः' दोषित्वं स्यादित्यपि न शङ्क्यम्। कुतः? तादृशस्य वेदाप्रामाण्यानापादकस्य स्वाधीनकर्मापेक्षया विषमफलप्रदानरूपस्य वैषम्यादेरदोषतया श्रुतौ 'उपलभ्यमानत्वात्' प्रतीयमानत्वादिति योजना। यद्वा—दोष इत्यनन्तरं किन्तूपपद्यते चेति शेषः। तथाच न पुनः वैषम्याद्यापातेन दोषः किन्तु तादृशमदोषतयैवोपपद्यते। कुतः? श्रुतौ तादृशवैषम्यादेस्तथोपलभ्यमानत्वादिति योजना। अनेन सौत्रपदयोरावृत्तिः चशब्दस्य हेत्वर्थत्वं च सूचितम्। अत एव तत्त्वप्रदीपे—उपपद्यते च तादृशवैषम्यादि। न तु दोषित्वापादकम्। कुतः? यतः श्रुतौ तथोपलभ्यत इत्युक्तम्। प्रथमयोजना तु टीकोक्ता। अत्रोपपद्यत इत्यस्य नावृत्तिः। किन्तूपलभ्यत इत्यस्यैव। अदोषतयेति शेषः। तथाच यतः श्रुतौ वैषम्यमदोषतयोपलभ्यते नैर्घृण्यं चादोषतयोपलभ्यते। अतस्तादृशयोस्तयोरदोषत्वात् ईश्वरे तदापादनं नानिष्टमिति साध्याध्याहारेणान्वयः। श्रुतौ पुण्यं पापं कारयेदित्येकवचननिर्देशात् सूत्रेऽपि तथा प्रयोगः। तथात्वे वैषम्यादेः प्रत्येकमन्वयः, वैषम्यादीत्यध्याहारेणैकान्वयो वा।

(९) कासौ श्रुतिरित्यतस्तामुदाहरति। स कारयेदिति॥ चतुर्वेदशिखायामित्यस्य उपलभ्यमानत्वादित्यनेनान्वयः। श्रुतौ स इत्यस्योत्तरवाक्यधिकारसूचकोऽथशब्दः। अपिशब्दो समुच्चयार्थो। तथाच 'सः' विष्णुः स्वार्धानपूर्वकर्मापेक्षया पुण्यं कर्म जीवेन कारयेत्। पापं कर्म च कारयेत्। एवं तस्य कर्मणः 'ईशिता' नियन्ताऽपि स एव। तावता न वैषम्यादिदोषवानित्यर्थः। तत्त्वप्रदीपे तु—स भगवान् स्वयमीशिताऽपि पुण्यस्य शोभनमेव फलं पापस्य तद्विपरीतमेवेत्येतदन्यथा कर्तुं समर्थोऽपि न तथा करोति। किन्तु पुण्यं पुण्यैः कारयेत् पापं पापैः। अथ मिश्रकर्मण्यपि विमिश्रैः कारयेच्चैतावता वैषम्यादिदोषवान्। कुतः? यतः 'परः' स्वतन्त्रः सः परमात्मा 'गुणदोषादिसत्त्वे' अन्येषु गुणदोषसम्बन्धापादने गुणदोषादीनां गुणदोषत्वापादने च स्वयमेवेशः अतः। किञ्चायं न

इति चतुर्वेदशिखायाम् ॥ ३७ ॥

॥ इति वैषम्यनैर्घृण्याधिकरणम् ॥ १० ॥

॥ ११. सर्वधर्मोपपत्त्यधिकरणम् ॥

(१) अवशिष्टैरुपसंहरति—

सू—ॐ ॥ सर्वधर्मोपपत्तेश्च ॥ ॐ ॥ ३८ ॥

सकर्तृकः, येन पराधीनतया दोषसम्भवः, अतो न तस्य दोष इत्याह—'अनादिः' उत्पादकशून्य इति। इतोऽपि न दोषसम्भव इत्याह—आदिः प्रजानामिति। प्रजोपलक्षितसर्वकर्तेत्यर्थः। न च कस्यापि स्वदोषेच्छा भवति। किमु सर्वकर्तुरतो न दोषवान्। किन्तु परमेश्वरः स्वातन्त्र्यात् सर्वगुणगणपरिपूर्ण एव स्वाभाविकीं स्वीयां स्थितिमनपोह्य त्रिविधान् धर्मान् त्रिविधैः कारयतीत्यभ्युपगमे श्रुत्याद्यनुग्रहश्चोपपद्यते। वक्ष्यन्ते च नियमास्तद्रूपाभावाः। तत्रोपपद्यते चैवंनियमवत्त्वं स्वतन्त्रस्य। उपलभ्यते चैवं स्वभावत्वं 'देवस्य' (मां. २-९.) इति श्रुतौ, इति श्रुतिर्व्याख्याता। अनेनोपपद्यते उपलभ्यत इत्यनयोरसकृदावृत्तिस्सूचिता।

॥ इति वैषम्यनैर्घृण्याधिकरणम् ॥ १० ॥

॥ ११. सर्वधर्मोपपत्त्यधिकरणम् ॥

(१) अत्राधिकरणे विष्णोः सर्वगुणपूर्तौ सर्वदोषराहित्ये च युक्त्यविरोध उच्यते। ननु सर्वेषां युक्तिविरोधानां परिहृतत्वात्किमुत्तरसूत्रेणेत्यत एतत्सूत्रतात्पर्यमाह—अवशिष्टैरिति ॥ पूर्णत्वमितिशेषः। तथाच विशिष्यप्रतिपादितेभ्यः स्रष्टृत्वादिगुणेभ्यः अवशिष्टैः सर्वगुणैः प्रतिपादितैः पूर्णत्वं 'उपसंहरति' निगमयत्यत्रेत्यर्थः। इदमुक्तं भवति—पूर्वाधिकरणेषु विष्णोः प्रत्येकमेकैकगुणविषये दोषाभावविषये च विरोधं परिहृत्य तत्समर्थनं कृतम्। तेभ्योऽवशिष्टाः ये सर्वगुणा दोषाभावाश्च तत्र सामान्यतो युक्तिविरोधपरिहारेण तान् समर्थ्य विष्णोः सर्वगुणपूर्णत्वविषये सर्वदोषाभाववत्त्वविषये च प्राप्तयुक्तिविरोधपरिहारेण तत्प्रकरणमत्राधिकरणे समापयति सूत्रकार इति। यथोक्तं प्रमेयदीपे 'उपसंहरति'

गुणाः श्रुताः सुविरुद्धाश्च देवे सन्त्यश्रुता अपि नैवात्र शङ्का ।
चिन्त्या अचिन्त्याश्च तथैव दोषाः श्रुताश्च नाज्ञैर्हि तथा प्रतीताः ॥

प्रकरणं समापयतीति । अत्र भाष्ये तृतीया द्वितीयार्थे । समर्थ्य पूर्णत्व-मितिपदद्वयमध्याहार्यमिति ध्येयम् । न विष्णोस्सर्वगुणपूर्णत्वं युक्तं, चेतनत्वात् जीववत्, अन्यथाऽन्यस्यापि तत्स्यादविशेषादितिप्राप्ते सिद्धान्तयत्सूत्रं पठित्वा व्याचष्टे—सर्वेति । इति सर्वधर्मोपपत्तेरिति । एवंरूपसर्वधर्मोपपादकश्रुतेरित्यर्थः । क्वचित् 'सर्वगुणोपपत्तिश्रुतेश्च' इतिपाठः । गुणेतिधर्मशब्दव्याख्यानम् । न केवलं स्वातन्त्र्यादिना विष्णोः सर्वधर्मोपपत्तिः, किन्तु 'गुणाः श्रुताः' (सौपर्णश्रुतिः.) इति सर्वधर्मोप-पादकश्रुतेश्चेति समुच्चये चशब्दः । तत्त्वप्रदीपे तु—'इति सर्वगुणोपपत्ति-श्रुतेः' कयापि विधया दोषाभावश्रुतेश्चेति चशब्दार्थ उक्तः । अस्य हेतोः चशब्दसूचितेन नायुक्तं विष्णोः पूर्णत्वमितिसाध्येनान्वयः । चेतनत्वं त्वप्रयोजकं श्रुतिविरुद्धं चेति भावः । सूत्रार्थस्तु स्पष्टः । वेदे 'श्रुता गुणाः' अणुत्वमहत्वादिशुभधर्माः 'सुविरुद्धाश्च' लोकदृष्ट्याऽतिविरुद्धाः अन्यत्र सहादृष्टा अपि 'देवे' हरौ सन्त्येव, न तु तेषां विरुद्धतया मिथ्यात्वं कल्पनीयमित्यर्थः । न केवलं विरुद्धा इत्यपिशब्दार्थः । एवं हरौ 'अश्रुताः' वेदानुक्ताश्च रमाचतुर्मुखवाणीचिन्त्या गुणास्सन्ति । तर्हि यावन्तो रमादिभिश्चिन्तयितुं शक्यन्ते तावन्त एव गुणाः किमित्यतो नेत्याह—अचिन्त्या इति । यथा रमादिभिश्चिन्त्यास्सन्ति, तथा तैरचिन्त्याश्च गुणाः सन्तीत्यर्थः । ननु यथा गुणाः श्रुताः चिन्त्या अचिन्त्याश्च देवे सन्ति तथा दोषा अपि किमित्यतो नेत्याह—दोषा इति । देवे दोषाः श्रुता एव न सन्ति, नापि चिन्त्याः, किमुपुनरचिन्त्या दोषा न सन्तीति वक्तव्यमित्यर्थः । ननु कथं न दोषाः श्रुताः 'जनितोऽत विष्णोः' ( ) इत्यादौ प्रतीतेरित्यत आह—अज्ञैरिति । मिथ्यादृग्भिर्हि तथा श्रुता इति सन्तीति च प्रतीताः, न तु ज्ञानिनामित्यर्थः । अयं चार्थस्तत्त्वप्रदीपन्यायदीपिका-सूक्तः । न चाश्रुता रमादिचिन्त्याः सन्ति चेत् 'अनुक्तं पञ्चभिर्वेदैर्न वस्त्वस्ति कुतश्च न' इत्युक्तिविरोध इति वाच्यम् । सामान्यतः श्रुताः विशिष्याश्रुता इत्यर्थस्येह विवक्षितत्वेन विरोधाभावात् । इयं च गीता-

इति सर्वधर्मोपपत्तेरिति ॥ ३८ ॥

॥ इति सर्वधर्मोपपत्त्यधिकरणम् ॥ ११ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
ब्रह्मसूत्रभाष्ये द्वितीयस्याध्यायस्य
प्रथमः पादः
॥ ॐ ॥

तात्पर्योक्तरीत्या ऋग्वेदे सौपर्णशाखाश्रुतिः । गीताभाष्ये तु इयं जाबालि-खिलश्रुतिरित्युक्तम् । सुपर्णदृष्टाया अपि श्रुतेर्जाबालिदृष्टत्वसम्भवाद-विरोधः ॥

॥ इति सर्वधर्मोपपत्त्यधिकरणम् ॥ ११ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां
श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण
श्रीमज्जगन्नाथयतिना कृतायां
श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां
द्वितीयाध्यायस्य प्रथमः पादः
॥ ॐ ॥

॥ १. रचनानुपपत्त्यधिकरणम् ॥

(१) इतरेषां चानुपलब्धेरिति सामान्यतो निराकरणं समयानां कृतम्। विशेषतो निराकरोत्यस्मिन् पादे।

(२) अचेतनप्रवृत्तिमतं प्रथमतो निराकरोति—

(३) सू—ॐ ॥ रचनानुपपत्तेश्च नानुमानम्॥ ॐ ॥

॥ १ ॥

॥ १. रचनानुपपत्त्यधिकरणम् ॥

(१) एतत्पादार्थं दर्शयति—इतरेषामिति ॥ तानिति शेषः। तथाच 'इतरेषां चानुपलब्धेः' इति सूत्रे येषां समयानां दर्शनानां तदुक्तफलानुपलब्ध्याऽनासोक्तत्वेन च लिङ्गेन निराकरणं कृतं तान् कपिलकणादादिसमयान् निराकरोत्यस्मिन् पादे सूत्रकार इति योजना। ननु प्राङ्निराकृतानां पुनर्निराकरणं व्यर्थमित्यत आह—सामान्यतो विशेषत इति। योजना तु सामान्यतो विशेषत इति पदद्वयप्रक्षेपेण पूर्ववदेव। तथाच प्राक्सामान्यतो निराकरणं कृतम्। नैतावताधिकारिणश्शास्त्रे निश्शङ्का प्रवृत्तिर्युज्यते। तेषामनादिकालानुवृत्तत्वात्प्रतीतिसुन्दरत्वाच्च। अतोऽधिकारिणो निश्शङ्कप्रवृत्त्यर्थं प्राङ्निराकृतानेव समयान्विशेषतया एकैकपक्षानुवादेन निराकरोत्यस्मिन्पाद इति न वैयर्थ्यमिति भावः।

(२) एतत्पादीयाद्याधिकरणार्थं दर्शयति—अचेतनेति॥ ईश्वरनिरपेक्षाचेतनप्रकृतेरेव महदादिकार्यकरणे प्रवृत्तिरिति यन्नैरीश्वरसाङ्ख्यमतं तत् 'प्रथमतः' अस्य पादस्य प्रथमेऽधिकरणे निराकरोति सूत्रकृदित्यर्थः। इतरसमयापेक्षया प्रबलत्वादतिविरोधित्वादतितुच्छत्वाच्चेति भावः।

(३) अत्र नानुमानमित्यंशव्याख्यानेनैव पूर्वपक्षः प्रदर्शितो भवतीत्याशयेन तमप्रदर्श्य सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे—रचनेति ॥ रचनानुपपत्तेरित्यस्यैकपदत्वे तदन्वययोग्यपदं दर्शयति—अचेतनस्येति। हेतुगर्भविशेषणमेतत्। प्रधानस्येति विपरिणामेनाकृष्यते। रचनेत्यस्य भिन्नपदत्वेऽत्र स्वतःप्रवृत्तीत्येकं पदम्। तथात्वे बहुव्रीहिः। प्रधानमित्यनेनान्वेति। अनुपपत्तेरित्यत्र नञ् विरुद्धार्थः। स्वमतेऽपीश्वरप्रेरित-

अचेतनस्य स्वतः प्रवृत्त्यनुपपत्तेर्नानुमानपरिकल्पितं प्रधानं जगत्कर्तृ ।

(४) चशब्देन प्रमाणाभावं दर्शयति ॥ १ ॥

चेतनप्रवृत्त्यभ्युपगमाद्बाधितमेतदित्यत उक्तं—स्वत इति । ईश्वरनिरपेक्षस्येत्यर्थः । प्रवृत्तिर्यत्नः रचनपदव्याख्यानमेतत् । 'अनुपपत्तेः' उपपत्तिविरुद्धत्वात् । अनेन सूत्रे अचेतनस्य स्वतइति शेषः कार्यः । नेत्यस्य रचनेत्यनेन संबंधभाष्ये स्वतः प्रवृत्तीत्यत्रापि अन्वयः । नेत्यावृत्योभयत्रान्वयः । सूत्रे अनुमानमिति वा आनुमानिकमिति वा छेदं अनुमीयत इत्यनुमानमिति व्युत्पत्तिं जगत्कर्तृ इत्यध्याहारं चाश्रित्य पर्यवसितार्थमाह—आनुमानेति । 'परिकल्पितं' सिद्धम् । प्रधानमिति शेषोक्तिः । अनेन नानुमानं प्रधानं जगत्कर्तृ इति प्रतिज्ञान्तरं दर्शितम् । तथा चेत्थं सूत्रभाष्ययोजना—अनुमानं महदादिकं स्वसदृशकारणकं कार्यत्वात् पटवदित्यनुमानेन सिद्धं प्रधानं न जगत्कर्तृ । कुतः ? यतो नास्य रचना न प्रधानं स्वतःप्रवृत्ति ईश्वरनिरपेक्षप्रवृत्तिमत् । न चासिद्धिः । अचेतनस्य रचनानुपपत्तेः । रचनायाः स्वतःप्रवृत्तेरचेतनत्वोपपत्तिविरुद्धत्वात् । अनेन प्रधानस्य स्वतः प्रवृत्त्यभावे अचेतनत्वाख्यहेतुसूचनादसिद्धिः परिहृता । तद्विरुद्धोपपत्तेरेव तदभावसाधकत्वात् । यद्विरुद्धं लिङ्गं तत्तदभावसाधकं यथा नित्यत्वविरुद्धकृतकत्वमनित्यत्वसाधकमितिव्याप्तेः । यद्यपि नानुमानमुपपत्तेरिति सुवचम्, सर्वस्यापि हेतोः सङ्गहात् । तथापि विरोधिहेतुप्राबल्यसूचनाय विरोधस्फोरणाय चैवमुक्तम् । अतएवाचेतनस्येति पदमध्याहृतम्, असम्भवादित्यनुक्त्वाऽनुपपत्तेरिति चोक्तम् ।

(४) प्रामाणिकं प्रधानस्य कर्तृत्वं न युक्त्या निराकर्तुं शक्यमित्यतः प्रवृत्तस्य सौत्रचशब्दस्यार्थमाह—चशब्देनेति ॥ प्रमाणाभावमिति । वादिनो हेतुकत्वेनात्र प्रमाणशब्दोऽनुमानपरः । वस्तुस्थितिकथनार्थं सामान्योक्तिः । अचेतनस्य स्वतः प्रवृत्तौ जगत्कर्तृत्वे चेति शेषः । 'दर्शयति' समुच्चिनोति सूत्रकृदित्यर्थः । अनेन न केवलं प्रकृतिकर्तृत्वे स्वतःप्रवृत्तौ च प्रमाणविरोधः, अपि तु प्रमाणाभावश्च । न चानुमानं मानम्, 'रचनानुपपत्तेः' अनुमानरचनानुपपत्तेः कार्यत्वाद्यनुमानं तु कारणतामात्रसाधकतया सिद्धसाधकत्वान्न प्रकृतोपयोगीति सूत्रस्य वृत्त्यन्तरं दर्शितं भवति ।

(५) सू—ॐ ॥ प्रवृत्तेश्च ॥ ॐ ॥ २ ॥

चेतनस्य स्वतः प्रवृत्तिदर्शनाच्च ॥ २ ॥

(६) सू—ॐ ॥ पयोऽम्बुवच्चेत्तत्रापि ॥ ॐ ॥ ३ ॥

---

(५) एवं प्रधानस्य स्वतःप्रवृत्तिकर्तृत्वे अचेतनत्वस्वतःप्रवृत्तिशून्यत्वप्रमाणाभावैः निराकृत्य युक्त्यन्तरेणापि तन्निराकुर्वन्सूत्रमुपन्यस्य व्याचष्टे—प्रवृत्तेश्चेति ॥ चेतनस्येति सावधारणम् । तथाच चेतनस्यैव कुलालादेर्घटादिसृष्टौ 'प्रवृत्तेः' व्यापारस्य 'दर्शनात्' अहं करोमीत्यनुभवसिद्धत्वादित्यर्थः । अचेतनस्यापि चेतनाधीनप्रवृत्तिदर्शनाद्व्यभिचारपरिहाराय 'स्वतः' इत्युक्तम् । चेतननिरपेक्षेत्यर्थः । अनेन सूत्रे चेतनस्य स्वतो दर्शनादितिपदत्रयमध्याहार्यमिति सूचितम् । चशब्दो न केवलमचेतनत्वसाधितस्वतःप्रवृत्तिशून्यत्वाख्यानुमानात्, नापि प्रधानकर्तृत्वसाधकप्रमाणाभावान्नानुमानं जगत्कर्तृ, किन्तुमहदादिसृष्टिश्चेतनेच्छानुसारिणी सृष्टित्वाद्घटादिसृष्टिवदित्यनुमानान्तरविरोधाच्चेति हेतुसमुच्चयार्थः । न चेदं कथं सूत्रोक्तमिति वाच्यम् । चेतनस्य ज्ञातुः प्रवृत्तेरित्यनेनास्योक्तत्वात् । प्रवृत्तिर्हि क्रिया, सा च कृतिं विना नोपपन्ना । सा च नेच्छां विना । सा च न ज्ञानं विनेति प्रवृत्त्यादिकार्याणां स्वस्वकारणाविनाभूतत्वेन प्रवृत्त्या इच्छापूर्वकत्वसाधनसम्भवात् । दर्शनादित्यस्य न दृष्टान्ते साध्यवैकल्यमित्यध्याहृतसाध्येनान्वयः ।

(६) उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्य व्याचष्टे—पयोऽम्बुवदिति ॥ अचेतनस्येत्यनन्तरं प्रधानस्येति शेषः । चो विशेषणसमुच्चये । यद्यपि तथापीत्यर्थे, न केवलं चेतनस्य किं त्वचेतनस्यापीतिसमुच्चये वाऽपिशब्दः । सूत्रे व्यस्तस्य रचनेत्यतोऽनुवृत्तस्य रचनाशब्दस्यार्थमाह—प्रवृत्तिरिति । युज्यत इति शेषोक्तिः । तथा चेत्थं पूर्वपक्षांशार्थः—यथाऽचेतनस्य पयसः क्षीरस्य दध्याकारेण परिणामः अम्बुनो जलस्य गतिश्च दृष्टा । तथा अचेतनस्यापि प्रधानस्याचेतनत्वेऽपि रचना स्वतःप्रवृत्तिर्युज्यत इति चेदिति । अनेन सिद्धान्तयुक्त्याद्यानुमानस्य प्रत्यनुमाने पक्षसाध्यहेतुदृष्टान्तप्रदर्शनेन प्रतिपक्ष उक्तो भवति । व्याप्तयभिधानायानेकदृष्टान्तोपा[illegible]म् । स्वतः परिणामे पयः, अम्बु तु प्रवृत्तिमात्रे दृष्टान्त इति केचित् ।

पयोऽम्बुवदचेतनस्यापि प्रवृत्तिर्नयुज्यत इति न युक्तम् ।
'एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यस्स्यन्दन्ते
याश्च श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां च दिशमनु'
(बृ. ५-८-९.) 'एतेन ह वाव पयो मण्डं भवति' ( )
इत्यादि तत्रापीश्वरनिमित्तप्रवृत्तिश्रुतेः ॥ ३ ॥

(७) सू—ॐ ॥ व्यतिरेकानवस्थितेश्चा-
नपेक्षत्वात् ॥ ॐ ॥ ४ ॥

अनेन सिद्धान्तिहेतोर्व्यभिचाराभिधानायाभिहिते पयोऽम्बादौ स्वतःप्रवृत्त्यभावरूपप्रथमसाध्यस्याभावो दर्शितः । अचेतनस्येत्यनेन हेतुरपि । तथा चाचेतनत्वहेतोः स्वेनैव सत्प्रतिपक्षितत्वात्पयोऽम्बादौ व्यभिचारित्वाच्च न साधकत्वमिति भावः । सौत्रापिपदं नत्रस्नमाकर्षकमिति भावेनाह— नेति । इत्यादीत्यादेर्भक्तिको निर्देशः । इत्यादावित्यर्थः । 'तत्रापि' पयोऽम्बादावपि न केवलं प्रधान इत्यपिशब्दार्थः । सौत्रापिशब्दः ईश्वराख्यचेतनार्थानप्रवृत्तेराकर्षकश्चेति भावेनाह- ईश्वरनिमित्तेति । पूर्वसूत्राध्याहृतस्य दर्शनादित्यस्य इहानुवृत्तिः कार्येतिभावेन तदर्थमाह श्रुतेरिति । तथाच पूर्ववाक्यप्रत्यनुमानदृष्टान्ते पयोऽम्बादौ सिद्धान्त्यभिमतसाध्यसत्त्वान्न तदनुमानस्य सत्प्रतिपक्षता न वा व्यभिचार इति भावः । श्रुतेः प्रावल्यात्तत्क्रमानुसारेण सौत्रक्रमातिक्रमः कृतः । अन्यथा एतेनेति वाक्यमादावुदाहरेत् । बृहदारण्यके एतस्यवेत्येकं वाक्यम् । एतेनेत्यन्यत्तत्रैव । तदर्थस्तु -याः अन्याः विलक्षणाः काश्चिन्नद्यः प्राच्यां दिशि स्थिताः याश्चान्याः काश्चित्प्रतीच्यः प्रतीच्यां दिशि स्थिताः नद्यः श्वेतेभ्यः तन्नामकपर्वतेभ्यः । बहुवचनमाद्यर्थे । सकाशादिति शेषः । यां यां दिशमनुस्यन्दन्ते स्रवन्ते ताः नद्यः एतस्याक्षरस्य भगवदाख्यस्य प्रशासने । निमित्तसप्तमीयम् । आज्ञामात्रात्तां तां दिशमनुस्यन्दन्ते । एतेन भगवता पयः क्षीरं मण्डं दधि भवति तद्रूपं भवति । यद्वा—मण्डं दधिभावं भवति प्राप्नोति दध्युपादानं भवतीति वेति ।

(७) ननु श्रुतिसामर्थ्येन पयोऽम्बुनोः प्रवृत्तेरीश्वराधीनतया तत्र

'न ऋते त्वत्क्रियते किञ्चनारे' (ऋ. १०-११३-९.) इति

व्यभिचाराभावेपि अयस्कान्तशिलादिरूपाचेतनान्तरस्य प्रवृत्तौ सिद्धायां भविष्यति तत्र व्यभिचारः सेत्स्यति च प्रधानस्य स्वतः प्रवृत्तौ साध्यायामयस्कान्तादिकमेव निदर्शनमुदाहरणनियमस्यानाश्रयणीयत्वादित्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—व्यतिरेकेति ॥ इतीत्यनन्तरं श्रुत्येति अनवस्थितेरित्यनन्तरं सिद्धत्वादिति च शेषः। यद्वा—इत्यनवस्थितेरसत्त्वश्रुतेरित्यर्थः। तद्व्यतिरेकेणेत्यनेनापि पदेन प्रकृत ईश्वरोऽत्र व्यतिरेकप्रतियोगितया संयोज्य इति सूचितम्। सौत्रचशब्दस्यार्थमाह—कस्यापि कर्मण इति। किञ्चित्कर्तृककर्मण इति व्यधिकरणे षष्ठ्यौ। यदा सामानाधिकरण्ये षष्ठ्यौ अपिरभिव्याप्तौ। तदा अनवस्थितेरित्यनन्तरं अत इति शेषः। अत इति अनपेक्षितमिति चावर्तते। अचेतनेति। अचेतनस्यैव स्वतः प्रवृत्तिरितिवादिनो मतमित्यर्थः। तथा चेत्थं सूत्रभाष्ययोजना—नर्ते इतीश्वरव्यतिरेकेण तं विना कस्यापि कर्मणोऽनवस्थितिश्रुतेर्नाचेतनत्वहेतोः कुत्रापि व्यभिचारः न वा पूर्ववाद्युक्तानुमाने दृष्टान्तलाभः। यतएवमतोऽचेतनवादिमतमनपेक्षमनपेक्षितम्। अपेक्षापदोपलक्षितप्रमाणविरुद्धमप्रामाणिकं चातोऽनपेक्षत्वादनपेक्षितमेव प्रेक्षावतां सद्भिरनादरणीयमेवातोऽनपेक्षत्वादपेक्षाशब्दितादरराहित्यान्नैतद्विरोधः प्रकृतार्थस्येति। यद्वा—अयस्कान्तादेरपि पूर्वसूत्रेणैव निरासान्सुधोक्तरीत्या व्यतिरेकानवस्थितेरीश्वरव्यतिरेकेण कस्यापि चेतनस्यापि कर्मणः प्रवृत्तेरभावात्। जडस्य किमु वाच्यमित्यनपेक्षितमेवाचेतनवादिमतमिति कैमुत्यन्यायपरत्वेनेदं व्याख्येयम्।

'निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम्। न ऋते त्वत्क्रियते किं च नारे महामर्कं मघवन् चित्रमर्च' (ऋक्सं. ८-६-१३.) इति ऋङ्मन्त्रस्यायमर्थः। हे गणपते इन्द्रियगणस्वामिन् मघवन् धनवन् यशस्विन् मखपते इति वा। भगवन् त्वं अर्चकानामिन्द्रियगणेषु निषुसीद सुसम्यक्निषीद स्थितो भव। तत्र स्थित्वा च महां महान्तं पूज्यं अर्कं अरं अलं कं सुखं यस्य स तथोक्तः परमानन्दयुतम्। चित्रमद्भुतमाश्चर्यतमं त्वां त्वमेव पूजय। कुतो ममैव पूज्यत्वमिति मावोचः। यतस्त्वामेव कवीनां ज्ञानिनां विप्रतमं विशेषेण प्रकृष्टतममाहुः कवयः। अतस्तवैव पूज्यत्वम्।

तद्व्यतिरेकेण कस्यापि कर्मणोऽनवस्थितेः अनपेक्षितमेवाचेतनवादिमतम् ॥ ४ ॥

॥ इति रचनानुपपत्त्यधिकरणम् ॥ १ ॥

॥ २. अन्यत्राभावाधिकरणम् ॥

(१) सेश्वरसाङ्ख्यमतं निराकरोति । यथा पृथिव्या एव पर्जन्यानुगृहीतं तृणादिकमुत्पद्यते, एवं प्रधानादीश्वरानुगृहीतं जगदिति ॥

न केवलं पूज्यत्वं तवैव । किन्तु पूजकत्वमपि तवैव मुख्यम् । नान्यस्य । कुतः ? यतस्त्वदृते त्वद्विना आरे दूरे समीपे वा केनचित् किञ्चन स्पन्दनमपि न क्रियते अत इति ॥ १ ॥

॥ इति रचनानुपपत्त्यधिकरणम् ॥

॥ २. अन्यत्राभावाधिकरणम् ॥

(१) एतदधिकरणार्थं दर्शयति—सेश्वरेति ॥ प्रधानमेव जगत्कर्तृ, तस्य गुणभूतत्वेनेश्वरोऽस्तीति वदन् सेश्वरः, स चासौ साङ्ख्यश्च तस्य पतञ्जलेर्मतं निराकरोत्यस्मिन्नधिकरणे सूत्रकृदित्यर्थः । सिद्धान्तप्रतिज्ञापरेण न तृणादिवदित्यनेन सूचितं पूर्वपक्षमाह—यथेति । पृथिव्या इति पञ्चमी । उपलक्षणमेतत् । कलमादिबीजाच्चेत्यपि द्रष्टव्यम् । एवशब्दस्योत्तरत्राप्यन्वयः । प्रधानपदं पुरुषस्याप्युपलक्षकम् । तथाच—यथा स्वाधीनोपादानत्वशक्तिमत्या एव केवलायाः पृथिव्याः, पुनर्वेदवादिन इव ईश्वराधीनत्वशक्तिमत्याः, एवं स्वाधीनबीजत्वशक्तियुक्तात्कलमादेश्च सकाशात् स्वोत्पत्तौ पृथिव्यनुग्राहकेण तत्सन्निधिमता तदनुकूलेन पर्जन्येनानुगृहीतं तदनुग्रहसहितं तत्कर्तृकस्वोत्पत्तीच्छाविषयीकृतं 'तृणादिकं' अङ्कुरादिकमुत्पद्यते । तथा प्रधानात्स्वाधीनोपादानत्वशक्तियुक्तादेव केवलात्, न पुनरीश्वराधीनशक्तियुक्तात् । एवं देहादिसम्बन्धेनोत्पत्तौ या शक्तिः सा बीजशक्तिः स्वाधीनतच्छक्तियुक्तात्पुरुषाच्च स्वोत्पत्तौ स्वोपादानभूतप्रकृत्यनुग्राहकेणेश्वरेणानुगृहीतं तत्कर्तृकस्वोत्पत्तीच्छाविषयीकृतं जगदुत्पद्यत इत्यर्थः । तथाचेश्वरस्य प्रेरकत्वबीजावापकर्तृत्वाभावेऽपि

(२) अतो ब्रवीति—

सू—ॐ ॥ अन्यथाभावाच्च न तृणादिवत् ॥ ॐ ॥५॥

(३) 'यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्थितः ॥

सन्निधिमात्रेण प्रकृत्यनुग्राहकत्वमस्त्येवेति तदर्थमीश्वरोऽङ्गीकार्य एवेति न तद्वैयर्थ्यशङ्केति भावः । अत्र दृष्टान्तदार्ष्टान्तिकयोः कार्ये पर्जन्येश्वरानुग्रहोक्तिः कारणेऽपि तदनुग्रहोपलक्षणार्था । सिद्धान्ते सौत्रचशब्देन तस्य व्यावर्तनात्प्रकृत्यनुग्रहशक्तिरेवेश्वरस्येति पतञ्जलिनाऽङ्गीकारादिति सुधोक्तेश्चेति ध्येयम् ।

(२) सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ श्रुत्युदाहरणेन हेत्वसिद्धिः परिहृता । 'अन्यत्र' ईश्वरात् 'राज्ञि राष्ट्रं' इतिवत्, अन्यत्राभावादित्यस्यान्यार्थानत्वेनाभावादित्यर्थः । अवगमोपलक्षणमेतत् । तथाचेत्यादिश्रुतिभ्योऽन्यत्र जगतोऽभावावगमादित्यन्वयः । तृणादिवदिति । तृणादीनामुत्पत्तौ यथा पर्जन्योऽनुग्राहक एव, न स्वतन्त्रोत्पादकः, तथा जगदुत्पत्तावीश्वरस्यानुग्राहकत्वमात्रं न, किन्तु स्वातन्त्र्येण तदुत्पादकत्वमेवेत्यर्थः ।

(३) यच्चेति तैत्तिरीयवाक्यम् । ब्रह्मण्येवेत्यादीनि श्रुत्यन्तरवाक्यानि । आद्यश्रुतावपिशब्दः क्रियान्तरसमुच्चये कर्मसमुच्चये वा । वाशब्दोऽनादरे । तथाच नारायणो यत्किञ्चिद्दृश्यते यच्च श्रूयते वा तत्सर्वमपि जगत्सर्वं सर्वपदार्थानां सत्त्वादिकं प्रति तत्प्रदानाय व्याप्य । यद्वा—तदुद्दिश्य सर्वं सर्वथा देशकालगुणशक्तिभिर्व्याप्य तत्प्रेरकतया स्थितः । न केवलमेतावत् किन्तु जगतोऽन्तर्बहिश्च तद्देशे तद्रहितदेशे च तत्काले तद्रहितकाले व्याप्य तद्भूतैस्तदभूतैश्च गुणैः शक्तिभिश्च युक्तस्सन् स्थित इति तत्त्वप्रदीपटीकादिशा श्रुत्यर्थः । द्वितीयश्रुतावाद्यो ब्रह्मशब्दो निमित्तसप्तम्यन्तः । द्वितीयतृतीयावधिकरणसप्तम्यन्तौ । 'इदं' जगत् 'आविरासीत्' अजायत । अनेनेशाधीनोत्पत्तिसत्तादिकमुक्तम् । ब्रह्मैवाधस्तादित्यनेनापि सत्ताप्रदानाय सर्वगतत्वमुच्यते । तदधीनसत्ताकस्य तदधीनत्वं सिद्धमेव । ब्रह्मैव सर्वपदार्था-

ब्रह्मण्येवेदमाविरासीद्ब्रह्मणि स्थितं ब्रह्मणि लयमभ्यु-
पैति ब्रह्मैवाधस्ताद्ब्रह्मैवोपरिष्टाद्ब्रह्म मध्यतो ब्रह्म सर्वतः'
'ब्रह्मैवेदं सर्वम्' (बृ. ४-५-१.) इत्यादिश्रुतिभ्योऽन्यत्र
जगतोऽभावात्तृणादीनां पर्जन्यवन्नानुग्राहकत्वमात्रमीश्वरस्य ।

(४) स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम् ।
अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससारशास्तिकृत् ॥

नामधस्तादुपरिष्टान्मध्यतः। किं बहुना- 'सर्वतः' सर्वत्र च तत्तत्सत्तादि-प्रदानाय तत्र तत्रास्तीत्यर्थः। ब्रह्मैवेदमितिवाक्यान्तरेणापि इदं जगत् तदधीनसत्ताकमेवोच्यते।

(४) इदानीं सप्रमाणकं सौत्रचशब्दार्थमाह—स एवेति ॥ अत्र स एवेत्यनेनेश्वराधीनोद्बोधवत्त्वं प्रकृतेरुच्यते। 'शास्तिकृत्' जगच्छिक्षकः स हरिरेव 'अनामरूपात्मनि' प्राकृतनामरूपरहिते स्वस्मिन् स्वाधारत्वेन 'रूपनामनी' अर्थशब्दप्रपञ्चौ 'भूयः' पुनः 'विधित्समानः' सिसृक्षुः 'निजवीर्यचोदितां' स्वसामर्थ्यप्रेरितां 'स्वजीवमायां' स्वाधीनां जीवबन्धिकां 'सिसृक्षतीं' सर्जनोन्मुखीं 'प्रकृतिं' लक्ष्मीं 'अनुससार' अनुजग्राहेत्यर्थः। इति चेति चः समुच्चये। द्रव्यमित्यनेन तदधीनसत्त्वमुच्यते। भागवत इत्यस्य पूर्वेणोत्तरेण च सम्बन्धः। वचनद्वयस्यापि भागवतस्थत्वात्। नानुग्राहकत्वमात्रमित्यत्रापि संयोज्यम्। समस्तं चेदम्। चशब्देनात्यतः परं सूचितमिति शेषः। उद्बोधप्रवृत्त्यादिरादिपदार्थः। चः समुच्चये। तथाच न केवलं कार्यस्वातन्त्र्यम्। किंतु स एव द्रव्यमिति च भागवते आदिशब्दादन्यत्र चाङ्गीकृतं सूत्रकृतोक्तमत्र चशब्देन सूचितम्। प्रकृति-सत्तादिप्रदत्वं च नानुग्राहकत्वमात्रमीश्वरस्यानुग्राहकत्वमात्रविरोधीति योजना। यद्वा—न केवलं कार्यसत्ताप्रदत्वमेव नानुग्राहकत्वमात्रमीश्वर-स्यानुग्राहकत्वमात्रविरोधीत्यङ्गीकृतम्, किन्तु प्रकृतिसत्तादिप्रदत्वमपीति चशब्देन सूत्रकृता सूचितम्। कथं प्रकृतिसत्तादिप्रदत्वं तेनाङ्गीकृतमिति ज्ञायते यतो भागवते तथा तद्वचनमस्त्यत इति योजना। अनेन—सूत्रे ईश्वर इति जगदिति च पदद्वयाध्याहारेणेश्वरादन्यत्र जगतोऽभावात्तदधीनसत्ता-

इति भागवते । द्रव्यं कर्म च कालश्चेत्यादि च ।
चशब्देन प्रकृतिसत्तादिप्रदत्वं चाङ्गीकृतम् ॥ ५ ॥

॥ इति अन्यत्राभावाधिकरणम् ॥ २ ॥

॥ ३. अभ्युपगमाधिकरणम् ॥

(१) लोकायतिकपक्षं निराकरोति—

(२) सू—ॐ ॥ अभ्युपगमेऽप्यर्थाभावात् ॥ॐ॥६॥

दिमत्वादिति यावत्। एवं प्रकृत्यादेश्चान्यत्राभावान्न तृणादिवज्जगदनुग्राह्यमात्रम्, नापीश्वरः पर्जन्यवदनुग्राहकमात्रमिति सूत्रार्थ उक्तो भवति। द्रव्यमित्येतद्वैषम्याधिकरणे व्याख्यातम् ।

॥ इति अन्यत्राभावाधिकरणम् ॥ २ ॥

॥ ३. अभ्युपगमाधिकरणम् ॥

(१) अत्राधिकरणार्थं दर्शयति—लोकायतिकेति ॥ लोकायतस्य चार्वाकाचार्यस्य अयं लोकायतिकः स चासौ पक्षः सिद्धान्तश्च तमित्यर्थः। लोकायतेनाङ्गीकृत इति वा ।

(२) धर्मान्वितेन्द्रियपदार्थानां तत्साधकश्रुत्यादिप्रामाण्यस्य चानभ्युपगमात्प्रमाणाभावेनेश्वरस्यैवाभावादन्तरेणापीश्वरं पूर्वपूर्वस्मादुत्तरोत्तरवस्तूत्पत्तिसम्भवान्न तस्य जगत्कारणत्वं युक्तमिति प्राप्ते सिद्धान्तयन्सूत्रमुपन्यस्य व्याचष्टे—अभ्युपगम इति। न केवलं परोपपादनेन किंतु 'अभ्युपगमेऽपि' स्वसिद्धान्तेऽपि तद्धीत्यापि विषयप्रयोजनयोरभावादनारम्भणीयमेव चार्वाकशास्त्रमिति सूत्रार्थः सुधायामुक्तः। चन्द्रिकायां तु पूर्वसूत्रान्नञोऽनुवृत्तिः। तथाच स्वकीयशास्त्रस्य सिद्धान्तत्वानभ्युपगमे सिद्धमस्मादिष्टम्। अभ्युपगमेऽपि तत्र तद्व्यापकयोर्विषयप्रयोजनयोरभावाभ्युपगमात् व्याहतिः स्यादिति उभयथापि न चार्वाकसिद्धान्तो युक्त इति सूत्रार्थ उक्तः। अत्र सुधापक्षे अनपेक्षमेवेत्यस्यानुवृत्तिः। योजनाद्वयेऽप्यपिशब्दः समुच्चयार्थः विरोधसूचकश्चेति ध्येयम् ।

(३) यस्य धर्माधर्मौ न स्तस्तत्सिद्धान्ते किं प्रयोजनम्। अतः स्वव्याहतेरेवोपेक्ष्यः ॥ ६ ॥

॥ इति अभ्युपगमाधिकरणम् ॥ ३ ॥

॥ ४. पुरुषाश्माधिकरणम् ॥

(१) पुरुषोपसर्जनप्रकृतिकर्तृवादमपाकरोति—

---

(३) यस्येति ॥ सिद्धान्त इत्याकृष्यते। धर्मो यागादिजन्यादृष्टम्। अधर्मस्तदन्यः स्वर्गादिः। यद्वा—अधर्मः पापं तत्साध्यो नरकश्च। अधर्मनिवृत्तिप्रयोजनकत्वस्यापि निराकरणार्थमधर्मग्रहणम्। धर्माधर्मपदाभ्यामतीन्द्रियमात्रमुपलक्ष्यते। सप्तमी षष्ठ्यर्थे। किमाक्षेपे। प्रयुज्यते प्रवर्त्यते शास्त्रे अधिकार्यनेनेति व्युत्पत्त्या प्रयोजनशब्देन फलविषयो गृह्यते। तथाच—'यस्य धर्माधर्मौ न स्तः' येन धर्माधर्मौ नाङ्गीकृतौ तस्य वादिनः सिद्धान्ते तेन सिद्धान्तत्वेनाभ्युपगतस्य शास्त्रस्य किं प्रयोजनम्? न किमपि विषयादिकमङ्गीकृतमिति योजना। सिद्धान्तप्रयोजनपदाभ्यां सौत्राभ्युपगमार्थशब्दौ विवृतौ। ततः किमित्यत आह—अत इति। स्वशास्त्रस्य सिद्धान्तत्वाभ्युपगमेऽपि तत्र तद्व्यापकयोर्विषयप्रयोजनयोरभावाङ्गीकारादित्यर्थः। ततोऽपि किमित्यतो विरोधस्फोरकेण सौत्रापिशब्देन सूचितं हेतुं दर्शयति—स्वेति। यः सिद्धान्तः असौ प्रयोजनादिमानिति नियमात्सिद्धान्तत्वेनाङ्गीकृतशास्त्रस्य प्रयोजनाद्यभावमभ्युपगतवतो माता वन्ध्येतिवत्स्ववचनविरुद्धवादित्वापातादित्यर्थः। न तत्र युक्त्यन्तरं वक्तव्यमित्येवशब्दार्थः। ततः किमित्यतः सूत्रेऽनपेक्ष्य इति बुद्ध्या विविच्यानुवृत्तपदेन नञनुवृत्त्या वा लब्धसाध्यं दर्शयति—उपेक्ष्य इति। स इति विपरिणामेनानुवर्तते। एवकारोऽत्रापि सम्बध्यते। तथाच स चार्वाकः तत्सिद्धान्तो वा उपेक्ष्य एव न त्वादरणीयः परिहाराय विषयो वा। अतो न तद्विरोधो विष्णुजगत्कारणत्वस्येत्यर्थः।

॥ इति अभ्युपगमाधिकरणम् ॥ ३ ॥

॥ ४. पुरुषाश्माधिकरणम् ॥

(१) अत्राधिकरणप्रतिपाद्यं दर्शयति—पुरुषेति ॥ पुरुषश्चेतनः प्रकृतिरचेतना। कर्त्रिति भावप्रधानम्। उच्यते अर्थोऽत्रेति वादो मतम्। तथा-

(२) सू—ॐ॥ पुरुषाश्मवदिति चेत्तथाऽपि ॥ॐ॥७॥

यथा चेतनसम्बन्धादचेतनमेव शरीरमश्मादिकमादाय गच्छति। एवमचेतनाऽपि प्रकृतिः पुरुषसम्बन्धात्प्रवर्तत इति चेन्न। 'न ऋते त्वत्क्रियते' इति तत्रापि तथात्वे दृष्टान्ताभावात् ॥ ७ ॥

चात्राधिकरणे निरीश्वरसाङ्ख्यैकदेशिनां चेतनोपसर्जनकाचेतनप्रकृतिकर्तृत्ववादिनां मतं निराकरोति सूत्रकृदित्यर्थः।

(२) पूर्वपक्षस्य सूत्र एवोक्तत्वात्तदुपन्यस्य पूर्वपक्षांशं तावद्व्याचष्टे—पुरुषेति ॥ चेतनसम्बन्धाज्जीवसन्निधानादित्यनेन सूत्रे पुरुषपदं जीवसम्बद्धशरीरपरमित्युक्तं भवति। एवकारः शरीरभेदेत्यन्वेति। न तु चेतनमपीत्येवार्थः। अश्मा पाषाणः। आदिशब्दाद्दार्वादिग्रहः। 'आदाय' तदर्थं प्रवर्तते तत् प्रगृह्य च 'गच्छति' गन्तुं प्रवर्तत इति। अनेन अश्मपदं लक्षणया तदादानादिविषयप्रवृत्तिपरमित्युक्तं भवति। दृष्टान्तवाक्येन सूचितं दार्ष्टान्तिकं दर्शयति—एवमिति। अपिशब्दो यद्यर्थोऽस्यार्थे। प्रकृतिरपीति समुच्चये च। प्रकृतिरेव न त्वीश्वर इत्यवधारणे वा। अचेतनमचेतनेनेतिहेतुगर्भविशेषणाभ्यां सिद्धान्तयुक्ताचेतनत्वहेतोः पक्षविपक्षवृत्तित्वोक्त्या तस्य व्यभिचारः, प्रधानं चेतनसन्निधानात्स्वतः प्रवृत्तिमत् अचेतनत्वात् शरीरवदिति अनुमानरूपप्रतिपक्षश्चोक्तो भवति। तथाच प्रधानादेव जगदुत्पत्तावीश्वरवैयर्थ्यान्नासावस्ति। तदभावे च तस्य जगत्कारणत्वं नास्त्येव। तस्यैव जगत्कारणत्वमित्येतद्दूरोत्सारितमिति भावः। एवमनुमानावलम्बेन प्राप्तं पूर्वपक्षं प्रतिक्षेप्तुं प्रवृत्तं तथापीति सिद्धान्तांशं तन्नञनुवृत्त्या व्याचष्टे—नेति। नानुमानेन प्रकृतेः स्वतः प्रवृत्तिसाधनं युक्तमित्यर्थः। कुतो नेत्यतस्तत्र हेतुत्वेन तथापीत्यंशमावर्त्याव्ययानामनेकार्थत्वमिति न्यायमनुसृत्य व्याचष्टे—नेति। इतिश्रुतेरितिशेषः। 'तत्रापि' ईश्वरप्रवृत्तावपि। न केवलं पूर्वोक्तपयोम्बुवादावित्यपिशब्दार्थः। तत्रापीति सूत्रपाठेऽप्ययमेवार्थो बोद्धव्यः। तथात्वेन परमात्माधीनत्वेन सिद्धेनेति शेषः। तथात्व इति पाठे निमित्तसप्तमी। तथात्वसिद्धेरित्यर्थः। तत्रापीत्येतद्दृष्टान्ताभावादित्यनेनापि सम्बध्यते। तथाच महदादिकार्ये करणप्रवृत्तेः पुरुषोपसर्जनप्रकृत्यधीनत्वसाधनेऽपि निरीश्वरोपन्यस्तपूर्वानुमान इव निदर्शनाभावादित्यर्थः। अनेन—पुरुषाश्मवत् चेतनोपसर्जनकशरीरस्याश्माद्यानयनादौ स्वतः प्रवृत्तिवत्

(३) सू—ॐ ॥ अङ्गित्वानुपपत्तेः ॥ ॐ ॥ ८ ॥

शरीरप्रवृत्तौ पुरुषस्याङ्गित्वात्, अङ्गमङ्गी समादाय यथा कार्यं करोत्यसौ' इत्यङ्गित्वव्यवहारोऽनुपपन्नः ॥ ८ ॥

॥ इति पुरुषाश्माधिकरणम् ॥ ४ ॥

पुरुषोपसर्जनप्रधानस्यैव महदादिकार्यकरणे स्वतः प्रवृत्तिः सम्भवतीति ईश्वरवैयर्थ्यम्। तदभावे च तस्य जगत्कारणत्वमपि नास्ति तस्यैव जगत्कारणत्वमित्येतद्वरोत्साहितमिति चेन्न। कुतः? यतः पुरुषोपसर्जनप्रकृतिकर्तृत्वे न मानमस्ति। न चोक्तानुमानं मानम्। यतः तथा श्रुतेः नर्ते इति श्रुतेः। तथापि तत्रापि शरीरप्रवृत्तावपि तथैव व्यतिरेकानवस्थानेरित्यनेनोक्तेश्वराधीनत्वमेव सिद्धम्। अत एव तथापि पुरुषोपसर्जनप्रकृतिकर्तृत्ववाद्युपन्यस्तानुमानेऽपि तथा निरीश्वरसाङ्ख्योपन्यस्तपूर्वानुमान इव तथा दृष्टान्ताभाव इति सूत्रार्थ उक्तो भवति ॥

(३) एवं श्रुतिलक्षणहेतुना दृष्टान्ते साध्यवैकल्यमभिधाय हेत्वन्तरेण दृष्टान्ते साध्यवैकल्योपपादनाय सूत्रं—अङ्गित्वेति ॥ अत्राङ्गित्वपदं लौकिकपरीक्षकतद्व्यवहारोपलक्षकम्। तथापीत्यनुषज्यते। पुरुषस्य चेत्यभिप्रत्य दृष्टान्ते परोक्तसाध्याभ्युपगमे बाधकतर्कोक्तिपरतया तद्व्याचष्टे—शरीरेति। यस्मादित्यादौ संयोज्यम्। शरीरप्रवृत्तावित्यनेन तथापीत्यनुषक्तांशो विवृतः। तथाच यस्मात्पुरुषसंवलितशरीरस्यैव स्वतः प्रवृत्तावुच्यमानायां पुरुषस्याङ्गित्वादप्रधानत्वावश्यं भावादङ्गमितिस्मृतौ पुरुषस्याङ्गित्वव्यवहारः शरीरं प्रति प्राधान्यव्यपदेशोऽनुपपन्नः स्यात्। एवं दार्ष्टान्तिकेऽपि पुरुषस्य प्रधानाङ्गित्वापत्त्याङ्गित्वव्यवहारानुपपत्तिरित्यर्थः। अस्य हेतोस्तस्मादपि न शरीरस्य स्वतः प्रवृत्त्यङ्गीकारो युज्यत इति विपर्ययपर्यवसानलब्धसाध्यद्वाराऽतदशब्दाध्याहारेण दृष्टान्ताभावादिति पूर्वहेतुनाऽन्वयः। एवं सौत्रहेतोर्न शरीरस्य स्वतः प्रवृत्तिर्न वा प्रधानस्य। कुतः? पुरुषस्याङ्गित्वव्यवहारानुपपत्तेः। शरीरप्रधानयोरङ्गित्वानुपपत्तेश्चेत्यध्याहृतसाध्यमुखेन तथा दृष्टान्ताभावो बाधश्चेति पूर्वसाध्येनान्वयो द्रष्टव्यः। वादिनो हैतुकत्वेनोक्तश्रुतावविश्वासादस्यैकस्यैव हेतुत्वात्सूत्रे चशब्दाभावः। स्मृत्यर्थस्तु—अङ्गी प्रधानः पुरुषोऽङ्गं गुणभूतं शरीरं सङ्गृह्य यथाऽश्माद्यानयनादि कार्यं करोति तथाऽसौ भगवानपि प्रकृतिमादाय महदादिकार्यं करोतीति।

॥ इति पुरुषाश्माधिकरणम् ॥ ४ ॥

॥ ५. अन्यथानुमित्यधिकरणम् ॥

(१) प्रकृत्युपसर्जनपुरुषकर्तृत्ववादमपाकरोति—

सू—ॐ ॥ अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥ ॐ ॥ ९ ॥

(२) शरीरसम्बन्धात्पुरुषः प्रवर्तत इत्यङ्गीकारेऽपि स्वतन्त्र्यासामर्थ्याच्छरीरसम्बन्ध एवायुक्तः ॥ ९ ॥

॥ ५. अन्यथानुमित्यधिकरणम् ॥

(१) अधिकरणार्थं दर्शयति—प्रकृतीति ॥ प्रधानोपसर्जनकचेतनकर्तृत्ववादिनां निरीश्वरसाङ्ख्यैकदेशिनां वादं मतमस्मिन्नधिकरणे निराकरोति सूत्रकृदित्यर्थः ।

(२) सूत्रे पुरुषाश्मवदिति चेदित्युक्तादन्यथानुमितौ चेति योजनामभिप्रेत्य तमंशं पूर्वपक्षपरतया व्याचष्टे—शरीरेति ॥ चेतनादिस्थाने शरीरपदस्य शरीरपदस्थाने पुरुषपदस्यैवमचेतनपदस्थाने पुरुषपदस्य पुरुषपदस्थाने प्रकृतिपदस्य प्रक्षेपेण यथेत्यादिपूर्वभाष्यमत्रापि संयोज्येदं व्याख्येयम् । 'प्रवर्तते' अदृष्टादाने । इत्यङ्गीकारेऽपीति । एवमभ्युपगम्य साधनेऽपीत्यर्थः । अनेन विमता प्रवृत्तिरचेतनोपसर्जनपुरुषार्थीना प्रवृत्तित्वादश्मानयनादिप्रवृत्तिवदिति पूर्वपक्षसाधकानुमानं सूचितम् । अपिशब्दो न केवलं पूर्ववाद्युक्तपक्ष इति समुच्चये । अनेन सौत्रचशब्दो व्याख्यातः । अर्थात्यनन्तरं तथेतिपदं संयोज्यम् । दृष्टान्ते साध्याभाव इति तदर्थः । कुतोऽसावित्यतस्तत्र हेतुत्वेन चशब्दादाकृष्टमङ्गीकृत्याऽनुपपत्तेरिति पदं व्याचष्टे—शरीरेति । तस्येत्युभयत्रान्वेति । शरीरसम्बन्ध इति सप्तम्यन्तं प्रथमान्तं च । तत्राद्यस्य तस्य जीवस्य शरीरसम्बन्धेऽप्यसामर्थ्यादित्यन्वयः । द्वितीयस्य युक्तपदेनान्वयः । सुतरां शरीरसम्बन्धेन जीवस्याश्मानयनादिकार्ये प्रवृत्तिरित्येवशब्दार्थः । शरीरपदं प्रकृतेरप्युपलक्षकम् । कुतः ? शरीरसम्बन्धानुपपत्तिरित्यतस्तत्र हेतुत्वेन ज्ञशक्तिवियोगादित्यंशं असिद्धिपरिहाराय स्वतः पदाध्याहारेण व्याचष्टे—स्वत इति । स्वातन्त्र्येणेत्यर्थः । अनेन—अन्यथा पुरुषाश्मवदित्युक्तपक्षाद्वैपरी-

(३) सू—ॐ ॥ विप्रतिषेधाच्चासमञ्जसम् ॥ॐ॥१०॥

सकलश्रुतिस्मृतियुक्तिविरुद्धत्वाच्चानीश्वरमतमसमञ्जसम् ।

(४) श्रुतयः स्मृतयश्चैव युक्तयश्चेश्वरं परम् ।
वदन्ति तद्विरुद्धं यो वदेत्तस्मान्न चाधमः ॥ इति पाद्मे ॥ १० ॥

॥ इति अन्यथानुमित्यधिकरणम् ॥

त्येन पुरुषाश्मवदचेतनत्वसम्बन्धाच्चेतनं प्रवर्तत इत्येवं रूपेणानुमितावनुमानेऽपि तथा दृष्टान्ते साध्यवैकल्यम् । कुतः ? अङ्गित्वानुपपत्तेर्जीवस्याङ्गपदोक्तशरीरसम्बन्धित्वायोगात् । सोऽपि कुतः ? ज्ञशक्तियोगात् अङ्गसम्बन्धे ज्ञस्य ज्ञातुर्जीवस्य सामार्थ्ययोगादिति सूत्रार्थ उक्तो भवति ॥

(३) एवं प्रत्येकं दूषितान्यनीश्वरमतानि सामान्यविशेषेणापि निराकुर्वन्सूत्रमुपन्यस्य व्याचष्टे—विप्रतिषेधादिति ॥ श्रुतीत्यादिना विप्रतिषेधप्रतियोगिनो दर्शिताः । विरुद्धत्वादित्यनेन विप्रतिषेधशब्दार्थ उक्तः । न केवलं उक्तयुक्तिविरुद्धत्वादिति चकारार्थः । अनीश्वरेति । न विद्यते ईश्वरो यस्मिन्निति तत्तथोक्तम् । तच्च तन्मतं चेति विग्रहः । अनीश्वराणां वादिनां मतमिति वा । मतमिति समुदायैकवचनम् । असमञ्जसमयुक्तमित्यर्थः ।

(४) कुतोऽनीश्वरमतानां श्रुत्यादिविरुद्धत्वमित्यत आह—श्रुतय इति । चशब्दो मिथः समुच्चयार्थो । ईश्वरमेव परं स्वतन्त्रं वदन्तीत्यन्वयः । युक्तिषु वदन्तीत्यस्य साधयन्तीत्यर्थः—श्रुतयः—'द्यावाभूमी जनयन्' (ऋ्वे. ३-३.) 'यतो वा' (तै. ३-१.) 'यस्सर्वज्ञः' (मु. १-१-९.) इत्याद्याः । स्मृतयः—'उत्पत्तिस्थितिसंहाराः' 'स्रष्टा पाता तथवात्ता' इत्याद्याः । युक्तयः—'विमतं सकर्तृकं कार्यत्वात्' 'चिच्चेत्ये केनचिन्नियते अस्वतन्त्रत्वात्' इत्याद्याः । 'तद्विरुद्धं' श्रुतिस्मृतियुक्तिविरुद्धं प्रकृतिस्वातन्त्र्यादिरूपमर्थमिति शेषः । यः पुरुषः तस्मादन्यः 'अधमः' अयोग्येषु अवरो नास्तीत्यर्थः । नैतावता सेश्वरमाङ्गेयेन सन्तोष्टव्यम् । यतः श्रुतयः स्मृतयश्चेति स्मृतिरीश्वरं परं वदतीत्यनेन तमपि निराह । इति पाद्म इत्यनन्तरं वचनादिति शेषः । अस्य श्रुत्यादिविरुद्धत्वाद्विरुद्धतावगमादिति पूर्वेणान्वयः ॥५॥

॥ इति अन्यथानुमित्यधिकरणम् ॥

॥ ६. वैशेषिकाधिकरणम् ॥

(१) परमाण्वारम्भवादमपाकरोति ।

(२) सू—ॐ ॥ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ॐ ॥ ११ ॥

महत्त्वाद्दीर्घत्वाच्च यथा कार्यमुत्पद्यते एवं ह्रस्वत्वात्परिमाण्डल्याच्चोत्पद्येत ।

॥ ६. वैशेषिकाधिकरणम् ॥

(१) अत्राधिकरणप्रतिपाद्यमाह—परमाण्विति ॥ परमाणुभ्यो जगदारम्भः जगदुत्पत्तिरिति वादिनां वैशेषिकादीनां 'वादं' मतं 'अपाकरोति' निराकरोत्यस्मिन्नधिकरणे सूत्रकृदित्यर्थः । आरम्भकेतिपाठे परमाणवः जगदारम्भकाः तत्कारणानीति वादमित्यर्थः ॥

(२) सूत्रे दृष्टान्तोक्त्या लब्धे परपक्षप्रतिक्षेपकानुमाने साध्यसमर्पकेण ह्रस्वपरिमण्डलाभ्यामित्यंशेनैव परमतविरोधादीश्वरस्यानन्तगुणत्वमयुक्तमिति पूर्वपक्षस्य सूचनात्तद्विवरणेनैव पूर्वपक्षः प्रदर्शितो भवतीत्याशयेन तमनुपन्यस्य सिद्धान्तयन्सूत्रमेवोपन्यस्य व्याचष्टे—महदिति ॥ अत्र महत्त्वादित्याद्युक्त्या सूत्रे महदित्यादिनिर्देशो भावप्रधानः । 'कारणबाहुल्यात्कारणमहत्त्वात् प्रचयविशेषाच्च महत्' इति काणादसूत्रानुसारेण तथा निर्देशः । तत्र तस्येत्यस्य प्रायिकत्वात् । ह्रस्वपरिमण्डलाभ्यामिति पञ्चमीसमभिव्याहारात्पञ्चम्यन्ताद्भवतिः । सकाशादित्यध्याहारेण षष्ठ्यन्ताद्वा भवतिः । उत्पद्यते उत्पद्येत इति च शेषः । कार्यं इत्युक्तं भवति । चः समुच्चये । तथाच वैशेषिकमते नैयायिकमते च यथा समवायिकारणीभूतत्र्यणुकचतुरणुकादिगतात् महत्त्वाख्यपरिमाणाद्दीर्घत्वाख्याच्चतुरणुकपञ्चाणुकादिगतं परिमाणाख्यकार्यमुत्पद्यते तथा द्व्यणुकगतह्रस्वत्वात् परमाणुगतात्परिमाण्डल्याख्याच्च परिमाणात्त्र्यणुकद्व्यणुकगतं परिमाणाख्यं कार्यमुत्पद्येत इत्यर्थः । अनेन द्व्यणुकपरमाणुपरिमाणं परिमाणान्तरारम्भकं द्रव्यसमवायिकारणपरिमाणत्वात् त्र्यणुकादिपरिमाणवदिति वैशेषिकादिमतस्य प्रतिकूलानुमानमुपन्यस्तं भवति ।

(३) वाशब्दादन्यथैतयोरपि न स्यात् विशेषकारणाभावात् ॥ ११ ॥

(४) सू—ॐ ॥ उभयथाऽपि न कर्मातस्तदभावः ॥ ॐ ॥ १२ ॥

ईश्वरेच्छाया नित्यत्वे तद्भावेऽपि परमाणुकर्माभावान्नेदानीमपि तत्स्यात् ।

---

(३) त्र्यणुकादिपरिमाणस्यारम्भकत्वेऽपि द्व्यणुकादिगतस्यैतन्मास्तु को दोषः । त्र्यणुकादिगतपरिमाणारम्भस्तु द्व्यणुकादिगतसङ्ख्ययैव सम्भवतीत्यप्रयोजकोऽयं हेतुरित्याशङ्क्य परिहरद्वाशब्दं व्याख्याति—वाशब्दादिति ॥ अस्य विशेषकारणाभावादित्यनन्तरं अध्याहृतेन 'इति सूत्रकृता सूचितं' इत्यनेनान्वयः । किं सूचितमित्यतस्तदाह—अन्यथेति । यद्युभयोः कारणगतपरिमाणत्वाविशेषेऽपि ह्रस्वत्वादेर्न कार्यमुत्पद्यते । तर्ह्येतयोर्महत्त्वदीर्घत्वयोरपि न स्यादित्यर्थः । तत्कार्यारम्भकत्वमिति शेषो वा, सकाशादिति शेषेण कार्यमित्यनेन वाऽस्यान्वयः । न केवलं तयोरिति समुच्चयेऽपिः । ननु विशेषकारणे सति प्रतिबन्दीमात्रं न बाधकमित्यतस्तदेवासिद्धमित्याह—विशेषेति । पक्षदृष्टान्तयोर्वैषम्यसाधकरूपस्य वा तदनङ्गीकारे बाधकरूपस्यवा नियामकविशेषस्याभावात् । भावे वा स वक्तव्यः स्यादित्यर्थः । तदभावस्तु टीकायामुपपादितः । तस्मादुपपत्तिविरुद्धत्वात् न तयोरसमवायिकारणत्वं किं त्वेतयोरेवेतिवैशेषिकाद्युक्तमसमञ्जसमेवेति न तद्विरोध ईश्वरानन्तगुणत्वस्येति भावः ।

(४) एवं वैशेषिकादिमते महत्त्वदीर्घत्वादेरसमवायिकारणत्वखण्डनरीत्या समवायिकारणमात्रं निरस्तं भवतीत्यभिप्रेत्य निमित्तकारणमप्येवं निराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—उभयथापीति ॥ ईश्वरेच्छाया इति । कार्यनिमित्तत्वेन पराभ्युपगतायाः ईश्वरेच्छायाः 'नित्यत्वे' सदातनत्वे 'तद्भावेऽपि' ईश्वरेच्छासद्भावेऽपि प्रलये 'परमाणुकर्माभावात्' तच्चेष्टाभावादन्वयव्यभिचारेण तस्यास्तत्कारणत्वायोगादिदानीं प्रलयादन्यस्मिन् अभिमतकालेऽपि ईश्वरेच्छायाः सकाशात्परमाणुकर्म 'न स्यात्' नोत्पद्येतेत्यर्थः । ततः किमित्यत आह—अत इति । अत इत्यस्य व्याख्यानं

अनित्यत्वे तत्कारणाभावात्। अतः परमाणुचेष्टाभावात्तत्कार्याभावः।
(५) वैदिकेश्वरस्य तु वेदेनैव सर्वशक्तित्वोक्तेः सर्वमुपपद्यते। स्वत

परमाण्विति। स्यादिति वर्तते। तदिति चेष्टा परामृश्यते। कार्यशब्दः प्रकृतद्व्यणुकादिकार्यपरः। एवं सौत्रस्तच्छब्दोऽपि। अनित्यत्व इत्यत्रेश्वरेच्छायाः इत्यनुवर्तते। तदिति तन्त्रम्। तथाच तस्याः ईश्वरेच्छायाः अनित्यत्वे तस्या निमित्तकारणाभावादत एव कर्मकारणीभूताया ईश्वरेच्छाया अभावादित्यर्थः। ततः किमित्यतः तदुत्तरत्वेन अत इत्याद्यत्रापि संयोज्यम्। अत्रात इत्यस्येश्वरेच्छेत्र इत्यर्थः। तत्कार्याभाव इत्यस्य तच्च तत्कार्यं चेति विग्रहेणेश्वरेच्छालक्षणकार्याभावः, तस्य कार्यमितिविग्रहेण परमाणुक्रियाजन्यद्व्यणुकादिकार्याभावः स्यादित्यर्थः। नित्यत्वेऽनित्यत्वे इत्युक्तोभयथेत्येतत् दूष्यत्वेनोपस्थितेश्वरेच्छानित्यत्वानित्यत्वाख्यप्रकारद्वयपरामर्शकमित्यभिप्रैति। तद्भावेऽपीदानीमपीत्यनेनापेरर्थः उक्तः। परमाणुकर्माभावादित्यनेन न कर्मेत्येतद्यतश्शब्दशिरस्कतया व्याख्यातम्। कर्मशब्दस्यावृत्त्यभिप्रायेण स्यादित्यत्र कर्त्रनुक्तिः। अत इत्यादेरेवावृत्त्यभिप्रायेणान्ते अर्थ उक्तः। तथाच अतोऽप्यसमञ्जसं वैशेषिकाद्युक्तमितिभावः। कार्याभाव इत्यनन्तरं यत इति शेषः। अस्योत्तरत्रान्वयः।

(५) ईश्वरेच्छाया निमित्तत्वनित्यत्वयोरभ्युपगमादाद्यपक्षोक्तदूषणं भवतामपि समामित्यत आह—वैदिकेति॥ वैदिकैर्वेदाधिकृतैः तत्प्रामाण्यज्ञैरभ्युपगतो वैदिकः वेदगम्यो वा ईश्वरो यस्य तस्येत्यर्थः। पक्ष इति शेषः। तेन विशेषार्थकतुशब्दस्यान्वयः। तेनेदं समाधानं परपक्षेऽपीति ज्ञापितम्। यद्वा—वैदिकश्चासावीश्वरश्चेति कर्मधारयः। अस्य च सर्वशक्तित्वोक्तेरित्यनेनान्वयः। तुशब्दः शङ्कापरिहारद्योतकः। तेन नायमस्मत्पक्षे दोष इति मूच्यते। अत्राद्यार्थो यस्य वेदगम्य ईश्वरस्तत्पक्ष इति तत्त्वप्रदीपे, तेनानुमानमात्रेणेश्वरमभ्युपगच्छतेति टीकायां चोक्तः। द्वितीयस्तु—ईश्वराचिन्त्यशक्तीति टीकोक्त्या तस्य वेदेनैव सर्वशक्तित्वोक्तेरिति तत्त्वप्रदीपोक्त्या च ज्ञापितः। तथाचेत्थं योजना—वैदिकेश्वरस्य पक्षे तु नायं दोषः। कुतः? यतः सत्यामपीश्वरेच्छायां सर्वं कार्यानुत्पादादिकं ईश्वराचिन्त्यशक्तित एवोपपद्यते। साऽपि तस्य कुतः? 'परास्य,' इत्यादि

एव काले विशेषाङ्गीकृतेश्च ॥ १२ ॥

वेदेनैवेश्वरस्य सर्वविषयकशक्तिमत्त्वोक्तेरिति न तत्र मानान्तरं मार्गणीयमित्येवकारार्थः। न च परपक्षे सममेतत्। तस्यानुमानमात्रगम्येश्वरत्वेन वेदैकगम्येश्वरत्वाभावादिति तुशब्दाभिप्रायः। इतश्च नायं दोषोऽस्मत्पक्ष इत्याह—स्वत इति। नास्मत्पक्षे प्रलये व्यभिचारदोषः। तदानीमीश्वरेच्छारूपनिमित्तसत्वेऽपि कालाख्यनिमित्तान्तरस्याभावेन कार्याभावस्यान्यथोपपत्तेः। न च प्रलये सोऽप्यस्तीति वाच्यम्। तदा सृष्टिकालाख्यकालविशेषस्याभावात्तस्यैव सृष्टिकारणत्वात्। न चैतत्परमतेऽपि सममिति वाच्यम्। अस्माभिः काले स्वत एव सृष्ट्याद्युपाधिमन्तरेणैव विशेषाणां स्वाभाविकसृष्टिकालत्वादिधर्माणामङ्गीकृतत्वात्। परेण तु सृष्ट्यवच्छिन्नः कालः सृष्टिकाल इति सृष्ट्याद्युपाधित एव काले विशेषाभ्युपगमेनानौपाधिकविशेषानभ्युपगमादित्युपस्कारेण वाक्ययोजना। ननु सत्यामपीश्वरेच्छायां सृष्टिकालाभावेन कार्याभावाभ्युपगमे सा मोघा स्यादित्यतोऽप्याह—स्वत एवेति। एवकारो भिन्नक्रमः। इच्छायाः इति शेषः। तथाच नैष दोषोऽस्माभिर्नित्याया अपीश्वरेच्छायाः 'काले एव' सृष्टिकाले एव 'स्वतः' अनौपाधिकानां सृष्टिविषयत्वादिविशेषाणामाविर्भावाभ्युपगमादेवं परेण वक्तुं शक्यम्, तेन इच्छायामनौपाधिकविशेषानभ्युपगमादित्यर्थः। यद्वा—उभयथाऽपि न कर्मेत्यस्य कालस्य नित्यत्वेऽनित्यत्वे चोक्तरीत्या न कर्मेति प्रकारेणापि व्याख्यानसम्भवात् कालस्य निमित्तकारणत्वमीश्वरेच्छानिमित्तकारणत्वनिरासन्यायेन निरस्तमित्यभिप्रेत्य तद्दोषं स्वपक्षे परिहरति—स्वत एवेति। योजना तु—नायं दोषोऽस्मत्पक्षे। कुतः? स्वतएव स्वसृष्ट्याद्युपाधिमन्तरेणैव अनित्ये काले सृष्टिकालत्वादिविशेषोत्पत्त्यङ्गीकारात्तस्यैव निमित्तत्वात्। न चैवं परेण वक्तुं शक्यम्। अस्माभिः काले विशेषाणां सृष्टिकालत्वादीनां स्वतएव स्वाभाविकत्वस्यैव अभ्युपगमात् परेण तु सृष्ट्याद्युपाधिनिबन्धनत्वाभ्युपगतेरिति। न च कालस्य कार्यमात्रनिमित्तकारणत्वात्सृष्टिकालाद्युत्पत्त्यसम्भवः। अधिकरणतयैव कालस्य सर्वकार्यकारणत्वेन सृष्टिकालादिकार्ये चात्माश्रयप्रसङ्गेन तत्र तस्याधिकरणतया कारणत्वायोगादिति वाच्यम्। कालातिरिक्तकार्येष्वेव कालस्याधिकरणतया कारणत्वाभ्युपगमात्। काले तु तथा कारणत्वा-

(६) सू—ॐ ॥ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ ॐ ॥ १३ ॥

कार्यकारणादीनां समवायसम्बन्धाङ्गीकारात्तस्य च भिन्नत्वसाम्यात्समवायान्तरापेक्षायामनवस्थितिः ॥ १३ ॥

नभ्युपगमात्। परन्तु—ईश्वरोद्देश्यत्वेनाधारः कालोऽपेक्षितः। स च सृज्य एव। ईश्वरोद्देशश्च स कालस्तदैव स्यादित्येवंरूपः। इच्छाविषयत्वरूपोद्देश्यत्वं च न प्राक्सत्त्वापेक्षम्। न हि सृज्यस्य प्राक् सत्त्वमस्ति। एकस्यैवाधिकरणाधिकर्तव्यताच्च 'ईशोद्देशश्च कालश्च स्वत एव' इति श्रुत्यादिसिद्धविशेषबलाच्चोपपद्यत इति न कश्चिद्दोषः। अथवा—उभयथेत्यस्यादृष्टनित्यत्वेऽनित्यत्वे चेति व्याख्यानसम्भवादृष्टस्य निमित्तत्वं ईश्वरेच्छाकालनिमित्तत्वनिरासन्यायेन निरस्तनित्यमभिप्रेत्य तद्दोषं स्वपक्षे परिहरति-स्वत एवेति। काल इत्यावर्तते। अदृष्ट इति शेषः। तथाच नायमस्मत्पक्षे दोषः। कुतः? अस्माभिः काले प्रलयकाले सत्येवादृष्टे काले सृष्ट्यादिकाले एव समुद्बोधविशेषाभ्युपगमात्। न चैतदन्यमते सम्भवति। अस्माभिः काले स्वत एव स्वाभाविकानामेव विशेषाणामङ्गीकारात्। परेण च तदनङ्गीकारादिति योजना।

(६) एवं वैशेषिकादिपक्षे निमित्तकारणासम्भवं दर्शयित्वा समवायिकारणमपि निराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—समवायेति॥ अत्र कार्यकारणपदे अवयव्यवयवपरे। आदिपदेनानित्यगुणक्रियातद्वतां सङ्ग्रहः। अथवा कार्यकारणपदेनैषां सङ्ग्रहः। आदिपदेन नित्यगुणगुणिजातिव्यक्तिविशेषविशेषिणां प्रसङ्गाद्ग्रहणम्। भिन्नत्वाङ्गीकारादित्यपि सम्बध्यते। ल्यब्लोपनिमित्ता पञ्चमी। तथाच द्व्यणुकादिकार्याणां परमाण्वादिकारणानां च परस्परं भिन्नत्वमुपेत्य समवायसम्बन्धाङ्गीकारादित्यर्थः। अस्य हेतोः सूत्रे पूर्वसादनुपक्तेन नञान्वयः। न समवायाङ्गीकारो युक्तः। अत एव न समवायिकारणत्वं युक्तमितिनञर्थः। सम्बन्धेत्युक्त्या समवायशब्दस्य समावेशार्थत्वभ्रमो वारितः। अस्य तन्मतमसमञ्जसमित्यध्याहृतेनान्वयः। ननु भिन्नयोरवयवावयविभावविशेषणविशेष्यभावोपपत्तये समवायसम्बन्धोऽङ्गीकार्य एव। अतस्तदभ्युपगमे को दोष इत्यतः प्रवृत्तं

(७) न च तत्प्रमाणम् । प्रथमसम्बन्धासिद्धयैव च तदसिद्धिः । स्वनिर्वाहकत्वे समवाय एव न स्यात् ॥ १३ ॥

साम्यादनवस्थितेरित्यंशं साम्यधर्मिप्रकारप्रदर्शनपूर्वकं व्याचष्टे—तस्य चेति । समवायस्यापीत्यर्थः । न केवलं कार्यकारणादीनामित्यपेरर्थः । चशब्दस्साम्याच्चेति च सम्बध्यते । सूत्रे तु चकारो यथाश्रुतो भिन्नक्रमोऽपि हेतुसमुच्चयार्थः । अस्तु साम्यं, ततः को दोष इत्यत आह—समवायेति । तस्येत्येतदावृत्त्या विपरिणतमत्रापि सम्बध्यते । तस्य समवायस्य ताभ्यां समवायिभ्यां भिन्नत्वसाम्यात् भिन्नस्य च तस्य विशेषणविशेष्यभावानुपपत्तये ताभ्यां समवायसम्बन्धाङ्गीकारात् तस्यापि समवायान्तरस्य तेन समवायान्तरेण भिन्नत्वसाम्यात् भिन्नस्य च तस्य समवायान्तरस्य तेन विशेषणविशेष्यभावानुपपत्तये तेन समवायान्तरेण समवायान्तरापेक्षया निमित्तभूतयाऽनवस्थितिः स्यादिति योजना । अनवस्थितिरित्यनन्तरं यत इति शेषः । अन्यथा सूत्रविसंवादः स्यात् । अस्याप्युत्तरत्रान्वयः । अत एव सूत्रे हेतुसमुच्चयार्थश्चशब्दः ।

(७) प्रामाणिकत्वान्नानवस्थादोषस्स्यादित्यत आह—न चेति ॥ तत्तत्र समवायानन्त्य इत्यर्थः । बीजाङ्कुरादिवत् मूलक्षयाभावान्नानवस्थादूषणमित्यत आह—प्रथमेति । एवकारो भिन्नक्रमः कमुत्यद्योतकः । तथाच मूलभूतावयवावयव्यादिसम्बन्धस्यैवासिद्ध्या तदसिद्धिः । तेषां प्रथमसम्बन्धसिद्ध्यर्थं अभ्युपगन्तव्यानां सम्बन्धान्तराणां सुतरामसिद्धिरित्यर्थः । तथाचेत्थं योजना । यतस्तत्र प्रमाणं नास्ति अतः प्रथमसम्बन्धस्यैवासिद्ध्या तदसिद्धिः । यतएवमतोस्त्येव मूलक्षतिरिति भवत्येवानवस्थादूषणमिति । माऽस्तु तर्हि समवायपरम्परा, प्रथमसमवाय एव स्वनिर्वाहकोऽस्त्वित्यत आह—स्वनिर्वाहकत्वे इति । तस्येत्यनुवर्तते । तथाच तस्य समवायस्य स्वनिर्वाहकत्वे स्वस्मिन् स्वयमेव विशेषणविशेष्यभावबुद्धिजनकत्वेऽङ्गीकृते समवाय एव 'न स्यात्' न सिद्ध्येदित्यर्थः । गुणगुण्यादिभेदं तत्समवायं चाङ्गीकृत्य तस्य स्वनिर्वाहकत्वकल्पनापेक्षया लाघवेन गुणगुण्यादेरभेदमङ्गीकृत्य एकस्य द्रव्यस्यैव स्वनिर्वाहकत्वोपपत्तौ समवायवैयर्थ्यादिति भावः ।

(८) सू—ॐ ॥ नित्यमेव च भावात् ॥ ॐ ॥ १४ ॥

नित्यत्वाच्च परमाणूनां समवायस्य च तस्यैव जनित्वाङ्गीकारा-
न्नित्यमेव कार्यं स्यात् । अन्यथा न कदाचित् ॥ १४ ॥

---

(८) एवं परपक्षे कारणत्रयनिरासेन सृष्टिं निरस्य प्रलयनिरासार्थं प्रवृत्तं सूत्रं पठित्वा व्याचष्टे—नित्यमिति ॥ नित्यत्वादिति । सदातनत्वादित्यर्थः । 'सदातनं सत्यमिति नित्यमित्युच्यते बुधैः' इति वचनात् । अनेन नित्यमित्यस्य भावादिति हेतावप्यन्वयो दर्शितः । चशब्दः परमाणूनां चेत्यन्वितो न केवलं समवायिकारणपरमाणूनां, किंतु निमित्तकारणेश्वरेच्छादेश्चेति समुच्चयार्थः । 'नित्यमेव' नित्यदेव कार्यं स्यादित्यनेन नित्यमित्यस्य साध्येऽप्यन्वयः । कार्यमित्यस्याध्याहारश्च दर्शितः । न तु परपक्षे कदाचित्प्रलये इत्येवकारार्थः । समवायसूत्रात्समवायस्येतिपदं बुद्ध्या विवेकेनानुवर्त्य समवायस्य नित्यं भावान्नित्यं नित्यदोत्पत्तिः स्यादिति सूत्रस्यार्थान्तरमभिप्रेत्याह—समवायस्येति । नित्यत्वादित्यनुवर्तते । सर्वं कार्यं नित्यमेव नित्यं जनिमदेव स्यादित्येवमन्वयस्यार्थः । न तु कादाचित्कजनिमदित्येवकारार्थः । न केवलं परमाण्वादीनामिति चशब्दार्थः । ततः किमित्यतो भावादित्यनेनोक्तं हेतुमाह—तस्यैवेति । समवायस्यैवेत्यर्थः । प्रागसतस्सत्तासमवाय एव जनिरिति परैरङ्गीकारादिति भावः । न तु विकारादेरित्येवकारार्थः । जनित्वाङ्गीकारादित्यनेन भावस्सद्भावः प्रजननं तद्रूपत्वाङ्गीकारादिति हेतोरर्थान्तरमुक्तं भवति । अनेन सौत्रश्चशब्दः कारणसमुच्चयार्थः । समवायसमुच्चयार्थश्चेति सूचितम् । केचित्तु—परपक्षे सृष्टिप्रलयनिरासस्समुच्चये चशब्दः किञ्चेत्यर्थक इत्याहुः । स्यादित्यनन्तरं तत इति शेषः । अस्याप्युक्तरीत्यान्वयः । समवायिकारणादिसत्त्वेऽपि कार्योत्पत्त्युपरमे बाधकमाह—अन्यथेति । सकलकारणसत्त्वेऽपि कार्योत्पादोपरम इत्यर्थः । न कदाचिदिति । कदाऽपि तस्मात्कार्योत्पत्तिर्न स्यादित्यर्थः । सति पुष्कलकारणे कार्यानुत्पादे तस्य तत्कारणत्वायोगादिति भावः ।

(९) सू—ॐ ॥ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ ॐ ॥ १५ ॥

रूपादिमत्त्वाच्च परमाणूनामनित्यत्वं तथा दृष्टत्वाल्लोके ॥ १५ ॥

(१०) सू—ॐ ॥ उभयथा च दोषात् ॥ ॐ ॥ १६ ॥

---

(९) एवं परमाणूनां नित्यत्वमभ्युपेत्य तदारम्भकवादो दूषितः । इदानीं नित्यत्वं पराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—रूपादीति ॥ भौतिक रूपरसगन्धस्पर्शवत्त्वादिति हेत्वर्थः । तेन नेश्वरादौ व्यभिचारः । नित्यमिति पूर्वसूत्रे प्रकृताः परमाणवोऽत्र पक्षीभूता इत्याह—परमाणूनामिति । पार्थिवाप्यतैजसपरमाणूनामित्यर्थः । साध्यप्रदर्शकस्य विपर्यय-शब्दस्यार्थमाह—अनित्यत्वमिति । तस्यैव स्वाभिमतप्रकृतनित्यत्वाभाव-रूपत्वादित्यर्थः । स्यादत इति शेषः । अग्रोत्तरत्रान्वयः । सूत्रे विपर्यय-श्चेति सम्बन्धः । तदनुसारेण भाष्येऽप्यनित्यत्वं चेति । उभयत्र चशब्दो भिन्नक्रमः । तदर्थस्तु सावयवत्वं, 'चकारात्सावयवत्वं गृह्यते' इति तत्त्व-प्रदीपोक्तेः । अतएव टीकायां अवयवित्वस्य द्रव्यत्वरूपपक्षधर्मावच्छिन्न-साध्यव्यापकस्योपाधित्वमाशङ्क्य रूपादिमत्त्वादेव तत्सिद्धेरित्यनेन पक्ष एव साधनव्यापकत्वोक्ता । ननु रूपादिमत्त्वेऽपि अनित्यत्वं कुत इत्यतः प्रवृत्तं दर्शनादिति सूत्रखण्डं व्याचष्टे—तथेति । लोके रूपादिमति घटादावनित्यत्वस्य च दृष्टत्वादित्यर्थः । तथाचात्र व्याप्तिसद्भावाच्चा-प्रयोजकताऽऽशङ्कति भावः ।

(१०) ननु रूपादिमत्त्वेऽपि परमाणूनां नित्यत्वं किं न स्यात्, अस्तु वा नित्यत्वं किं बाधकमित्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—उभयथा चेति ॥ परमाणूनां 'नित्यत्वे' अनित्यत्वाभावे अनित्यत्व इत्यनेन सूत्रे उभयथेत्येतन्नित्यत्वे च विपर्यय इति प्रकृतनित्यत्वानित्यत्वरूपपक्षद्वय-परामर्शकमिति व्याख्यातम् । परमाणूनामित्यतः प्राग्रूपादिमतामपीत्युप-स्कार्यम् । दोषादित्युक्तदोषमाद्यपक्षे संयोजयति—तद्धीति । परमाणु-वत्सर्वेषां घटादीनामपि नित्यत्वं स्यात् । अनित्यत्वं न स्यादित्यर्थः । ननु घटादेरवयवित्वात् कृतकत्वाच्च भवत्यनित्यत्वं, न परमाणूनां, तदभावात् ।

नित्यत्वे परमाणूनां तद्वत्सर्वनित्यत्वं स्यात् । विशेषप्रमाणाभावात् । अनित्यत्वे कारणाभावात्तदुत्पत्त्यभावः ॥ १६ ॥

(११) सू—ॐ ॥ अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ ॐ ॥ १७ ॥

अतो रूपादिमत्त्वाविशेषेऽपि विशेषप्रमाणबलादस्तु घटादेरनित्यत्वं न परमाणूनामिति वैषम्यमाशङ्क्याह—विशेषेति । परमाणूनामनित्यत्वाभावसाधकस्यावयवित्वकृतकत्वाभावरूपस्य विशेषप्रमाणत्वेन पराभिमतस्य पक्षीभूतेषु परमाणुष्वभावादित्यर्थः । रूपादिमत्त्वादेव तत्सिद्धेरिति भावः । अनित्यत्वपक्षमनूद्य तत्र दोषादित्युक्तदोषं योजयति—अनित्यत्व इति । परमाणूनामिति वर्तते । तथाच परमाणूनामनित्यत्वे तेषां कारणाभावात्समवायिकारणाभावादुत्पत्त्यभावः स्यात् । यतएवमतो द्व्यणुकादेः समवायिकारणाभावादुत्पत्तेरप्यभावः स्यात् परपक्षे, अतः स दुष्टः अतः न तद्विरोधः प्रकृतार्थस्येत्यावृत्त्या योजना । अत्र सूत्रे चशब्दोऽप्यर्थे । न केवलमेकपक्षे दोषः, किन्तु पक्षद्वयेऽपीति समुच्चयार्थः । अथवा न केवलं 'उभयथापि न कर्म' इत्यत्र पक्षद्वयोक्तदोषात्, किन्त्वपसिद्धान्तदोषाच्चेति समुच्चये चशब्दः । अन्यथा परमाणुनित्यत्वे नित्यमेव कार्यं स्यादिति दोषस्योक्तत्वात्, अनित्यत्वेऽपीश्वरेच्छान्यायेन मूलकारणाभावापसिद्धान्तयोरर्थसिद्धत्वात्, उक्तत्वर्थाभ्यामुभयत्र दोषावगमादिदं सूत्रं व्यर्थमेव स्यात् । अतएव तत्त्वप्रदीपे—प्रथमं श्रुत्यर्थाभ्यामवगतदोषद्वयपरतयेदं सूत्रं व्याख्यायानन्तरं अथवोभयत्रापसिद्धान्ताख्यं दूषणान्तरमुच्यत इति पक्षान्तरपरतया व्याख्यातम् । न च व्यवधानायोगः । यतोऽत्र निमित्तं 'एवं परमाणूनाम्' इत्यवतारिकाटीकायां सङ्गतिविशेषाख्यं पूर्वसूत्रस्याभिहितं, तथास्य सूत्रस्य ननु रूपादिमत्त्वेऽपीत्यनेन विशेषाशङ्कारूपा सङ्गतिरपि तत्त्वप्रदीपटीकयोः प्रदर्शितेति ध्येयम् ।

(११) एवं प्रपञ्चेन दूषितं परमाण्वारम्भवादमप्रामाणिकत्वेनापि दूषयत्सूत्रं पठित्वा व्याचष्टे—अपरिग्रहाच्चेति ॥ श्रुतीति । श्रुतिस्मृत्यनुकूलत्वाभावात् तद्विरुद्धत्वाच्चेत्यर्थः । परमाण्वारम्भवादस्येति प्रकरणाल्लभ्यते । न केवलं पूर्वोक्तहेतुभ्य इति चार्थः । अनेन पूर्वोक्तहेतूनामनपे-

श्रुतिस्मृत्यपरिगृहीतत्वाच्चातिशयेनानपेक्षता ।
(१२) आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थकाम् ।
इति च मोक्षधर्मे ॥ १७ ॥

॥ इति वैशेषिकाधिकरणम् ॥ ६ ॥

क्षेति साध्येनान्वय इति सूचितम् । अत्र आद्यव्याख्याने सूत्रे अपरिग्रहादित्यस्य असूर्यंपश्या राजदारा इतिवदसामर्थ्येऽपि समासं निर्मक्षिकमित्यादाविव अव्ययत्वं वा आश्रित्य श्रुत्यादिपरिग्रहाभावात् तदानुकूल्याभावादित्यर्थः । द्वितीयव्याख्याने तु परिगृह्यत इति परिग्रहः न परिग्रहः अपरिग्रहः इति विग्रहः । नञश्च विरुद्धार्थता । भावप्रधाननिर्देशश्चायमिति ज्ञातव्यं, प्रधानकारणत्वयावदपेक्षया अतिशयेनेत्यनेन अत्यन्तशब्दस्य अनपेक्षता अनादरणीयतेति । अनेन अनपेक्षत्वस्यच अर्थ उक्तः । सूत्रे न अपेक्षा अनपेक्षेति विग्रहः । शिष्टैः कार्यैतिशेषः । परमाण्वारम्भवाद इति च प्रकरणाल्लभ्यते ।

(१२) यदवादि श्रुतिस्मृतिविरुद्धत्वादिति तत्स्मृतिसिद्धमित्याह—आन्वीक्षिकीमिति ॥ इदं च—'इन्द्रः सृगालरूपेण वभाषे क्रुद्धमानसं' इति पूर्ववाक्ये प्रकृतस्य सृगालरूपस्य इन्द्रस्य कश्चित्प्रति वाक्यम् । एतच्च 'अहमासं पण्डितको हैतुको वेदनिन्दकः' इति पूर्वेण 'तस्येयं फलनिष्पत्तिस्सृगालत्वं यतो मतम्' इत्युत्तरेण वाक्येन च व्याख्येयम् । तथा हि—यतः अहं 'पण्डितकः' कुत्सितो विद्वान् 'हैतुकः' शुष्कानुमानप्रामाण्यवादी अतएव स्वतर्कविरुद्धवेदपदोक्तसदागमार्थनिन्दकश्च 'आसम्' अभूवं, न केवलमेतावत्, किन्तु 'आन्वीक्षिकीं' दृष्टवदुत्प्रेक्षारूपां 'निरर्थकां' परमात्मोत्कर्षावोधकत्वान्निर्विषयां मोक्षासाधकत्वान्निष्प्रयोजनां तर्कविद्यामनुरक्तः तत्रार्तावासक्तोऽभवम् । अतस्तस्यानुरागस्येदं सृगालत्वं फलरूपमिति । अत्रेन्द्रेण तर्कविद्यानुरागस्य जम्बुकजन्महेतुत्वोक्त्या वेदनिन्दक इत्युक्त्या च तर्कविद्यारूपपरमाण्वारम्भवादस्य 'आत्मन आकाशः' (तै. २-१-२.) 'उत्पत्तिस्थितिसंहाराः' इत्यादिश्रुतिस्मृतिविरुद्धत्वं ज्ञायत इति न हेत्वसिद्धिः । मोक्षधर्म इत्यस्य श्रुत्यादिविरुद्धत्वं उक्तमिति अध्याहृतेनान्वयः । अनेन न केवलं पूर्वोक्तविशेषहेतुभ्यः । नाप्यपरिग्रहात् । किंतु श्रुत्यादिविरुद्धत्वाच्चेति सौत्रचशब्दस्यार्थ उक्तो भवति ।

॥ इति वैशेषिकाधिकरणम् ॥ ६ ॥

॥ ७. समुदायाधिकरणम् ॥

(१) परमाणुपुञ्जत्वादिमतमपाकरोति ।

(२) सू—ॐ ॥ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ ॐ ॥ १८ ॥

समुदायस्यैकहेतुकत्वं न युज्यते । उभयहेतुकेऽप्यन्योन्याश्रय-

॥ ७. समुदायाधिकरणम् ॥

(१) अत्राधिकरणप्रतिपाद्यं दर्शयति--परमाणुपुंजेति ॥ अत्राधिकरणे पाषण्डिप्रभेदेषु वैभाषिकसौत्रान्तिकमाध्यमिकयोगाचारभेदेन चतुर्विधेषु सौगतेषु मध्ये परमाणुसमुदाय एव गोघटादिबोधबोध्यो नत्ववयवी नाम तदतिरिक्तोऽस्तीति वादिनां वैभाषिकाणां सौत्रान्तिकानां च मतं निराकरोति सूत्रकृदित्यर्थः ।

(२) अत्र सूत्रव्याख्यानेनैव पूर्वपक्षः स्फुटीभविष्यतीत्यभिप्रेत्य सिद्धान्तयत्सूत्रं पठित्वा तत्र समुदाय इति सप्तम्यन्तपदस्योभयपदार्थप्रतियोगिना एकहेतुके इत्यध्याहृतपदेनान्वयमभिप्रेत्य प्रथममपिशब्दलभ्यपक्षान्तरं प्रतिषेधति—समुदायस्येति ॥ 'समुदायस्य' परमाणुसमुदायस्य एकदेशसंयोगविशेषरूपस्य 'एकहेतुकत्वं' एकपरमाणुजन्यत्वमयुक्तमित्यर्थः । अस्मिन् साध्ये हेतुस्तु सूत्रे विरोध इत्यध्याहृतपदेन सूचितः एकस्मात्समुदाय इत्यस्य व्याहतेरित्येवंरूपो द्रष्टव्यः । इदानीं समुदाय उभयहेतुक इति वाक्येन साक्षादुक्तं पक्षमनूद्य तत्र सूत्रकृदुक्तं दोषं योजयति—उभयेति ॥ समुदाय इत्यस्ति । तथाच समुदाये उक्तरूपे 'उभयहेतुके' मिलितोभयहेतुके एकदेशस्यानेकपरमाणुहेतुकेऽङ्गीकृतेऽपि 'तदप्राप्तिः' तस्य समुदायस्याप्राप्तिरनुपपत्तिरेवेत्यर्थः । न केवलमेकहेतुक इत्यपिशब्दार्थः । कुतोऽप्राप्तिरित्यतस्तत्र तस्मादिति व्यत्यस्ततत्पदेनोक्तं हेतुं दर्शयति—अन्योन्येति । उभयोरिति बुद्ध्या विवेकेन सम्बध्यते । तथाच मिलितानेकतः समुदायसिद्धिः समुदाये सति मिलितानेकत्वसिद्धिः इत्युभयोर्मिलितानेकत्वसमुदाययोः कार्यकारणयोः परस्पराश्रयभावापातादित्यर्थः । तदप्राप्तिः समुदायानुपपत्तिरित्यर्थः । इदानीमुभयहेतुक

त्वात्तदप्राप्तिः । अन्यथा सर्वदा समुदायसत्त्वं स्यात् ॥ १८ ॥

(३) सू—ॐ ॥ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥ ॐ ॥ १९ ॥

सर्वदा विद्यमानोऽपि समुदायः परस्परापेक्षया व्यवह्रियत

इत्यस्य विरलानेकहेतुकेत्यर्थमुपेत्य तेनोक्तं पक्षान्तरमनूद्य दूषयति—अन्यथेति। समुदायस्योक्तविधत्वमनङ्गीकृत्य नानादेशस्थानेकपरमाणुहेतुकत्वेऽङ्गीकृते इत्यर्थः। अत्र पक्षे समुदाय इत्यनेन अनेकत्वसङ्ख्या विवक्षिता। समुदायत्वं तेषामिति शेषः। तथाच सर्वदा सतां तेषां विरलानेकपरमाणूनां सर्वदा समुदायत्वं तदुत्पादकत्वं स्यात्। ततश्च समुदायस्यापि सर्वदा सत्त्वं स्यात्। तथाच प्रलयाभ्युपगमविरोध इति योजना। समुदायस्येति पाठान्तरम्। यस्मादेवं समुदायस्याप्राप्तिः तस्मात्स एव गोघटादिबुद्धिवेद्यो नत्ववयवी कश्चिदस्तीति पक्षो न युक्त इति भावः।

(३) उक्तमाक्षिप्य समादधत्सूत्रं पठति—इतरेतरेति ॥ अत्र षष्ठ्यन्ततया विपरिणतस्य समुदायस्येति पदस्य व्यवहार इत्यस्य वा अनुवृत्तिं, इतरसहितं इतरत् इतरेतरत् तस्य प्रत्ययः तद्विषयापेक्षाबुद्धिः इतरेतरप्रत्ययः। स निमित्तभूतो ययोर्वित्तिव्यवहारयोस्तावितरेतरप्रत्ययाविति व्यधिकरणो बहुव्रीहिः। ततः 'अर्श आदिभ्योऽच्' विषयतासम्बन्धेन तद्वान्। 'यद्वा—इतरत् इतरत्र प्रत्ययः इदं चेदं चेत्यपेक्षाबुद्धिः यस्य व्यवहारादेर्निमित्तभूतः स तथोक्तः। तस्य भावस्तत्त्वं, तस्मादिति विग्रहं चाभिप्रेत्य समुदायस्य विरलानेकहेतुकत्वपक्षोक्तदोषोद्धाराय तत्र हेतुकथनार्थं प्रवृत्तमाक्षेपांशं तावद्व्याचष्टे—सर्वदेति। अपिर्यद्यपि तथापीत्यर्थे। नञावर्तते। योजना तु—यद्यपि विरलानेकहेतुकः समुदायः सर्वदा विद्यमानो नित्य एव भवति, तथाऽपि न प्रलयानुपपत्तिदोषः। कुतो? यतोऽनेकत्वसङ्ख्यारूपः समुदायः सर्वदा न व्यवह्रियते न प्रतीयते च। न च विद्यमानत्वे व्यवहाराद्यभावोऽपि कुत इति वाच्यम्। यतः 'परस्परापेक्षयैव' इदं चेदं चेति परस्परज्ञानापेक्षयैव 'व्यवह्रियते' तज्जन्यानेकत्वज्ञानेन तादृशव्यवहारेण च विषयीक्रियते। अपेक्षाबुद्ध्यभावे

इति चेन्न । एकं कार्यमुत्पाद्य तस्य विनष्टत्वात्परस्परप्रत्यय-
स्तदपेक्षया व्यवहार इति न युज्यते ।
(४) कारणे सति कार्यं भवत्येवेति हि तस्य नियमः ॥ १९ ॥

तु न प्रतीयते न व्यवह्रियते । न च प्रलये परस्परापेक्षाबुद्ध्यभावोऽपि कुत इति वाच्यम । यतः परस्परापेक्षा परस्परापेक्षयैव मेलनरूपपरमाणु-सामीप्यापेक्षयैव भवति । विप्रकृष्टे इदं चेदं चेत्यपेक्षाबुद्धेरदर्शनादिति परिहारांशं व्याचष्टे—नेति । नेत्येतद्विवृणोति—परस्परेति । परस्परं प्रत्येति विषयीकरोतीति परस्परप्रत्ययः अपेक्षाबुद्धिः तदपेक्षयेत्यर्थः । व्यवहार इत्यनेन तत्कारणज्ञानमप्युपलक्ष्यते । तथाच समुदायस्य नित्य-त्वेऽपि तद्विषयिव्यवहारयोरपेक्षाबुद्धिनिबन्धनयोः कादाचित्कतया न प्रत्ययानुपपत्तिदोष इत्येतन्न युक्तमित्यर्थः । कुतो नेत्यतस्तत्र तदप्राप्तेः समुदाये कदाऽपि विप्रतिव्यवहारयोरभावापातादिति पूर्वसूत्रानुवृत्तहेतु-मभिप्रेत्य तदुपपादकत्वेन प्रवृत्तमुत्तरसूत्रमिति सौत्रहेतुं तात्पर्यतो व्याख्याति—एकमिति । 'तस्य' विरलानेकपरमाणुजन्यसमुदायस्य 'एकं' एव 'कार्यमुत्पाद्य नष्टत्वात्' इत्यर्थः । तथाच प्रथमं विरलपरमाणूनां मिलित-परमाणूत्पादकत्वं मिलितानां च दर्शनं ततः इदं चेदं चेति परस्परापेक्षा-प्रत्ययः, ततो व्यवहारादिः, तत्र द्रष्टा पुरुषः परमाणवश्च क्षणिकाः ते चैकमेव कार्यमुत्पाद्य नश्यन्तीत्यङ्गीकुर्वतां सौगतानां मते प्रथममेकस्य परमाणुदर्शनम्, अथ तत्रैव तस्यैवापेक्षाबुद्धिः अथ तत्रैव तस्यैव व्यवहारा-दीति क्रमो न युज्यते । तन्मते सर्वेषां क्षणिकत्वेन दर्शनबुद्धिव्यवहारादीनां एकविषयत्वस्यैकाधिकरणत्वस्य चायोगादिति भावः । अनेनोत्पत्तिनिमित्त-मात्रत्वादिति सूत्रशेषस्य परमाणूनामेककार्योत्पत्तावेव निमित्तत्वात् द्वितीयादिक्षणवृत्तिदर्शनापेक्षाबुद्ध्यादिरूपकार्यान्तरोत्पत्तावनिमित्तत्वात् तेषामेकं समुदायाख्यं कार्यमुत्पाद्य नष्टत्वात् पुनस्तेभ्यः कार्यान्तरोत्पत्त्य-योगादित्यर्थ उक्तो भवति ।

(४) ननु विरलपरमाणुजन्यानां मिलितपरमाणूनां स्थायित्वमङ्गी-क्रियते । ततस्तद्विषये दर्शनापेक्षाबुद्धिव्यवहारा भवेयुरतो नोक्तदोष इत्यत आह—कारणे सतीति ॥ हि यस्तस्य सौगतस्य नियमः । अस्तीति

(५) सू—ॐ ॥ उत्तरोत्पादे च पूर्वनिरोधात् ॥ ॐ ॥ २० ॥

शेषः। अस्यातस्तेषां स्थायित्वाभ्युपगमे प्रतिक्षणं कार्योत्पादकत्वप्रसङ्गः। तथाचाल्पतरकालेऽप्येकैकस्मात्परमाणुपुञ्जात्मकाद्घटादनेककार्योत्पत्त्या कुलालशालापरिपूर्तिप्रसङ्ग इत्युपस्कृतवाक्येनान्वयः। यद्यपि क्षणिकत्वहानिरेव वक्तव्या, न तूक्तबाधकम्। तथापि क्षणिकत्वहानिरेव क्षणिकत्वाभ्युपगमे नियमाख्यकारणप्रदर्शनेनोक्ता वेदितव्या। अस्माच्चियमात्स्थायित्वाभ्युपगमे कुलालशालापरिपूर्तिप्रसङ्गाद्धि तैः क्षणिकत्वमभ्युपगतम्। अत्र तत्त्वप्रदीपे — इतिचेत्कार्यसम्भृतिमात्रव्यावृत्तिकारणमित्यनुभाष्यदिशा द्वितीयसूत्रांशस्य कारणस्य सदृशकार्योत्पत्तावेव निमित्तत्वादित्यर्थमभिप्रेत्य तदनुसारेणैकं सदृशं कार्यमुत्पाद्य तस्य विनष्टत्वान्नापेक्षाप्रत्ययादिरूपविसदृशकार्योत्पत्तिर्युज्यते। कुत एतत्? कारणे सति कार्यं भवत्येवेति तस्य नियमो, न पुनर्विशेषकार्यमपीति भाष्यस्याप्यर्थ उक्तः। न चैवं टीकायास्तद्विरोधः, सुधाविरोधश्चेति वाच्यम्। द्वितीयतृतीयसूत्रयोरर्थान्तराभिप्रायेण तत्प्रवृत्त्या विरोधाभावात्।

(५) एवं विरलपरमाणुभ्यो मिलितपरमाणूत्पत्तिमभ्युपेत्य व्यवहाराद्यसम्भवो दर्शितः। अथ विसदृशकार्योत्पत्तिमपि निराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—उत्तरेति ॥ कार्यशब्दः सदृशकार्यपरः। विषयसप्तमीयम्। सामर्थ्यादिति शेषः। तथाच कारणस्य सदृशकार्यजनन एव सामर्थ्यादित्यर्थः। न तु विसदृशकार्योत्पत्तौ। अन्यथा घटात्पटोत्पत्तिप्रसङ्गात् इत्येवशब्दार्थः। कार्यकारणपदाभ्यां उत्तरपूर्वशब्दौ व्याख्यातौ। कार्योत्पत्तावेव कारणस्य सामर्थ्यादिति हेत्वन्वययोग्यं सूत्रे नञनुवृत्त्या लब्धं साध्यं दर्शयति—नेति। विशेषेभ्यो विरलेभ्यः परमाणुभ्यो विशेषकार्योत्पत्तिः मिलितपरमाणुरूपविसदृशकार्योत्पत्तिर्न युक्तेत्यर्थः। चशब्दो भिन्नक्रमेणात्राप्यन्वेति। न केवलं वित्तिव्यवहारयोरसम्भव इति तदर्थः। एवेत्यनेन विशेषकार्योत्पत्तिश्चेत्यनेन च सौत्रचशब्दोऽवधारणार्थः समुच्चयार्थश्चेत्युक्तं भवति।

(६) कार्योत्पत्तावेव कारणस्य विनाशाच्च न विशेषकार्योत्पत्तिः ॥२०॥

(७) सू—ॐ ॥ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ ॐ ॥ २१ ॥

कारणे विनष्टे कार्यमुत्पद्यते चेत्तत्कार्यमिति प्रतिज्ञाहानिः ।

(८) तत्काले कारणमस्ति चेद्विनाशकारणाभावाद्यौगपद्यं

---

(६) ननु सदृशकार्यजनने समर्थमपि कारणं कार्यमुत्पाद्य पश्चात्तत्र वैसादृश्यमुत्पादयति, न चातिप्रसङ्गः । विशेषकार्योत्पत्तेरदृष्टाधीनत्वादित्यतस्तत्रोत्तरत्वेनापि उत्तरोत्पाद इति समग्रसूत्रं योजयति- कार्येति ॥ अत्र पक्षे उत्तरोत्पाद इति सतिसप्तमी। निरोधाच्चेत्यपिशब्दान्वयः। तथाच 'उत्तरोत्पादे' कार्योत्पत्तौ सत्यामेव 'पूर्वनिरोधात्' पूर्वस्य कारणस्य विनाशाच्च नोक्तविशेषकार्योत्पत्तिर्युक्तेत्यर्थः। अन्यथा पूर्वनिरोधात् पूर्वाचार्याङ्गीकृतक्षणिकत्वविरोधादिति चशब्दसूचितार्थः। तत्त्वप्रदीपे तु इतश्च न विशेषकार्योत्पत्तिरित्यवतारितत्वात् चशब्दस्य पूर्वहेतुसमुच्चायकत्वमुक्तम्। अतएवैकं कार्यमिति पूर्वहेतुव्याख्यानरूपं भाष्यमपि विशेषकार्योत्पत्तिनिरासकतया व्याख्यातम्।

(७) एवं विसदृशकार्योत्पत्तिनिरासेन व्यवहारादिकं पराकृत्येदानीं प्रतिक्षणकार्योत्पत्तिमेव निराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—असतीति ॥ कारणे विनष्ट इत्यनेनासतीत्यस्यार्थ उक्तः। कार्यमुत्पद्यते चेदित्यनेन सूत्रे उत्तरोत्पाद इत्यस्यानुवृत्तिः सूचिता। अस्य पक्षान्तरत्वद्योतनाय—चेदिति। यदीत्यर्थेऽयम्। अतस्तर्हीति लभ्यते। तदिति तन्त्रम्। तस्य तत्कार्यमिति प्रतिज्ञायाः सैद्धान्तिकप्रतिज्ञापदानां हानिर्विरोधः स्यादित्यर्थः। कार्यकाले कारणस्य सत्त्वावश्यंभावेन तदनभ्युपगमे तस्य तत्कार्यत्वमिति व्यपदेशो विरुद्ध इति भावः।

(८) पक्षान्तरोद्घाटनपरमन्यथेत्येतद्व्याचष्टे—तत्काल इति ॥ कार्योत्पत्तिक्षण इत्यर्थः। कारणे सत्येव कार्यमुत्पद्यते चेदिति पर्यवसितार्थः। यौगपद्यं स्यादिति शेषः। कुत इत्यतः सूत्रकृदभिप्रेतहेतुमाह—विनाशकारणाभावादिति। कार्योत्पत्तिक्षणरूपद्वितीयक्षणे कारणस्य सत्त्वेन

सर्वकार्याणाम् ॥ २१ ॥

(९) सू—ॐ ॥ प्रतिसङ्ख्याऽप्रतिसङ्ख्या-निरोधाप्राप्तिरविच्छेदात् ॥ ॐ ॥ २२ ॥

तस्यास्तद्विनाशकत्वायोगात्, विनाशकान्तरस्य चाभावात्। तृतीयादि-क्षणेऽपि सतस्तस्मात्पुनः कार्योत्पत्तयः स्युः। कारणे सति कार्यं भवत्येवेति नियमात्। तेभ्यस्तथेति सर्वकार्याणां यौगपद्यमविच्छेदेनोत्पत्तिः स्यादि-त्यर्थः। एवं तत्काल इति वाक्यं यस्मिन् काले कारणमस्ति तत्काले कारण-सत्त्वकाले कार्यमस्ति चेत् तस्यापि किञ्चित्कार्यकारणत्वेन तत्सत्त्वकाले कार्यान्तरस्यापि सत्त्वापत्त्या तस्याप्येवं सत्त्वापत्त्या सर्वकार्याणां विनाश-कारणाभावाद्यौगपद्यं युगपदवस्थानं स्यात्। ततश्चैकस्यां घटिकायां कुलालशालापरिपूर्तिप्रसङ्ग इत्यपि व्याख्येयम्। अत एव कारणे विनष्टे कार्यमुत्पद्यते चेदिति प्रथमपक्षवैपरीत्येनान्यथाशब्दार्थमनभिधायोभय-विधयौगपद्यापादनाय तत्काले कारणमस्ति चेदिति वाक्यविन्यासः कृतः।

(९) एवं क्षणिकवादे कार्योत्पत्तिं निराकृत्य विनाशं च निराकुर्वत्सूत्रं पठित्वा व्याचष्टे—प्रतिसङ्ख्येति ॥ नियमादित्यनेन विच्छेदोऽनियम-स्तद्भावोऽविच्छेद इति हेतोरर्थान्तरमभिप्रेति। अभ्युपगमोपलक्षकमेतत्। कार्योत्पत्त्यविच्छेदादित्यर्थान्तरं तु न युज्यत इत्युत्तरवाक्यस्य न हि कार्योत्पत्तिविच्छेदो युज्यत इति योजनयाऽभिहितं बोध्यम्। सन्तानः कार्यपरम्परा निर्गतः सन्तानो यस्मान्नाशात्स तथोक्तः। सन्तानमन्तरेणेति यावत्। ससन्तान इत्यस्य प्रतियोगितया सन्तानेन सहित इत्यर्थः। विनाश इत्युभयान्वयी। कारणस्येति शेषः। चःसमुच्चये। निस्सन्तानः ससन्तानश्चेत्यनेन प्रतिसङ्ख्याऽप्रतिसङ्ख्याशब्दौ व्युत्क्रमेण व्याख्यातौ। तत्राद्यनाशे सन्तानस्य नाशान्वयाभावः। द्वितीये तु तस्याप्येवं अविच्छे-दोऽपि। प्रथमपक्षे कार्यविच्छेदाभावः, द्वितीये तु सन्तानोच्छेदाभावरूप इति विवेकः। विनाशश्चेति चशब्दो न केवलं विनाशद्वयसमुच्चये, किन्तु न केवलं परपक्षे कार्योत्पादो न युज्यते, किन्तु विनाशश्चेति समुच्चयेऽपि। तेन सूत्रे चशब्दोऽनुवर्त्य इति सूचितम्। न युज्यत इत्यनेनाप्राप्तिशब्दोऽ-

कारणे सति कार्यं भवत्येवेति नियमान्निस्सन्तानः ससन्तानश्च विनाशो न युज्यते ॥ २२ ॥

(१०) सू—ॐ ॥ उभयथा च दोषात् ॥ ॐ ॥ २३ ॥

नुपपत्त्यर्थकतया व्याख्यातः। यद्यपि प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधशब्दौ प्रतिसङ्ख्याप्रतिसङ्ख्यापदोक्तबुद्धिपूर्वकाबुद्धिपूर्वकविनाशार्थकतया बौद्धैः परिभाषितौ। तथापि घटादेः प्रतिक्षणविनाशस्याबुद्धिपूर्वकत्वात् सन्तानेन सहात्यन्तिकविनाशस्य मुसलप्रहारादिजन्यस्य प्रायेण बुद्धिपूर्वकत्वात्प्रतिक्षणविनाशसन्तानविनाशौ तदुभयशब्दार्थत्वेनोक्तावित्यदोषः। प्रतिक्षणं जायमानस्य घटादेः निस्सन्ताननाशस्य प्राथमिकत्वादात्यन्तिकनाशस्य ससन्तानस्य चानन्तरभावित्वात् तदभिप्रायेण भाष्ये व्युत्क्रमेण व्याख्यानम्। अनेन न केवलं क्षणिकमते कार्योत्पत्तिर्युक्ता, किन्तु प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधावपि, कुतोऽविच्छेदात्। नहि कार्योत्पत्तिविच्छेदो युज्यते। क्षणिकत्ववादिना हि प्रतिक्षणं कारणं कार्यमुत्पाद्य नश्यतीति वक्तव्यम्। अन्यथा सन्तानसाहित्येन नाशापत्तेः। क्षणिकत्वविरोधाच्च। क्षणिकस्य चोत्पत्तिकाल एव वियोगकालः। एवंचेत् कार्योत्पत्तिकाले सतः कारणस्य तद्वियोगकालेऽपि सत्त्वं प्राप्तम्। अन्यथा कार्येण वियोगानुपपत्तेः। एवं वियोगकालेऽपि कारणं कार्यमुत्पादयेत्। सतोऽपि कारणस्य कुतः कार्योत्पादकत्वम्, अविच्छेदात्, कारणे सति कार्यं भवत्येवेति नियमाभ्युपगमात्। एवं तदुत्पत्त्यनन्तरमपि कार्यान्तरमुत्पादयेदिति सिद्धः कार्योत्पत्त्यविच्छेदः। एवं सतो हि घटस्यात्यन्तिको नाशः न त्वसतः, अतोऽसौ सत्त्वात्कार्यं उत्पादयेदेव। कुतोऽविच्छेदात्। कारणे सति कार्यं भवत्येवेति नियमात्, तत्कार्यं चैवमिति कार्यपरम्परायाः अविच्छेदात् कथं सन्तानोच्छेदावसर इत्यतोऽपि न क्षणिकपक्षो युक्त इति सूत्रार्थ उक्तो भवति। केचित्तु—अविच्छेदादित्यस्य विच्छेदाभावादित्यर्थः। कारणे सति कार्यं भवत्येवेति नियमादिति भाष्योक्तहेतुस्तूपस्कृतः, न सोत्रपदोक्त इति कारणस्य कार्योत्पत्त्युत्तरक्षणेऽपि सत्त्वमिति चाहुः।

(१०) ननु तथापि सतां भावपदार्थानां न क्षणिकता निषेद्धुं शक्या, घटादेर्घटाद्यन्तररूपार्थक्रियाकारित्वं खलु सत्त्वं नाम। न च तत् क्षणिक-

कारणे सति कार्यं भवत्येवेति नियमे सर्वदा कार्यभावान्न कार्यकारणविशेषः । अनियमे कार्यानुत्पत्तिः ॥ २३ ॥

(११) सू—ॐ ॥ आकाशे चाविशेषात् ॥ ॐ ॥ २४ ॥

तामन्तरेणोपपद्यते । यद्याद्यक्षणे घटो घटान्तरमुत्पाद्य न स्वयं नश्यति, तदा घटान्तरमपि तथेत्यनन्तकार्यापातः । ततश्चैकस्यां घटिकायां कुलालशालापरिपूर्तिस्स्यात् । अतोऽर्थक्रियाकारित्वरूपसत्त्वसिद्ध्यै क्षणिकत्वमेष्टव्यं भावानामित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—उभयथेति ॥ नियमे अनियमे इत्यनेन उभयथेत्येतद्व्याख्यातम् । सर्वदा कार्यभावात् । क्षणिकमते कार्यस्य यावत्कारणभावित्वादित्यनेन दोषादिति सौत्रहेतोरुपपादकश्चशब्दसूचितो हेतुर्दर्शितः । 'न कार्यकारणविशेषः' सव्येतरगोविषाणवत् कार्यकारणयोर्विशेषः कार्यकारणभावो न स्यादित्यनेन 'कार्यानुत्पत्तिः' यतः कार्योत्पत्तिर्न स्यात् इत्यनेन च पक्षद्वयेऽपि दोषादित्युक्तो हेतुर्विवृतः । तत्रानियमपक्षे कारणे सत्यपि कदाचित्कार्याभावाङ्गीकारे तत्काले कारणस्यार्थक्रियाकारित्वाभावेनासत्त्वापत्तिः । ततश्चासतः कारणात् कदाऽपि कार्योत्पत्तिर्न स्यादित्यनिष्टप्रसङ्गान्तरोपस्कारेण सौत्रहेतुर्योज्यः । एवमनियमपक्षे कारणस्य घटादेः अर्थक्रियाकारित्वरूपसत्त्वाभावेन ततः कल्प्यमाना क्षणिकताऽपि व्याहन्येतेति चशब्दसूचितानिष्टप्रसङ्गान्तरं च द्रष्टव्यम् । कार्योत्पत्तिरित्यनन्तरं नान्यतरपक्षावलम्बेन घटादीनां घटाद्यन्तररूपार्थक्रियाकारित्वेन सत्त्वं वाच्यम्, किंतु जलाद्याहरणादियोग्यत्वेनेति परोक्तापादकासिद्धेर्न तदनुपपत्त्या क्षणिकता कल्प्येत्यसमञ्जसमिदं दर्शनमिति वाक्यशेषः । अनेन च सौत्रचशब्दस्य परपक्ष एवोभयथा दोषसत्त्वादस्मत्पक्षे च दोषाभावादिति हेतुसमुच्चायकत्वं प्रतिज्ञासमुच्चायकत्वं च अभिप्रेति ।

(११) ननु मा भूदर्थापत्त्या क्षणिकत्वसिद्धिः । तथापि विमतं क्षणिकं, सत्त्वात्, यत्सत् तत् क्षणिकम्, यथा दीपादि, सन्तश्चामी भावाः पदार्था इत्यनुमानेन सेत्स्यति । न च दृष्टान्ते साध्यवैकल्यम् । यद्विरुद्धधर्माधिकरणं तन्नानेति व्याप्तेः । पूर्वोत्तरक्षणयोः प्रदीपे परिमाणविशेषदर्शनेन वस्तुभेदस्याप्यावश्यकत्वात्तत एव क्षणिकतासिद्धेरित्याशङ्कां

दीपादिषु विशेषदर्शनात् क्षणिकत्वेनान्यत्रापि क्षणिकत्वमनुमीयते चेदाकाशादिष्वविशेषदर्शनादन्यत्रापि तदनुमीयेत ॥२४॥

परिहरत्सूत्रमुपन्यस्य व्याचष्टे – आकाशे चेति ॥ दीपादिष्विति वाद्युक्तानुमानदृष्टान्तेषु दीपदेहफलेष्वित्यर्थः । विशेषेति । पूर्वोत्तरक्षणयोः परिमाणविशेषदर्शनात्, ततएव विशेषस्य भेदस्यापि दर्शनात्सिद्धत्वादित्यर्थः । 'क्षणिकत्वेन' क्षणिकत्वस्य निश्चितत्वेनेत्यर्थः । तदृष्टान्तेनेति शेषः । अन्यत्रापीति । दीपाद्यन्यनीलादिभावपदार्थेऽपीत्यर्थः । अपिः समुच्चये । अनेन चशब्दो विवृतः । चेद्यदि तर्हीति शेषः । आकाशादीत्यादिपदेन प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधयोर्ग्रहणम् । अत एव विष्णुतत्त्वनिर्णयटीकायां सेयं दिगित्यादिप्रत्यभिज्ञाया इत्येतद्व्याख्यावसरे दिक्शब्देनात्राकाशो गृह्यते, अव्याकृताकाशस्यैव दिक्त्वज्ञापनार्थम् । आदिशब्देन सोऽयं विनाश इत्यस्य ग्रहणमित्युक्तम् । न च निरोधयोर्द्वित्वात् आदिष्विति बहुवचनानुपपत्तिरिति वाच्यम् । अवकाशात्मकानां प्राच्यादिदिशामप्यादिपदेन ग्रहणात् । न चैवं 'आकाशो द्वौ निरोधौ च नित्यं त्रयमसंस्कृतं' इति बौद्धवचनविरोधः । दिशामाकाशप्रभेदत्वेन वास्तवैक्यविवक्षया तदुपपत्तेः । अविशेषेति । परिमाणविशेषादर्शनादित्यर्थः । तत एव 'अविशेषस्य' अभेदस्यापि सिद्धत्वादित्यपि व्याख्येयमेतत् । अक्षणिकत्वेन तदृष्टान्तेनेति च शेषः । अक्षणिकत्वस्य निश्चितत्वेनेत्यर्थः । अन्यत्राकाशादेर्नीलघटादिप्रपञ्च इत्यर्थः । तदक्षणिकत्वमपीत्यपिशब्दो भिन्नक्रमः । न केवलमाकाशादिषु, किंतु अन्यत्रापीति वा । अनुमीयते यत इति शेषः । अस्यास्तदप्राप्तिस्तेन सत्त्वेन क्षणिकत्वस्याप्राप्तिरिति प्रकृतप्रतिक्षयाऽन्वयः । अत्र वाद्युक्तानुमाने प्रतिपक्षानुमाने च पक्षसाध्यहेतुदृष्टान्तानां समुच्चये अर्थापत्त्यनुमानसमुच्चये च सौत्रश्चशब्दः । तथा चायं सूत्रार्थः — यदि दीपादौ विशेषात् क्षणिकत्वस्य सिद्धत्वादन्यत्रापि तदृष्टान्तेन तदनुमीयते । तर्ह्याकाशेऽविशेषात् स्थायित्वस्य सिद्धत्वेन तदृष्टान्तेन सत्त्वहेतुनैवाक्षणिकत्वमप्यनुमीयेत । सत्त्वहेतोराकाशे दीपादौ नीलिमादौ चाविशेषात् । अतः सत्त्वहेतोः स्वेनैव प्रतिपक्षितत्वान्नानेनापि क्षणिकत्वसिद्धिः, न केवलमर्थापत्त्येति ।

(१२) सू—ॐ ॥ अनुस्मृतेश्च ॥ ॐ ॥ २५ ॥

तदेवेदमिति प्रत्यभिज्ञानाच्च । प्रत्यभिज्ञाया भ्रान्तित्वे

---

(१२) एवं प्रतिपक्षेण सत्त्वानुमानं निरस्य प्रमाणबाधेनापि निराकुर्वत्सूत्रं पठित्वा व्याचष्टे—अनुस्मृतेरिति ॥ तदेवेदमिति प्रत्यभिज्ञानादिति । यदृष्टपूर्वं तदेवेदं घटादीति पूर्वोत्तरदेशकालसम्बन्धिनोरैक्यविषयकप्रत्यभिज्ञानादित्यर्थः । स एवाहमित्यनुक्त्वा तदेवेदमिति जडविषयकप्रत्यभिज्ञाप्रदर्शनं न परमत इवात्ममात्रस्थायित्वपरमिदं सूत्रमिति प्रदर्शनाय । चशब्दः पूर्वहेतुसमुच्चये । अस्यापि पूर्वसाध्येनान्वयः । उक्तं हि चन्द्रिकायां--सप्तमाष्टमयोः क्षणभङ्गविरोधस्थायित्वरूपैकसाध्यान्वयस्य सम्भव इति । ननु परिल्हनपुनर्जातकुन्तलकलापे सोऽयं कुन्तलकलाप इति प्रत्यभिज्ञायाः इवास्याः प्रत्यभिज्ञायाः भ्रान्तित्वाङ्गीकारात् न तद्बाधः सत्त्वानुमानस्येत्यतः तत्र प्रत्यभिज्ञायाथार्थ्यसूचकानुपदसूचितं दोषमविशेषादिति हेतुमापाद्यापादकोपस्कारपूर्वकमाह — प्रत्यभिज्ञाया इति । 'भ्रान्तित्वे' बाधकं विनाऽपि भ्रान्तित्वकल्पने 'विशेषदर्शनस्यापि' दीपादौ क्षणिकत्वसाधकतयोक्तपरिमाणभेदादिदर्शनस्यापि । अपिः समुच्चये । 'भ्रान्तित्वं' स्यादविशेषादिति शेषः । ननु तत्त्वोद्योतटीकायामनुस्मृतेश्चेत्यादिना तृतीयाङ्गीकारोऽपीत्यनेनास्य सूत्रस्य तद्देशकालविशिष्टैतद्देशकालविशिष्टवस्त्वैक्यसाधकप्रत्यभिज्ञापरतया व्याख्यानात् अस्मन्मते पूर्वोत्तरकालविशिष्टयोरैक्यसत्त्वेऽपि तयोर्भेदस्याप्यङ्गीकारात् तदेवेदमिति सावधारणप्रत्यभिज्ञाया चात्यन्ताभेदावगाहनेन तद्भ्रान्तित्वस्यावश्यकत्वात् तस्याप्यापाद्यत्वमनुपपन्नमिति चेन्न । यत इदं चोद्यं सुधायामाशङ्क्य परिहृतम् । तथा हि—ननु भवन्मते प्रत्यभिज्ञाभ्रान्तिरेव परिणामवादे पूर्वोत्तरकालवर्तिवस्तुनोर्भेदाभेदाङ्गीकारात्तदेवेदमिति प्रत्यभिज्ञया चात्यन्ताभेदावगाहनादिति चेत् । उच्यते—यदा हि पूर्वोत्तरकालभाविनोः अभेदः प्रत्यभिज्ञाविषयोऽङ्गीक्रियते तदा सावधारणस्य प्रत्यभिज्ञानस्य भ्रमत्वेऽपि तदिदमिति न भ्रमः, तेनैव च स्थायित्वसिद्धिर्भवति । यदा तु कालद्वयसम्बन्धो विषयः, तदा सावधारणमपि न भ्रम इति । तथाच तदेवेदमिति प्रत्यभिज्ञायाः तद्देशतत्कालसम्बन्ध्येवैतद्देशैतत्कालसम्बन्धीति

विशेषदर्शनस्यापि भ्रान्तित्वम् ॥ २५ ॥

॥ इति समुदायाधिकरणम् ॥ ७ ॥

॥ ८. असदधिकरणम् ॥

(१) शून्यवादमपाकरोति—

सू—ॐ ॥ नासतोऽदृष्टत्वात् ॥ ॐ ॥ २६ ॥

अदृष्टत्वान्नासतः कारणत्वं युज्यते ॥ २६ ॥

विशेष्यमात्रैक्यविषयकत्वेनेदं भाष्यं प्रवृत्तम्, न तु विशिष्टैक्यविषयकत्वेन, तादृश्याश्च भ्रान्तित्वमनिष्टमेवेति नापाद्यत्वानुपपत्तिः। विशिष्टविषयकत्वेऽपि निरवधारणप्रत्यभिज्ञानस्याभ्रमत्वमेवेति तस्य भ्रान्तित्वापादने नानुपपत्तिः, न वा ग्रन्थान्तरविरोध इति ध्येयम्।

॥ इति समुदायाधिकरणम् ॥ ७ ॥

॥ ८. असदधिकरणम् ॥

(१) अत्राधिकरणार्थं दर्शयति—शून्येति ॥ शून्यमेव जगत्कारणमिति वदतां माध्यमिकानां वादं समयं निराकरोति सूत्रकृदित्यर्थः। श्रुतिप्रामाण्यानभ्युपगमेन तद्विरोधाभावादसङ्गस्यापि संवृतिसम्बन्धेन जगत्कारणत्वोपपत्तेः शून्यतत्वादेव जगदुदयसम्भवादीश्वरेणोपयोगाभावात्तस्य जगत्कारणत्वमयुक्तम्। तस्यैव तल्लक्षणमित्येतत्तु सुतरामयुक्तमिति प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे—नेति। अदृष्टत्वादित्यतः प्राक् प्रामाणाभावादित्युपस्कार्यम। तथाचासतः सर्वधर्मविकलत्वरूपासत्त्वोपेतस्य शून्यस्य जगत्कारणत्वं न युज्यते। कुतः? तत्र प्रमाणाभावात्। न चासिद्धिः। शून्यकारणत्वस्य 'अदृष्टत्वात्' अप्रत्यक्षत्वात्। तत एव तदुपजीव्यनुमानाविषयत्वात्। एवमेव शून्यकारणतावगमकागमस्याप्यदर्शनादिति योजना। एतेन सौम्यहेतोरीश्वरादौ व्यभिचारो निरस्तः। अस्य हेतुसाधकहेतुत्वाभ्युपगमेन साक्षाद्धेतुत्वानभ्युपगमात्। अत एव तत्त्वप्रदीपे—प्र नादृष्टत्वादित्येवोक्तम्।

(२) सू—ॐ ॥ उदासीनानामपि चैवं सिद्धिः ॥ ॐ ॥ २७ ॥

असतः कारणत्वे उदासीनानां हेयोपादेयबुद्धिवर्जितानां खपुष्पादीनामपि सकाशात्कार्यसिद्धिः ।

---

(२) नन्वदृष्टमपि जगत्कारणत्वं शून्यस्याभ्युपगतं चेत्को दोषः । ननूक्तमदृष्टत्वादेव अप्रामाणिकत्वान्नाङ्गीकारार्हतेति, न अदृष्टत्वेन दृष्टानुमानानुपपत्तावपि सामान्यतो दृष्टत्वोपपत्तेः । कारणस्य हि कार्यवत् वस्तुत्वेन सत्त्वे निषिद्धे कार्यत्वेन हेतुनाऽसत एव जन्म सेत्स्यतीत्याशङ्कापरिहाराय पराभिप्रेतानुमानानां तर्कप्रतिघातं वक्तुं प्रवृत्तं सूत्रमुपन्यस्य व्याचष्टे—उदासीनानामिति ॥ असत इत्यस्य सर्वधर्मविकलत्वादसतः शून्यस्येत्यर्थः । न तुच्छस्येति । शून्यं परमार्थसदिति परैरभ्युपगमादसतः कारणत्वेऽङ्गीकृत इत्यनेनापादकप्रदर्शकैवंशब्दः पूर्वप्रकृतासत्कारणत्वपरामर्शकतया व्याख्यातो भवति । आपाद्यसमर्पके उदासीनानामपि सिद्धिरित्यंशे उदासीनानामिति पदमनूद्य हेयोपादेयबुद्धिविषयत्वात् उद्गत्य आसीनानामिति तत्त्वप्रदीपोक्तः । उदास्यन्त इति उदासीना इति व्युत्पत्तिमाश्रित्य चन्द्रिकारीत्योदासीनशब्दस्य हेयोपादेयबुद्ध्यविषयखपुष्पादिषु लक्षणामाश्रित्य वा हेयोपादेयबुद्धिवर्जितानां हेयत्वोपादेयत्वोपेक्षणीयत्वबुद्धिविषयताशून्यानामिति व्याख्यातम् । बुद्धिविषयत्वशून्यानामिति हेतुगर्भविशेषणपदस्य व्याख्यानात् बुद्धिशून्ये कार्यहेतौ तन्त्वादौ व्यभिचारो निरस्तः । अनेन चापाद्यस्य खपुष्पादेः कार्यसाधकत्वस्यानिष्टत्वे हेतुरुक्तो भवति । 'खपुष्पादीनां' गगनकुसुमादीनाम् । आदिपदेन सप्तमरसादिकं गृह्यते । न केवलं पराभिमतशून्यात्कार्यसिद्धिरिति समुच्चयेऽपिशब्दः । षष्ठ्यर्थकार्यकारणभावसम्बन्धविवरणाय सकाशादित्युक्तम् । न तु शेषतया । उदासीनानामित्यस्य सिद्धिरित्यनेन साक्षादन्वयभ्रमवारणाय तदन्वयाय च सिद्धिपदमुदासीनसम्बन्धिकार्यसिद्धिपरतया व्याख्यातम् । कार्यपदं सौरभ्यपीनतादिकार्योत्पत्तिपरं । स्यादित्यत्रापि सम्बध्यते ।

(३) चशब्दान्न चेदन्यत्रापि न स्यात् अविशेषात् ॥ २७ ॥

(४) सू—ॐ ॥ नाभाव उपलब्धेः ॥ ॐ ॥ २८ ॥

न च जगदेव शून्यमिति वाच्यम् । दृष्टत्वात् ॥ २८ ॥

(५) सू—ॐ ॥ वैधर्म्याच्च न स्वप्नादिवत् ॥ॐ॥२९॥

---

(३) खपुष्पादीनामकारणत्वेऽपि को दोष इत्यतस्तत्र स्वाभिमता सिद्धिरूपदोषोक्तिपरतया सौत्रचशब्दं व्याचष्टे—चशब्दादिति ॥ अस्या-विशेषादित्यनन्तरं अध्याहार्येण इतिसूचितमित्यनेनान्वयः । किं सूचित-मित्यतस्तदाह—न चेदिति । खपुष्पादीनामपि सकाशात्कार्यसिद्धिर्नास्ति चेदित्यर्थः । 'अन्यत्र' अन्यतः खपुष्पाद्यन्यवौद्धाभिमतशून्यात् 'अपि' जगदाख्यकार्योत्पत्तिः 'न स्यात्' इत्यर्थः । ननु शून्यस्य कारणत्वे खपुष्पादिकारणत्वापादनमसङ्गतं हेत्वभावादित्यत आह—अविशेषादिति। शून्यस्य खपुष्पादेश्चासत्त्वाविशेषादित्यर्थः । तथाच सर्वधर्मविकलत्व-रूपासत्त्वं हेतुः । अत्र दृष्टान्तस्तु शून्यमेवेति भावः । अनेन तर्कस्य विपर्ययपर्यवसानेन प्रकृतोपयोग उक्तो भवति ।

(४) भवेदेतद्दूषणं यदि शून्यतत्त्वात्परमार्थतो मृत्पिण्डाद्घट इव जगदुत्पद्येत । नैतदस्ति । शून्यस्य जगदाकारेण परिणामानभ्युपगमात् । किंतु संवृतिशब्दिताज्ञानविशेषादसतो रजताकारेणेव शून्यस्यापि जग-दाकारेण अवभासाख्यविवर्तत्वाभ्युपगमादित्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—नेति ॥ एवकारो भिन्नक्रमः । तथाच 'शून्यमेव' शून्यरूपमसदेव 'जगत्' जगदाकारेणावभाति । न परमार्थतो जगदस्तीति न वाच्यमित्यर्थः । न केवलमेतावत्, किन्त्वदृष्टिदोषपरिहाराय यदसदेव रजताकारेणावभा-तीति वचनं तदपि न युक्तमिति चशब्दार्थः । अनेन सौत्राभावशब्दो भवतीति भावः ननु, न भावोऽभाव इति व्युत्पत्त्या असत्पर इत्युक्तं भवति । 'दृष्टत्वात्' सदिति प्रतीयमानत्वादित्यनेन उपलब्धेरिति सौत्र-हेतुर्व्याख्यातः । एवं दृष्टत्वादित्येतत् नेदं रजतं, किंतु शुक्तिकैवेति बाधदर्शनादिति नोक्तसाधकनिरासकत्वेनापि व्याख्येयम् ।

(५) ननु स्व ने दृश्यमानस्य स्वाप्नस्य रज्जुभुजङ्गादेश्चासत्त्वं दृष्टम् ।

न च दृष्टस्यापि स्वप्नादिवदभावः । तस्योत्तरकाले स्वप्नोऽयं नायं सर्प इत्याद्यनुभवात् ।

(६) न चात्र तादृशं प्रमाणमस्ति ॥ २९ ॥

॥ इति असदधिकरणम् ॥ ८ ॥

अतो जगतस्सत्त्वेन दृष्टत्वेऽपि तद्वदसत्त्वं किं न स्यादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—वैधर्म्याच्चेति ॥ 'दृष्टस्य' सत्त्वेनोपलब्धस्य । अपिः वाद्युक्तहेतोः प्रतिपक्षहेतोश्च भेदे रुचिसूचको यद्यपीत्याद्यर्थे, न केवलमदृष्टस्येति समुच्चये वा । जगत इति शेषः । 'स्वप्नादिवत्' गजतुरगादिरूपस्वाप्नपदार्थादेरिव । आदिपदेन रज्जुभुजङ्गादिकं गृह्यते । अभावोऽसत्त्वम् । इदं चानुपक्तं पदम् । शङ्क्य इति शेषः । अनेन दृष्टत्वादिति हेतोः स्वेनैव प्रतिपक्षो व्यभिचारश्चोदितो भवति । कुतो नेत्यतस्तत्रापि हेतुत्वेन वैधर्म्यादित्यस्य साध्यधर्मविहीनत्वाद्दृष्टान्तस्येत्यर्थाश्रयणेनान्वयसम्भवेऽपि सत्यवादिसिद्धान्तेऽपि स्वप्ने मिथ्यार्थप्राचुर्यात्कतिपयार्थस्य सत्यत्वेऽपि विप्रतिपन्नत्वात् अङ्गीकारवादेन वा तं परित्यज्य, ननु न स्वप्नो दृष्टान्तो येन तत्र साध्यवैकल्यम्, किंतु स्वप्नजाग्रत्त्वम्, तस्य च मिथ्यात्वेनोभयसम्मतत्वान्नोक्तदोष इति वा यदि परो ब्रूयात्तं प्रति दोषान्तरोक्तिपरतया वैधर्म्यादिति हेतुं व्याख्याति—तस्येति ।- इदं चावर्तते । स्वप्न इति सावधारणम् । आदिपदेन बाधकान्तरं गृह्यते । तथाच तस्य स्वाप्नजाग्रत्त्वादेः तस्य जगतः सकाशात् भ्रान्त्युत्तरकाले प्रबोधानन्तरं स्वप्न एवायं न जाग्रत् । तथा नायं सर्पः किंतु रज्जुरित्यादिबाधकप्रमाणविषयत्वरूपाद्वैलक्षण्यादित्यर्थः । अनेन परोदीरितप्रतिपक्षानुमानस्य बाधकप्रमाणविषयत्वरूपोपाधिः तदभावरूपप्रतिपक्षश्चोक्तो भवति । प्रागबाधितोपलब्धेरेव हेतुतया सिद्धान्तिभिरुपन्यासान्न व्यभिचारोऽपीत्यप्युक्तम् ।

(६) ननु जगत्यपि स्वप्नादिवद्बाधकादसत्त्वं किं न स्यात्तथाचोपाधेः साधनव्यापकत्वं तदभावस्यासिद्धिश्चेत्याशङ्कां सौत्रचशब्दाभिप्रायोक्त्या परिहरति—न चेति ॥ अत्र प्रकृतजगति 'तादृशं' दृष्टान्तोदाहृतबाधकप्रत्यक्षसदृशं जगदसत्त्वग्राहिबाधकप्रमाणं नास्तीत्यर्थः । अनेन न केवलं

॥ ९. अनुपलब्ध्यधिकरणम् ॥

(१) विज्ञानवादमपाकरोति—

सू—ॐ ॥ न भावोऽनुपलब्धेः ॥ ॐ ॥ ३० ॥

स्वप्नादेर्बाध्यत्वरूपाज्जगद्वैधर्म्यात्, किंतु जगति बाधकाभावाच्चेत्यनुक्तसमुच्चये चशब्द इत्युक्तं भवति। यद्यपि स्वप्नादौ जगद्वैधर्म्योक्तौ जगति बाधकाभावरूपस्वप्नवैधर्म्यमुक्तप्रायं, तथापि कण्ठतोऽनुक्तत्वादनुक्तत्वम्। न च द्वयमपि वैधर्म्यशब्देनैव वक्तुं युक्तमिति चशब्दो व्यर्थ इति वाच्यम्। आवृत्तिं विनैव तत्सूचनार्थत्वात्। न च चशब्दस्योक्तशङ्कापरिहारकतया व्याख्याने तत्त्वोद्योतटीकायां इह चशब्देन सूचितं जगद्धर्मिकवैधर्म्ये वैधर्म्यशब्दार्थत्वेनाङ्गीकृत्य दूषणान्तरसमुच्चयार्थश्चकार इत्युक्तत्वात् तद्विरोध इति वाच्यम्। 'चेति दृष्टिविरुद्धताम्। निष्प्रमाणत्वमप्यस्य दर्शयामास विश्वकृत्' इत्यनुव्याख्यानोक्त्यैव मानाभावप्रत्यक्षविरोधरूपदूषणान्तरसमुच्चायकस्यापि चशब्दस्य बाधकप्रमाणाभावरूपार्थत्वस्यापि सम्भवेन विरोधाभावात्। परं तु वैधर्म्यधर्मिव्यत्यासमात्रम्। तच्च न प्रमेयविरुद्धम्। अस्तीत्यनन्तरं यत इति शेषः। अस्यातोऽपि न स्वप्नादिवदिति पूर्वेणान्वयः ॥

॥ इति असदधिकरणम् ॥ ८ ॥

॥ ९. अनुपलब्ध्यधिकरणम् ॥

(२) एतदधिकरणप्रतिपाद्यं दर्शयति—विज्ञानवादमिति ॥ चतुर्विधेषु सौगतेषु मध्ये वैभाषिकसौत्रान्तिकमाध्यमिकेषु त्रिषु निरस्तेषु अधुना क्रमप्राप्तं तुरीयं विज्ञानपरिणामं तन्मात्रमेवेदं जगत् न तु ततोऽतिरिक्तमिति वदतां योगाचाराणां वादं मतं निराकरोत्यस्मिन्नधिकरणे सूत्रकृदित्यर्थः। नित्यं निरञ्जनं विज्ञानतत्त्वमेव खलु विद्यमानं तन्मात्रमेवेदं जगत्, न तु ततोऽतिरिक्तमस्ति। तथाच ततएव जगदुदये नेश्वरेण कृत्यमित्युक्तं तस्य जगत्कारणत्वलक्षणमिति प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे—नेति। विज्ञानमात्रं तद्रूपमेव जगत्। न तु ततोऽतिरिक्तमस्तीति न युक्तमित्यनेन भाव इति साध्यांशः सावधारणं कृत्वा जगत्पदाध्याहारेण

न विज्ञानमात्रं जगत्तथाऽनुभवाभावात् ॥ ३० ॥

(२) सू—ॐ ॥ क्षणिकत्वाच्च ॥ ॐ ॥ ३१ ॥

ज्ञानं क्षणिकमर्थानां च स्थायित्वमुक्तम् । अतश्च नैक्यम् ॥३१॥

(३) सू—ॐ ॥ सर्वथाऽनुपपत्तेश्च ॥ ॐ ॥ ३२ ॥

च व्याख्यातः । भावशब्दस्य विज्ञानार्थकत्वं च भवतेरनुभवार्थत्वात् उपसर्गा हि धातुर्लीनस्यार्थस्य व्यञ्जका एवेति सुधोक्तया सिद्धम् । प्रसिद्धज्ञानपदं विहाय भाव इत्युक्तिस्तु परमते भवतीति भाव इति व्युत्पत्त्या भावशब्देन सद्विवक्षितं तच्च विज्ञानमेव तन्मते तदतिरिक्तसतोऽभावादिति ज्ञापयितुम् । तथेति । विज्ञानाभिन्नत्वेन जगतोऽनुभवाभावात् प्रमित्यभावात् प्रत्युत ततो भिन्नत्वेनैव अनुभवादित्यनेन हेतुर्व्याख्यातः । केचित्तु—विज्ञानमात्रमित्युक्तिस्वारस्यात् वः युष्माकं भासाकारत्वेनाभिमतं ज्ञानं न जगत्, कुतः? तथाऽनुपलब्धेरिति व्याचख्युः ।

(२) युक्त्यन्तरेणापि जगतो विज्ञानात्मकत्वं पराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—क्षणिकत्वाच्चेति । ज्ञानमित्युक्त्या सूत्रे भावस्येनुपङ्गो दर्शितः । क्षणिकं यत इति शेषः । ज्ञानस्य क्षणिकत्वादाशुतरविनाशित्वादित्येतदर्थानां स्थायित्वादित्यस्याप्युपलक्षकम् । चशब्दो वा तत्समुच्चायक इत्याशयेनार्थानां घटादीनां चेत्याद्युक्तमुक्तं साधितं 'उभयथा च' इत्यादिविस्मृत्यामित्यर्थः । अत्रापि यत इति शेषः । अतो विरुद्धधर्माधिकरणत्वात् । चशब्दोऽप्यर्थे । न केवलं प्रमाणाभावादिति समुच्चये । नैक्यं विज्ञानजगतोरिति । अनेन सूत्रे न भावो जगदित्यनुवृत्तप्रतिज्ञाभागो व्याख्यातः ।

(३) एवं प्रत्येकं दूषितानि वैभाषिकादिबौद्धमतानि पुनः सामान्यदूषणेन पराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—सर्वथेति ॥ प्रमाणाभावादित्यनेन अनुपपत्तेरित्येतत्प्रमाणसामान्यनिषेधपरतया व्याख्यातम् । नञो विरुद्धार्थत्वमाश्रित्य उपलक्षणं चाश्रित्य हेतोरर्थान्तरमाह—सर्वेति ॥ बहुश्रुतिस्मृतियुक्तिविरुद्धत्वादित्यर्थः । सर्वेति सर्वथेत्यस्य व्याख्यानम् । यद्वा—सर्वथेत्यस्य प्रत्यक्षक्षणिकत्वकल्पने प्रतिक्षणं उत्पत्तिविनाशकल्पने शून्याद्वैतकल्पने विज्ञानाद्वैतकल्पने प्रकटने प्रच्छादने वेति तत्त्वप्रदीपोक्तार्थो

प्रमाणाभावात्सर्वश्रुतिस्मृतियुक्तिविरुद्धत्वाच्च नैते पक्षा ग्राह्याः ॥ ३२ ॥

॥ इति अनुपलब्ध्यधिकरणम् ॥ ९ ॥

॥ १०. नैकस्मिन्नधिकरणम् ॥

(१) स्याद्वादिमतं दूषयति—

सू—ॐ ॥ नैकस्मिन्नसम्भवात् ॥ ॐ ॥ ३३ ॥

ग्राह्यः । सर्वेत्युक्तिस्त्वसङ्कोचाभिप्रायेणेति ध्येयम् । प्रमाणाभावतद्विरोधयोस्समुच्चये सौत्रश्चकारः । तत्त्वप्रदीपे तु—स्थायिनोर्जीवेशयोश्च अनङ्गीकारादित्यर्थ उक्तः । श्रुतयस्तु 'नर्ते' (ऋ. १०-११२-९.) 'यच्च किञ्चित्' (महाना. ११.) 'ब्रह्मण्येवेदमाविरासीत्' ( ) इत्याद्याः उक्ताः । पाशुपताद्यधिकरणेषु वक्ष्यमाणाश्च । स्मृतयस्तु 'स एव भूयः' इत्याद्याः उक्ताः वक्ष्यमाणाश्च । युक्तयस्तु सूत्रोक्ता एव द्रष्टव्याः । एते वेदविद्वेषिणां वैभाषिकसौत्रान्तिकशून्यवादिविज्ञानवादिनां पक्षाः प्रेक्षावद्भिर्न ग्राह्याः नोपादेयाः इति । अनेन नैते ग्राह्या इत्यस्याध्याहारः सूचितः । अत्र श्रुत्यादिविरोधवचनमधिकारिणं प्रत्येव न तु परं प्रति तन्मते तेषां अप्रामाणिकत्वादिति ध्येयम् । तथाचायं तत्त्वप्रदीपदिशा सूत्रार्थः । सर्वथा सर्वप्रकारेषु प्रत्यक्षक्षणिकत्वकल्पने परोक्षप्रत्यक्षविम्बप्रतिविम्बजगद्युगलकल्पने शून्याद्वैतकल्पने विज्ञानाद्वैतकल्पने प्रकटने प्रच्छादने वा सर्वेषां वेदद्वेषिणां पक्षाः नोपपद्यन्ते । कुतोऽनुपपत्तेः । उपपत्तिपदोपलक्षितप्रमाणसामान्याभावात्प्रमाणविरुद्धत्वाच्च । स्थायिनोः जीवेशयोरनङ्गीकाराच्च । अतो न ग्राह्या इति ॥

॥ इति अनुपलब्ध्यधिकरणम् ॥ ९ ॥

॥ १०. नैकस्मिन्नधिकरणम् ॥

(१) अधिकरणार्थं दर्शयति—स्यादिति ॥ सप्तप्रकारिणो जगतः कार्यपरिमाणाज्जीवात्मनो दृष्टादृष्टसाधनैश्चोत्पत्तिसम्भवात्किमीश्वरेण कृत्यमित्ययुक्तं लक्षणसूत्रमिति प्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे—नेति ।

सत्स्यादसत्स्यात्सदसत्स्यात्ततोऽन्यच्च स्यादित्येतन्नैकस्मिन् युज्यते । अदृष्टत्वेनासम्भवात् ॥ ३३ ॥

(२) सू—ॐ ॥ एवं चात्माकात्स्न्यम् ॥ ॐ ॥ ३४ ॥

सत्स्यादित्याद्यनुवादेन जैनोक्तस्य सूत्रकृद्बुद्धिस्थस्य नञर्थप्रतियोगिनः सप्तभङ्गित्वस्य सूत्रे अध्याहृतैतच्छब्देन परामर्शः कार्य इति सूचितम् । अत्र जगत्सत्स्यादित्यनेन सत्त्वाख्यैकप्रकारोऽभिहितः । असत्स्यादित्यनेनान्यप्रकारः । सदसत्स्यादित्यनेन सदसत्त्वरूपोऽपरः प्रकारोऽभिहितः । ततः उक्तपक्षत्रयादन्यच्चकारादन्यत्पुनस्ततोऽन्यत्ततोऽन्यदपि स्यादित्यनेन प्रकारचतुष्टयमनूदितम् । तथा हि—ततः सदसद्भ्यां अन्यदिति सदसद्विलक्षणत्वप्रकारोक्तिः । पुनः सत्स्यात्ततोऽन्यत्स्यादिति अन्वयेन सत्त्वे सति सदसद्विलक्षणत्वरूपोऽन्यः प्रकारोऽनूदितः । एवमसत्स्यात्ततोऽन्यच्च स्यादित्यन्वयेन असत्त्वे सत्यसद्विलक्षणत्वरूपप्रकारोऽभिहितः । तथा सदसत्स्यात्ततोऽन्यत्स्यादित्यन्वयेन सदसत्त्वे सति सदसद्विलक्षणत्वरूपोऽपरः इति पूर्वोक्तप्रकारत्रयेण सहास्य सप्तत्वमित्येवं रूपमेतत् । तदोषपरिजिहीर्षुणा जिनेनोक्तं जगतः सप्तभङ्गित्वमेकस्मिन् वस्तुनि न युज्यते इत्यर्थः । कुतो नेत्यत उक्तस्यासम्भवादेतस्यासम्भावितत्वादिति हेतोर्हेत्यन्तरसाध्यत्वात्तद्धेतुत्वेनासत इति सूत्राददृष्टत्वादिति पदमनुवर्त्य योजयति—अदृष्टत्वेनेति । सदसद्भ्यामन्यभङ्गिन एवाप्रामाणिकत्वेन एकस्मिन् सप्तभङ्गित्वस्य सुतरामप्रामाणिकत्वेनेत्यर्थः ।

(२) यद्यपि जीवस्याणुत्वे सर्वाङ्गवेदनानुसन्धानायोगाद्व्याप्तत्वे च देहान्तरगतस्याप्यनुसन्धानप्रसङ्गाच्छरीरपरिमितत्वमुक्तं जिनेन तत्र प्रष्टव्यं, किं तत् स्वीयसर्वशरीरावयवगतचेष्टोपपत्त्यर्थमुपेयते । उत शरीरावच्छिन्नत्वमन्तरेणात्मनः स्वतः परिमाणाभावाद्वा । तत्राद्यपक्षं प्रतिक्षेप्तुं प्रवृत्तं सूत्रमुपन्यस्य व्याचष्टे—एवं चेति ॥ जीवस्येत्यादिना जैनमतप्रसङ्गसन्निधापितमात्मनः शरीरपरिमाणत्वमेवमित्यनेन परामृश्यते । चकारोऽङ्गीकारद्योतक आत्मशब्दश्च जीवपर इत्युक्तं भवति । एवमेवमित्येतदापादकपरतया व्याख्यायात्माकात्स्न्यमित्येतदेकं पदं कृत्वा स्यादित्यध्याहारेणापाद्यपरतया व्याख्याति-अण्वादीति । पिपीलिकादिशरीर-

जीवस्य । शरीरपरिमितत्वाङ्गीकारेऽण्वादिशरीरस्थस्य हस्त्यादि-शरीरेऽकात्स्न्यं स्यात् ॥ ३४ ॥

(३) सू—ॐ ॥ न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ॐ ॥ ३५ ॥

स्थस्यैवेत्यर्थः । जीवस्येत्यनुषज्यते । तत्तत्परिमाणस्येत्यपि द्रष्टव्यम् । हस्त्यादीति । गजगर्दभादिशरीर इत्यर्थः । कर्मवशात्प्राप्ते सतीति शेषः । 'अकात्स्न्यं' तस्य तत्रापूर्णता स्यादित्यर्थः । ततश्चात्मनः कायपरिमाणा-भ्युपगमेऽपि न सर्वशरीरावयवगतचेष्टोपपत्तिरिति भावः । एवं शरीरपदं सावधारणं कृत्वाऽऽवृत्त्याण्वादिहस्त्यादिपक्ष्योः विनिमयेनाण्वादीत्यादि-वाक्यं हस्त्यादिशरीरस्थस्य तत्परिमाणस्यात्मनोऽण्वादिशरीरेऽपि पिपीलि-कादिशरीरे कर्मवशात्प्राप्ते सति तच्छरीर एवाकात्स्न्यं स्यात् पूर्णता न स्यादतिरेकस्स्यादिति यावत् । तथाच शरीरपरिमाणत्वभङ्ग इत्यपि व्याख्येयम् । अत एवोभयत्रादिशब्दः । उक्तं हि तत्त्वप्रदीपे—हस्त्यादि-शरीरस्थस्याण्वादिशरीरप्राप्तौ तच्छरीर एवात्मनः कात्स्न्यं न स्यादिति । अनेन सूत्रे एवमात्मा कात्स्न्यं च स्यादिति चशब्दस्यान्वयः, स चातिरेक-समुच्चयार्थ इत्युक्तं भवति । केचित्तु—एतदर्थं भाष्येऽपि अकात्स्न्यं-मित्येतदनन्तरं चेति शेष इत्याहुः । यद्वा—सूत्रे आत्मेति प्रथमान्तं भिन्नं पदं कात्स्न्यं अकात्स्न्यमिति द्वेधा विच्छेदः । चः समुच्चये । तथा चात्मा जीवो यद्येवं कायपरिमाणोऽङ्गीक्रियते तर्हि स यदा पिपीलिकादिशरीरस्थ-स्तत्परिमाणो गजादिकायं प्राप्तस्तदा अकात्स्न्यं प्राप्नुयात् । एवं गजादि-कायपरिमितो यदा पिपीलिकादिशरीरं प्राप्तस्तदा तत्र कात्स्न्यमाधिक्यं च प्राप्नुयादिति सूत्रं व्याख्यायैतदनुसारेण भाष्यमपि योजनीयम् ।

(३) ननु जीवो यदा यच्छरीरं प्राप्नोति तदा तत्परिमाणो भवति अतो नोक्तदोष इत्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—नेति ॥ इति-शब्दानन्तरं चशब्दोऽध्याहार्यः नञश्चावृत्त्यान्वयः । तथाच 'तत्तच्छरीर-स्थस्य' गजपिपीलिकादिशरीरस्थस्य आत्मनः 'तत्तत्परिमाणत्वं' क्रमिक-तत्तद्देहपरिमाणत्वमिति 'न मन्तव्यम्' अत एवाविरोधः एवं चेत्युक्त-

तत्तच्छरीरस्थस्य तत्तत्परिमाणित्वमिति न मन्तव्यम् । विकारित्वादनित्यत्वप्रसक्तेः ॥ ३५ ॥

(४) सू—ॐ ॥ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषात् ॥ ॐ ॥ ३६ ॥

दोषाभाव इति च न मन्तव्यमित्यर्थः । अनेन न केवलं पर्यायानङ्गीकारे विरोधपरिहाराभावः, किन्तु तदङ्गीकारेऽपीत्यपिशब्दार्थः । तथा पर्यायात्क्रमात्परिमाणपरिवर्तनात्तत्तच्छरीरस्थस्य तत्तत्परिमाणत्वरूपाद्विरोधपरिहारो न युक्तः । कुतः? यतः पर्याय एव न युक्त इति चशब्दार्थश्च दर्शितो भवति । कुतः पर्यायो न युक्त इत्यतो विकारादिभ्य इत्यनेनोक्तान् हेतून् परस्परहेतुहेतुमद्भावाभिप्रायेण योजयति—विकारित्वादिति । विकारित्वापत्तेरित्यर्थः । ततः किमित्यत आह—अनित्यत्वप्रसक्तेरिति । तथाचानिर्मोक्षप्रसङ्गः । तथाच शास्त्रवैफल्यं स्यादिति सौत्रादिशब्दसूचितहेतोरप्युपलक्षकमेतत् । ननु समानः प्रसङ्गः यावताऽस्माभिरपि जीवे सुखदुःखानुभवाभ्यां उच्चनीचत्वरूपो विकारोऽप्युपगम्यत इति चेन्न । यतो यस्य वस्तुनो यल्लक्षणं तन्निवृत्तिरूपोऽन्यथाभाव एव तदनित्यतानिबन्धनं नान्यथा भावमात्रं जीवस्य लक्षणं च चैतन्यादिकमेव न सुखादीत्यस्मदभ्युपगमोऽत इति सुयोक्तिः ।

(४) इदानीं शरीरावच्छेदमन्तरेणात्मनः स्वतः परिमाणाभावात्तदर्थं कार्यपरिमाणत्वमङ्गीक्रियत इति द्वितीयपक्षं निराकुर्वत्सूत्रं पठित्वा व्याचष्टे—अन्त्येति ॥ अत्र पूर्वसूत्रादेवं चेत्यनुषज्यते । अन्त्यावस्थितेरित्यावर्तते । चशब्दो हेतुसमुच्चये अवधारणेऽप्यर्थे च । प्रसङ्ग इति शेषः । तथानैवं सूत्रभाष्ययोजना—एवं च एवं सति क्षपणकेन शरीरावच्छेदमन्तरेणात्मनः स्वतः परिमाणाभावरूपप्रसञ्जकभयाच्छरीरपरिमाणत्वेऽङ्गीकृते सत्यन्त्यावस्थितेःप्रसङ्गोऽन्त्यस्य मुक्तिकालीनस्यापि शरीरस्य स्थितेः प्रसङ्गः तदापि तत्सत्त्वमङ्गीकार्यं स्यात्कुतोऽन्त्यावस्थितेरन्त्यपरिमाणस्थितेरन्त्ये मुक्तौ परिमाणसत्त्वस्यावश्यकत्वात्तदर्थत्वेन परिमाणावच्छेदकत्वेन शरीरस्थितेरप्यावश्यकत्वादवच्छेदकं विनाऽवच्छेद्यसत्त्वायोगात्, मुक्तौ जीवे परि-

परिमाणाभावे स्वरूपाभावप्राप्त्याऽन्त्यपरिमाणस्थितेस्तदर्थत्वेन शरीरस्थितेरुभयनित्यत्वादविशेषेण सर्वशरीरनित्यत्वं स्यात् ॥ ॥ ३६ ॥

॥ इति नैकस्मिन्नधिकरणम् ॥ १० ॥

॥ ११. पत्युरधिकरणम् ॥

(१) पाशुपतपक्षमपाकरोति—

सू—ॐ ॥ पत्युरसामञ्जस्यात् ॥ ॐ ॥ ३७ ॥

माणस्थितिरेव कुतोऽन्त्यावस्थितेरन्त्ये मुक्तौ जीवस्य स्थितेस्तदर्थत्वेन परिमाणावस्थितेरावश्यकत्वात् । जीवसत्वेऽपि परिमाणावश्यकत्वं कुतः ? यद्द्रव्यं तत्परिमाणवदिति व्याप्तेः । परिमाणशून्यस्य द्रव्यस्यासत्त्वात् परिमाणाभावे स्वरूपसत्त्वस्याप्यभावप्राप्त्या तत्सिद्धेः । नन्वस्तु मोक्षे शरीरसत्त्वं किमनिष्टमिति चेत्, तथा सति उभयनित्यत्वादुभयस्य मुक्तात्मशरीरयोर्नित्यत्वप्रसङ्गात् । मुक्तिकालीनत्वेन हेतुनाऽऽत्मदृष्टान्तेन शरीरस्यापि नित्यत्वसाधनसम्भवात् । अस्तु मुक्तौ शरीरस्य नित्यत्वं किमनिष्टमिति चेत्तथा सति सर्वशरीरनित्यत्वं स्यात्सर्वेषामधुनातनशरीराणामपि नित्यत्वप्रसङ्गात् । कुतोऽविशेषात् परिमाणविशेषात् परिमाणावच्छेदकजडशरीरत्वाविशेषेण तत्प्राप्तेः । यदि चैतद्दोषपरिहाराय मुक्तदेहस्याप्यनित्यत्वं, तर्ह्यविशेषादुभयस्य मुक्तिसंसारयोरविशेषप्रसङ्गात् । यदि चैतद्दोषपरिहारायान्त्ये मोक्षे एवं शरीरपातेऽपि तत्परिमाणस्यावस्थितिरङ्गीक्रियते, तर्ह्यविशेषात्संसारेऽपि परिमाणपरिवर्तनाभावप्रसङ्गादिति नात्मनः कायपरिमाणत्वपक्षो युक्त इति ।

॥ इति नैकस्मिन्नधिकरणम् ॥ १० ॥

॥ ११. पत्युरधिकरणम् ॥

(१) अधिकरणार्थं दर्शयति—पाशुपतेति ॥ पशुपतेरमी पाशुपता इति विग्रहः । तथाच पाशुपतशाक्तेयसौरस्कान्दगाणपतभेदेन बहुविधेषु वैदिकाभासेषु मध्ये ये शैवपाशुपतकालामुखमहाव्रतभेदेन चत्वारः पशुपतिपारम्यवादिनः, तेषां पक्षमस्मिन्नधिकरणे निराकरोति सूत्र-

'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्' (ऋ. १०-१२५-५.) 'अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वा उ' (ऋ. १०-१२५-६.) 'अस्य देवस्य

कृदित्यर्थः। सार्वज्ञादिगुणशाली पशुपतिरेव प्रकृतिमुपादानीकृत्य हरि-हिरण्यगर्भादिजगदुत्पत्त्यादि करोति। तथा श्रुतिस्मृतयोऽस्मिन्नर्थे भवन्ति। तथाच का वार्ता हरेर्जगत्कारणत्वस्य। अतो न लक्षणसूत्रं युक्तमिति प्राप्ते सिद्धान्तयत्सूत्रमुत्थाप्य व्याचष्टे—पत्युरिति। इत्यादि-श्रुतेरिति पञ्चमी। समुदायैकवचनमेतत्। आदिशब्देन 'वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्करः' ( ) इत्यादिकं गृह्यते। 'पारतन्त्र्येण' परतन्त्राख्यदोषावगमेन पारतन्त्र्यं जननमरणादेरप्युप-लक्षकम्। अनेन हेत्वसिद्धिः परिहृता। पारतन्त्र्येणेत्यसामञ्जस्यपद-स्यार्थान्तरं भावे प्यञ्जमभिप्रेत्याह—असमञ्जसत्वादिति। दोषित्वादित्यर्थः। पशुपतेरिति विपरिणामेनात्रापि सम्बध्यते। पशुपतिः पशूनां पाशबन्ध-विमोक्षद इति ईश्वर इति च पत्युरिति पदस्यार्थद्वयम्। ईश्वरत्वं चाञ्जनप्रसिद्ध्याऽन्यस्यापीत्यतः पशुपतिरित्याह, योगेनान्योऽपि पशुपति-र्भवतीत्यतः—ईश्वर इति चाह। उभयसमभिव्याहाराच्छिवस्यैव प्राप्तिः। न जगत्कर्तेत्यनेन प्रकरणाल्लब्धस्य जगत्कर्तृत्वमित्यस्य सूत्रेऽध्याहृतनञा सम्बन्धो ज्ञापितः। अनेन—पत्युर्न जगत्कर्तृत्वं, कुतः? 'असामञ्जस्यात्' अयुक्तत्वात्। तदपि कुतः? 'असामञ्जस्यात्' समञ्जसो गुणी तद्विरुद्ध-त्वात् दोषित्वात्। न चासिद्धिः। 'यम्' इत्यादिश्रुतेरिति सूत्रार्थ उक्तो भवति। 'यम्' इत्यम्भ्रणीवाक्येन शिवादेः पराधीनपदप्राप्तिमत्त्वावगमेन पारतन्त्र्याख्यदोषोऽवगम्यते। 'अहं रुद्राय' इति मृतिरपि। अहं 'यंयमुग्रं' रुद्रं कर्तुं कामये तं तं योग्यं उग्रं रुद्रं कृणोमि करोमि। तथा तं ब्रह्माणं ऋषिं सुमेधसं च तत्तद्भावयोग्यं करोमि। अहं 'शरवे' हिंसा-शीलाय 'ब्रह्मद्विषे' चतुर्मुखपञ्चममुखच्छेत्रे प्रमेयदीपोक्त्या संहारकाले ब्राह्मणादिसर्वप्राणिविद्विषे इति वा, सुधारीत्या व्यत्ययेन ब्रह्मद्विषां दैत्यानां शरवे हिंसकायेति वा, चन्द्रिकारीत्या दक्षप्रजापतिद्विषे इति वा रुद्राय। द्वितीयार्थे चतुर्थी। उक्तविशेषणकरुद्रमिति। 'हन्त वा उ'

मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः। विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत्' (ऋ. ७-४०-५.) एको नारायण आसीन्न ब्रह्मा नेशानो नाग्नीषोमौ' (महोप. १.) इत्यादिश्रुतेः पारतन्त्र्येणासमञ्जसत्वान्न पशुपतिरीश्वरो जगत्कर्ता ॥ ३७ ॥

हन्तुमेव, न तु भीषणाद्यर्थम्, प्रलये दुर्गारूपेण हननात्। धनुः 'आतनोमि' विस्तारयामि सज्यं करोमीति वा। अहं 'जनाय' जनस्य 'समदं' सम्मदं हर्षं सन्ततमोदं वा करोमि। अहं 'द्यावापृथिवी' तदुपलक्षितानूर्ध्वाधोलोकान् धारणाय 'आविवेश' च्छन्दसि परोक्षे लिट्। अहमस्य जगतः 'पितरं' ब्रह्माणं 'मूर्धन्' मूर्धनि सर्वज्ञ्यो-त्कृष्टत्वे सुपुस्नायामिति नारायणपण्डिताचार्योक्तिः। 'सुवे' जनयामि। न केवलं पदे स्थापयामि। एवंभूतायाः मम 'योनिः' कारणं 'समुद्रे अप्सु' अपामन्तस्तिष्ठतीत्यर्थः। स्त्रीणां पतिनामग्रहणमनुचितमिति शिक्षणाय नारायण इत्यनुक्त्वा 'आपो नाराः' इत्यादिनोक्तं तदर्थमेवाह। 'अस्येति' ऋग्वेदवाक्येनापि शिवादेः पारतन्त्र्यमवगम्यते। 'अस्य' प्रमितस्य 'देवस्य' द्योतनादिगुणततेः 'मीळ्हुषः' भक्ताभिलषितवर्षितुः मीढवान् समर्थ इति तत्त्वप्रदीपोक्तेः। समर्थस्येति वा। 'एषस्य' आसमन्तादीशस्य। व्यत्ययेन शकारस्य षकारः। सुधाविष्णुतत्त्वनिर्णयटीकारीत्या 'इषु इच्छायाम्' इत्यस्माद्भावे घञि गुणे एषस्य इच्छारूपस्य सत्यकामस्येति वा विष्णोः 'प्रभृथे' कर्मणा ध्यानेन च प्रवृद्धे भरणे पूजने हविर्भिः कृते सति तत्प्रसादात् 'वयाः' अहं तत्त्वाभिमानित्वेन जनानां बन्धको रुद्रः 'रुद्रियं महित्वं' रौद्रं पदं 'विदे' विविदे लेभे। हि प्रसिद्धमेतत्। तथाहि 'अश्विनौ' युवामपि विष्णुपूजयैव तत्प्रसादात् 'इरावत्' अन्नवत् 'वर्तिः' वर्तनं समस्तभोगवत्पदं 'यासिष्टं' अयासिष्टं प्राप्तवन्तौ स्थ इति। 'एको नारायणः' इत्यादिकं श्रुत्यन्तरवाक्यम्। अनेन प्रलयेऽभावोऽवगम्यते। महाप्रलये नारायण एक एव प्रधान आसीत्। तदा स्वातन्त्र्येण 'न ब्रह्म' न चतुर्मुख आसीत्, न 'शङ्करो' रुद्रश्चासीदित्यर्थः।

(२) सू—ॐ ॥ सम्बन्धानुपपत्तेश्च ॥ ॐ ॥ ३८ ॥

अशरीरत्वात्तस्य जगता सम्बन्धो न युज्यते कर्तृत्वेन मृतपुरुषवत् ॥ ३८ ॥

(३) सू—ॐ ॥ अधिष्ठानानुपपत्तेश्च ॐ ॥ ३९ ॥

पृथिव्याद्यधिष्ठाने स्थितो हि कुलालादिः कार्यं करोति, न चास्य तदस्ति ॥ ३९ ॥

---

(२) युक्तयन्तरेण पशुपतेर्जगत्कारणत्वं पराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—सम्बन्धेति ॥ अशरीरत्वादित्यनेन न केवलं पारतन्त्र्यादेः, किन्त्वशरीरत्वाच्चेति चशब्दसमुच्चेतव्यो हेतुर्दर्शितः। 'तस्य' पशुपतेरित्यनेन सूत्रे पत्युरित्यस्यानुवृत्तिर्दर्शिता। 'जगता' कार्येण। जगत्पदं अशरीरस्य क्वचिदपि कार्यकर्तृत्वेन सम्बन्धो न युज्यते सुतरां सर्वस्मिन्निति कैमुत्यद्योतनाय। सूत्रेऽनुपपत्तेरिति पञ्चमीप्रयोगेऽपि नात्र सम्बन्धानुपपत्तेः हेतुत्वं साध्याविशेषप्रसङ्गात्, किंतु साध्यत्वं, पञ्चमी तु चशब्दसूचिताशरीरत्वस्य हेतुत्वज्ञापिकेति प्रदर्शनाय युक्तेरित्यनुक्त्वा न युज्यत इति निर्देशः कृतः। ननु कार्येण जगताऽपि सम्बन्धमात्रमशरीरस्यापि सम्भवति गगनादेर्घटादिसंयोगदर्शनात् अतः कोऽसावत्र विवक्षितः सम्बन्धोऽयुक्त इत्यतः कार्यकर्तृभाव इति भावेनोक्तं—कर्तृत्वेनेति। 'कर्तृत्वेन सम्बन्धः' कर्तृत्वरूपसम्बन्धः। अत्र दृष्टान्तमाह—मृतेति। त्यक्तदेहवदित्यर्थः। अनेन—न केवलमसामञ्जस्यात्, किंतु पत्युरशरीरत्वाच्च न जगता कार्यकर्तृभावरूपसम्बन्धो युक्त इति सूत्रार्थोऽभिहितः ॥

(३) हेत्वन्तरेण पशुपतेर्जगत्कारणत्वं पराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—अधिष्ठानेति ॥ 'चो' यतोऽस्य पत्युस्तदधिष्ठानं नास्त्यतोऽपि न जगत्कर्तृत्वमित्यनेन 'अधिष्ठानानुपपत्तेः' अधिष्ठानाभावाच्च न पत्युः जगत्कर्तृत्वमिति सूत्रार्थो दर्शितः। अत्राप्रयोजकत्वमाशङ्क्य तत्परिहाराय सूत्रे अधिष्ठानाभावादित्यनुक्त्वा अधिष्ठानानुपपत्तेः अधिष्ठानाख्यव्याप्याभावादित्युक्तिबलात्सूचितां व्यतिरेकव्याप्तिं सामान्यतः सदृष्टान्तं दर्शयति—पृथिव्यादीति। 'पृथिव्याद्यधिष्ठाने' भूम्याद्यधिकरणे। हिः प्रसिद्धौ। 'कार्यं' घटादि।

(४) सू—ॐ ॥ करणवच्चेन्न भोगादिभ्यः ॥ॐ॥४०॥

इदमेव जगत्तस्य करणवदधिष्ठानादिरूपं नित्यस्यापि कस्यचिद्भावाद्युज्यत इति चेत्—

(५) न, भोगादिप्राप्तेः उत्पत्तिनाशौ सुखदुःखभोगाश्च प्राप्यन्ते

---

(४) उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याक्षेपांशं तावद्व्याचष्टे—करणवदिति ॥ इदमेवेति । मायादिकारकसमुदायरूपं जगदेवेत्यर्थः । न ततोऽन्यत् मृग्यमित्येवशब्दार्थः । 'तस्य' ईश्वरस्य । अनेन सूत्रे पत्युरिदमेवेति पदानुषङ्गो दर्शितः । 'करणवत्' करणमस्मदादिशरीरेन्द्रियादि तद्वत् समानं भवति, साक्षात्प्रयत्नाधिष्ठेयत्वसाम्यात् । यत एवमतस्तस्य इदमेवाधिष्ठानादिस्वरूपं भवतीत्यर्थः । आदिपदेनेह विवक्षितं सम्बन्धोपपादकं शरीरं गृह्यते । यद्यप्यस्य सूत्रस्य व्यवहिताव्यवहितपूर्वसूत्रद्वयोक्तानुपपत्तिद्वयपरिहारनिरासकत्वात् व्यवहितपूर्वसूत्रेऽशरीरत्वस्य हेतुत्वेनोक्तत्वात् इदमेव विश्वं शरीरादिरूपमिति वक्तव्यम् । अतएवानुव्याख्याने 'देहादिवद्विश्वम्' इत्युक्तम् । तथापि सन्निहितपरित्यागकारणाभावादधिष्ठानादिरूपमित्युक्तावपि उभयानुपपत्तिपरिहारप्रतीतेस्तन्निरासोऽत्र युज्यत एवेत्याशयेनाधिष्ठानादीत्युक्तम् । अनुव्याख्याने तु उभयानुपपत्तिपरिहारनिरासकत्वज्ञापनायोभयमध्ये 'करणवच्चेत्' इत्यस्य सूत्रस्य व्याख्यातत्वात् तदनुसारेण सन्निधिमनादृत्य देहादिवदित्युक्तमिति न विरोधः । अधिष्ठानादिरूपमित्यनन्तरं अतो न तदनुपपत्तिरिति वाक्यशेषः । ननु प्रलये सर्वस्यापि विनाशात् कारकसमूहस्यापि नाधिष्ठानत्वादि युज्यत इत्यत आह—नित्यस्येति । अपिः प्रलयेऽपीत्यध्याहृतेनान्वेति । अधिष्ठानादीति भावप्रधानमिहानुवर्त्यते । युज्यत इति चावर्तते । तथा च यतः प्रलयेऽपि 'कस्यचित्' मायादिरूपकारकसमूहस्य नित्यस्य 'भावात्' विद्यमानत्वात् तस्याधिष्ठानादिरूपत्वं युज्यते तदुक्तं युज्यत इति च योजना ।

(५) परिहारांशं व्याचष्टे—नेति ॥ पूर्ववादिनोक्तं नेत्यर्थः । कुतो नेत्यतो भोगादिभ्य इत्येतत्प्राप्त्युपलक्षकतया व्याचष्टे—भोगादीति । भोगनिमित्तपदार्थवचनेन विपर्ययोक्त्या च भोगादीत्येतदेव स्फुटीकरोति—उत्पत्तीति । यत इत्यादावुपस्कार्यम् । उत्पत्तिविनाशयोरादिशब्दगृहीतयोः

तद्भृताः ॥ ४० ॥

(६) सू—ॐ ॥ अन्तवत्त्वमसर्वज्ञता वा ॥ ॐ ॥४१॥

देहवत्त्वेऽन्तवत्त्वम् । अन्यथा ज्ञानाभावः । शरीरिण एव हि ज्ञानोत्पत्तिर्दृष्टा ।

पश्चाद्भुक्तव्यत्वेऽपि सुखदुःखानुभवरूपभोगमूलत्वात्प्रथमं ग्रहणम् । अतएवासमासः । क्रियान्वयोऽपि विपरिणामेन पृथगेव द्रष्टव्यः । विषयीभूतसुखदुःखव्यक्तिबाहुल्याद्बहुवचनम् । सुखदुःखे च तयोर्भोगश्चेति वा । भोगश्चेत्येकवचनपाठः स्वरसः । तथात्वे आहृत्यैते प्राप्यन्त इत्यन्वयः । 'तद्भृताः' शरीरादिसमानकारकव्रातगताः तदुपादानहानिनिमित्ता इति यावत् । 'प्राप्यन्ते' प्राप्येरन् । यज्ञदत्तादेः साक्षात्प्रयत्नाधिष्ठेयविकारात्मकशरीरोपादानहानयोः सतोस्तन्निमित्तयोरुत्पत्तिविनाशयोर्दर्शनादिति भावः । सुखदुःखभोगस्य तद्भृतत्वं चोत्पत्तिविनाशद्वारा बोध्यम् ।

(६) 'सम्बन्धानुपपत्तेः, करणवच्च' इत्याभ्यां मुक्तशरीरभावाभावपक्षावेव विकल्पभङ्ग्या दोषान्तरेण दूषयत्सूत्रं पठित्वा व्याचष्टे—अन्तवत्त्वमिति ॥ भावरूपत्वात्प्रथमं करणसूत्रोक्तपक्षो गृहीतः । 'अन्तवत्त्वं' देशतः परिच्छिन्नत्वं स्यात् यज्ञदत्तवदित्यर्थः । पत्युरिति वर्तते । ततश्च न जगत्कर्तृत्वं स्यादिति वाक्यशेषः । 'अन्यथा' देहाभावे ज्ञानस्यैवाभावस्स्यात् । सुतरां सार्वज्ञस्येत्येवार्थः । ततश्च न जगत्कर्तृत्वं पत्युरिति भावः । शरीराभावे कुतो ज्ञानाभाव इत्यतो व्यतिरेकव्याप्तिं दर्शयति—शरीरिण एव हीति । न त्वशरीरिण इत्येवार्थः । हिः प्रसिद्धौ । अनेन—सूत्रे करणवदिति मतुबन्तं पदं भावप्रधानमनुवर्तनीयम् । न चेदिति शेषः । वाशब्दश्चार्थः । कल्पभेदेन दोषसूचकश्च । तथाच यतः पत्युः करणवत्त्वं देहवत्त्वं चेत् अन्तवत्त्वं च स्यात्, न केवलं भोगादिप्राप्तिः । न चेदज्ञता स्यात्, सुतरामसर्वज्ञता च । न केवलं जगता कार्यकर्तृभावानुपपत्तिरिति सूत्रार्थ उक्तो भवति । अत्र सम्बन्धानुपपत्तिसूत्रे शरीराभावे कर्तृत्वोपयुक्तज्ञानाद्यभावेन कर्तृत्वरूपसम्बन्धानुपपत्तिरुक्ता । अत्र तु शरीराभावे ज्ञानाभावेनासर्वज्ञत्वाज्जगत्कर्तृत्वानुपपत्तिरित्युच्यतेऽत इति भेदो द्रष्टव्यः ।

(७) विष्णोस्तु श्रुत्यैव सर्वे विरोधाः परिहृताः । 'यदात्मको भगवांस्तदात्मिका व्यक्तिः । किमात्मको भगवान् । ज्ञानात्मक ऐश्वर्यात्मकः' (एकायन.) इति । 'बुद्धिमनोऽङ्गप्रत्यङ्गवत्तां भगवतो लक्षयामहे । बुद्धिमान्मनोवानङ्गवान्प्रत्यङ्गवान्' ( ) इति । 'सद्देहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः

---

(७) ननु विष्णावप्युक्तविकल्पमुखेनोक्तदोषाः प्रसरन्त्येवेति तस्यापि कर्तृत्वानुपपत्तिरित्याशङ्क्य 'आत्मनि चैवम्, सर्वार्पिता च, विकरणत्वात्' इत्यादिषु सूत्रकृता निरस्तामपि पुनः प्रमाणविशेषैः परिहरति—विष्णोस्त्विति ॥ तुशब्दो रुद्रादेर्विशेषद्योतकः । देहित्वादाविति शेषः । 'श्रुत्या' वक्ष्यमाणया । समुदायैकवचनमेतत् । 'विरोधाः' अन्तवत्त्वादिदोषाः परिहृताः । न तत्र प्रमाणान्तरमन्वेषणीयमित्येवशब्दार्थः । श्रुतीनां निरवकाशत्वद्योतको वैवकारः । ताः श्रुतीरुदाहरति—यदात्मक इति । 'यदात्मकः' इत्यारभ्य 'ऐश्वर्यात्मकः' इत्यन्तमेकं वाक्यम् । इतिशब्दस्य इत्युत्तरमित्यन्वयः । 'बुद्धि' इत्यारभ्य 'प्रत्यङ्गवान्' इत्यपरं वाक्यम् । इतिशब्दस्य क्रियया ऽन्वयः । 'सद्देहः' इत्यारभ्य 'परमोऽक्षरः' इत्यन्तमन्यत्तैत्तिरीयवाक्यम् । इत्यादिकयेत्यस्य भाष्यकारीयस्य श्रुत्यैवेति पूर्वेणान्वयः । आदिशब्देन तत्त्वप्रदीपरीत्या 'स्वे महिम्नि' (छा. ७-२४.) 'किं स्विदासीदधिष्ठानम्' (ऋ. १०-८१-२.) 'पतिं विश्वस्यात्मेश्वरम्' (महाना. ११.) इत्यादिकं गृह्यते । सुधारीत्या श्रुत्यर्थस्तु—भगवान् यत्स्वरूपो 'व्यक्तिः' तद्देहोऽपि तदात्मकेति प्रतिज्ञा । भगवानेव किमात्मक इति पृच्छति—किमिति । उत्तरमाह—ज्ञानात्मक इति । अत्र भगवद्देहस्य तत्स्वरूपत्वज्ञानाद्यात्मकत्वोक्त्याऽन्तवत्त्वादिदोषाः परिहृताः । भगवतो बुद्धिमनोऽङ्गप्रत्यङ्गवत्तां लक्षयामह इति प्रतिज्ञा । बुद्धिर्ज्ञानं, मनः चेतः, अङ्गं शरीरं, प्रत्यङ्गं हस्तादीनि । एतद्वत्त्वं ज्ञापयाम इत्यर्थः । तत्प्रकारमेवाह—बुद्धिमानित्यादिना । अत्रेश्वरस्य देहित्वाभिधानेनादेहित्वपक्षोक्तदोषाः परिहृताः । यो जन्मच्छेदादिदोषरहितो देहो यस्यासौ सद्देहः । यः 'सुखगन्धः' सुगन्धिः पुण्यगन्धः सुखात्मकगन्धो वा । तत्रैकः सुधोक्तः । द्वितीयस्तृतीयः न्यायदीपोक्तः । यश्च 'ज्ञानभाः' न तु तैजसभाः ।

ज्ञानज्ञानः सुखसुखः स विष्णुः परमोऽक्षरः' (पैङ्गिश्रुतिः) इत्यादिकया ॥ ४१ ॥

॥ इति पत्युरधिकरणम् ॥ ११ ॥

॥ १२. उत्पत्त्यधिकरणम् ॥

(१) शक्तिपक्षं दूषयति—

सू—ॐ ॥ उत्पत्त्यसम्भवात् ॥ ॐ ॥ ४२ ॥

न हि पुरुषाननुगृहीतस्त्रीभ्य उत्पत्तिर्दृश्यते ॥ ४२ ॥

'सत्यपराक्रमः' अप्रतिहतपराक्रमः। यश्च 'ज्ञानज्ञानः' अतिशयितज्ञानः कर्तृसाधनोऽयं ज्ञानशब्दः। 'सुखसुखः' अतिशयितसुखः। अर्शआद्यजन्तः सुखशब्दः निर्धारणषष्ठ्या चोभयत्रोक्तार्थलाभः। स विष्णुः 'परमोऽक्षरः' परा जडप्रकृतिः। ततः परा चित्प्रकृतिः परमा। तत उत्तमोऽक्षर इत्यर्थः। तत्त्वप्रदीपे तु—'ज्ञानज्ञानः' नाज्ञानमिश्रज्ञानः 'सुखसुखो' न दुःखमिश्रितसुख इत्यर्थ उक्तः।

॥ इति पत्युरधिकरणम् ॥ ११ ॥

॥ १२. उत्पत्त्यधिकरणम् ॥

(१) अधिकरणार्थं दर्शयति—शक्तीति ॥ असामञ्जस्यादिति पूर्वोक्तन्यायेन निरस्तमपि शक्तिपक्षं शक्तेः स्त्रिया एव जगदुत्पत्तिरिति वदतां महावामनमध्यवामनाणुवामनभेदेन त्रिविधानां शाक्तानां मतमसाधारणदोषाविष्कारेण पुनर्दूषयत्यस्मिन्नधिकरणे सूत्रकृदित्यर्थः। शक्तिरेव खलु सार्वज्ञादिगुणशालिनी सकलजगज्जननी श्रुतिस्मृतीतिहासपुराणेषु पठ्यते। ततो न हरेर्जगत्कारणत्वं लक्षणं युक्तमितिप्राप्ते सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे—उत्पत्तीति। न हीत्यादिना सूत्रे अनुपङ्गहेत्वध्याहाराभ्यां न शक्तेः केवलाया जगत्कर्तृत्वं युक्तम्। केवलायास्तस्या जगत्कर्तृत्वासम्भवात्। कुतः? पुरुषाननुगृहीतत्वादिति सूत्रार्थो दर्शितः। अत्राप्रयोजकतामाशङ्क्य विपक्षे क्वचिदप्यनुपलम्भबाधोक्त्या साऽपि परिहृता।

(२) सू—ॐ ॥ न च कर्तुः करणम् ॥ ॐ ॥ ४३ ॥

यदि पुरुषोऽङ्गीक्रियते तस्यापि करणाभावादनुपपत्तिः ॥ ४३ ॥

(३) सू—ॐ ॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ॐ ॥ ४४ ॥

यदि विज्ञानादिकरणं तस्याङ्गीक्रियते तदा तत एव सृष्ट्याद्युपपत्तेरीशवादान्तर्भावः ॥ ४४ ॥

---

(२) ननु हेतुरसिद्धः। यतोऽस्त्येव शक्त्यनुग्राहकः पुरुषः सदाशिवः अतस्तस्याः जगदुत्पत्तिर्युक्तेति वदतां मध्यमवामनानां मतं निराकुर्वत्सूत्रमुपन्यस्य व्याचष्टे—न चेति ॥ यद्यपीति सम्बन्धः। तत एव तथापीति लभ्यते। अङ्गीक्रियते कैश्चिच्छाक्तैयैः। 'तस्य' शक्त्यनुग्रहकर्तुः पुरुषस्य। करणाभावादिति । उत्पत्त्युपयोगिज्ञानादेस्तत्साधनेन्द्रियादेस्तत्कारणशरीरस्य चाभावादित्यर्थः। प्रकृतस्योत्पत्त्यसम्भवस्येह साध्यत्वेनान्वय इत्याशयेन अनुपपत्तिरित्युक्तम्। सावधारणमेतत्। तथा च पुरुषानुगृहीतशक्तेरपि जगदुत्पत्त्यसम्भव एवेत्यर्थः। अनेन सैत्रश्चशब्दो यत इत्यर्थे अवधारणे चेत्यभिप्रैति।

(३) ननु शक्त्यनुग्राहकपुरुषभावात् तस्याः जगदुत्पत्तिर्युक्तेत्येव नोच्यते, किंतु तस्य पुंसः सार्वज्ञादेरपि सद्भावेन युक्ततरा शक्तेर्जगदुत्पत्तिरितीत्यङ्गीकुर्वतामणुवामनानां मतनिरासाय सूत्रमुपन्यस्य व्याचष्टे—विज्ञानादीति ॥ आदिपदेनोत्पत्त्युपयोगिशरीरेन्द्रियादिग्रहणम्। 'करणं' तत्सत्त्वम्। 'तस्य' शक्त्यनुग्रहकर्तुरिति। अनेन सूत्रे कर्तुरित्यस्यानुवृत्तिः सूचिता। अङ्गीकार इत्यनेन सत्त्वार्थकभावपदमङ्गीकारोपलक्षकमित्युक्तं भवति। 'अत एव' यदितदेत्युक्तं तत एव शक्त्यनुग्रहकर्तुः शिवादेः कर्त्रन्तरमनपेक्ष्यैव 'सृष्ट्याद्युपपत्तेः' जगदुत्पत्त्यादिसम्भवात् इति भावकथनं, 'तदेश्वरवादान्तर्भावः' शक्तिमतस्य पाशुपतमतैक्यं स्यादिति। अनेन 'तदप्रतिषेधः' तेन शाक्तेयेन तस्य पाशुपतमतस्याप्रतिषेधः कृतः स्यात्। तेन तदनुमतमेव स्यात्। नच निरस्तमेवेति पुनस्तदप्रतिषेधो नास्माभिस्तत्प्रतिषेधः कार्य इत्यावृत्त्या तदप्रतिषेध इत्यंशो व्याख्यातः। सूत्रे वाशब्दो मतान्तरत्वद्योतकः।

(४) सू—ॐ ॥ विप्रतिषेधाच्च ॥ ॐ ॥ ४५ ॥

सकलश्रुत्यादिविरुद्धत्वाच्चासमञ्जसम् ॥ ४५ ॥

॥ इति उत्पत्त्यधिकरणम् ॥ १२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
ब्रह्मसूत्रभाष्ये द्वितीयस्याध्यायस्य
द्वितीयः पादः

॥ ॐ ॥

---

(४) एवं शाक्तेयमतत्रयं पृथङ्निराकृत्य समुदितदूषणेनापि परा-कुर्वत्सूत्रमुपन्यस्य व्याचष्टे—विप्रतिषेधाच्चेति ॥ आदिशब्देन स्मृत्यादि-परिग्रहः। विरुद्धत्वादित्यनेन विप्रतिषेधशब्दो व्याख्यातः। चशब्दः पूर्वोक्तप्रत्येकहेतुसमुच्चये। श्रुतयः 'नर्ते' 'एको नारायणः' (महोपनिषत्) इत्याद्याः। स्मृतयः 'स एव' इत्याद्याः। चशब्दः पूर्वोक्तहेतुसमुच्चये। शिष्टजनैर्जिगुप्सितत्वाच्चेत्यनुभाष्योक्तयुक्तिसमुच्चये च। 'असमञ्जसं' अयुक्तमिति। एतद्विप्रतिषेधसूत्रादनुपक्तं पदम्। शाक्तिकर्तृत्वमतमिति शेषः।

॥ इति उत्पत्त्यधिकरणम् ॥ १२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां
श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण
श्रीमज्जगन्नाथयतिना कृतायां
श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां
द्वितीयाध्यायस्य द्वितीयः पादः

॥ ॐ ॥

॥ १. वियदधिकरणम् ॥

(१) जीवपरमात्माधिभूताधिदैवेषु श्रुतीनां परस्परविरोधमपाकरोत्यनेन पादेन—

॥ १. वियदधिकरणम् ॥

(१) एतत्पादार्थं दर्शयति—जीवेति ॥ अव्ययीभावगर्भतत्पुरुषगर्भद्वन्द्वसमासोऽयम । तथाच जीवश्च परमात्मा च अधिभूतं च अधिदैवं च तानि तथोक्तानि, तेषु तदुत्पत्तिविषये श्रुतीनामन्योन्यविरोधं अनेन तृतीयपादेन निराकरोति सूत्रकृदित्यर्थः । अध्यात्मविषयश्रुतिविरोधपरिहारस्तु जिज्ञासोरध्यात्मविषयविचारस्यान्तिमत्वाच्चतुर्थपादे करिष्यतीति भावः । यद्यपि अस्मिन् पादे प्रथममेकैकस्मिन्नधिकरणे एकैकाधिभूतविचारस्यानन्तरं 'असम्भवस्तु, नात्माऽश्रुतेः' इत्यधिकरणद्वये परमात्मविचारस्य, अथ 'ज्ञोऽतएव' इत्यारभ्य आपादपरिसमाप्तेर्जीवविचारस्य च करणात्तदनुसारेणाधिभूताधिदैवपरमात्मजीवेष्विति निर्देष्टव्यम् । तथापि जीवविचारस्य बाहुल्यात्तद्विवक्षया क्रमोल्लङ्घनम् । यद्यप्यत्र पादे अधिदैवश्रुतिविरोधपरिहारः पृथङ्न क्रियते । तथापि भूतविचारपराण्येव सूत्राण्यधिदैवपराणीत्याशयेनैवमुक्तम् । 'एतेन' इत्यधिदैवविचारोऽपि कृतः । अधिभूतं नाम भूतमधिकृत्य वर्तमानम् । अधिकर्तव्यप्रधानो अधिः अधिकरणे अधिशब्दः । सकार्यकारणभूतानि तच्च भूतं भूतकार्यं ब्रह्माण्डादिकं तत्कारणमव्यक्तादिकं तदेकदेशश्च भवति । उक्तं च सुधायाम्—अधिभूतानि कार्यकारणोपेतानि वियदादिभूतानीति । उक्तं च न्यायविवरणटीकायाम्—अधिभूतादिशब्दैः आकाशादीन्युच्यन्ते । समुदायैकदेशाश्रयेणाधिकरणाधिकर्तव्यतोपपत्तेरिति । तत्त्वप्रदीपकृच्चाह—अधिभूतेषु महाभूतेषु आकाशादिषु 'इमानि पञ्चभूतानि पृथिवीवाय्वाकाशापोज्योतींषि' (ऐ. ३-३.) इति श्रुतिः । अथवा—अधिभूतेष्विति भूततत्सम्बन्धिविवक्षयेति । अधिभूताभिमानिदेवता अधिदैवतम् । अधिगतं च तत् दैवतं चेति विग्रहः । तदुक्तं तत्त्वप्रदीपसुधयोः—अधिदैवेष्विति तदभिमानितत्सम्बन्धिविवक्षयेति । अधिदैवानि अव्यक्ताभिमानिदेवता इति च । एवमधिभूतशब्द इव अध्यात्मशब्देऽपि आत्मानन्देहं जीवं च अधिकृत्य वर्तमानं अध्यात्ममिति विग्रहो ज्ञातव्यः ।

(२) सू—ॐ ॥ न वियदश्रुतेः ॥ ॐ ॥ १ ॥

न वियदनुत्पत्तिमत्, तथाऽश्रुतेः ॥ १ ॥

(३) सू—ॐ ॥ अस्ति तु ॥ ॐ ॥ २ ॥

अस्त्येव चोत्पत्तिश्रुतिः, 'आत्मन आकाशस्सम्भूतः' (तै. २-१.) इत्यादि ॥ २ ॥

(४) सू—ॐ ॥ गौण्यसम्भवात् ॥ ॐ ॥ ३ ॥

---

(२) न वियदित्यंशविवरणेनैव विषयपूर्वपक्षादिः सूचितो भवतीत्याशयेन तमप्रदर्श्य सिद्धान्तयत्सूत्रमेवोपन्यस्यति—नेति ॥ अत्र 'उत्पत्त्यसम्भवात्' इति सूत्रप्रकृतानुत्पत्तिबोधकानुत्पत्तिमदितिपदमनुवर्त्य न वियदिति प्रतिज्ञाभागं व्याचष्टे—नेति। अत्र वियत्पदेन भूताव्याकृताकाशौ तदभिमानिदेवतं चोच्यते। सुधाटीकोक्तरीत्या प्रकृतिजीवकालमहदहङ्कारादेः उपलक्षकमेतत्। तत्त्वप्रदीपे तु वियदितिविशेषव्याप्तिमत्त्वादहङ्कारादिकमप्युच्यत इत्युक्तम्। तत्रोच्यत इत्यस्य प्रतिपाद्यत इत्यर्थाश्रयणान्न विरोधः। कुतो नेत्यतस्तथाशब्दाध्याहारेण अश्रुतेरिति हेत्वंशं व्याचष्टे—तथेति। 'तथा' तत्रानुत्पत्तौ श्रुत्यभावादित्यर्थः।

(३) ननु न वियत उत्पत्त्यभावे प्रमाणं नियमेन वक्तव्यम्, उत्पत्तौ प्रमाणाभावेनैव तत्सिद्धेः। न हि घटे प्रमाणाभावे पुनः प्रमाणापेक्षा स्यादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—अस्तीति ॥ एवेति तुशब्दार्थ उक्तः। चेति तुशब्दस्य न केवलं तथाऽश्रुतेः, किंतु यत उत्पत्तौ श्रुतिरस्त्येव चेति समुच्चयरूपार्थान्तरं यत इत्यर्थत्वं चाह। यथोक्तं तत्त्वप्रदीपे—न केवलमनुत्पत्तिर्न श्रूयते, किंतु 'अस्ति तु' अस्त्येव चोत्पत्तिवादिनी श्रुतिरिति। इत्यादिश्रुतिरित्यन्वयः। आदिशब्देन 'एतस्माज्जायते ....खं वायुः' (मु. २-१-३.) 'नाभ्या आसीदन्तरिक्षम्' (तै. आ. ३-१२-६.) 'सन्देहो बहुलः' (छा. ५-१८-२.) इत्यादिकं गृह्यते।

(४) ननु न वियतोऽनया श्रुत्योत्पत्तिः साधयितुं शक्या। 'अनादिर्वा' इत्यनादित्वाभिधायकश्रुतिविरोधादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—गौणेति ॥ इत्यादीति। एवमादिरूपे वाक्ये अनादित्वश्रुतिः तद्बोधक-

'शून्योऽलौकिकः' इत्यादिश्रुतिर्गौणी ।

(५) अन्यथोत्पत्तिश्रुतिबाहुल्यासम्भवात् ॥ ३ ॥

शब्दो 'गौणी' भूते छत्रिवल्लाक्षणिकी । आकाशशब्दार्थैकदेशानादित्वपरा । एकदेशनित्यत्वगुणयोग इति तत्त्वप्रदीपोक्तेः । चिरंतनत्वमात्रेण गौणी वेत्यर्थः । यद्वा—'इत्यादिश्रुतिर्गौणी' अमुख्यपदोपेतेत्यर्थः । तच्चोक्तरीत्याऽनादिपदमाकाशपदं वा । तस्यापि भूतेतरस्मिन्नाकाशशब्दबोध्ये लाक्षणिकत्वसम्भवादिति भावः । इत्यादिश्रुतिरित्यनेन सूत्रेऽनुत्पत्तिश्रुतिरिति प्रकृतमनुषज्यते इति सूचितम् । उपलक्षणमेतत् । उत्पत्तिश्रुतिस्तु मुख्यार्था सर्वविषयिणीत्यपि द्रष्टव्यम् । गौणीत्यनन्तरं यत एवं व्यवस्था युज्यते, अतो नोक्तश्रुतेस्तद्विरोध इति वाक्यशेषः । श्रुतौ अयमित्यव्याकृताकाशो ग्राह्यः । भूते कथमप्यवृत्तेरिति टीकाविरोधात् न भूताकाशोऽपि । आकाशानादित्वे हेतुमाह—यतः 'शून्यः' सूक्ष्मः अप्रतिघ इति । सूक्ष्मत्वं वायोरप्यस्तीति व्यभिचार इत्यतो हेतुगर्भं विशेषणान्तरमाह—अलौकिक इति । अतीन्द्रिय इत्यर्थः । नन्वव्याकृतस्य साक्षिवेद्यत्वात्कथमेतत् । न, तत्त्वप्रदीपरीत्यास्य लौकिकप्राकृतेन्द्रियागम्य इत्यर्थाश्रयणात् । ननु तथाऽपि व्यभिचारानुद्धारः, 'आकाशवायू त्वव्यक्तौ' इति भागवततात्पर्योक्तेः, तस्य प्रत्यक्षाप्रत्यक्षपञ्चमहाभूतविषयत्वादिति सुधोक्तेश्च वायोरप्यतीन्द्रियत्वादिति चेत्—न, भूताकाशस्य दिव्यदृष्टिगोचरत्वेन तद्विषयेऽव्यक्तशब्दस्य सङ्कोचेऽवश्यंभाविनि तद्वत् वायोरपि स्पार्शनेन्द्रियग्राह्यत्वमङ्गीकृत्य अव्यक्तशब्दस्येतरेन्द्रियाग्राह्यार्थकतया सङ्कोचसम्भवात् । अत एव सुधावाक्यस्थाप्रत्यक्षपदमपि भूताकाशमात्रपरम् । न च पद्धतौ 'वायुस्पर्शोऽपि त्वचो विषयः' इति वायुस्पर्शमात्रग्रहणविरोधः । वायुस्तत्स्पर्शोऽपीत्यर्थाश्रयणात् । अस्तु वा—तात्पर्यसुधानुसाराद्वायोरतीन्द्रियत्वम् । तथाऽपि न व्यभिचारः । भूताकाशवत् वायोरपि योगिचाक्षुषप्रत्यक्षविषयत्वेन प्राकृतेन्द्रियग्राह्यतया तदग्राह्यत्वहेतोस्तत्राभावात् ।

(५) ननु किमेतया व्यवस्थया, अनादित्वश्रुत्यनुसारेणानुत्पत्तिरेव किं नाश्रयत इत्यतः प्रवृत्तमसम्भवादित्यंशं व्याचष्टे—अन्यथेति ॥ उक्तव्यवस्थामनभ्युपगम्याकाशस्य सर्वथाऽनुत्पत्तेरेवाभ्युपगमे 'उत्पत्तिश्रुत्य-

(६) सू—ॐ ॥ शब्दाच्च ॥ ॐ ॥ ४ ॥

' अथ ह वाव नित्यानि पुरुषः प्रकृतिरात्मा काल इति । अथ यान्यनित्यानि प्राणः श्रद्धा भूतानि भौतिकानीति । यानि ह

सम्भवात् ' तत्प्रामाण्यासम्भवात्तदप्रामाण्यप्रसङ्गादित्यर्थः । विषयाभावादिति भावः । ननूत्पत्तिश्रुतेरनुभवाद्यनुसारिबलवदनादित्वश्रुतिविरोधेनाप्रामाण्यं युक्तमिति नेदमनिष्टमित्याशङ्क्योत्तरत्वेनापि प्रवृत्तमसम्भवादित्येतत् बाहुल्यासम्भवपरतयापि व्याचष्टे—अन्यथेति ॥ अनादित्वश्रुतिविरोधेनोत्पत्तिश्रुतेरप्रामाण्याङ्गीकारे 'आत्मन आकाशस्सम्भूतः' इत्युत्पत्तिश्रुतेर्बहुविषयत्वरूपबाहुल्येन प्रबलत्वात्तदसम्भवप्रसङ्गादित्यर्थः । बाहुल्यस्य प्राबल्यहेतुतया उत्पत्तिश्रुतेरपि बलवत्त्वेन अप्रामाण्यस्य वक्तुमशक्यतया श्रुतिद्वयप्रामाण्याय उक्तव्यवस्थाया एव आश्रयणीयत्वादिति भावः । यद्वा—नन्वनादित्वश्रुतिर्मुख्या, उत्पत्तिश्रुतिस्तु गौणीति वैपरीत्यं किं न स्यादित्याशङ्क्योत्तरत्वेनापि प्रवृत्तं असम्भवादित्येतद्बाहुल्यासम्भवपरतया व्याचष्टे—अन्यथेति । उत्पत्तिश्रुतेरेवैकदेशविषयत्वरूपगौणार्थानभ्युपगमे तस्या बहुविषयत्वरूपबाहुल्यासम्भवप्रसङ्गादित्यर्थः । अयं भावः—उत्पत्तिवाक्यस्थाकाशशब्देन हि आकाशाख्यभूतं तदभिमानी विनायकः अव्याकृताकाशं तदभिमानिचित्प्रकृतिश्चेति चत्वारो वाच्याः । उत्पत्तिरपि अभूत्वाभवनरूपा देहसम्बन्धरूपा पराधीनविशेषावासिरूपा चेति त्रिधा । तत्राद्या भूताकाशे । द्वितीया तदभिमानिनि । तृतीया मूर्तद्रव्यसम्बन्धरूपपराधीनविशेषवत्यव्याकृताकाशे, तदभिमानिचित्प्रकृतौ चास्ति । तथाचोत्पत्तिश्रुतेर्बहुविषयत्वम्, अनुत्पत्तिश्रुतेस्त्ववकाशमात्रविषयत्वेनाल्पविषयत्वं सिद्धम् । एवं चोत्पत्तिश्रुतेरेव गौणार्थत्वे एकदेशविषयत्वापत्त्या बहुविषयत्वासम्भवप्रसंगाद्बहुग्रहायानुत्पत्तिश्रुतेरेव गौणत्वं अङ्गीकृत्योत्पत्तिश्रुतेर्मुख्यार्थताऽङ्गीकार्येत्युक्तव्यवस्थैव युक्ता, न वैपरीत्यमिति ।

(६) न केवलमुक्तव्यवस्थाऽसम्भवयुक्तिसिद्धा, अपि तु श्रुतिसिद्धा चेत्यर्थप्रतिपादकं सूत्रमुपन्यस्य तां श्रुतिमुदाहरति—शब्दाच्चेति ॥ भाल्लवेयश्रुतेश्चैतस्य अनुत्पत्तिश्रुतिर्गौणीति व्यवस्था सिद्धेति पूर्वेणान्वयः । न केवलमसम्भवयुक्त्येति चशब्दार्थः । श्रुतौ अथेति प्रमेयान्तरारम्भे ।

वाव उत्पत्तिमन्ति तान्यनित्यानि। यानि ह वा अनुत्पत्तिमन्ति तानि नित्यानि, न ह्येतानि कदाचनोत्पद्यन्ते न विलीयन्ते पुरुषः प्रकृतिरात्मा काल इति। अथैतान्युत्पत्तिमन्ति च

वावेति निपातौ प्रसिद्धौ। हेत्यास्वादने। ह्वावेति निपातसमुदायो वा प्रसिद्धौ। यानीत्युभयत्र सम्बध्यते। तथा च यानि पुरुषादीनि तानि नित्यानि, यानि च प्राणादीनि प्रसिद्धानि तान्यनित्यानीति प्रतिज्ञाद्वयमस्यार्थः। इत्येतानीति इति शब्दद्वयस्यान्वयः। 'पुरुषो' जीवचैतन्यं तदभिमानी ब्रह्मा च। 'प्रकृतिः' सत्त्वादिगुणात्मकं जडं तदभिमानिनी श्रीभूदुर्गात्मिका लक्ष्मीश्च। तत्र लक्ष्म्याः न स्वरूपदेहयोरुत्पत्तिः, नापि प्रधानवत्परिणामेनेति नित्यं सत्त्वेन नित्यत्वमुच्यते। 'आत्मा' परमात्मा। 'कालः' तत्प्रवाहस्तदभिमानिप्रकृतिश्च। 'प्राणो' मुख्यवायुः। 'श्रद्धा' तत्पत्नी भारती। 'भूतानि' आकाशादीनि। 'भौतिकानि' भूतकार्याणि शरीरादीनि। यद्यपि सकलचैतन्यग्राहकपुरुषपदेनैव प्राणश्रद्धयोर्नित्यवर्गे गृहीतत्वात् तदुपकरणभूतयोस्तच्छरीरयोरपि भौतिकपदेनानित्यवर्गे गृहीतत्वात् पुनस्तदुभयग्रहणवैयर्थ्यम्। तथापि प्रवाहतो नित्यं वृत्तिज्ञानरूपं परिकरान्तरं चैतन्यमात्रादधिकमेतयोरस्तीति दर्शयितुं पुनः प्राणश्रद्धयोरनित्ये ग्रहणम्। यद्यपि चैतन्यमात्रादधिकमपि नित्यज्ञानमस्तीति प्रदर्शनं तयोर्नित्यानित्यतोक्त्यैव सिद्ध्यति। तथापि अनित्यत्वोक्त्यभावे नित्यानित्यत्वोक्तेः स्वरूपशरीरविषयतया पर्यवसानसम्भवेन न चैतन्यातिरिक्तज्ञाननित्यता सिद्ध्यति। सपरिकरयोः प्राणश्रद्धयोरनित्यत्वोक्तौ तु पुरुषपदेन तयोः स्वरूपनित्यत्वोक्तेः, भूतभौतिकपदेन शरीररूपपरिकरानित्यत्वोक्तेः, तयोश्चेतरजीवसाधारण्येन पुनर्नित्यानित्यत्वोक्तेः वैयर्थ्येन तद्विषयत्वासम्भवाच्चैतन्यातिरिक्तवृत्तिज्ञाननित्यताविषयतयैव पर्यवसानावश्यंभावादधिकनित्यसद्भावप्रदर्शनार्थं शरीराद्यंशपरिकरविशिष्टयोः प्राणश्रद्धयोः पुनर्ग्रहणं कृतम्। पुरुषपदेन तु अपरिकरस्येति ध्येयम्। उदाहरणोपनयवाक्याभ्यामेवानादित्वात्सदित्वादिति हेतुलाभादत्राप्रयोजकत्वशङ्कापरिहारेण तद्धेतुकप्रतिज्ञाद्वयसमर्थनायोभयत्रापि व्याप्तौ वक्तव्यायामनुत्पत्तेरुत्पत्तिप्रतियोगिकत्वादानन्तरिक्ष्याप्युत्पत्तिमत्त्वहेतोः प्रथमं

अनुत्पत्तिमन्तिच प्राणः श्रद्धाऽऽकाश इति भागशो ह्युत्पद्यन्ते' इतिभाल्लवेयश्रुतेश्च ॥ ४ ॥

(७) सू—ॐ ॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ॐ ॥५॥

व्याप्तिमाह—यानीति ॥ हवैशब्दार्थः पूर्ववत्। नित्यत्वव्याप्तस्यानादित्वहेतोः समुचितदेशवृत्तितावोधनायोपनयमाह—न हीति। हिशब्दः प्रसिद्धौ यस्मादित्यर्थे वा। 'कदाचन' कदाऽपि। तस्यैव निगमनमाह—न विलीयन्त इति। न नश्यन्ति नित्यानीत्यर्थः। तस्मादित्यादौ ग्राह्यम्। इतिशब्दस्येत्येतानीति पूर्वेणान्वयः। एवमनित्येषु भूतभौतिकेषु नञ्परित्यागेनोपनयनिगमने द्रष्टव्ये। अनित्यत्वेन गृहीतेषु प्राणादिषु मध्ये न सर्वेषामनित्यत्वमेव मन्तव्यम्, किंतु केषुचिन्नित्यत्वमपीत्याह—अथेति। अथान्तरवचनोऽयम्। चावन्योन्यसमुच्चये। इत्येतानीत्यन्वयः। तस्मान्नित्यानीति शेषः। तत्रोपपत्तिमाह—भागश इति। बहुभागैरुत्पद्यन्ते कैश्चिन्नोत्पद्यन्त इत्यर्थः। तथाच 'हि' यस्मात्प्राणादीनि भागश उत्पद्यन्ते, भागशस्तु न, अथ तस्मादुत्पत्तिमन्ति चानुत्पत्तिमन्ति च तस्मान्नित्यानित्यानीति योजना। तथा हि—प्राणपदोक्तो भूततदमुख्यमुख्याभिमानिरूपत्रितयात्मको वायुस्त्रिभिरपि भागैरुत्पद्यते। एवं श्रद्धापदोक्ता भारती च। एवमाकाशपदोक्तं भूतमव्याकृतं तदभिमानिद्वयं च। आहत्य चतुष्टयं चतुर्भिरपि भागैरुत्पद्यते उक्तायाः उत्पत्तेश्च त्रिष्वपि सत्त्वात्। एतान्येवाभिमानिचैतन्यस्वरूपेणावकाशस्वरूपेण भूतसूक्ष्मरूपेण च नोत्पद्यन्त इति। अनेन यानि प्राणः श्रद्धा आकाशाख्यभूतं चेत्येतानि, तानि नित्यानित्यानीति प्रतिज्ञान्तरम्। तत्र साध्यनादित्वादितिहेतुः तदनुसार्युदाहरणोपनयनिगमनानि चोपलक्षणयाऽनेन दर्शितानीति ज्ञातव्यम्॥

(७) ननु भवेदाकाशस्य गौणमनादित्वं उत्पत्तिस्तु मुख्यत इति व्यवस्था, यद्यनादित्वश्रुतिर्गौणी भवेत्, नैतदस्ति, 'न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः' (भ. गी. २.) इत्यादौ न जायत इत्यनुत्पत्तिमत्त्वाभिधायकशब्दस्य परमात्मनि मुख्यत्वदर्शनेन तदेकार्थानादित्वश्रुतेरपि तथात्वौचित्यात्। यद्यप्ययं मन्त्रो गीताभाष्ये जीवपरत्वेन व्याख्यातः। तथाऽपि तत्र परमात्मप्रतिबिम्बत्वेनैव तच्छब्दप्रवृत्ति-

स्यादेवैकस्योत्पत्तिमत्त्वमनुत्पत्तिमत्त्वं च गौणमुख्यत्वापेक्षया ।

(८) यथा ब्रह्मशब्दः । 'अथ कस्मादुच्यते परं ब्रह्मेति.. बृहति बृंहयति च' (अथर्वशिरः) इति श्रुतेः । परे ब्रह्मणि मुख्योऽपि गौणत्वेन विरिञ्चादिष्वपि वर्तते । अत एवाब्रह्मत्वं च तेषाम् । एवमन्यत्राप्यनुत्पत्तिमच्छब्दः ॥ ५ ॥

मुख्यतो भगवत्येवायं शब्द इत्यस्ति चोद्यावकाशः । 'अयं ना' परमपुरुषो न जायते इति गीतातात्पर्ये परमात्मपरत्वेनापि व्याख्यानाच्चेत्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—स्यादिति ॥ एवकारो भिन्नक्रमः, चकारार्थोऽयम् । इदं चैकस्यैवाकाशस्य उत्पत्तिमत्त्वमनुत्पत्तिमत्त्वं च गौणमुख्यत्वापेक्षया स्यात् । भावरूपत्वात्क्रमव्यत्यासः । उत्पत्तिमत्त्वं मुख्यं अनुत्पत्तिमत्त्वं गौणमित्युभयमविरुद्धं स्यात् । कुतः ? यत एकस्यैवानुत्पत्तिमच्छब्दस्य ब्रह्मणि मुख्यत्वेऽप्याकाशे गौणत्वमिति गौणमुख्यत्वापेक्षया प्रवृत्तिः स्यात् अत इत्याहृत्या योज्यम् ।

(८) अत्र सूत्रकृदुक्तं दृष्टान्तं विवृणोति—यथेति ॥ आद्योऽपिर्यद्यपि-तथापीत्यर्थे । द्वितीयस्समुच्चये । ब्रह्मशब्दः परे ब्रह्मणि कुतो मुख्य इत्यत उक्तम्—अथेति । इति श्रुतेर्मुख्यत्वेनावगतोऽपीत्यन्वयः । 'गौणत्वेन' अमुख्यत्वेन परममुख्यान्यवृत्त्येति यावत् । ब्रह्मशब्दो विरिञ्चादिष्वमुख्यतः कुतोऽस्तीत्यत उक्तम्—अत एवेति । ब्रह्मशब्दस्य तत्रामुख्यत्वादेव 'तेषां' विरिञ्चादीनां 'अब्रह्मत्वं' अपूर्णत्वं मुख्यमस्तीत्यर्थः । न केवलं गौणं ब्रह्मत्वमिति चकारार्थः । हिशब्दार्थो वा चशब्दः । एवकारो मुख्यत्वस्य व्यापकतासूचकः । अनेन विरिञ्चादीनाममुख्यब्रह्मशब्दार्थत्वे पूर्णत्वादिति व्यतिरेकी हेतुः सूचितः । अथेति प्रश्नार्थः । परं वस्तु ब्रह्मेति कस्मान्निमित्तादुच्यत इति । बृहति बृंहयतीत्युत्तरम् । स्वयं वर्धते पूर्णं भवति, यथायोग्यं वर्धयति, पूरयति, चान्यान् तस्मात् प्रवृत्तिनिमित्तसद्भावाद्ब्रह्मेत्युच्यत इति श्रुत्यर्थः । आथर्वणीयं श्रुतिः । ब्रह्मशब्दवदित्यनेन लब्धं दार्ष्टान्तिकमाह—एवमिति । 'अन्यत्र' विष्णोः आकाशे । अपिः समुच्चये । 'अनुत्पत्तिमच्छब्दः' तत्प्रतिपादको न जायतेऽनादिरित्यादिरूपः गौणत्वेन वर्तत इति शेषः ।

(९) सू—ॐ ॥ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ॐ ॥ ६ ॥

ब्रह्मणोऽन्यस्य नित्यत्वे 'स इदं सर्वमसृजत' (तै. २-६.) इत्यादिप्रतिज्ञाहानिः। आकाशस्यापि सर्वस्मादव्यतिरेकात्।

(१०) 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. १-१.) सदेव

---

(९) ननु युक्तं ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वमन्यत्रामुख्यत्वम्, गुणपूर्णत्वरूपशब्दप्रवृत्तिनिमित्तसत्त्वासत्त्वाख्यकारणसद्भावात्। न च तथाऽनुत्पत्तिमच्छब्दे वक्तुं शक्यम्, तद्वत्प्रकृते प्रवृत्तिनिमित्तपौष्कल्यभावाभावाख्यकारणानुपलम्भादित्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे—प्रतिज्ञेति॥ ब्रह्मणः 'अन्यस्य' आकाशस्यापि 'नित्यत्वे' ब्रह्मवन्मुख्यनित्यत्वे मुख्यास्तद्वाच्यनुत्पत्तिमच्छब्दवाच्यत्वेऽङ्गीकृते सति। अनेन सूत्रे पूर्ववाद्युक्तं सूत्रकृद्बुद्धिस्थमिहापादकत्वेन संयोज्यमिति सूचितम्। इत्यादिप्रतिज्ञाहानिरिति। नात्रप्रतिज्ञाशब्दः पक्षवचनपरः, अपि तु प्रतिपिपादयिषितार्थोक्तिपरः। तथाच 'स इदम्' इत्यादिपरमात्मकर्तृकसर्वसृष्ट्युक्तिविरोधः स्यादित्यर्थः। अतस्तत्परिहाराय ब्रह्मण्येवानुत्पत्तिमच्छब्दो मुख्योऽन्यत्र त्वमुख्य इत्यङ्गीकार्यमिति वाक्यशेषः। 'स इदम्' इति तैत्तिरीये। अत्र 'स तपस्तप्त्वा' (तै. २-६.) इति प्रकृतस्य तच्छब्देन परामर्शः। 'इदं' प्रमितं सर्वं जगत्। आदिशब्देन 'पुरुषात्प्रकृतिर्जगदण्डम्' इत्यादिकं गृह्यते। ननु अत्राकाशशब्दाश्रवणात्तस्य मुख्यानुत्पत्तावपि न प्रतिज्ञाहानिरित्यतः प्रवृत्तं अव्यतिरेकादित्यंशं व्याख्याति—आकाशस्यापीति। न केवलं पृथिव्यादीनां, किन्त्वाकाशस्यापीत्यपेरर्थः। 'सर्वस्मात्' सर्वशब्दार्थात् जगतः 'अव्यतिरेकात्' अनतिरेकात्सर्वमध्यपतितत्वादित्यर्थः। सर्वशब्दार्थसङ्कोचे कारणाभावादिति भावः।

(१०) तथाऽप्याकाशब्रह्मणोः सादित्वानादित्वे स्फुटं न प्रतीयेते, किन्त्वर्थतः। अतो नेदं नियामकमित्यतः प्रवृत्तं शब्देभ्य इत्यंशं तद्वाक्योदाहरणेन विवृणोति—आत्मेति॥ ऐतरेयवाक्यमेतत्। इदमिति द्वितीया षष्ठ्यर्थे। यथोक्तं बृहद्भाष्ये—इदमग्रे अस्याग्रइति षष्ठ्यर्थे द्वितीयेति।

सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छा. ६-२-१.) 'इदं वा अग्रे नैव किञ्चनासीत्' (तै. ब्रा. २-२-९.) इत्यादिश्रुतिभ्यः ॥ ६ ॥

इदमग्र इति समस्तं पदम्, व्यस्तं वा, इदमित्यव्ययं वा। तथाच 'इदम्' अस्य जगतः 'अग्रे' प्रलये 'आत्मा' नारायण एव 'एकः' प्रधान एव 'आसीत्' अवर्ततेत्यर्थः। यद्यपि ऐतरेयभाष्ये इदमिति द्वितीयान्तं, अग्र इति प्रथमान्तं च कृत्वा 'इदं' रमाब्रह्मादिकं सर्वं जगदपेक्ष्य ततगुणत्वात् 'आत्मा' विष्णुरेक एव 'अग्रः' अग्र्यो गुणतोऽधिक आसीदिति व्याख्यातम्। तथाऽपीदं बृहद्भाष्यदिशा टीकोक्तं व्याख्यानान्तरमित्यदोषः। 'सदेवेत्याद्यद्वितीयम्' इत्यन्तं छन्दोगवाक्यम्। सोम्येति श्वेतकेतुसम्बोधनं 'इदमग्र' जगतो अग्रे 'सत्' ब्रह्मैव स्वातन्त्र्येणासीत्। तद्ब्रह्म च 'एकं' स्वसजातीयमत्स्यादिभिर्भेदशून्यम्। 'एकं' स्वगतगुणक्रियावयवादिभिरभिन्नं न तु तैर्भिन्नम्। यद्वा-अवयवादिनाऽप्यभिन्नमेव न तु घटादिवत्स्वावयवैर्भिन्नाभिन्नमित्येवशब्दार्थः। 'अद्वितीयं' समशून्यं अधिकशून्यत्वमार्थिकार्थः। 'इदं वा अग्रे' इत्यध्वर्यूणां श्रुतिः इयं च—

सर्वसंहारकं विष्णुं देवीं जीवांस्तथैव च।
कालं त्रिगुणसाम्यं च कर्माणि प्राणमिन्द्रियम्॥
संस्कारं चैव वेदांश्च नतें किञ्चिल्लयेत्वभूत्॥

इति बृहद्भाष्योदाहृतब्रह्मतर्कवचनानुसारेण 'इदं' अस्य 'अग्रे' प्रलये 'किञ्चन' विष्णुरमादिभ्योऽन्यो नैवासीदिति व्याख्येया। इत्यादिश्रुतिभ्य इत्यस्यानुत्पत्तिमच्छब्दोऽन्यत्रामुख्यो ब्रह्मण तु मुख्य इत्यवसीयत इति पूर्वेणान्वयः। तथाचाकाशब्रह्मणोः 'आत्मा' इत्यादिश्रुतिभिः स्पष्टमेव सादित्वानादित्वप्रतीतेस्ता एव तयोरनुत्पत्तिमच्छब्दमुख्यत्वामुख्यत्वयोः कारणमिति तदनुपलम्भोऽसिद्ध इति भावः। बहुवचनाद्बहुश्रुतिविरोधे च एकस्यानुत्पत्तिमच्छब्दस्यामुख्यार्थत्वं न्याय्यमिति न्यायं सूचयति—यद्यप्युदाहृतवाक्येष्वपि ब्रह्मणोऽनादित्वस्य तदन्यस्य च कतिपयस्यानादित्वाभावस्य च प्रतीतावपि न स्पष्टमाकाशस्योत्पत्तिः प्रतीयते। तथाऽप्यादिशब्दगृहीतेषु तदुत्तरपूर्वभाविषु 'स इमान् लोकानसृजत' (ऐ. १-१.) इत्यादिषु सा प्रतीयत इति नानुपपत्ति-

(११) सू—ॐ ॥ यावद्विकारं तु विभागो लोकवत् ॥ ॐ ॥ ७ ॥

विभक्तत्वाच्च विकारित्वं युक्तम् ।

(१२) विकारिण एव हि विभक्ता लोके दृश्यन्ते ।

रिति ध्येयम्। न च गौण्यसम्भवादित्यनेनेदं पुनरुक्तं, श्रुतिनिरूपितबाहुल्यासम्भवस्यापि असम्भवपदेनोक्तत्वादिति वाच्यम्। शब्देभ्य इत्यस्य पूर्वोक्तासम्भवसम्बन्धिबहुत्वाश्रयविवरणरूपत्वेनापुनरुक्तेः । अत एव 'अस्ति तु' इत्यनेनापि न पुनरुक्तिः ॥

(११) अनुमानेनापि ब्रह्मण एवानादित्वं अन्येषां सादित्वमनुत्पत्तिश्रुतेर्मुख्यामुख्यत्वसिद्ध्यर्थं साधयत्सूत्रमुपन्यस्यति—यावदिति ॥ अत्र तुशब्दश्चार्थो हेताववधारणं च। तेन विकारस्य व्यापकता लभ्यते। यावच्छब्दोऽवधारणं। अत्र अवधारणमियत्तापरिच्छेदः। अव्ययीभावसमासश्चायम्। विकारविभागशब्दौ कर्मणि घञन्तौ। लोकवदिति सप्तम्यन्ताद्वतिरित्यभिप्रेत्य व्याप्त्यभिधानेन लब्धौ प्रतिज्ञाहेतू बहिरेव दर्शयित्वा सूत्रं व्याप्तिप्रदर्शनपरतया व्याचष्टे—विभक्तत्वाच्चेति । वियत इति विपरिणामेनेहानुवर्तते। चो हेतुसमुच्चये। तथा च न केवलं शब्देभ्यः, किन्तु वियतो 'विभक्तत्वात्' अल्पशक्तित्वानुमानाच्च 'विकारित्वं' उत्पत्तिमत्त्वमेव 'युक्तं' न्याय्यमित्यर्थः। चकारादविभक्तत्वादविकारित्वं च ब्रह्मणो युक्तमिति समुच्चयोऽपि सूच्यते ॥

(१२) एवं प्रतिज्ञाहेतू अभिधाय हेतोरप्रयोजकत्वशङ्कामपाकर्तुं सूत्रे यावद्विकारमिति सकलसाध्याश्रयार्पकांशेन साधनाश्रयार्पकेण विभाग इत्यनेन च लोकवदिति दृष्टान्तोक्त्या च ज्ञापितां व्याप्तिं दर्शयति—विकारिण एवेति ॥ घटादय इति शेषः। न त्वविकारिण इत्येवार्थः। बहुवचनेन यावत्पदतात्पर्यमुक्तम्। एवेत्यनेन विभक्तत्वहेतोर्व्यतिरेकव्याप्तिश्च दर्शिता। तेन विकारित्वसाध्येन व्यभिचाराभावो ज्ञापितः। एवकारस्य विभक्ता एवेति भिन्नक्रमेणान्वये समव्याप्तिरप्यनेनोक्ता। तेन ब्रह्मण्यविकारित्वे साध्ये तद्व्यतिरेकस्याविभक्तत्वाभावरूपविभक्तत्वव्याप्यता सिद्ध्यति। हिशब्दोऽस्यार्थस्य प्रमाणप्रसिद्धतामाह—यद्वा सौत्रतुशब्दो हेतावपीत्या-

(१३) एकोऽविभक्तः परमः पुरुषो विष्णुरुच्यते ।
प्रकृतिः पुरुषः कालस्त्रय एते विभागतः ॥
(१४) चतुर्थस्तु महान् प्रोक्तः पञ्चमाऽहङ्कृतिर्मता ।
तद्विभागेन जायन्त आकाशाद्याः पृथक्पृथक् ॥

शयेन हिशब्दप्रयोगः । 'लोके' जगति । तस्माद्विभक्तत्वहेतोर्नाप्रयोजकताशङ्केति वाक्यशेषः । अनेन वियद्विकृतमुत्पत्तिमत् विभक्तत्वात् घटवत्, ब्रह्मानुत्पत्तिमत्, अविभक्तत्वात्, व्यतिरेकेण घटवत्, इत्यनुमानद्वयमुक्तं भवति। सूत्रार्थस्तु—'लोकवत्' यथा लोके जगति 'यावद्विकारं' विक्रियमाणं यावद्वस्तु घटादिकं तत्सर्वमेव 'विभागः' अल्पशक्तिमत् दृष्टम्, यद्यद्विभक्तं तत्तद्विकृतं दृष्टम्, यथा लोके घटादीति। यावदिति। एवं यावद्विभागं तु विकारो 'लोकवत्' यथा लोके इत्यपि व्याख्येयम्। यस्मादेवं तस्माद्विभक्तत्वाच्च वियद्विकारो विकृतमुत्पत्तिमत्, अविभक्तत्वात् ब्रह्माविकारीति च सिद्धमिति सूत्रशेषः ॥

(१३) सूत्रार्थं स्मृतिसम्मतिं चाह—एक इति ॥ यतो विष्णुरेक एव परमपुरुषः। अतः स एक एवाविभक्त उच्यते। एतत्समर्थनायान्येषां विभक्तत्वमाह—प्रकृतिरिति। प्रकृतिः पुरुषः कालः इति। एतैः प्राङ्नित्यत्वेन उत्तरत्र परनित्यत्वेन च गृह्यमाणानां ग्रहणम् । तत्त्वप्रदीपे तु प्रकृतिः पुरुषः काल इत्येतैः परनित्यभूताः श्रीभूदुर्गाः सत्त्वाद्यात्मिकाः गृह्यन्त इत्युक्तम्। तत् नित्यस्याप्युपलक्षकं, श्रुत्यर्थनिर्णायकत्वात्स्मृतेः। श्रुतावक्रमेण निर्दिष्टानामपोह क्रमेण निर्देशः कृतः। तथा च प्रकृतिः पुरुषः काल इत्येते त्रयो 'विभागतो' विभागत्वेन प्रोक्ता इत्यर्थः ॥

(१४) एवं विभक्तेषु त्रीन् तत्त्वदेवान् प्रदर्श्य तत्सृज्यं चतुर्थमाह—चतुर्थ इति ॥ 'महान्' महत्तत्त्वाभिमानी चतुर्मुखस्तु विभक्तेषु 'चतुर्थः प्रोक्तः' तत्त्वेन परिगणितः। 'अहंकृतिः' रुद्रस्तु 'पञ्चमा' पञ्चमीत्वेन मता। अस्त्वेवं, ततः किमित्यत आह—तदिति। स चासौ विभागश्च स तथोक्तः। तथा च तेन विभक्तत्वरूपहेतुना आकाशाद्याः 'पृथक्पृथक्' प्रकृतिगुणेभ्यो महान्, ततो अहम्, तत आकाशः, आकाशाद्वायुः, वायोरग्निरिति परम्परया जायन्ते। नत्वेकस्मात्सर्वमित्यनुमीयत इत्यर्थः। आद्यशब्देन वाय्वादिकं गृह्यते ॥

(१५) यो विभागी विकारः स सोऽविकारः परो हरिः ।
अविभागात्परानन्दो नित्यो नित्यगुणात्मकः ॥
विभागो ह्यल्पशक्तिस्यान्न तद्अस्ति जनार्दने ॥
इति बृहत्संहितायाम् ॥ ७ ॥

॥ इति वियदधिकरणम् ॥ १ ॥

---

(१५) विभक्तत्वेऽपि कुतो जन्मेति तत्राह—य इति ॥ 'यो विभागी' विभागवान् 'स विकारः' विकृत इत्यर्थः । इति व्याप्तेरिति शेषः । ननु विष्णुरेक एवाविभाग इत्युक्तम्, समर्थितं च तत् । ततः किमित्यत उक्तम्—स इति । अविभक्तत्वेनोक्तो हरिः 'अविकारः' अनादिनित्यः । कुतः? अविभागात् । न च द्वयमसम्भावितम् । यतः 'परः' लोकविलक्षणः । न केवलं हरिरविभागादविकारीत्येतावन्मात्रम्, किं तर्हि? 'परानन्दः' पूर्णानन्दः स्वरूपतो देहतश्च नित्यः नित्यज्ञानादिगुणश्च भवति । नन्वविभागादित्यसिद्धं, तथासति विष्णोः द्रव्यत्वानुपपत्तेरित्यत आह—विभाग इति । नात्र विभागशब्देन विभागाख्यो गुणो ग्राह्यः, येन द्रव्यत्वानुपपत्तिः, किन्तु 'अल्पशक्तिः' अल्पसामर्थ्यम्, तच्च जनार्दने नास्ति । अन्यथा तस्य महाबलदुर्जनसंहर्तृत्वानुपपत्तिरित्याशयेन जनार्दन इत्याह । न च तद्विभागेनेत्यत्र अन्वयसाधने विभागस्य हेतुत्वोक्तया व्यतिरेके तदभावस्य व्यापकत्वात् अविभागादिति तस्य हेतुत्वोक्तिरयुक्तेति वाच्यम् । विभागाख्यहेतोः समव्याप्त्यभिप्रायेणास्य प्रवृत्तेः । न च 'प्रकृतिः पुरुषः कालः' इति वचनस्य 'नित्यानि पुरुषः प्रकृतिरात्मा कालः' इति प्राचीनश्रुतिविरोधः । तत्र प्रकृत्यादेः स्वरूपस्य अभूत्वाभवनरूपोत्पत्त्यभावोक्तेः । अत्र पुनः पराधीनविशेषावाप्तिरूपोत्पत्त्युक्तेर्भिन्नविषयत्वेन विरोधाभावात् । ननु प्रकृत्यव्याकृताकाशप्राणश्रद्धादीनां विकारमूर्तसम्बन्धशरीरतदभिमानविशेषाख्यविशेषस्य भगवदुत्पन्नत्वे धर्मिणां कथमुत्पत्तिरिति चेत्—अत्रोक्तं सुधायां—अपूर्वविशेषोपजननेन हि विशिष्टाकारोपजनोऽवश्यं भावी । विशिष्टाकारश्च वस्तुस्वरूपाभिन्न इति तस्यैव असावुपजनो भवतीति । इति बृहत्संहितायामित्यस्य सूत्रकृदुक्तमित्यध्याहृतवाक्येनान्वयः ॥ १ ॥

॥ इति वियदधिकरणम् ॥

॥ २. मातरिश्वाधिकरणम् ॥

(१) 'अथ ह नित्याश्चानित्याश्च तेजोऽवन्नान्याकाश इति तान्यनित्यानि वायुर्वाव नित्यो वायुना हि सर्वाणि भूतानि नेनीयन्ते' ( )।

॥ २. मातरिश्वाधिकरणम् ॥

(१) अत्राधिकरणे ईश्वरे श्रुतिसमन्वयसिद्धये मुख्यवायोरुत्पत्ति-विषयश्रुतिविरोधः परिहियते। पूर्वेणास्य गतार्थताशङ्कापरिहारायाधिकाशङ्कां दर्शयितुं वायोरनुत्पत्तौ श्रुतीराह—अथेति॥ प्रकरणान्तरारम्भार्थोऽथशब्दः। हिशब्दः प्रसिद्धौ। नित्यानित्यशब्दावनादिसादिपरौ। भूतपदार्था उच्यन्त इति शेषः। चावन्योन्यसमुच्चये। नित्यस्य वायोरनित्यवैलक्षण्यज्ञापनाय प्रथममनित्यान् दर्शयति—तेज इति। 'अन्नं' पृथिवी। तेजश्चापश्चान्नं चेति विग्रहः। तेजोऽवन्नानि। आकाश इत्यत्र भूताकाश उच्यत इति तत्त्वप्रदीपोक्तेरत्राकाशशब्देन भूताकाशमात्रमुच्यते, न त्वव्याकृतमिति। न चैवं 'न चाकाशपदेन भूतमेवात्रोच्यत इत्यत्र नियामकमस्ति' इति टीकाविरोधः। नियामकत्वोक्तेः पूर्वं पूर्वपक्षदशायां वायुभिन्नस्य सर्वस्याकाशादेः नित्यत्वाभावप्रदर्शनार्थं प्रौढवादेन तथोक्तिसम्भवात्। तत्त्वप्रदीपस्य च समभिव्याहारानुसारेण वस्तुस्थित्या प्रवृत्तत्वात्। तथा च यान्यनित्यानि प्रतिज्ञातानि तानि तेजोऽवन्नान्याकाश इत्येतानीति ज्ञेयानीत्यर्थः। यदर्थमनित्यं दर्शितम, तं नित्यं दर्शयति—वायुरिति। यो नित्यः प्रतिज्ञातः स वायुरेवेत्यर्थः। यद्यपि नित्या इति प्रतिज्ञानुसारान्नित्या बहवः प्रदर्शनीयाः। तथाऽपि नित्यानां बहूनां मध्ये मुख्यवायोरतिशयितनित्यत्वमिति प्रदर्शनायैकवचननिर्देशः। एवं च नित्य इत्यस्य विशेषेण नित्य इत्यर्थः। 'नित्याश्चेतनाः' इति बहुवचनद्वयं त्वंशबाहुल्यादुपपद्यत इति ध्येयम्। वायोर्नित्यत्वे हेतुमाह—वायुनाहीति। 'हि' यस्मात् 'सर्वाणि भूतानि' वायुभिन्नपृथिव्यादीनि 'नेनीयन्ते' स्वस्वकार्येषु भृशं प्रेर्यन्ते। तस्माद्भृतनेतृत्वात् वायुरेवातिशयितनित्य इत्यर्थः। यद्यपि मुख्यवायोर्नित्यत्वे 'वायुर्वाव नित्यः' इति श्रुत्यंश एव हेतुत्वेनोदाहार्यः, न त्वधिकांशः। तथाऽपि आकाशादिवद्वायोरपि गौणानुत्पत्तिमत्त्वे एकदेशतो नित्यत्वानित्यत्ववतामपि तेजोवन्नानाम-

(२) 'अथ ह चेतनाश्चाचेतनाश्च तेजोऽबन्नान्याकाश इति तान्य-चेतनानि वायुर्वाव चेतनो वायुना हि सर्वाणि भूतानि विज्ञायन्ते' ( ) ।

(३) 'कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन् ।
ते वायवे मनवे बाधितायावासयन्पर्षं सूर्येण' ॥ (ऋ.७-९१-१.)

(४) सा वा एषा देवताऽनादिर्योऽयं पवत इति ॥

(५) 'यस्य नादिर्न मध्यं नान्तो नोदयो न निम्लोचः' ( )

नित्यत्वमुक्त्वा वायोर्नित्यत्वोक्तिरयुक्ता स्यादिति युक्तिप्रदर्शनाय स उदाहृतः ।

(२) अनुत्पत्तिश्रुतेः गौणत्वाभावे युक्त्यन्तराभिधायकं श्रुत्यन्तरमुदाहरति—अथेति ॥ यतः सर्वाणि पञ्चभूतानि वायुना विज्ञायन्तेऽतः सर्वभूतत्वाद्वायुरेव सर्वभूतेभ्योऽतिशयितचेतन इत्यर्थः । चिती संज्ञाने इति स्मरणादिति भावः । अनेन वाय्वनुत्पत्तिश्रुतेः स्वरूपमात्रविषयतया गौणत्वे तस्य सर्वचेतनसमत्वेनातिशयितचेतनत्वोक्तिरयुक्ता स्यादिति युक्त्यन्तरमुपन्यस्तं भवति ॥

(३) वायोरनुत्पत्तौ युक्त्यन्तरोपन्यासाय श्रुत्यन्तरमुदाहरति—कुविदङ्गेति ॥ व्याख्यातोऽयं मन्त्रः शब्दाधिकरणे । अनेन वायोरुत्पत्तिमत्त्वे दोषित्वेन सर्वदेवतोपास्यत्वानुपपत्तिरिति पूर्वपक्षे विशेष-युक्त्यन्तरमुपन्यस्तं भवति ॥

(४) वायोरुत्पत्त्यभावे युक्त्यन्तरोपन्यासाय श्रुत्यन्तरमुदाहरति—सेति ॥ 'पवते' शोधयति । कल्मषमिति शेषः । सञ्चरतीति वा शुद्धोऽस्तीति वा । इतिशब्दः श्रुत्यन्तर्गतः । 'योऽयं पवते' इति बृहदारण्यके 'अयं वै ब्रह्म योऽयं पवते' इति बह्वृचब्राह्मणे च । या पवत इति पवनकर्तृत्वेनोक्ता साऽनादिरित्यर्थः ।

(५) अनादित्व एव वाक्यान्तरमाह—यस्येति ॥ 'आदिः' उत्पत्तिः । 'मध्यं' मध्यमवयः । 'अन्तो' नाशश्च नास्ति यस्याः सा वायुदेवतेति सम्बन्धः । वायोरुदयनिम्लोचयोरेवाभावात्कुतो जन्म सम्भवतीत्याह —यतो नोदयो न निम्लोच इति । प्रादुर्भावतिरोभावौ न स्त इत्यर्थः ।

इत्यादिश्रुतिभ्यो वायोरनुत्पत्तिरिति ॥

(६) अतो ब्रवीति—

सू—ॐ॥ एतेन मातरिश्वा व्याख्यातः ॥ॐ॥८॥

युक्तीनामपि श्रुतिगृहीतत्वाच्छ्रुतिभ्य इत्येवोक्तम् । हेतुमुक्त्वा साध्यमाह — वायोरनुत्पत्तिरिति । सावधारणमेतत्सिध्यतीति शेषः । अतः उत्पत्तिश्रुतिरप्रमाणमिति न जगत्कारणे ब्रह्मणि श्रुतिसमन्वयो युक्त इति वाक्यशेषः ॥

(६) एवमधिकाशङ्क्या पूर्वपक्षितेऽतिदेशेन सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ एतेनेत्यनूद्य मुख्यामुख्यानुत्पत्तिवचनेन विभक्तत्वाच्चेति च व्याख्यातम् । अत्र 'भाष्यं चात्यर्थविस्तरम्' इत्युक्तेः मुख्यस्य वायोरमुख्यानुत्पत्तिवचनेन मुख्यानुत्पत्तिवचनाभावेनेत्येकोऽर्थः । अनेनाश्रुतेरिति प्रथमसूत्रोक्तो हेतुरुक्तो भवति । एवं मुख्यस्यामुख्यानुत्पत्तिवचनेन 'प्राणाद्वायुरजायत' इत्यादिमुख्योत्पत्तिवचनेनेति व्याख्यानेऽस्तीति सूत्रोक्तहेतुर्दर्शितः । एवं मुख्यस्यामुख्यानुत्पत्तिवचनेन अमुख्यानुत्पत्तिरितिवचनेनेति व्याख्याने तृतीयसूत्रोक्तहेतुर्दर्शितः । एवं 'अथैतानि' इति वायोर्मुख्यामुख्योत्पत्त्यनुत्पत्तिवचनेनेति व्याख्याने चतुर्थसूत्रोक्तो हेतुर्दर्शितः । एवं तत्त्वप्रदीपरीत्या अनुत्पत्तिश्रुतिर्ब्रह्मण्येव मुख्या अन्यत्र प्रतिज्ञाहान्यादिबाधकादमुख्या अत एवोत्पत्तिश्रुतिर्मुख्येत्येवं स्याच्चैकस्येत्यादौ वचनेनेत्येवंव्याख्याने पञ्चमसूत्रोक्तौ हेतू दर्शिताविति ज्ञातव्यम् । विभक्तत्वादित्यस्यालपशक्तित्वादित्यर्थः । चशब्दः षष्ठोक्तहेतुसमुच्चायकः । चकारादन्यथा सर्वसृष्टिप्रतिज्ञाहानेश्चेति तत्त्वप्रदीपोक्तः । एवमेतत्पदं व्याख्याय अथ मातरिश्वपदं व्याख्यातपदस्वारस्यात्तदनुत्पत्तिपरतया व्याचष्टे—वाय्वनुत्पत्तिश्रुतिरपीति । अपिः समुच्चये । तथा च न केवलमाकाशानुत्पत्तिश्रुतिः, किन्तु 'वाय्वनुत्पत्तिश्रुतिः' वायोरनुत्पत्तिप्राप्तिप्रापिकोक्तश्रुतिरप्यल्पभागविषयत्वेन स्वरूपानुत्पत्तिविषयत्वेन गौणी व्याख्याता । उत्पत्तिश्रुतिस्तु बाहुल्यान्मुख्यार्थेत्येति व्याख्यातेत्यर्थः । टीकायां तु 'एनेन' अनुत्पन्नत्वेन अश्रुतत्वात् उत्पन्नत्वेन श्रुतत्वात् सम्भवशब्दादिरूपहेतुना 'मातरिश्वा' मुख्यवायुरपि उत्पत्तिमान्

एतेन मुख्यामुख्यानुत्पत्तिवचनेन विभक्तत्वाच्च वाय्यनुत्पत्ति-
श्रुतिरपि व्याख्याता ॥

(७) नित्यः परमनित्यश्च तथा नित्यः परस्तथा ।
चतुर्धेतज्जगत्सर्वं परानित्यं तु पार्थिवम् ॥
अनित्यानि तु भूतानि नित्यो वायुरुदाहृतः ।
परस्तु नित्यः पुरुषः प्रकृतिः काल एव च ॥

(८) एतच्चतुष्टयं विष्णुः स्वयं नित्यः परात्परः ।

'व्याख्यातः' तन्त्रेण निश्चित इति श्रुतिलक्षणां विनैव पर्यवसितार्थो दर्शितः ॥

(७) ननु वायोर्मुख्यानुत्पत्त्यभावे उत्पत्त्यनुत्पत्तिमद्भ्यो वियदादिभ्यो विशेषेणानुत्पत्तिश्रुतिर्मुख्यचेतनत्वादिन्युक्तिश्च विरुद्धा स्यादित्याशङ्कां परिहर्तुं स्मृतिमुदाहरति - नित्य इति ॥ लिङ्गव्यत्ययश्च आर्षः । पर इत्यनन्तरमनित्यपदमनुवर्तते । इतिशब्दोऽध्याहार्यः । तथा च 'एतत्' प्रमितमखिलं जगत् नित्यं परमनित्यं अनित्यं परानित्यं चेति चतुर्धा भवतीत्यर्थः। चः समुच्चये । परस्परसमुच्चये तथाशब्दौ । तानि क्रमेण दर्शयति—परेति । तुशब्दाः पूर्वपूर्वस्मादुत्तरोत्तरस्य विशेषद्योतकाः । 'पार्थिवं' पृथिव्युपलक्षितभूतकार्यं संसृष्टमण्डादि । 'अनित्यानि तु भूतानि' असंसृष्टान्तर्गतानि आकाशादीनि तदभिमानिविनायकादीनि च । भूतानामुपचयमात्रनाशात् तदभिमानिनः अभिमानमात्रनाशात् पूर्वेभ्यो विशेषः । न च प्रागाकाशस्य 'प्राणः श्रद्धाऽऽकाशः' इति नित्यानित्यत्वोक्तिविरोध इति वाच्यम् । पार्थिववत्परानित्यत्वस्य वायुवन्नित्यत्वस्य चाभावेन तदुक्तिसम्भवात् । 'वायुः' मुख्यवायुर्नित्य उदाहृतः प्रमाणेषु । स्वरूपातिरिक्तप्रातिभज्ञानस्याप्यनुपपन्नत्वात् । न च प्राङ्नित्यत्वानित्यत्वोक्तिविरोधः । शरीराख्यपरिकरविशिष्टस्य तदुक्तिसम्भवात् । परो 'नित्यः' परमनित्यः शरीरतोऽपि नित्य इत्यर्थः । पुरुषः प्रकृतिः काल इति शब्दैस्तत्त्वप्रदीपरीत्या परनित्यत्वं देहादेरपि नित्यत्वमपि टीकारीत्या च श्रीभूदुर्गात्मिका चित्प्रकृतिरुच्यते ।

(८) यद्येवं जगच्चतुर्विधं, तर्हि विष्णुर्न नित्यः स्यादित्यतस्तस्योक्तेभ्योऽतिशायितनित्यत्वाख्यप्रकारान्तरमाह—एतदिति ॥ विष्णुस्तु 'परात्पर-

प्रतिव्यूह्य व्यूह्य चासावतीत्य च जनार्दनः ॥
धारयत्यनिशं देवो नित्यानन्दैकलक्षणः ॥ इति कौर्मे ॥ ८ ॥

॥ इति मातरिश्वाधिकरणम् ॥ २ ॥

नित्यः' परनित्यात्छ्रीतत्वादपि परनित्य इत्यर्थः । यद्वा—स्वातन्त्र्यमनेन लभ्यते । तत्र हेतुमाह—एतदित्यादिना । विष्णुर्यतो 'नित्यानन्दैकलक्षणः' नित्यानन्द एव एकं केवलं लक्षणं स्वरूपभूतं यस्य स तथोक्तः । यतश्च 'देवो' द्योतनादिमान् । जननमर्दयतीत्यपगमयतीति जनार्दनः । यतश्चैतच्चतुर्विधं विश्वं 'व्यूह्य' अनित्यादिभेदेन विभज्य राशीकृत्येति वा । स्वयं 'प्रतिव्यूह्य' स्वात्मानं च जगत्प्रति तन्नियामकत्वेन विभज्य व्यूहशः समूहतः कृत्वेति वा । तत्र विभागेन प्रविश्यैतच्चतुष्टयं स्वगुणैः स्वशक्त्या वा 'अतीत्य' अतिक्रम्य प्रतिबिम्बभूतान् जीवान् प्रति निजरूपं 'व्यूह्य' जीवेषु च व्यूह्य स्वगुणैस्तानतीत्य गुणतस्तदुत्तमो भूत्वा तदनपेक्ष एव 'अनिशं' सदा एतज्जगत्स्वयं स्वतन्त्र एव 'धारयति' धत्ते, पुष्णाति च । अतः परात्परनित्य इति योजना । अनेन विष्णोः परात्परनित्यत्वे स्वातन्त्र्यं निमित्तमित्युक्तं भवति । टीकायां तु निमित्तनैमित्तिकयोः उपचारेणाभेदोक्तिर्वा निमित्तार्थो वा लक्षणशब्दो द्रष्टव्यः । यद्वा—परात्परनित्यः स्वतन्त्रनित्य इत्यर्थः । तथा च 'वायुर्वाव नित्यः' इत्याद्यनुत्पत्त्यादिश्रुतौ वायोः परतन्त्रत्वेन ईश्वरवत्स्वातन्त्र्यलक्षणपरात्परनित्यत्वाभावेऽपि देहोत्पत्तिमत्त्वेन चित्प्रकृतिवत्परनित्यत्वाभावेऽपि प्रलयेऽपि प्रतिभातपरावरत्वात्स्वरूपातिरिक्तवृत्तिज्ञानप्रवाहनित्यत्वाभिप्रायेण पार्थिवादिवत्सम्यगनित्यताशून्येभ्यो वियदादिभ्यः स्वरूपातिरिक्तसादिज्ञानेभ्यः तदभिमानिविनायकादिभ्यश्चातिशयेन नित्यत्वं भूतनेतृत्वेन वा नित्यत्वं सर्वभूतज्ञातृत्वेन मुख्यचेतनत्वं अवान्तरेश्वरत्वेन सर्वदेवतोपास्यत्वं वृत्तिज्ञानप्रवाहनिम्लोचाभावप्रयुक्तोदयनिम्लोचाभाववत्त्वं चोच्यत इति नोक्तश्रुतियुक्तिविरोध इति भावः । कौर्म इत्यस्योक्तमतो न विरोध इत्यध्याहारेणान्वयः ॥

॥ इति मातरिश्वाधिकरणम् ॥ २ ॥

॥ ३. असम्भवाधिकरणम् ॥

(१) सू—ॐ ॥ असम्भवस्तु सतोऽनुपपत्तेः ॥ ॐ ॥ ९ ॥

'असद्वा इदमग्र आसीत् । ततो वै सदजायत' (तै. २-७.)
'असतस्सदजायत' (ऋ. १०-७२-२.) इत्यादिश्रुतिभ्यः
सतोप्युत्पत्तिरिति चेत्—

(२) न, अनुत्पत्तिरेव सतः । तुशब्देनोक्तव्यवस्थामपाकरोति ।

॥ ३. असम्भवाधिकरणम् ॥

(१) पूर्वपक्षादिजिज्ञासाजननाय प्रथमं सूत्रमेवोदाहृत्य तद्गततुशब्द-व्यावर्त्यपूर्वपक्षं सयुक्तिकं तावद्बहिरेवाह—असम्भवस्त्विति ॥ 'असद्वा इदम्' इति तैत्तिरीयश्रुतिः । 'असतः सत्' इति ऋक्श्रुतिः । आदि-शब्देन एवंजातीयकश्रुत्यन्तराणि गृह्यन्ते । श्रुतिभ्य इति बहुवचनं न पूर्वपक्षयुक्तिबाहुल्यार्थकम्, किन्तु बहुवाक्येषु ब्रह्मजन्मश्रुतिरिति जन्म-प्रापकश्रुतिबहुत्वार्थकम् । यद्यपि 'असद्वा' इत्यंशो नोपयुक्तः । तथापि पूर्वपक्षे श्रुतिस्त्यासच्छब्दस्य शून्यार्थत्वेन सच्छब्दस्य च ब्रह्मार्थकतया असतो ब्रह्मकारणत्वे प्रमाणत्वेनोपयुक्तः । न केवलं गगनपवनयोः, किन्तु सतो ब्रह्मणोऽपीति समुच्चये वा, गगनपवनयोरिवानादितया श्रुतस्यापीति विशेषणसमुच्चये वाऽपिशब्दः । तेन जन्मश्रुतेः सयुक्तिकत्वेन प्राबल्यं सूचितम् । उत्पत्तिः पराधीनविशेषावाप्तिरूपा । अवगम्यत इति शेषः ।

(२) एवं पूर्वपक्षमभिधाय सिद्धान्तयत्सूत्रं व्याचष्टे—नेति ॥ सत उत्पत्तिर्नेत्यर्थः । नेत्यनन्तरं किन्त्विति शेषः । अनुत्पत्तिरित्यनेन असम्भव-शब्दः एवेत्यनेन तुशब्दः सर्वात्मना न तु व्यवस्थयेत्यवधारणार्थतया व्याख्यातः । कुत इत्यतोऽस्यां प्रतिज्ञायां सत इति पदेनैव 'सत्त्वं स्वातन्त्र्य-मुद्दिष्टम्' इति भारतोक्तेः सत्त्वात्स्वातन्त्र्यादिति केवलव्यतिरेकी हेतुः सूचितः । एतदर्थमेव सूत्रे भाष्ये च ब्रह्मण इत्यनुक्त्वा सत इत्युक्तिः । नभोनभस्वतोर्ब्रह्मवदनादित्वेऽप्यस्वातन्त्र्यादुत्पत्तिः । ब्रह्मणस्तु तदभावा-दनुत्पत्तिरिति वैषम्यनिमित्तोक्त्या पूर्वपक्ष्युक्तवैषम्यायोगहेतोर्गतिकथ-

(३) न ह्यसतः सदुत्पद्यतेऽदृष्टत्वादनुपपत्तेः ।

(४) 'तद्वा एतद्ब्रह्माहुर्बृहति बृंहयति चेति । तद्वा एतदसदाहुः न

नार्थं च सत इत्युक्तिः । मयाऽपि वियदादिवद्व्यवस्थया ब्रह्मणोऽनुत्पत्तेरङ्गीकृतत्वात्सिद्धप्रतिक्षेपमित्यतः एवार्थकतुशब्देन सूचितं प्रयोजनमाह—तुशब्देनेति ॥ उक्तेति स्वरूपेणानुत्पत्तिर्देहविशेषाभ्यामुत्पत्तिरित्युक्तव्यवस्थां निराकरोति सूत्रकृदित्यर्थः ।

(३) ननु 'असतः सदजायत' इत्यादिश्रुतौ ब्रह्मणोऽप्युत्पत्तिश्रवणात्कथं सर्वात्मनाऽनुत्पत्तिरूच्यत इत्यतो नायं श्रुत्यर्थ इत्याह—न हीति ॥ 'हि' यस्मादसतः सकाशात् 'सत्' ब्रह्म उत्पद्यत इति श्रुत्यर्थो न भवति, तस्माद्ब्रह्मणोऽनुत्पत्तौ न तद्विरोध इत्यर्थः । कुतो नायं श्रुत्यर्थ इत्यतस्तत्र अनुपपत्तेरिति सौत्रं हेतुं योजयति — अनुपपत्तेरिति । असतस्सकाशात्सतः सम्भव इति प्रातीतिकार्थस्यायुक्तत्वादित्यर्थः । कुतोऽनुपपत्तिरित्यतः स्वातन्त्र्यानुपपत्तेरित्यनेन सूचितं हेतुमाह—अदृष्टत्वादिति । असतः सत्सम्भवस्येति प्रकृतमनुवर्तते । तथा च असतः सकाशात्सच्छब्दितवस्तुमात्रोत्पत्तेरेवाप्रामाणिकत्वात् अत एव सुतरां सतो ब्रह्मणः उत्पत्तेरदृष्टत्वादप्रामाणिकत्वादित्यर्थः । यद्यपि सुधायां ननु अनुत्पत्तेरित्यप्ययुक्तम्, सत्यम् । तस्यार्थो न ह्यसतः सदुत्पद्यतेऽदृष्टत्वादनुपपत्तेरित्यनेनानुपपत्तेरिति हेतुवाक्यस्य न हीत्येतद्भाष्यमर्थकथनरूपमित्युक्तेः । न हीत्यस्यासतः सदुत्पत्तेरभावात्, कुतः ? अदृष्टत्वादसतः सत्कारणत्वानुपपत्तेः । सतो वाऽसत्कार्यत्वानुपपत्तेरनुत्पत्तिरेव सत इति योजनायां अनुत्पत्तिरूपे साध्ये असतः सदुत्पत्त्यभावो हेतुः । तत्र चानुपपत्तिः । तत्रादृष्टत्वं हेतुः सर्वथाऽनुत्पत्तौ तु प्रसक्तकारणनिरासादन्यस्याप्रसङ्गात्सिद्धः कारणमात्राभावो हेतुरिति प्रतीयते । टीकायां तु श्रुतिविरोधपरिहारायानुत्पत्तेरित्यस्य श्रुतेः प्रातीतिकार्थानुपपत्तेरित्यर्थोक्तेर्भेदः प्रतीयते । तथापि टीकोक्तार्थमात्रग्रहणेऽनुत्पत्तिरूपे साध्ये हेतोरनभिधानात् न्यूनता स्यात्, अतः सुधोक्तार्थोऽपि ग्राह्यः । तथात्वे सौत्रहेतुः परम्परया योजनीयः ।

(४) नन्वसतः कारणविशेषस्य प्रतिषेधे कुतस्सतोऽनुत्पत्तिसिद्धिः कारणान्तरेण तदुत्पतिसम्भवादिति चेन्नैवं प्रसक्तकारणनिरासात् अन्यस्या-

ह्यासादयति कश्चनेति । तद्वा एतत्परमाहुः परतो हि तदुदीक्ष्यते' इति श्रुतेरसच्छब्दो ब्रह्मवाची ।

(५) 'देवानां पूर्वे युगेऽसतः सदजायतेति। ब्रह्म वा असत् सद्वाव प्राणः

प्रसंगात् कारणाभावस्यैव सिद्धेः तस्यैवानुत्पत्तौ साक्षाद्धेतुत्वेनाभिप्रेतत्वात् तर्हि 'असतः सत्' (छा. ६-२-१.) इति श्रुतेः प्रातीतिकार्थानुपपत्तावप्रामाण्यप्रसङ्ग इत्यतः श्रुत्यन्तरेण तां सम्यग्व्याचष्टे—तदिति। 'तद्वा एतदसदाहुर्न ह्यासादयति कश्चन' इत्यस्यैवात्रोपयोगित्वेऽपि तस्य पूर्वोत्तरवाक्यबलाद्ब्रह्मपरत्वज्ञापनायान्यांशोदाहरणम् । श्रुत्यर्थस्तु—'तदेतत्' नारायणाख्यं चैतन्यं ब्रह्मेत्याहुः वृद्धाः। वै प्रसिद्धम्। कस्मान्निमित्तात्? यतः स्वयं 'वृहति' वर्धते वं । नित्यवृद्धस्याप्ययं व्यपदेश आत्माऽस्तीतिवदुक्तः। न केवलमेतावान् किंतु स जीवांश्च 'बृंहयति' वर्धयति। अतः निमित्तद्वयसमुच्चये चः। इतिशब्दः श्रुतिस्थ इति हेतोरित्यर्थेऽस्ति । तदेतदसच्छब्दवाच्यमाहुः। किं निमित्तं? 'हि' यस्मात् 'कश्चन' कोऽपि अतिसमर्थोऽपि ब्रह्मादीतरत् नासादयति न विशरणादिकं प्रापयति च । तस्मात्तदेतद्ब्रह्म परमित्याहुः। कुतः? 'हि' यतः परतो रमादेरुच्चत्वेन 'ईक्ष्यते' ज्ञायते ज्ञानिभिः अत इति। श्रुतेरिति पञ्चमी। इति ज्ञायत इति शेषः।

(५) असच्छब्दस्य ब्रह्मपरत्वेऽपि कः समस्तश्रुत्यर्थ इत्यत आह—देवानामिति ॥ पैङ्गिश्रुतिर्देवानामिति ऋक्प्रतीकं गृहीत्वा ब्रह्मेत्यनेन तां व्याख्याति। 'पूर्वं युगे' आदिसृष्टिकाले देवानां मध्ये प्रथमं सच्छन्दितो वायुः 'असतः' परब्रह्मणोऽजायतेत्यर्थः। 'असत्' असच्छब्दवाच्यं, वैशब्दोऽवधारणे। वावेति निपातसमुच्चयः प्रसिद्धौ। कथं प्राणः सच्छब्दवाच्य इत्याह—प्राणमिति। यतो वृद्धाः 'प्राणं' मुख्यं 'महान्' पूज्यः 'सहः' सहनशक्तिः 'ओजो बलम्' 'इत्याचक्षते' प्राहुः, अतः प्राणो महत्त्वादिसद्गुणशालित्वान्निमित्तात् 'सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते' इति गीतोक्तेरिति भावः। धर्मधर्म्यभेदविवक्षया सह इत्याद्युक्तिः। यद्यप्युक्तार्थसिद्धौ पैङ्गिश्रुतिरेवालम्। तथाऽप्यसच्छब्दस्य ब्रह्मणि निर्वचनार्थं 'तद्वा एतत्' इति पूर्वश्रुत्युदाहरणम्। असच्छन्दिता-

प्राणं वाव महान् सह ओजो बलमित्याचक्षते' इति पैङ्गिश्रुतिः ॥

(६) त्वं देव शक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविरादधेऽजः ।
ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन् करवाम किं ते ॥
इति भागवते ॥

नारायणात्सच्छब्दितो वासुदेवः समुद्भूत इति तैत्तिरीयभाष्यं तु व्याख्यानान्तरम्। यच्च 'असतः' इति श्रुतेरनेकार्थत्वादिति प्रमेयदीपिकायामसच्छब्दस्य प्रकृतिपरतया व्याख्यानम्, तदप्यमुख्यवृत्त्यैवेति ध्येयम्। श्रुतिर्यत इति शेषः। अस्यातोऽसच्छब्दो ब्रह्मवाचीत्यनेन वा न हीति पूर्वेणान्वयः। तथा च असत इति श्रुतेः अन्यथा सम्यग्व्याख्यातत्वात् नाप्रामाण्यमिति भावः। यद्वा न केवलं 'तद्वा एतत्' ( ) इति श्रुतिरिति समुच्चये चशब्दः।

(६) सच्छब्दवाच्यस्य वायोः परब्रह्मजातत्वे न केवलं 'असतः' इति श्रुतिर्मानं, किन्त्वत्र स्पष्टस्मृतिश्चास्तीत्याह—त्वमिति ॥ भागवते तृतीयस्कन्धे देवानां वाक्यमेतत्। हे देव त्वं 'कविः' अतिक्रान्तदर्शी 'अजो' देहतोऽप्युत्पत्तिशून्यश्च अतः यद्यपि त्वयि देवदत्तवद्गर्भाधानादिकर्माण्यसम्भावितानि। तथापि भवान् 'शक्त्यां' भार्यायां 'गुणकर्मयोनौ' गुणानां ज्ञानादीनां सत्त्वादीनां वा कर्मणामदृष्टादीनां योनौ हेतुभूतायां 'अजायां' जननधर्मरहितायां चित्प्रकृतौ 'रेतो' गर्भं 'आदधे' आधत्त। तुर्विशेषार्थः। ततः अथ तस्याः प्रकृतेस्सत्प्रमुखाः वायुप्रभृतयो बभूविम। किञ्चातः हे 'आत्मन्' स्वामिन् वयं यदर्थे यत्कार्याय बभूविम, ते तव तर्हि कार्यं करवाम, न किमपि तदुपयुक्तज्ञानाद्यभावादित्यर्थः। यद्यपि सत्प्रमुखाः महदादय इति तात्पर्यं व्याख्यातम्। तथापि वायुरपि महत्तत्वाभिमानीत्यविरोधः। यद्यपि त्वमग्ने प्रथमं मातरिश्वनः आविर्बभूवेति ऋग्भाष्यटीकायां युष्मद्युपपदेऽपि भाष्ये आविर्बभूवेति प्रथमपुरुषप्रयोगो युक्त इत्यत्र त्वं देवशक्त्यां रेत आदधे इति प्रयोगो दृष्टान्तीकृतः। तद्वदत्राप्यार्षत्वसमाधानं वक्तुं युक्तम्। तथाऽप्यार्षत्वं विना वाक्यभेदेन भवानित्यध्याहारेण च व्याख्यानान्तरमिदं व्यासतीर्थैः कृतमित्यदोषः। भागवते उक्तमत उक्तं युक्तमिति शेषेणान्वयः।

(७) 'अजायमानो बहुधा विजायते' (तै.आ. ३-१३.) इति च ।

(८) प्रत्यक्षत्वं हरेर्जन्म न विकारः कथञ्चन ।
पुरुषः प्रकृतिः कालो महानित्यादिषु क्रमात् ॥

---

(७) ननु रामकृष्णादिरूपेण हरेर्जायमानत्वात्कथं जन्माभाव इत्यत आह–अजायमान इति॥ व्याख्यातोऽयं श्रुतिर्युष्माद्यधिकरणस्थानाधिकरणयोः। इति श्रुतिश्चात्रार्थे मानम्. अतो न प्रातीतिकजनिविरोध इत्यन्वयः।

(८) अजायमानस्य कीदृशं जन्मेत्यत आह–प्रत्यक्षत्वमिति॥ अवतारेषु व्यक्तिरेवेत्यर्थः। कथंचनेति स्वरूपदेहविशेषाणामन्यतमेनेत्यर्थः। अन्यत्र तु विकार एव जन्मेत्याह—पुरुष इति। 'पुरुषः' चेतनः, अत एव चित्प्रकृतेरपि लाभः। प्रकृतिकालमहच्छब्दैः जडान्युच्यन्ते। तथैव तत्त्वप्रदीपोक्तेः। 'इत्यादिषु' एवमादिशब्दवाच्येषु। आदिशब्देन अहमादिशब्दवाच्याहङ्कारतत्त्वादीनि गृह्यन्ते। अभिमानिचेतनव्यावर्तनाय तत्त्वमात्रं ग्राहयितुमितिशब्दः। 'क्रमात्' पूर्वतत्त्वापेक्षया उत्तरोत्पन्नतत्त्वोपचयाधिक्यक्रमात्। उपचयो नाम स्थूलभावः। तस्याधिक्यमतिशयः तस्य क्रमः तारतम्यं तदनुसारेणाधिक्यतारतम्यवान्यो विकारस्तदेव प्रकृत्यादिषु जननमित्यर्थः। क्रमादित्यस्य प्रकृतिमहदादिष्वेवान्वयः। न तु पुरुषकालयोरपि, तयोर्विकारत्वेऽप्युपचयकृतविकारस्याभावात्। अतएव पुरुषे तद्विशेषणमिति पृथगुक्तिः। तत्र सत्त्वरजस्तमोगुणात्मकप्रकृतिगुणेषु मध्ये सत्त्वगुणस्य न द्रव्यान्तरसंयोगकृत उपचयः, अपि तु स्वत एव स्थूलभूतस्य मूलराशितो विभागेन देशान्तरसंयोगकृतः। रजसस्तु न मूलराशितो विभागेन देशान्तरसंयोगमात्रकृत उपचयः। अपि तु द्रव्यान्तरसंयोगकृतश्च स च तमसोऽल्पः। सत्त्वापेक्षयाऽधिकः। अतएव विकारोऽप्यधिकः। एवं तमसो रजोऽपेक्षयोपचयकृतविकारोऽधिकः गुणत्रयापेक्षया महत्तत्त्वस्य, तदपेक्षया अहङ्कारस्याधिकः। एवमुत्तरत्रापि। पूर्वपूर्वतत्त्वादुत्पन्नानामुत्तरोत्तरतत्त्वानां न केवलं पूर्वपूर्वतत्त्वभागसंयोगकृत एवोपचयः किंतु स्वस्वसूक्ष्मभागसंयोगकृतश्च। अत एवोत्तरोत्तरतत्त्वेषूपचयाधिक्यमिति ध्येयम्। केचित्तु पुरुषपदोक्तचेतनानां सूक्ष्मसृष्टिकाले सूक्ष्मप्रकृतिभिरुपचयः। प्रकृतेरपि प्रकृत्यन्तरसम्बन्ध एवोपचयः। कालप्रकृतेरपि स

विकार एव जननं पुरुषे तद्विशेषणम् ।
परतन्त्रविशेषो हि विकार इति कीर्तितः ॥ इति च पाद्मे ॥

(९) अविकारोऽपि भगवान् सर्वशक्तित्वहेतुतः ।
विकारहेतुकं सर्वं कुरुते निर्विकारवान् ॥

एवोपचयः । महत्तत्त्वप्रकृतीनां गुणत्रयरूपकार्यभागैरुपचयः । एवमहङ्कारादिप्रकृतीनामपि महत्तत्त्वादिभागैरुपचय इत्युपचयाधिक्यक्रमादित्यर्थ इत्याहुः । ननु पुरुषस्य चेतनत्वात्कथं विकार इत्यत आह—पुरुष इति । चेतन इत्यर्थः । तद्विशेषणमिति । तेन विकारेण विशेषितत्वं तदाख्यविशेषवत्त्वं भवतीत्यर्थः । तथैव तत्त्वप्रदीपोक्तेः । स च विकारो विकारिवस्त्वभिमानकृतः । तर्हि चेतनगतविशेषस्यैवोत्पत्तिरागता न चेतनस्येत्यत आह—परतन्त्रेति । पराधीनविशेष एव विकार इत्यर्थः । हिशब्दो यत इत्यर्थे । तत्र जडप्रकृतौ परिणामः, चित्प्रकृतौ सिसृक्षाविषयत्वादिरूपो विशेषः परमात्माधीनोऽस्ति । जीवे तु विकाररूपविशेष एव पराधीनोऽस्ति । कालस्य तु निमेषादिरूपेणोत्पाद एव अस्ति । अत एव तत्त्वप्रदीपे 'सर्वे निमेषाः' (महा. १-८.) इत्यादिश्रुत्युपन्यासः । कीर्तित इत्यनेनास्य प्रमितत्वमाह । पाद्म इत्यनन्तरं तत्तदवतारिकशङ्कापरिहृतेति शेषः ।

(९) ननु जगत्कारणत्वात्परमेश्वरस्य कथमविकारित्वमित्यत आह—अविकारोऽपीति ॥ अपिरवधारणे । कर्तृत्वनिमित्तसुखदुःखानुभवरूपविकाररहित एवेत्यर्थः । न केवलं स्वरूपतो विकारः, किंतु निर्विकारवानपीति वाऽपिशब्दार्थः । 'सर्वशक्तित्वहेतुतः' सर्वशक्तिमत्त्वनिमित्तेन शक्त्याख्यहेतुना सर्वं करोतीत्यनेन ईश्वरस्य कुलालादिवन्निमित्तकारणत्वात् न मृदादिवद्विकारित्वमित्युक्तं भवति । 'विकारहेतुकं' विक्रियमाणप्रकृत्याद्युपादानकं 'सर्वं' जगत् 'कुरुते' सृजतीत्यर्थः । निर्विकारवानिति । निर्गतो विकारः एभ्यस्ते निर्विकारधर्मास्तद्वानित्यर्थः । यथोक्तं तत्त्वप्रदीपे—विकारवान् धर्मोऽप्यस्य नास्तीति निर्विकारवानिति । अनेन ईश्वरधर्मादेरविकारित्वमुच्यते । अतएवाविकारो निर्विकारवान् इत्यनयोर्न पुनरुक्तिः । ननु यदीश्वरस्य शक्त्या जगत्कारणत्वं तर्हि तद्विनाशे तदभावः स्यादित्यत आह—शक्तीति । चस्त्वर्थः । शक्तिशक्तिमतोस्तु न विभेदः

शक्तिशक्तिमतोश्चापि न विभेदः कथंचन ।
अविभिन्नाऽपि सेच्छादिभेदैरपि विभाव्यते ॥
इति भागवततन्त्रे ॥ ९ ॥

॥ इति असम्भवाधिकरणम् ॥ ३ ॥

॥ ४. तेजोऽधिकरणम् ॥

(१) सू—ॐ ॥ तेजोऽतस्तथा ह्याह ॥ ॐ ॥ १० ॥

किन्त्वभेद एवेत्यर्थः । चशब्दावन्योन्यभेदाभावसमुच्चये नित्यत्वसमुच्चये वा । तथा च शक्तेर्नित्यशक्तिमदभिन्नत्वान्नित्यत्वाच्च नोक्तदोष इति भावः । ननु इच्छाज्ञानप्रयत्नानां कर्तृत्वोपयुक्तत्वात्तैर्विना कथं शक्तिमात्रेण कर्तृत्वमित्यत आह—अविभिन्नाऽपीति । अत्राभेदो नान्योन्याभावाभावः, तथासति तत्प्रतियोगिसमर्पकस्य भेदैरित्यस्यान्योन्याभावरूपोभेदोऽर्थः स्यात् । न च तद्युक्तम्, निर्भेदत्वात् । भेदैरिति बहुवचनायोगाच्च । किन्त्वेकत्वसङ्ख्यारूपः । अपिरेवार्थः यद्यपीत्याद्यर्थे च । ज्ञानप्रयत्नावादिपदोक्तौ । तथा च यद्यप्यभिन्ना तथापि अविभिन्नाऽपि एकैव सा शक्तिः 'इच्छादिभेदैः' इच्छादिनिरूपितद्वित्वत्रित्वादिसङ्ख्याभिः । इच्छेत्याद्यनेकशब्दैरिति यावत् । 'विभाव्यते' 'पराऽस्यशक्तिः' इत्यादावभिधीयत इत्यर्थः । न केवलं शक्तिरित्यपेरर्थः । तथा च शक्तिसत्त्वे तदवान्तरभेदरूपाणामिच्छादीनामपि सत्त्वान्न शक्त्या कर्तृत्वनिर्वाहानुपपत्तिरिति भावः । अनेनेश्वरस्य न केवलं शक्त्या सर्वं करोतीति हेतोरुपादानत्वाभावः, येन विकारशक्तिमत्युपादाने व्यभिचारः स्यात्, किंतु कुलालादिवदिच्छापूर्वकारणत्वाच्च नोपादानत्वम् । अतोऽपि निर्विकारमित्युक्तं भवति । भागवततन्त्र इत्यस्योक्तत्वात् न कश्चिद्दोष इत्यध्याहृतेनान्वयः ।

॥ इति असम्भवाधिकरणम् ॥ ३ ॥

॥ ४. तेजोऽधिकरणम् ॥

(१) अस्मिन्नधिकरणे तेजोजन्मविषयश्रुतिविरोधः परिह्रियते । 'वायोरग्निः' इति श्रुतेस्तेजो वायोर्जायत इति पूर्वपक्षे सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे—तेज इति ॥ इत्यादेरिति । इत्यादिश्रुत्येत्यर्थः । आदि-

'वायोरग्निः' (तै. २-१.) इत्यादेर्नान्यत उत्पत्तिर्ग्राह्या । अत एव परात्तदपि जायते । 'तत्तेजोऽसृजत' इति ह्याह ।

शब्दात्तैत्तिरीयश्रुतिजातीयश्रुत्यन्तरपरिग्रहः । 'अन्यतो' ब्रह्मणोऽन्यस्माद्वायोः । तेजस इति शेषः । 'ग्राह्या' ज्ञातव्या । ग्राह्येत्यनन्तरं किन्त्विति शेषः । एवमवधारणार्थकानुवृत्ततुशब्दसूचितं सयुक्तिकपूर्वपक्षं तन्निषेधरूपं साध्यं च प्रदर्श्य तत्र हेतुत्वेन किन्त्विति प्रश्नोत्तरभूतं तेजोऽत इत्यनेनोक्तं विधिरूपं साध्यान्तरं दर्शयति—अत एवेति । अन इत्यस्य व्याख्या परादिति । परादेवेति सम्बन्धः । यतो वियद्वायू जातावत एव पूर्वसूत्रे सच्छब्देन प्रकृतात्परमात्मन एवेत्यर्थः । 'तत्' तेजः । अपिशब्दो न केवलं वियदादिकं किन्तु तेजोऽपीति समुच्चयार्थः । अनुवृत्ततुशब्दव्याख्यानान्तरमेतत् । तत्त्वप्रदीपे तु अपिपदेन भूतवायुरपि परादेव जायत इति साधितमिति सूचयतीत्युक्तम् । न चोत्तराधिकरणटीकायामपिपदस्य भूतवाय्वाद्युपलक्षकत्वोक्तिविरोधः। लाघवात्तत्र सर्वोपलक्षणायामपि क्रमाभिप्रायेणात्र भूतवायोर्ग्रहणोपपत्तेः । जायत इति सूत्रे शेषोक्तिः । एवं प्रतिज्ञांशं व्याख्याय तथा ह्याहेति हेत्वंशं व्याख्याति—तदिति । इति श्रुतिरिति शेषः । इतीत्यनेन प्रकारार्थकतथाशब्दो व्याख्यातः । हिशब्दो यत इत्यर्थे । तच्छब्दोदितं ब्रह्म तेजोभूतं वायुद्वारा ऽसृजतेति छान्दोग्यश्रुत्यर्थः । यद्यपि ।

सोऽसृजत्प्रथमं देवीं तेजआख्यां श्रियं सतीम् ।
तते स्थितेन रूपेण साऽजैव हि यतस्ततः ।
तेज इत्युच्यते तस्मात् जनेर्वा तत एव तु ॥

इति छान्दोग्यभाष्ये तते व्याप्ते भगवति व्याप्यप्रकृतौ वा स्थितेन रूपेण न जायत इति वा तते भगवति निमित्ते सत्येव तस्माद्रूपविशेषेण जनेर्वा तेजश्शब्दः श्रीदेवीपर इत्युक्तेः । तथा प्राथम्याच्च तेजआद्या लक्ष्म्यादय इति सिद्धमिति, तद्भाष्यस्थवाक्यान्तरेण चास्य विरोधः प्रतीयते । तथापि श्रुतिसूत्रयोस्तेजश्शब्देन तेजोदेवताया रमायास्तदभिमन्यमाननेजोभूतस्य च विवक्षितत्वान्न विरोधः । न च 'वायोरग्निः' इति श्रुतिविरोधपरिहारायात्र तेजसो वायुद्वारा ब्रह्मजातत्वस्याभिप्रेतत्वेन तेजश्शब्देन लक्ष्म्या अपि ग्रहणे कथं तस्याः वायुद्वारा ब्रह्मजातत्वमिति वाच्यम् । ब्रह्मजातत्व-

(२) कारणत्वेनेत्युक्तेऽप्यमुख्यतयाऽन्येषामपि शब्दोक्तत्वात्पुनरुक्ति-रुभयकारणत्वनिवृत्त्यर्थम् ॥ १० ॥

॥ तेजोऽधिकरणम् ॥ ४ ॥

॥ ५. अवधिकरणम् ॥

(१) सू—ॐ ॥ आपः ॥ ॐ ॥ ११ ॥

स्योभयसाधारण्येनोक्तावपि वायुजातत्वस्य भूतविवक्षयैवोक्तत्वात्। न च भूतविवक्षायां तेजःप्राथम्यायोग इति वाच्यम्। आकाशवाय्वोरप्रत्यक्षत्वेन प्रत्यक्षभूतेषु तेजसः प्राथम्येन तदुपपत्तेः। सृष्टिभेदेन वाक्यद्वयाविरोध इत्यपि केचित्।

(२) ननु 'कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः' इत्यधिकरणे वाय्वादिशब्दानां ब्रह्मणि समन्वयस्योक्तत्वेन तेजसो ब्रह्मजातत्वस्य सिद्धत्वात्किं पुनरुक्तयेत्यत आह—कारणत्वेनेति ॥ इतीत्यनन्तरं अत्रैवेति शेषः। 'उक्तेऽपि' उक्तत्वेऽपि ब्रह्मणः कारणत्वस्येति शेषः। अपिः शङ्कापरिहारसमुच्चयार्थः। निवृत्त्यर्थमित्यनन्तरं यत इति शेषः। तथा च यद्यपि 'कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः' इत्यत्रैव इत्यधिकरण एव ब्रह्मणस्तेजः कारणत्वमुक्तम्। तथापि तत्र तस्योक्तत्वेऽपि सिद्धत्वेऽपि पुनरत्रोक्तिर्युक्ता। न च वैयर्थ्यम्, यतस्सा 'उभयकारणत्वनिवृत्त्यर्थं भवति' उभयोर्ब्रह्मवाय्वोः साम्येन स्वतन्त्रकारणत्वशङ्कानिवृत्त्यर्थं भवतीति योजना। न चैतच्चोद्यपरिहारः तत्रैव कुतो न भवेदित्यत आह—अमुख्यतयेति। परममुख्यवृत्तिभिन्नमुख्यवृत्त्येत्यर्थः। 'अन्येषां' ब्रह्मणोऽन्येषां वाय्वादीनाम्। न केवलं ब्रह्मण इत्यपिशब्दार्थः। 'शब्दोक्तत्वात्' वाय्वादिशब्दवाच्यत्वस्याङ्गीकृतत्वादित्यर्थः। नोभयकारणत्वनिवृत्तिस्तत्र भवतीति वाक्यशेषः। अविरोधादिति भावः।

॥ इति तेजोऽधिकरणम् ॥ ४ ॥

॥ ५. अवधिकरणम् ॥

(१) अत्राधिकरणे अब्जन्मविषयश्रुतिविरोधः परिह्रियते। 'अग्नेरापः' इतिश्रुतेः अग्नेरापोऽजायन्त इति पूर्वपक्षे सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे—आप इति ॥ श्रुतेरित्यनेन सूत्रे 'तथा ह्याह' इत्यस्यानुवृत्तिस्सूचिता। ब्रह्मण

'ब्रह्मैवेदमग्र आसीत्तदपोऽसृजत तदिदं सर्वम्' इति श्रुतेः 'अग्नेरापः' (तै. २-१.) इत्युक्तेऽपि ब्रह्मण एवाद्यादिसृष्टिः ।

(२) एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥
(मु. २-१-३.) इत्यादि च ।

इत्यनेन अत इत्यस्य एवेत्यनेन तुशब्दस्यैवार्थस्य अनुवृत्तिस्सूचिता । श्रुतेर्ब्रह्मण इति पञ्चम्यौ । 'अग्नेरापः' इत्युक्तेऽपीत्यनेन एवकारव्यावर्त्यः सयुक्तिकपूर्वपक्षोऽपि दर्शितः । अपिः शङ्कापरिहारसमुच्चयार्थः । न त्वन्यतोऽग्नेरित्येवकारार्थः । अद्यादीत्यादिपदं तु भूतवायुपृथिव्यौषध्यादीनां उपलक्षणमप्यदमिति सूचनार्थम् । तेषामपि 'आकाशाद्वायुः' (तै. २-१-१.) इति सयुक्तिकश्रुतिरूपपूर्वपक्षन्यायप्राप्तत्वात् । 'इदं सर्वमसृजत' (बृ. ३-२-५.) इति सिद्धान्तश्रुतिरूपन्यायप्राप्तत्वाच्च । अत एव 'इदं सर्वम्' इति श्रुत्यंशोदाहरणम् । सृष्टिरित्यनेन सूत्रे जायन्त इति शेषो दर्शितः । सृष्टिरपीत्यपिशब्दान्वयेन अनुवृत्ततुशब्दः आपोऽपीत्यर्थतयाऽपि व्याख्यातः । तथा च यद्यपि 'अग्नेरापः' इत्युक्तं घर्मात्स्वेदादिकं च दृष्टम् । तथापि 'अग्नेराप इत्युक्तेऽपि' तथा श्रुतावपि घर्मात्स्वेदादिदर्शनेऽपि नाग्न्यादेरद्यादिसृष्टिः मन्तव्या, किंतु ब्रह्मण एवाद्यादिसृष्टिर्भवति । कुतो ? 'ब्रह्मैवेदम्' (तै. २-१) इति श्रुतेरिति योजना । 'इदम्' अस्य 'अग्रे' प्रलये ब्रह्मैवासीत् । तद्ब्रह्मापोऽसृजत । 'इदं सर्वं' भूतवाय्वादिकं तद्ब्रह्म ततो जातमेवेति श्रुत्यर्थः ।

(२) 'तदपोऽसृजत' (छां. ६-२-३.) इति श्रुतेरम्मात्रस्य ब्रह्मजातत्वेऽपि वाय्वादेः सर्वस्य ब्रह्मजातत्वं कुतः ? इदं सर्वमित्यस्य च सामान्यरूपत्वादित्यतः श्रुत्यन्तरमाह—एतस्मादिति ॥ 'एतस्मात्' परब्रह्मणो मुख्यप्राणो मुख्यवायुर्जायते । 'मनस्सर्वेन्द्रियाणि च' जडचेतनोभयरूपाणि जायन्ते । एवं 'खं' आकाशं भूतवायुः तेज आपः 'विश्वस्य धारिणी' पृथिवी च जायत इत्यर्थः । पृथिवीनिष्ठं विश्वधारकत्वमपीश्वराज्जातमिति दर्शयितुं विश्वस्य धारिणीत्युक्तम् । इत्यादिचेत्यस्य ब्रह्मणोऽद्यादिसृष्टि-

(३) कर्ता सर्वस्य वै विष्णुः एक एव न संशयः ।
इतरेषां तु सत्ताद्या यत एव तदाज्ञया ॥ इति भविष्यत्पुराणे ।

(४) वामने च—

तत्र तत्र स्थितो विष्णुः तत्तच्छक्तीः प्रबोधयन् ।
एक एव महाशक्तिः कुरुते सर्वमञ्जसा ॥ इति ॥

रित्याहेति पूर्वेणान्वयः । चः पूर्वश्रुतिसमुच्चये । यद्यपीयं श्रुतिः पूर्वाधिकरण एवोदाहर्तव्या तेजसो ब्रह्मजातत्वस्याप्यत्रैवोक्तेः । तथाऽप्यधिकरणद्वयोक्तार्थसाधकत्वेन तदन्त एवोपन्यासो युक्तः । अत एव भाष्यकृता तेजःपदस्याप्यप्पदवदन्योपलक्षकत्वसम्भवेऽपि पूर्वत्र तेजआद्यपीत्यनुक्त्वाऽत्रैवावादीत्युक्तम् ।

(३) ननूदाहृतश्रुतिविरोधादितरमात्रजनकत्वानुपपत्तावपि 'वायोरग्निः, अग्नेरापः' इति सयुक्तिकश्रुतिबलाद्विष्णोरितरेषामपि जनकत्वं किं न स्यादित्यतः शक्त्यभावादित्याह—कर्तेति ॥ विष्णुरेव सर्वस्य जगतो मुख्यः 'कर्ता' कारणं वै । कुतो ? यतः 'इतरेषां' वाय्वादीनां 'सत्ताद्याः' सत्ताप्रतीतिशक्तयः 'तदाज्ञया' तस्य विष्णोः आज्ञामात्रेणैव भवन्त्यत इत्यर्थः । तुशब्दो विशेषार्थः । यद्यपीयं स्मृतिरपि पूर्वत्रैवोपन्यसनीया, अतिव्याप्तिनिरासस्य तत्रापि साम्यात् । तथाऽप्यौचित्यादधिकरणद्वयान्त एवोपन्यस्ता । पुराणे इत्यस्य ब्रह्मण एव अवादिसृष्टिरित्युक्तमिति सावधारणवाक्येनान्वयः ।

(४) तर्हि विमताः आपस्तेजसो जायन्ते अप्त्वात्, स्वेदादिवदिति युक्त्युपेता 'अग्नेरापः' इति श्रुतिः कथमुपपद्यत इत्यतो विशेषप्रमाणमाह—वामनेचेति ॥ यद्यपि विष्णुः 'एकः' अन्यानपेक्ष एवावादिजनने 'महाशक्तिः' पूर्णसामर्थ्योपेतः । तथापि लीलयैव 'तत्रतत्र' अग्न्यादिषु 'स्थितः सन्' स्थित्वा 'तत्तच्छक्तीः' अग्न्यादिसामर्थ्यानि प्रबोधयन् तद्द्वारा 'सर्वं' अवादिकं 'अञ्जसा' सम्यक् 'कुरुते' जनयतीत्यर्थः । अञ्जसेत्यनेन उत्पादनप्रकाराभिज्ञत्वं सूचितम् । तथाचाग्न्यादिगतेश्वरविषयं श्रुत्यादिकमिति न तदनुपपत्तिरिति भावः । इति च वामन इत्यन्वयः । 'अग्नेरापः' इत्यादिश्रुतिगतिरुक्तेति शेषः ।

(५) धर्मात्स्वेदादिदृष्टेः पुनः प्रतिषेधः ॥ ११ ॥

॥ इति अवधिकरणम् ॥ ५ ॥

॥ ६. पृथिव्यधिकरणम् ॥

(१) 'ता आप ऐक्षन्त बह्व्यस्याम प्रजायेमहीति। ता अन्नमसृजन्त' (छा. ६-२.) इत्यद्भ्योऽन्नसृष्टिः श्रूयते। 'अद्भ्यः पृथिवी'

---

(५) ननु कारणत्वेनेत्यत्रैवापां ब्रह्मणो जन्मनः सिद्धत्वात् व्यर्थमेतदधिकरणम्। न चाग्निब्रह्मणोरुभयोः स्वतन्त्रकारणत्वनिवृत्त्यर्थमेतदिति वाच्यम्। तस्यापि पूर्वाधिकरण एव निरस्तत्वादित्यत आह—धर्मादिति॥ ऊष्मभयशोकादित्यर्थः। स्वेदादीति। स्वेदवाष्पादिदर्शनादित्यर्थः। 'प्रतिषेधः' अग्नेरापः प्रति स्वतन्त्रकारणत्वस्याऽत्र क्रियत इति शेषः। तथा चापां ब्रह्मजन्यत्वसमर्थनार्थं चोभयकारणतानिरासार्थं वा नेदमधिकरणं, येन वैयर्थ्यं स्यात्, किंतु भवतु वायोरग्न्युत्पत्तौ तद्द्वारत्वप्रतिपादकता 'वायोरग्निः' इति श्रुतेः, अत्र पुनरग्नेरप्कारणत्वमेव 'अग्नेरापः' इति श्रुत्या प्रतिपाद्यते, न तु द्वारकारणत्वम्, कुतः? प्रत्यक्षानुकूल्यादित्यभ्यधिकाऽऽशङ्का प्राप्तब्रह्मेतरमात्रजन्यतानिरासार्थं, अतः सार्थकमेतदिति भावः।

॥ इति अवधिकरणम् ॥ ५ ॥

॥ ६. पृथिव्यधिकरणम् ॥

(१) एवं सर्वस्य जगतः साक्षादन्यद्वारा वा ब्रह्मजातत्वे सिद्धेऽत्रान्यद्वारा जगत्कारणे समन्वयसिद्ध्यर्थमपां ब्रह्मद्वारत्वे श्रुतिविरोधः परिह्रियते। अत्रापः किमन्नस्य द्वारकारणमुत पृथिव्या इति सन्देहस्य बीजभूतं श्रुतिविरोधं दर्शयन् पूर्वपक्षयति—ता इति॥ प्रथम इतिशब्दः श्रुत्यन्तर्गतः। द्वितीयो भाष्यकारीयः। 'इति श्रूयते' इति छान्दोग्यश्रुत्योच्यत इत्यर्थः। यद्यपि 'ता अन्नमसृजन्त' इत्येतदेवोपयुक्तम्। तथाऽप्यस्य किञ्चिद्व्यवहितत्वात् तच्छब्दपरामर्शनीयप्रदर्शनाय तत्पूर्ववाक्यमप्युदाहृतम्। पूर्वपक्षेऽवन्नशब्दौ प्रसिद्धावन्नपरौ। सिद्धान्ते श्रुत्यर्थस्तु—'ताः' तेजोऽभिमानिरमाजन्योऽब्भूताभिमानी मुख्यप्राणः 'ऐक्षन्त' व्यचिन्तयत्। किमिति? तेजोवद्वयमपि 'बह्व्यो' बहुरूपवत्यः 'स्याम' भवेम तदर्थं 'प्रजायेमहि'

(तै. २-१.) इति कुत्रचित्पृथिवीसृष्टिः। अतो विरुद्धत्वादप्रामाण्यमिति।

(२) अतो वक्ति—

सू—ॐ॥ पृथिव्यधिकाररूपशब्दान्तरादिभ्यः॥ ॐ॥ १२॥

पृथिवी तत्रान्नशब्देनोच्यते भूताधिकारत्वात्।

(३) काष्ण्र्यप्रचुरा च पृथिवी नान्नस्य तथा विशेषः।

सृज्यं जगत्प्रजनयाम इति। शब्दस्वाभाव्याद्बहुवचनम्। इत्थं विचिन्त्य 'ता' आपो मुख्यप्राणः 'अन्नमसृजन्त' अन्ननामकरुद्रसहितं तदभिमन्यमानपृथिव्याख्यं भूतमसृजतेति। अद्भ्यः पृथिवीति 'कुत्र चित्' तैत्तिरीयेऽद्भ्यः पृथिवीसृष्टिः श्रूयते इत्यर्थः। अत इति। यत एवं द्विधा श्रूयते, अतः संशयः, उभयोरप्रामाण्यं च भवेत्, कुतः? श्रुतिद्वयस्य 'विरुद्धत्वात्' विरुद्धार्थबोधकत्वादिति योजना।

(२) एवं पूर्वपक्षेऽथ सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति॥ 'वक्ति' परिहारम्। सूत्रे न श्रुतिद्वयस्यानिर्णयमूलकाप्रामाण्यं कल्प्यम्, अपां पृथिवीकारणत्वस्यैव निर्णयात् इति प्रतिज्ञाहेतूपस्कारमभिप्रेत्य न च श्रुतिद्वयविरोध इत्याशङ्कायां तत्रोत्तरत्वेन पृथिवीत्यंशं व्याचष्टे—पृथिवीति। सूत्रे तत्र तेनोच्यते इति पदत्रयशेषमभिप्रेत्य तत्र 'ता अन्नम्' इति वाक्ये तेनान्नशब्देन पृथिव्युच्यत इत्याह। यत इति शेषः। कुतोऽसावन्नशब्दः पृथिवीपर इत्यतस्तत्र हेतुत्वेनोक्तमधिकारेत्यंशं सविभक्तिकं विच्छिद्याधिकारप्रतियोगिप्रदर्शनेन व्याचष्टे—भूतेति। 'तत्तेजोऽसृजत... तदपोऽसृजत....तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' इत्यादिवाक्यादस्य प्रकरणस्य भूतविषयत्वावगमादित्यर्थः। विषयविषयितावोधनाय त्वप्रत्ययः।

(३) नन्वन्नश्रुतौ जाग्रत्यां कथं प्रकरणमात्रेण निर्णय इत्यतः तदुत्तरत्वेन रूपेत्यंशं व्याचष्टे—काष्ण्र्येति॥ पृथिवी 'काष्ण्र्येन' कृष्णरूपेण 'प्रचुरा' बाहुल्येन कृष्णवर्णोपेतेत्यर्थः। काष्ण्र्यं चान्ने 'यत्कृष्णं तदन्नस्य' इति सिद्धम्। यत इति वाक्यशेषः। तथा च प्रकरणलिङ्गाभ्यामन्नश्रुति-

(४) 'आपश्च पृथिवी चान्नम्' (ऐ.आ. २-३-१.) 'पृथिवी वा अन्नम्' (तै. ३-९.) 'ता आपोऽन्नमसृजन्त पृथिवी वा अन्नम्' इत्यादि-शब्दान्तराच्च ।

(५) आदिशब्दाद्युक्तिः अपौरुषेयत्वेनादोषस्य वाक्यस्य नाप्रामाण्य-मित्यादि ।

बाध इति भावः। पृथिव्यां रूपान्तरस्य सद्भावात्कथं काण्व्यं लिङ्गमित्या-शङ्कापरिहाराय प्रचुरेत्युक्तम्। अनेन स्वतः काण्व्यं लिङ्गमित्यभिप्रैति। चशब्दो लिङ्गसमुच्चये। नन्वन्नेऽपि सम्भवतः काण्व्यस्य कथं पृथिवी-लिङ्गत्वमित्यत आह—नेति। अन्नस्य 'तथा' पृथिवीवत् 'विशेषः' काण्व्यप्राचुर्यरूपो धर्मो नेत्यर्थः। तथा च लिङ्गं निरवकाशमिति भावः॥

(४) न केवलं प्रकरणलिङ्गाभ्यामवाचकेनैवान्नशब्देन पृथिवी बोध्यते, किंतु श्रौतप्रयोगबलात्, तत्रापि तस्य वाचकत्वशक्तिरस्तीत्यतोऽपीत्या-शयेन शब्दान्तरेत्यंशं व्याचष्टे—आपश्चेति॥ 'आपश्च पृथिवी चान्नम्' इत्यैतरेयश्रुतिः। अत्रेत्युच्यत इति शेषः। परस्परसमुच्चये चशब्दौ। यद्यप्यैतरेयभाष्ये पृथिव्यच्छब्दौ नारायणानिरुद्धपरतया व्याख्यातौ। तथापि अन्यत्रापि शक्तिसत्त्वात् नासङ्गतिः। पृथिवी वा अन्नम्' इति तैत्तिरीयश्रुतिः। वैशब्दः प्रसिद्धौ। 'ता आपः' इत्यपरा श्रुतिः स्वयमेव स्वस्थितान्नशब्दं व्याख्याति—पृथिवीति। आदिशब्देनैवंजातीयका श्रुति-र्गृह्यते। 'शब्दान्तरात्' अन्नमित्यादिश्रुत्यपेक्षया अन्यस्माच्छ्रुतिवाक्या-दित्यर्थः। शाखान्तरस्थत्वसूचनायान्तरेत्युक्तिः। यद्वा—शक्तिग्राहक-शब्दविशेषादित्यर्थः। चो हेतुसमुच्चये। अस्य पृथिवी तत्रान्नशब्दे-नोच्यत इति पूर्ववाक्येनान्वयः।

(५) किमन्नश्रुतेरर्थान्तरकल्पनया, परस्परविरोधात् श्रुतिद्वया-प्रामाण्यमेव किं नाभ्युपेयते इत्यत आह—आदिशब्दादिति॥ सूचितेति शेषः। तामेव युक्तिं साध्यसाधनोक्त्या दर्शयति—अपौरुषेयत्वेनेति। वेदस्येति शेषः। तथा चापौरुषेयत्वेन लिङ्गेनाशेषस्य निर्दोषत्वेन सिद्धस्य वेदस्य नाप्रामाण्यमित्यादियुक्तिरनुमानमादिशब्दात्सूचितमित्यर्थः। आदि-पदेन मन्वादिस्मृतिरूपाप्तवाक्यानुसारित्वादिति युक्तिर्गृह्यते। अनेन

(६) कौर्मे च—

विरोधो वाक्ययोर्यत्र नाप्रामाण्यं तदेष्यते ।
यथा विरुद्धता न स्यात्तथार्थः कल्प्य एतयोः ॥ इति ॥

(७) रक्तोऽग्निरुदकं शुक्लं कृष्णैव पृथिवी स्वतः ।
नाभिपद्माभिसम्बन्धात्पीता सेत्यभिधीयते ॥

वेदो नाप्रमाणमप्रामाण्यकारणदोषशून्यत्वात्प्रत्यक्षवत्। न च हेतोरसिद्धिः। वेदोऽशेषदोषशून्यः, अपौरुषेयत्वात्, स्मृत्यनुसारित्वाच्च नाप्रमाणमित्यनुमानमुपन्यस्तं भवति। एवं च युक्तिबलाद्वेदप्रामाण्यसिद्धौ तत्र विरोधावभासेऽन्यार्थतैव कल्प्या, नाप्रामाण्यमिति भावः।

(६) विरोधप्रतीतावन्यार्थतैव कल्प्या, नाप्रामाण्यमित्युक्तार्थं एव स्मृतिमाह—कौर्मे चेति ॥ न केवलमस्माभिः, किंतु कौर्मे चोक्तमिति चशब्दार्थः। किमुक्तमित्यतस्तत्पठति—विरोध इति। आपाततो विरोध इत्यर्थः। 'यत्र' विषये 'तदा' तत्र 'नेष्यते' नाङ्गीक्रियत इत्यर्थः। किं तर्हीत्यत आह—यथेति। 'एतयोः' विरुद्धत्वेन प्रतीतवाक्ययोरन्योन्यं मानान्तरेण च 'विरुद्धता' विरोधो यथा न स्यात्तथा अर्थः प्रातीतिकादन्योऽर्थः कल्पनीय इति योजना। इति कौर्मे इतीतिशब्दान्वयः।

(७) यदुक्तं प्राचुर्येण कृष्णा पृथिवीति तत्र प्रमाणमाह—रक्तोऽग्निरिति ॥ 'अग्निः' तेजो 'रक्तो' रक्तस्वरूप इत्युक्तम्। उदकं स्वतः शुक्लम्। एवं पृथिवी 'स्वतो' निरुपाधिकतया कृष्णैव। स्वत इत्यस्य कृत्यं दर्शयति—नाभीति। विष्णोरिति शेषः। पद्मस्य लोकाधारत्वात्पीतरूपवत्त्वाच्चेति भावः। पद्मसम्बन्धादित्युक्त्या प्राक्सृष्टेतानामेव लोकानां पद्मदलैः संबन्धो, न तु पाद्मसृष्टौ प्राग्विलीनानां पद्मदलैः सृष्टिरिति ज्ञायते। 'सा' पृथिवी। तस्या एवौपाधिकं रूपान्तरमाह—क्षत्रेति। दुष्टक्षत्रियाणां रक्ताभिसम्बन्धात् सा रक्तेत्यभिधीयत इत्यर्थः। तस्या एवौपाधिकं रूपान्तरमाह—उदकबहुत्वत इति। उदकसम्बन्धबाहुल्यादित्यर्थः। 'एति' प्राप्नोति। सेत्यस्ति। एवमेवेति। पृथिव्यां वर्णान्तरस्य वर्णविशेषस्य 'एवमेव' वक्ष्यमाणरीत्या 'गतिः' स्थितिर्भवेदित्यर्थः। एवमेवेत्युक्तमेव दर्शयति—विष्णिवति। 'वीर्याभियोगात्' वीर्यसम्बन्धात्, वीर्यविकाराण्ड-

क्षत्ररक्ताभिसम्बन्धाद्रक्तोदकवहुत्वतः ।
शुक्लत्वमेत्येवमेव वर्णान्तरगतिर्भवेत् ॥
विष्णुवीर्याभियोगाच्च पीतत्वं भुव इष्यते ।
स्वर्णवीर्यो हि भगवाननादिः पुरुषोत्तमः ॥
इति व्योमसंहितायाम् ॥ १२ ॥

॥ इति पृथिव्यधिकरणम् ॥ ६ ॥

॥ ७. तदभिध्यानाधिकरणम् ॥

(१) 'प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकस्तेनान्नेनाप्यायस्व' (महाना. १६-२.) इत्यादिनाऽन्यः संहर्ता प्रतीयत इति ।

द्वारेति भावः। न केवलं पद्मसम्बन्धात्, किं तु वीर्यसम्बन्धाच्चेति निमित्तसमुच्चये चशब्दः। वीर्यसम्बन्धेऽपि कुतः पीतत्वं भुव इत्यत आह—स्वर्णेति । हिशब्दो भगवतः स्वर्णवीर्यत्वे 'तदण्डमभवद्धैमम्' शुष्मं हिरण्यात्मकम्' इत्यादिप्रमाणप्रसिद्धिद्योतकः। स्वर्णस्य पीतत्वमप्यनेनैव सिद्धम्। यत इत्यर्थे वा हिशब्दः। नन्वन्यत्रादृष्टं विष्णुवीर्यस्य सुवर्णत्वं कथं कल्प्यते, वीर्यसम्बन्धात्पूर्वं निमित्ताभावश्चेत्यत आह—अनादिः पुरुषोत्तम इति। तथाच विष्णोरनादित्वेन तद्वीर्यसम्बन्धस्यापि प्रवाहतोऽनादित्वान्न निमित्ताभावः । लौकिकक्षराक्षरपुरुषविलक्षणत्वान्न दृष्टविरोध इति भावः। परमेश्वर इति पाठे तु ऐश्वर्यमुक्तार्थघटकतया व्याख्येयमिति। व्योमसंहितायामित्यस्य कार्ष्ण्यप्रचुरेत्युक्तमित्यध्याहृतेनान्वयः। अनेन प्रचुरेत्युक्तिप्रयोजनमुक्तं भवति ॥ ६ ॥

॥ इति पृथिव्यधिकरणम् ॥

॥ ७. तदभिध्यानाधिकरणम् ॥

(१) अत्राधिकरणे ब्रह्मणः प्रकृताधिभूताधिदैवविषयसंहृतिकर्तृत्वे श्रुतिविरोधः परिह्रियते। पूर्वपक्षयति—प्राणानामिति ॥ तैत्तिरीयश्रुतिरियम्। आदिशब्दादेवंविधश्रुत्यन्तराणि पातृत्वादिति युक्तिश्च गृह्यते। व्याख्यातेयं श्रुतिर्द्युभ्वाधिकरणे। 'अन्यो' विष्णोः रुद्र एवेत्यर्थः ॥

(२) अतो ब्रूते—

सू—ॐ ॥ तदभिध्यानादेव तु
तल्लिङ्गात्सः ॥ ॐ ॥ १३ ॥

'तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः' (श्वे. १-१०.) इति बन्धलयस्य तदभिध्याननिमित्तत्वलिङ्गात्तत्कर्तृत्वं प्रतीयते, किमु सादेर्जगतः। इत्येतस्मादेव सर्वसंहारकर्ता विष्णुरिति प्रतीयते।

---

(२) सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ हर्तीत्यनन्तरं श्रुताविति शेषः। बन्धलयस्येत्यनेन तदित्यस्यावृत्तिर्दर्शिता। अनादेरित्यादौ ग्राह्यम्। अस्य तत्कर्तृत्वमित्यनेनान्वयः। अत्र तत्कर्तृकत्वं तदिच्छाधीनत्वं विवक्षितम्। ततः किमित्यतस्तल्लिङ्गादित्यस्य तच्च तत् लिङ्गं चेति विग्रहाश्रयेणार्थमाह—तदभिध्यानेति। बन्धलयस्येत्यत्राप्यन्वीयते। तथाच बन्धस्य संसारस्य लयस्य तस्मान्मोक्षस्येश्वरेच्छाधीनत्वरूपहेतोरित्यर्थः। श्रुतादित्यध्याहारे लिङ्गादित्यस्येति श्रुतालिङ्गात्तत्कर्तृत्वं प्रतीयत इत्यन्वयः। अत्र तत्कर्तृकत्वं तत्कृत्यधीनत्वं, प्रतीयत इत्यस्य चानुमीयत इत्यर्थः। बन्धलयस्येच्छाधीनत्वलिङ्गेन तत्प्रयत्नाधीनत्वानुमानोपपत्तेरिति भावः। ततः किमित्यतोऽनादिबन्धलयकर्तृत्वेनेश्वरस्य सादिजगत्संहृतिकर्तृत्वं सुतरां सिध्यतीत्यभिप्रेत्य तदेव विवरितुं सौत्रमेवशब्दं कैमुतिकन्यायपरतया व्याख्याति—किम्विति। लयस्य तत्कर्तृत्वमित्यनुषज्यते। सिध्यतीति शेषः। नन्वस्तु विष्णोरनादिभवभेत्तुर्विश्वसंहारकर्तृत्वं, तावता प्रयत्नाख्यतत्संहारफलोपधानं कुतः सिध्यतीत्यत आह—इत्येतस्मादिति। इत्येतद्रूपात् सादिजगत्संहर्तृत्वरूपाद्धेतोरेवेत्यर्थः। सूत्रे उद्देश्यसमर्पकपदाभावाद्योग्यतया लब्धं तद्दर्शयति—सर्वेति। विधेयसमर्पकस्य स इत्यस्यार्थो विष्णुरिति। निखिलनिगमतात्पर्यप्रसाधितजगत्कर्तृत्वादिना तस्यैव प्रस्तुतत्वादिति भावः। यद्वा—सइत्यस्यावृत्त्योद्देश्यविधेयपरत्वमित्याशयेन सर्वसंहारकर्ता विष्णुरिति चोक्तम्। विष्णुरिति सावधारणम्। अत एव सूत्रेऽवधारणार्थकस्तुशब्दः प्रायोजि। नन्वस्त्वीश्वरेच्छाधीनत्वमनादि-

(३) किमु 'यमप्येति भुवनं साम्पराये स नो हरिर्धुतमिहायुपेत्तु देवः।

बन्धलयस्येश्वरकर्तृकत्वे लिङ्गम्, अस्तु चानादिबन्धलयस्येश्वरकर्तृकत्वं सादिजगत्संहर्तृत्वे। तथापि सादिजगल्लयकर्तृत्वं तत्संहर्तृत्वे कथं लिङ्गमुभयोरभेदादिति चेन्न। संहारकर्तृत्वशक्तेर्हेतुत्वेन तत्कर्तृत्वफलोपधानस्य साध्यत्वेनाभ्युपगमेन अभेदाभावात्॥

(३) सौत्रमेवशब्दं कैमुत्यान्तरपरतया व्याख्याति—किम्विति॥ इदं चावर्तते। किम्वित्यादिश्रुतिभ्य इत्यन्वयः। तथाच यदा लिङ्गादेव सिद्ध्यति, तदा किमु श्रुत्या बलवत्या सिध्यतीति। यदैकयैव स्पष्टश्रुत्या विष्णुरेव संहारकर्तृत्वेन सिद्ध्यति, तदा किमु वक्तव्यं बहुश्रुतिभ्य इत्यर्थः। इत्येवशब्द इति। सूचयतीति शेषः। तथाच इत्येवमर्थं सौत्र एवशब्दो ज्ञापयतीत्यर्थः। अनेन सूत्रे तदभिध्यानादितिश्रुतियुक्तिसूचके व्यधिकरणे पञ्चम्याविति सूचितम्। तथा चायं सूत्रार्थः—'तदभिध्यानात्' 'तस्याभिध्यानात्' इति श्रुतौ तदभिध्यानहेतुकत्वश्रवणात्, 'तल्लिङ्गात्' तस्माल्लिङ्गात् सादिजगल्लयकर्तृत्वमीश्वरस्य सुतरां सिध्यति। ततश्च 'तल्लिङ्गात्' सादिजगत्संहृतिशक्तत्वरूपाल्लिङ्गात् स तु विष्णुरेव सर्वसंहारकर्ता सिद्धः। यदा सादिजगत्संहरणसामर्थ्यरूपलिङ्गादेवेश्वरः सर्वसंहर्तासिध्यति, तदा सुतरां 'यमप्येति' इति स्पष्टश्रुत्या यदैकयैव सिध्यति किमु तदा बहुश्रुतिभ्य इति। चन्द्रिकायां तु तुशब्दोऽभिध्यानगतस्य संज्ञिहीपर्यन्तरूपविशेषस्य द्योतकः। समानाधिकरणे पञ्चम्यौ। तथाच तस्याभिध्यानादिति श्रुत्युक्ताद्धेरनादिबन्धसञ्ज्ञिहीपर्यन्तात् 'तल्लिङ्गात्' सादिजगत्संहर्तृत्वलिङ्गात् योऽनादिस्पृष्टत्वेन प्रकृतो यश्च जनकत्वेन मारकतया शक्तितो यश्च 'ओं तत्सदिति निर्देशः' इति स्मृतिसिद्धः तच्छब्दवाच्यत्वेनोक्तः 'स नो हरिः' इति श्रुतौ च स इत्युक्तः, स एव हरिः संहर्तेति सूत्रयोजनां प्रदर्श्य टीकाऽप्येतत्परेत्युक्तम्। श्रुतौ भूयश्चेति चशब्दो व्याप्तायाम्। ज्ञातादिति शेषः। तथाच तस्मिन् भगवति तस्य मनसः संयोजनाद्भूयो भूयः 'तत्त्वभावात्' पुनः पुनस्तस्य भगवतो यथार्थध्यानाद्यथार्थज्ञानाच्च जातात् 'अभिध्यानाच्च' मध्यमप्रसादरूपाद्भगवदिच्छाविशेषात् 'अन्ते' परिपाककाले प्रारब्धकर्मावसाने सति 'तिश्चबन्धकमायानिवृत्तिर्भवतीत्यर्थः। अत एव तृतीयाध्याये अव्यक्ताधिकरणे

'य इदं सर्वं विलापयति स हरिः परः परमात्मा ( )

तस्याभिध्यानादिच्छया प्रसादेन संसारो निवर्तते इत्युच्यते । एतच्च मोक्षस्य प्रसादसाध्यत्वे लिङ्गं भगवत्प्रसादेन तद्दर्शनभावं च ज्ञापयति—दृष्ट्वैव तं मुच्यत इति । मोक्षस्य दर्शनसाध्यत्वश्रवणात्प्रसादाद्दर्शनं दर्शनान्मोक्ष इत्यवश्यमङ्गीकार्यत्वादिति टीकावचनमुक्तार्थानुकूलम् । परिपाक काल इत्येतदधिकरणीयटीकापदस्योपासनाजनितप्रसादाद्दर्शने जाते सति प्रारब्धकर्मावसाने सतीति चार्थः । यथोक्तं तत्त्वप्रदीपे—तस्य विष्णोरभिध्यानाद्विश्वमायानिवृत्तिः कुतः जाता । तस्मिन्नेव मनोयोजनाद्भयोभूयस्तत्त्वभावनया चान्तेऽपरोक्षज्ञाने जाते विश्वबन्धकमायानिवृत्तिद्वारको मोक्षो भवतीति । उक्तं च सुधायाम्—अस्यापरोक्षज्ञाने जाते अन्ते कर्मक्षयान्त इति । अत्र मायाशब्देन मायाऽविद्याप्रकृतिरित्यादिशब्दाभिधेयमनाद्येव किमपि द्रव्यमङ्गीकरणीयमिति सुधोक्तेः,

अजे द्वे प्रकृती दुष्टे नृषु प्रातिस्विकं स्थिते ।
स्वगुणाच्छादिका त्वेका परमाच्छादिका परा ॥
स्वगुणाच्छादिकां हत्वा परमाच्छादिकां परः ।
व्याघुट्य मोक्षपदवीं ददाति पुरुषोत्तमः ॥

इति स्मृतिसिद्धे द्विरूपे दुष्टप्रकृती गृह्येते । तयोर्दुष्टत्वं च स एवेश्वरः स्वप्रकाशमपि स्वरूपचैतन्यं स्वाधिष्ठानलब्धपरिणाममहदहङ्कारादिप्रकृत्यंशैः संयोज्याविद्यमानमेवास्य कर्तृत्वादि स्वातन्त्र्यादि प्रदर्श्य रागाद्युत्पादनद्वारा दुःखमनुभावयतीति सुधोक्तरीत्या जीवस्य दुष्टत्वसम्पादकत्वात्, 'अजामज्ञितदोषगृहीतगुणाम्' (भाग. १०-५४-१५.) इति वचनाच्च सिद्धम् । जडप्रकृतेर्बन्धकत्वं चित्प्रकृतिद्वारा, चित्प्रकृतेर्बन्धकत्वं तु 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' इति स्मृतिसिद्धम् । एषा तु अस्य मोहिका इति व्याख्यानात् अन्यप्रकृतिद्वयमप्यस्ति, तच्च 'अथान्ये प्रकृती दुष्टे' इत्यादिवचनात्सिद्धं, दुष्टत्वमपि अत एव तयोः सिद्ध्यति । अनादिप्रकृतेः कीदृशो विनाश इति चेत्सुधोक्तरीत्या स्वरूपप्रध्वंस एवेति गृहाण । न च दुष्टप्रकृत्योरुभयोः स्वरूपेण निवृत्त्यभ्युपगमे श्रुतिगीतातात्पर्योद्दाहृतश्रुतौ हन द्रावयेत्युक्तिविरोधः, स्मृतावपि व्याघुट्येत्युक्तिविरोधश्चेति वाच्यम् । व्याघुट्येत्यस्य निहत्येत्यर्थाभ्युपगमात् । प्रथमं द्रावय पश्चाद्धनेत्यर्थसम्भवाच्च । श्रुतौ

इत्यादिश्रुतिभ्य इत्येवशब्दः ।

विश्वशब्दः एकैकाशेषपरः न तु समस्ताशेषपरः । एकैकस्य प्रातिस्विकमायानिवृत्तावपि सर्वमायानिवृत्तेरभावात् । अत एव ऋग्भाष्ये प्रातिस्विकी प्रकृतिर्यत्तमश्च दोषाश्चान्ये पुंस्यतो युक्तमेतदित्युक्तम् । सुधायां च एकमुक्तौ न सर्वमुक्तिः, प्रतिजीवमविद्याभेदाङ्गीकारादित्युक्तम् । इदं त्ववधेयम्—जीवस्य न मायैवावरणं किन्त्वन्यान्यप्यावरणानि सन्ति । तानि चादौ देहः ततः प्रकृतिबन्धः ततः सत्त्वादिगुणबन्धः ततः कर्मादिबन्धः ततः लिङ्गदेहः ततः ईश्वरेच्छेत्येवंरूपाणि । न चात्र मूलाभावः । देहाद्बाह्यं विनाऽतीववाह्यत्वादिति गीताभाष्यस्य मूलत्वात् । इदं हि भाष्यं प्रमेयदीपे देहाद्बाह्यं विनाऽऽत्माभिमानस्थमध्यात्मम्, तत्र युक्तिः—अतीववाह्यत्वादत्यभिमानविषयत्वाभावादिति व्याख्यातम् । अत्र देहाद्बाह्यस्य गेहादेरध्यात्मत्वाभावे साध्ये जीवापेक्षयाऽतीववाह्यत्वादिति हेतुरुक्तः । अस्य हेतोर्व्यभिचारवारणायात्यभिमानविषयत्वाभावादिति व्याख्यातः । तथा च जीवापेक्षया देहस्यातीववाह्यत्वात् मध्ये बहून्यावरणानि सन्तीति सिद्धमिति । न चापरोक्षज्ञाने जाते सतीत्यर्थाभ्युपगमे तन्निर्धारणाधिकरणविरोधः, तत्र श्रवणादेरेवाज्ञाननिवर्तकत्वोक्तेः । अत्रापि पुनःपुनर्भगवति मनोयोजनतत्त्वभावजनिताभिध्यानस्य श्रवणादिजनितप्रसादरूपस्य मायानिवर्तकत्वोक्तश्चेति वाच्यम् । यतोऽज्ञानस्य श्रवणादिनिवर्त्यत्वेऽप्यपरोक्षज्ञाननिवर्त्यत्वमपि सम्भवति । श्रवणजनितापरोक्षज्ञानेन अज्ञानस्य शिथिलीभावरूपनिवृत्तिः अपरोक्षज्ञानेनात्यन्तिकी निवृत्तिरित्यभ्युपगमात् । एतत्सर्वं

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥

इति गीताभाष्यप्रमेयदीपिकयोः स्पष्टमुपवर्णितम् । तथा हि प्रमेयदीपवचनं—स्वरूपज्ञानमविद्ययाऽऽवृतं, वृत्तिज्ञानं त्वविद्यां शिथिलयति । ब्रह्म प्रकाशयतीति । अत्र वृत्तिज्ञानशब्दस्य गीताभाष्यरीत्या परोक्षमपरोक्षं चार्थः । न चैवं प्रमाणरूपत्वमपीदं मनोवृत्तिरूपतत्त्वज्ञानं अन्तरङ्गभूतेन विशुद्धस्वभावरूपज्ञानेनोपोद्बलितं सत् बहिरङ्गमनाद्यपि सवासनमेवाज्ञानं समूलघातं हन्तीति सुधाविरोधः । अत्र केवलवृत्तिज्ञानस्याज्ञाननिवर्तक-

(४) स्रष्टा पाता च संहर्ता स एको हरिरीश्वरः ।
स्रष्टृत्वादिकमन्येषां दारुयोषावदुच्यते ॥
एकदेशक्रिया चात्र न तु सर्वात्मनेरितम् ।
सृष्ट्यादिकं समस्तं तु विष्णोरेव पराद्भवेत् ॥
इति च स्कान्दे ॥

त्वोक्तेरज्ञाननिवर्तने स्वरूपज्ञानस्यापि वृत्तिज्ञानसहायत्वोक्तेश्चेति वाच्यम् । पूर्वं स्वरूपज्ञानस्यावृतत्वेनाकिञ्चित्करत्वेऽपि परोक्षवृत्तिज्ञानेनावरकाज्ञानस्य शिथिलीभावानन्तरमपरोक्षवृत्तिज्ञानोपोद्बलकत्वसम्भवात्केवलस्यापरोक्ष-वृत्तिज्ञानस्यात्यन्तिकाज्ञाननिवर्तकत्वाभावेऽपि स्वरूपज्ञानोपोद्बलितस्य स-मूलाज्ञानघातकत्वोपपत्तेश्च । यमप्येतीति श्रुतिरत्ताधिकरणे व्याख्याता । य इदमित्यन्यश्रुत्यर्थस्तु । यस्माद्यः 'इदं सर्वं' विश्वं 'विलापयति' नाशयति तस्मात्स भगवान् संहर्तृत्वाद्धरिरित्युच्यते । न च पितृत्वा-न्नाशकत्वायोगः । यतः स 'परो' ममत्वादिदोषराहित्याल्लोकपितृविलक्षणः । तत्कथं ? यतः स परमात्मा सर्वोत्कृष्टत्वेनोऽत इति ।

(४) विष्णोरेव संहर्तृत्वे 'रुद्रो माऽऽविशान्तकः' (महा. १६-२.) इत्युक्त श्रुतिविरोध इत्यत आह—स्रष्टेति ॥ यतो हरिः परमेश्वरो ईशेभ्यो ब्रह्मादिभ्यो वर उत्तमोऽत एक एव स्रष्टा 'पाता' रक्षिता संहर्ता च भवति । ततोऽन्येषां ब्रह्मादीनां स्रष्टृत्वादिकं 'दारुयोषावत्' दारुमय-स्त्रीप्रतिमावत् परतन्त्रमुच्यते पुराणादावित्यर्थः । तदपि न सामस्त्येने-त्याह—एकदेश इति । सृष्ट्यादिकमिति पूर्वत्रापि सम्बध्यते । चोऽव-धारणेऽप्यर्थे च । तथा चात्र परतन्त्रेऽप्यन्यनिष्ठस्रष्टृत्वादावेकदेशस्य क्रियैव जगदेकदेशविषयैव सृष्ट्यादिक्रिया निविष्टा, न तु 'सर्वात्मना' सर्वथा सर्वजगत्सम्बन्धिसृष्ट्यादिकमीरितं निविष्टमुक्तमित्यर्थः । यद्वा—परतन्त्रेऽपि ब्रह्मादिजीवे 'एकदेशक्रिया' जगदेकदेशस्यैव क्रिया सृष्ट्यादि-रूपा तत्कर्तृत्वमिति यावत् । 'न तु सर्वात्मना' सर्वथा सर्वजगत्सम्बन्धि-सृष्ट्यादिकं तत्कर्तृत्वमीरितं प्रमाणेषु । तर्हि समस्तं सृष्ट्यादिकं कस्मा-द्भवेदित्यत आह—सृष्ट्यादिकमिति । तुशब्दो विशेषार्थः । परादिति हेतुगर्भम् । तथा च 'समस्तं' सर्वजगत्सम्बन्धिसृष्ट्यादिकं 'परात्'

(५) निमित्तमात्रमीशस्य विश्वसर्गनिरोधयोः ।
हिरण्यगर्भश्शर्वश्च कालाख्यारूपिणस्तव ॥
इति च भागवते ।

(६) 'स ब्रह्मणा विसृजति स रुद्रेण विलापयति सोऽनुत्पत्तिरलय

स्वतन्त्राद्विष्णोरेव भवेत्, न त्वन्यस्मादित्यर्थः। तथा चान्तकन्वश्रुतिः पराधीनसंहारकर्तृत्वपरा परतन्त्रजगदेकदेशसंहृतिकर्तृत्वविषयतया भाक्ता चेति न तद्विरोध इति भावः। स्कान्द इत्यनन्तरमुक्तमिति शेषः।

(५) रुद्रस्य संहारे पारतन्त्र्यं च विष्णुकर्तृके तस्मिन् द्वारत्वमेवेति भावेनाह—निमित्तमिति ॥ दशमस्कन्धे उद्धववाक्यमेतत्। तवेति कृष्ण उच्यते। तस्य कालाख्यारूपिण इति हेतुगर्भं विशेषणम्। आख्या च रूपं च आख्यारूपे काल इत्याख्यारूपे यस्यासौ कालाख्यारूपी तस्येति विग्रहः। यस्येति बहुव्रीहिज्ञापकटीका तु इनेरर्थकथनपरा। रूपस्याकृतेः कालत्वं सर्वसंहर्तृत्वादिगुणसम्पन्नत्वं, कालशब्दो जगद्बन्धनच्छेदनज्ञानादिसर्वभगवद्धर्मवाचीति गीताभाष्योक्तेः। धर्मविशिष्टभगवद्वाचीति तदर्थः। यद्वा—'विष्णौ चाधीश्वरे चित्तं धारयन् कालविग्रहः' इति गीताभाष्योदाहृतस्मृतेः प्रमेयदीपे कालनामा विग्रहो यस्यासौ तथोक्त इति व्याख्यानादत्रापि सप्तम्यन्तरूपपदघटितबहुव्रीहिसमासविग्रहप्रदर्शकतया टीका व्याख्येया। न चैवं कालाख्यारूपिण इति न स्यादिति वाच्यम्। आरूपिणो व्याप्तरूपिण इति आङ् प्रश्लेषात्। अस्य काल इत्याख्यया युक्तं रूपमस्यास्तीति मध्यमपदलोपित्वाद्वा। तत्त्वप्रदीपे तु—कालाख्यैव काल इति नामैव रूपं ज्ञापकं वाचकत्वेन तद्वानिति व्याख्यातम्। तथा च कालाख्यारूपिण ईशस्य तव 'विश्वसर्गनिरोधयोः' जगत्सृष्टिसंहारयोः हिरण्यगर्भः शर्वश्च 'निमित्तमात्रं' द्वारमात्रं न तु स्वतन्त्रकारणमित्यर्थः। इति चेति चशब्दो न केवलं स्कान्दे, किंतु भागवते चेति समुच्चयार्थः। अत्रापि पूर्ववदेव शेषः।

(६) भागवतस्मृतेर्मूलभूतां श्रुतिं चाह—स इति॥ स विष्णुः ब्रह्मणा द्वारभूतेनेति शेषः। एवं रुद्रेणेत्यत्रापि। 'विसृजति' विविधं सृजति। 'विलापयति' विनाशयति। सृष्ट्यादौ विष्णोरेव मुख्यकारणत्वे हेतुमाह—

एक एव हरिः परः परानन्दः' इति च महोपनिषदि ॥ १३ ॥

॥ इति तदभिध्यानाधिकरणम् ॥ ७ ॥

॥ ८. विपर्ययाधिकरणम् ॥

(१) 'अत एव हीदं परात्क्रमादुत्पद्यते क्रमाद्विलीयते नासावुदेति नास्तमेति' इति भाल्लवेयश्रुतौ क्रमाल्लयः प्रतीयते ।
अक्षरात्परमादेव सर्वमुत्पद्यते क्रमात् ।
व्युत्क्रमाद्विलयश्चैव तस्मिन्नेव परात्मनि ॥
इति चतुर्वेदशिखायां व्युत्क्रमाल्लयः प्रतीयते ।

सोऽनुत्पत्तिरलयो यत इति । उत्पत्तिनाशशून्य इत्यर्थः । स एक एव हरिरित्यन्वयः । 'परः' उत्तमो विलक्षणो वा । अनेन ममत्वादिदोषराहित्येन लोकपितृवैलक्षण्याल्लोके पितुरन्यस्य मारकत्वेऽपि प्रकृते पितुरेव विष्णोर्मारकत्वोक्तौ न लोकविरोधः, तस्यादोषत्वादिति सूचितम् । 'परानन्दः' पूर्णानन्दः निर्दुःखत्वं चोक्तम् । महोपनिषदीत्यस्य ब्रह्मरुद्रयोर्द्वारत्वमेवोक्तमित्यध्याहारेणान्वयः ।

॥ इति तदभिध्यानाधिकरणम् ॥ ७ ॥

॥ ८. विपर्ययाधिकरणम् ॥

(१) अस्मिन्नधिकरणे अधिभूतादिसंहारक्रमविषयश्रुतिविरोधः परिह्रियते । अत्र प्रकृताधिभूतादीनि किमुत्पत्तिक्रमानुसारेण भगवता लीयन्ते व्युत्क्रमेण वेति सन्देहस्य बीजभूतं श्रुतिविज्ञानं दर्शयति—अत एवेति ॥ पूर्वप्रकृतादेव 'परात्' उत्तमात् 'इदं' जगत् 'क्रमात्' तत्त्वदेवतातारतम्यक्रमेणैवोत्पद्यते, क्रमेणैव लीयत इत्यर्थः । न जगदुत्परमात्माऽप्युत्पत्तिनाशवानित्याह—नेति । 'असौ' परमात्मा 'नोदेति' नोत्पद्यते 'अस्तं' नाशं 'नेति' न प्राप्नोतीत्यर्थः । श्रौतत्वव्यावृत्त्यर्थं परमादक्षराद्विष्णोरिति । न त्वन्यस्मादिति प्रथमैवकारस्य व्युत्क्रमादेवेति द्वितीयस्य न त्वन्यस्मिन्निति तृतीयस्य चार्थः । उत्पत्तिक्रमेणैव लीयन्ते 'अत एव' इति श्रुतेर्लोकानुकूल्याच्च ।

(२) अत आह—

सू—ॐ ॥ विपर्ययेण तु
क्रमोऽत उपपद्यते च ॥ ॐ ॥ १४ ॥

क्रमवचनमपि विपरीतक्रमापेक्षया ।

(३) कर्ता प्राणादिकस्यास्य हन्ता भूम्यादिकस्य च ।
यः क्रमाद्व्युत्क्रमाच्चैव स हरिः पर उच्यते ॥
इत्यत एव भाल्लवेयश्रुतिवचनात् ॥

(४) अनुरूपः क्रमः सृष्टौ प्रतिरूपो लये क्रमः ।
इति क्रमेण भगवान्सृष्टिसंहारकृद्विभुः ॥
इति च पाद्मे ॥

---

(२) इति प्राप्ते सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ क्रमवचनमपीत्यनेन सूत्रे आवृत्तः क्रमशब्दः क्रमवचनपरः । अप्यर्थस्तुरित्युक्तं भवति । अपिः बाधकत्वेन उपन्यस्तमपीति विशेषणसमुच्चयार्थः । आवृत्तस्य विपर्ययेणेत्यस्यार्थः विपरीतेति । प्रवृत्तं यत इति शेषः । अस्यातो लयक्रमः विपर्ययेण उत्पत्तिक्रमवैपरीत्येनैवेति सौत्रपदोक्तसाध्येनान्वयः ॥

(३) कुतः क्रमश्रुतेरर्थान्तरकल्पनमित्यतोऽपि प्रवृत्तं अत इति पदं तुशब्दार्थावधारणान्विततयाऽनूद्य व्याख्याति—कर्तेति ॥ कर्तेत्यतः प्राक् अतएवेत्युत्तरवचनात् कुत इत्युपस्कार्यम् । यस्यामेव श्रुतौ क्रमाल्लयः श्रूयते, तस्यामेव वचनात् न त्वन्यस्यामित्येवशब्दार्थः । यः 'प्राणादिकस्य' ब्रह्मादिकस्यास्य जगतः क्रमात्कर्ता यश्च 'भूम्यादिकस्यास्य' व्युत्क्रमाद्धन्ता स हरिरेव परो, न त्वन्य इत्यर्थः । अनेनोत्पत्तावुत्तमक्रमः, लये त्वधमक्रम इति सूचितम ॥

(४) ननु श्रुतित्वाविशेषात् व्युत्क्रमश्रुत्या क्रमश्रुतेः कुतो बाधः, विपरीतमेव किं न स्यादित्यतोऽतःशब्दसूचितां स्मृतिमाह - अनुरूप इति ॥ योजना तु—क्रमो द्विविधः अनुरूपः प्रतिरूपश्चेति । तत्र सृष्टौ यः क्रमः सोऽनुरूपः । उत्तमादितारतम्यानुसारित्वात् । यो लये क्रमः स

(५) पूर्वेषां पूर्वेषां सामर्थ्याधिक्यादुपपद्यते च ।

(६) वामने च—

पूर्वं पूर्वं यतो विष्णोः सन्निधानं क्रमाधिकम् ।

प्रतिरूपः उत्तमादितारतम्यप्रतिकूलत्वात् । एवमुभयविधक्रमेण 'विभुः' समर्थो भगवान् सृष्टिसंहारकर्तेति । पाद्म इत्यनन्तरं वचनादित्यनुषज्यते । अस्य सावकाशक्रमश्रुतेर्निरवकाशव्युत्क्रमपदघटितश्रुत्या बाधो युक्त इत्यध्याहृतसाध्यवाक्येनान्वयः ॥

(५) व्युत्क्रमाल्लयाङ्गीकारे लोकविरोधापातान्नासौ युक्तः, लोके प्रायेण पूर्वोत्पन्नानां पित्रादीनां प्रथमं लयदर्शनादित्यतः प्रवृत्तमतः शब्दावृत्त्या उपपद्यते चेत्यंशं व्याचष्टे—पूर्वोत्पन्नानामित्यर्थः । उपपद्यत इत्यतः प्राक् लये क्रमो विपर्ययेणेति सूत्रांश आवृत्त्या संयोज्यः । उपपद्यत इत्यस्य सामर्थ्याधिक्ययुक्त्या सिद्ध्यतीत्यर्थः । यद्वा-उपपद्यत इत्यस्य युज्यत इत्यर्थः । सामर्थ्याधिक्यं त्वतश्शब्दार्थः । न केवलं श्रूयते, किन्तु युज्यते चेति समुच्चये चशब्दः । तथा च लौकिकानां प्रायश्शतवर्षजीवित्वादिरूपस्य बलज्ञानादिरूपस्य वा सामर्थ्यस्य साम्यात् क्रमाल्लयेऽपि नासावलौकिकतत्त्वदेवताल्लये भवति, यतः पूर्वोत्पन्नानां सामर्थ्याधिक्यादुत्तरेषां तदभावात्, एवंच लौकिकविरोधस्यैव गुणत्वादिति भावः । पूर्वोत्पन्नेषु सर्वत्र उत्तरोत्पन्नापेक्षया सामर्थ्याधिक्यमस्तीति ज्ञापनाय द्विर्वचनम् । अनेन—यतः 'क्रमस्तु' क्रमवचनमपि 'विपर्ययेण' विपरीतक्रमापेक्षया प्रवृत्तमतो लये क्रमः 'विपर्ययेण तु' उत्पत्तिक्रमवैपरीत्येनैव । कुतोऽर्थान्तरकल्पनं क्रमश्रुतेः? अत एव व्युत्क्रमाल्लयश्चेति श्रुतेरेव । तथापि क्रमश्रुतेः कुतो बाधः श्रुतित्वाविशेषात् विपरीतं किं न स्यात् । अत एव सावकाशत्वादेव । न च लोकविरोधः । यत उपपद्यते चायं व्युत्क्रमो युज्यते च । कथम्? अतः सामर्थ्याधिक्यात् । न केवलं श्रुत्योच्यते व्युत्क्रमः किन्तु उपपद्यते चेति सूत्रार्थ उक्तो भवति ॥

(६) ननु पूर्वोत्पन्नानां सामर्थ्याधिक्यमेव कुतः? येन पश्चाल्लयः स्यादित्यत आह—वामने चेति ॥ सामर्थ्यं व्याप्तार्थः । तथा च यतः 'पूर्वं पूर्वं' आदिसृष्टौ पूर्वोत्पन्नेषु चतुर्मुखादितत्त्वदेवेषु विष्णोः 'सन्निधानं'

सामर्थ्याधिक्यमेतेषां पश्चादेव लयस्तथा ।
व्याप्तिश्चाभ्यधिका तेषामत एव न संशयः ॥ इति च ॥ १४ ॥

॥ इति विपर्ययाधिकरणम् ॥ ८ ॥

॥ ९. अन्तराधिकरणम् ॥

(१) सू—ॐ ॥ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ ॐ ॥१५॥

सन्निधिः 'क्रमाधिकं' तारतम्यक्रमेणाधिकं अत एव तेषां पूर्वोत्पन्नानां पश्चादुत्पन्नापेक्षया 'सामर्थ्याधिक्यम्' बलज्ञानशक्त्याधिक्यमेवास्ति । न केवलमेतावत्, किन्तु तेषां 'व्याप्तिः' अण्डाद्बहिः स्वस्वाभिमन्यमानपर्यन्तं देहतो व्याप्तिरपि तारतम्यक्रमेणाधिकैव, न न्यूना समा च । यत एवं अतस्तेषां पश्चादेव लयो न कदाचित्पूर्वे, नात्र संशय इत्यर्थः । तथाशब्द उपमायां समुच्चये वा । तेन पश्चादुत्पन्नेषु उक्तविपरीत्यं च सिध्यति । 'पूर्वादिभ्यो नवभ्यो वा' इति सर्वनामसंज्ञायां विकल्पानुशासनात् तदभावपक्षे पूर्वे इत्येतत्सप्तम्यन्तं, तद्भावपक्षे तु प्रथमाबहुवचनमिदम् । न च तथात्वे सन्निधानमित्यस्यानन्वयः सन्निधीयते विष्णुरत्रेति व्युत्पत्त्याऽस्य प्रतिमापरत्वात् । तथात्वे 'पूर्वे पूर्वे' पूर्वपूर्वमुत्पन्नास्तत्त्वदेवाः यतो विष्णोः 'क्रमाधिकं सन्निधानं' क्रमेणाधिकप्रतिमारूपा इति योजना । इति वामन इत्यन्वयः । वचनादित्यत्राप्यनुषज्यते । न सामर्थ्याधिक्यासिद्धिरित्यध्याहृतेनान्वयः ।

॥ इति विपर्ययाधिकरणम् ॥ ८ ॥

॥ ९. अन्तराधिकरणम् ॥

(१) अत्राधिकरणे पूर्वोक्तव्युत्क्रमेण लये विज्ञानादौ क्वचिदपवादशङ्का निराक्रियते । पूर्वपक्षस्य सूत्र एवोक्तत्वात् तत्पठित्वा पूर्वपक्षांशं तावद्व्याचष्टे—अन्तरेति ॥ तल्लिङ्गादित्येतच्छ्रुत्युक्तात्क्रमादुत्पत्तिक्रमाल्लयाख्यलिङ्गादित्यर्थः । यद्वा—इत्येतद्रूपाल्लिङ्गदर्शनादित्यर्थः । मनसः पूर्वोत्पन्नत्वे 'प्राणान्मनः' इति श्रुत्युदाहरणेन तस्य पूर्वमेव लये 'यच्छेत्' इति श्रुत्युदाहरणेन

'प्राणान्मनो मनसश्च विज्ञानम्' 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि' (कठ. ३-१३.) इति लिङ्गाद्विज्ञानमनसी अन्तरा विपरीतक्रम इति चेत्—

(२) न, विशेषप्रमाणाभावात् ॥ १५ ॥

चोभयोरसिद्धिः परिहृता। पूर्वपक्षे प्राणात् 'मनो' मनस्तत्त्वं जातं ततो विज्ञानतत्त्वं जातमित्यर्थः। सिद्धान्ते तु—मुख्यप्राणान्मनोरूपेन्द्रियं, तस्माद्वृत्तिरूपं विज्ञानं उत्पन्नमित्यर्थः। यच्छेदिति काठकवाक्ये पूर्वपक्षे मनश्शब्दस्तत्त्वपरः सिद्धान्तेऽर्थस्तु—'प्राज्ञो' ज्ञानी 'वाक्' वाक्तत्त्वं तदभिमानिनी उमा 'मनसी' मनस्तत्त्वे तदभिमानिनि रुद्रे 'यच्छेत्' उपरमेत्तद्वशत्वात्तत्र लीयत इति स्मरेदिति यावत्। 'तत्' मनः 'ज्ञान आत्मनि' विज्ञानतत्त्वाभिमानिन्यां वाण्यां लीयत इति ध्यायेदिति। प्रमेयदीपे तु—'यच्छेत्' नियच्छेदिति काठकभाष्यानुरोधात् 'वाक्' वाचं मनसि 'यच्छेत्' तन्नियतां ध्यायेत् वाग्देवतां मनोदेवताधीनतया चिन्तयेदिति विपरिणामाश्रयेण अध्याहारं लयपरत्वं च विना व्याख्यातम्। अत एव तत्त्वप्रदीपकारोऽपि वाचं मनसि यच्छेत् इत्येवाह। मनसीति दीर्घश्छान्दसः। वाङ्मनसी परस्परं 'यच्छेत्' एकैकत्रैकैकं यच्छेत् इति व्याख्यानं तूदाहृतग्रन्थविरुद्धम्। हेत्वंशं व्याख्याय पूर्वपक्षप्रतिज्ञांशं व्याचष्टे—विज्ञानमनसी इति। तत्त्वे इति शेषः। द्वितीयाद्विवचनमेतत्। 'अन्तरा' विना। विपरीतक्रम इत्यनेन क्रमेणेत्येतदुक्तार्थं, अन्येषां लय इत्यादौ ग्राह्यम्। तेन सूत्रे लय इति शेषो दर्शितः।

(२) सिद्धान्तांशं व्याचष्टे—नेति ॥ विज्ञानमनस्तत्त्वे विना विपरीतक्रमेण लय इत्युक्तं नेत्यर्थः। कुतो नेत्यतः प्रवृत्तं अविशेषादित्येतद्विशेषधर्मरहितत्वादित्यन्यथाप्रतीतिनिरासाय व्याचष्टे—विशेषेति। सङ्कोचकप्रमाणाभावादित्यर्थः। यद्वा-विज्ञानमनस्तत्त्वयोर्यथोत्पत्तिलय इति विशेषप्रमाणाभावादित्यर्थः। ननु सर्वेषामपि विपरीतक्रमेणैव लय इत्यत्रापि प्रमाणं नास्ति। तथा च साम्यमेवेत्यतोऽप्याह—विशेषेति। अभावादिति विच्छेदः। तथा च सर्वं वा एतत्क्रमादुत्पद्यते क्रमाद्विलीयत इति विशेषप्रमाणाभावादित्यर्थः। ननु सर्वेषामपि विपरीतक्रमेणैव लय इत्यत्रापि

(३) सू—ॐ ॥ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ॐ॥१६॥

'मनसश्च विज्ञानम्' इति व्यपदेशश्चराचरेष्वालोचनाद्विज्ञानं भवतीति भागापेक्षया स्यात् न विज्ञानतत्त्वापेक्षया ।

प्रमाणं नास्ति । तथा च साम्यमेवेत्यनोप्याह । विशेषेति । अभावादिति-च्छेदः । तथा सर्वेषा एतत्क्रमादुत्पद्यते क्रमाद्विलीयत इति विशेषप्रमाण-सद्भावादित्यर्थः । अनेन नाविशेषादित्येकपदं सूचितम । अथवा—अभावादित्येव छेदः । तथात्वे सर्वं वेत्यविशेषप्रमाणाभावादित्यर्थः ॥

(३) नन्वस्त्येवोक्तं लिङ्गदर्शनं केषांचित्क्रमाल्लयः, केषांचिद्वयत्क्रमादित्यत्र विशेषप्रमाणरूपमतः कथं विशेषप्रमाणाभाव इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—चराचरेति ॥ मनसश्च विज्ञानमिति व्यपदेश इत्यनेन तद्व्यपदेश इत्येतत् स चासौ व्यपदेशश्च तद्व्यपदेशो मनो विज्ञानमिति शब्द इति व्याख्यातम्। 'चराचरेषु' जङ्गमस्थावरेषु। विषयसप्तमीयम्। इदं चराचरेषु व्यपदेशश्चञ्चलान्तःकरणावबोधरूपचरतत्त्वरूपाचरविषयको व्यपदेश इति चराचरेष्वालोचनादिति चोभयान्वयि। पूर्वत्रान्वयेन चराचरव्यपाश्रयो व्यपदेश इत्येनद्व्याख्यातम्। चराचरेष्वालोचनाद्विज्ञानं भवतीत्यनेन च तद्भावभावित्वादित्यंशः तस्मिन् चराचरविषये तस्य मनसो भावेनालोचनेन तस्यावबोधस्य वृत्तिज्ञानस्य भावित्वात् उत्पद्यमानत्वादिति व्याख्यातः। यद्वा—चराचरेष्वालोचनादित्यनेन चन्द्रिकारीत्या चराचरव्यपाश्रयत्वस्य समासान्तर्गततद्भावं प्रत्यपि विशेषणत्वं ज्ञापितम्। 'इति' हेतोर्व्यपदेशो 'भागापेक्षया स्यात्' इन्द्रियावबोधाख्यभागविषय एव स्यादिति। अनेन 'भजनं भागसेवयोः' इति वचनात् भजधातोर्भावे क्तप्रत्यये निष्पन्नभक्तशब्दात् ष्ठिन प्रत्यये वा निष्पन्नाद्भक्तिशब्दाद्वा तस्येदमित्यणि कृते निष्पन्नो भाक्तशब्दो व्याख्यातः। 'न विज्ञान तत्त्वापेक्षया' न तत्त्वविषयोऽपीति। अनेन नुरवधारणार्थोऽप्यर्थश्चेत्युक्तं भवति। यत एवमतो न लिङ्गदर्शनविरोध इति वाक्यशेषः। अनेन—यद्यपि 'मनसश्च विज्ञानम्' इति व्यपदेशः 'चराचरव्यपाश्रयः' मनोरूपेन्द्रियतज्जन्यज्ञानमनस्तत्त्वविज्ञानतत्त्वाख्यराशिद्वयविषयस्तत्साधारणः।

(४) स्कान्दे च—परादव्यक्तमुत्पन्नमव्यक्तात्तु महांस्तथा ।
विज्ञानतत्त्वं महतः समुत्पन्नं चतुर्मुखात् ॥
विज्ञानतत्त्वात्तु मनो मनस्तत्त्वाच्च खादिकम् ।

तथापीह यतः स 'भाक्तस्तु स्यात्' अन्तःकरणवृत्तिज्ञानाख्यभागविषय एव स्यात्, न तु मनोविज्ञानाख्यतत्त्वविषयः, अतो न तद्विरोधः। न चेन्द्रियावबोधविषयत्वेऽप्यनुपपत्तिः। तत्त्वयोरिव तयोरपि कार्यकारणाभावायोगादिति वाच्यम्। 'तद्भावभावित्वात्' तेषु चराचरेषु तस्य मनसो भावेन। यद्वा—चराचरव्यपाश्रयेण तद्भावेनालोचनेन तस्य वृत्तिज्ञानस्य भावित्वादुत्पद्यमानत्वादिति सूत्रार्थ उक्तो भवति ॥

(४) ननु 'मनसश्च विज्ञानम्' इति व्यपदेशोऽस्तु भाक्तः, तथापि तत्त्वविषय एव किं न स्यादित्यत आह—स्कान्दे चेति ॥ चन्द्रिकारीत्या स्मृत्यर्थस्तु—'अव्यक्तं' श्रौतत्त्वाभिमन्यमानं अव्यक्ताख्यतत्त्वं 'परात्' सर्वोत्तमाद्धरेरुत्पन्नं, 'महान्' चतुर्मुखाभिमन्यमानं महत्तत्त्वं तु अव्यक्तादुत्पन्नम्। तथाशब्दः समुच्चये। 'महतः' चतुर्मुखात् महत्तत्त्वाभिमानिनश्चतुर्मुखात् वाण्यभिमन्यमानं विज्ञानतत्त्वं समुत्पन्नम्। विज्ञानतत्त्वाद्रुद्राभिमन्यमानं मनस्तत्त्वं समुत्पन्नमिति। अनेन वैकारिकाहङ्कारकार्यस्यापि मनसो विज्ञानतत्त्वकार्यत्वं चास्तीति ज्ञायते। 'खादिकम्' इन्द्रियाद्याकाशादि वा। सर्वसृष्टावयं क्रमः किमित्याशङ्क्य नेत्याह—एवमिति। या 'बाह्या' ब्रह्माण्डबहिर्जाता सृष्टिः सैव 'एवं' परादित्युक्तप्रकारेण भवति। 'परा' मुख्या तारतम्यज्ञापिका च। अथ यत्र क्वचित्तत्त्वानामेव अवरस्य पूर्वत्वमित्येवंरूपो विपरीतक्रमः श्रूयते, तत्र कथमित्यतस्तस्या विषयमाह—अन्तरिति। 'विपरीतक्रमः' परादित्युक्तापेक्षया विपरीतक्रमोत्पत्तिश्रुतिः 'प्राणान्मनो मनसश्च विज्ञानम्' इत्येवमादिरूपा अन्तः ब्रह्माण्डस्य देहस्य चान्तस्तत्त्वाभिव्यक्तौ ज्ञानिनां तदापरोक्ष्ये च क्रमापेक्षया न प्रवृत्तेत्यर्थः। यथोक्तं तत्त्वप्रदीपे—यस्मादवरेषां दर्शनान्ते हरेर्दर्शनं तस्मादुत्पत्तिक्रमवद्विपरीतो व्युत्क्रमो ज्ञेय इति। व्यक्तिपदं दर्शनस्याप्युपलक्षकम्। अत एव टीकायामन्तरभिव्यक्तौ ज्ञानिनां तत्त्वापरोक्ष्ये चेत्युक्तम्। आपरोक्ष्यस्य व्यक्तिसाध्यत्वात्। ब्रह्माण्डस्य देहस्यचान्तर्व्यक्तावापरोक्ष्ये च विपरीतक्रम

एवं बाह्या परा सृष्टिरन्तस्तद्व्यक्तयपेक्षया ॥
विपरीतक्रमो ज्ञेयो यस्मादन्ते हरेर्दृशिः ॥ इति ॥ १६ ॥

॥ इति अन्तराधिकरणम् ॥ ९ ॥

॥ १०. आत्माधिकरणम् ॥

(१) सू—ॐ ॥ नात्माऽश्रुतेर्नित्य-त्वाच्च ताभ्यः ॥ ॐ ॥ १७ ॥

इत्यत्र लिङ्गमाह—यस्मादिति। यस्माद्द्वारपालदर्शनानन्तरं राज्ञ इव अघमतत्त्वदेवतादर्शनान्तरं 'अन्ते' पश्चाद्धरेः 'दृशिः' दर्शनं भवति दर्शनसाधनीभूताघमतत्त्वदेवताव्यक्तिश्च भवति। तस्मादन्तस्तद्व्यक्तयपेक्षया विपरीतक्रम इत्युक्तं युक्तमित्यर्थः। चन्द्रिकायां तु स्मृतिक्रमापेक्षया विपरीतक्रमश्रुतिः ब्रह्माण्डान्तःसृष्ट्यभिप्राया। तत्त्वदेवानां देहोत्पत्तिलक्षणानुसृष्ट्यभिप्राया। यद्वा—विपरीतक्रमश्रुतिः ज्ञानिनां स्वदेहे ज्ञानिकर्तृकतत्त्वाभिमानिदेवतापरोक्ष्यक्रमाभिप्रायेत्युक्तम्। तत्पक्षे व्यक्तिशब्दो दृष्टिपरः। ब्रह्माण्डस्यान्तर्देहस्यान्तर्दृष्टिरिति व्यवस्थयाऽन्वयः। न तूभयोरुभयत्रान्वयः। टीकायामभिव्यक्ताविति अनन्तरं आपरोक्ष्ये चेति शेषः। इति स्कान्द इत्यन्वयः। उक्तत्वादिति शेषः। अस्मातो मनसश्च विज्ञानमिति व्यपदेशः, न तत्त्वापेक्षयेति पूर्वेणान्वयः। न केवलं सूत्र इति चशब्दार्थः।

॥ इति अन्तराधिकरणम् ॥ ९ ॥

॥ १०. आत्माधिकरणम् ॥

(१) अत्राधिकरणे परमात्मनिलयविषयश्रुतिविरोधपरिहारः क्रियते। तत्र सूत्रमुपन्यस्य पूर्वपक्षं सूचयन् व्याचष्टे – नेति ॥ श्रुतेरित्यनेन सूत्रे श्रुतेरित्यपिपदच्छेदः सूचितः। परमात्माऽपि लीयत इति नेत्यर्थः। न केवलं पृथिव्यादिरित्यपिशब्दार्थः। अनेन आत्मा चेत्यन्वितश्चशब्दोऽप्यर्थतयाऽपि व्याख्यातः। तथा 'तमसि निलीनः' इति श्रुते चेतनत्वयुक्तेश्च परमात्माऽपि लीयत इति सयुक्तिकपूर्वपक्षश्च सूचितः। सृष्ट्याद्यष्टक-

'स इदं सर्वं विलाप्यान्तस्तमसि निलीनस्तद्विलाप्य व्युत्तिष्ठते स इदं सर्वं विसृजति विलापयति विस्थापयति प्रस्थापयत्याच्छादयति प्रकाशयति विमोचयत्येक एव' ( ) इति श्रुतेः परमात्मापि न लीयते अश्रुतत्वाद्ब्रह्मलयस्य ।

(२) निलीनशब्देनापिहितत्वमुच्यते । तुच्छ्येनाभ्वपिहितं यदासीत्, (ऋ. १०-१२९-३.) इति श्रुतेः ।

कर्तृत्वरूपब्रह्मलिङ्गप्रतिपादकं 'स इदम्' इत्यादिवाक्यशेषोदाहरणं तु निलीनश्रुतेरीश्वरैकविषयत्वेन निरवकाशत्वोपपादनाय । 'सः' एक एव परमात्मा 'इदं सर्वं' जगद्विलाप्य चित्प्रकृतिरूपोदकात्मकेन तमसाऽऽच्छाद्य संहृत्य स्वयं तमस्यन्तर्निलीनः प्रकृतावाच्छन्नोऽथ तत्प्रकृतिरूपं तमो विलाप्याऽच्छाद्य स्वयं 'व्युत्तिष्ठते' प्रादुर्भवति । अथ स इदं जगत्सृजति । सृष्ट्वा च विविधं 'स्थापयति' स्थितिं प्रापयति । अथ 'विलापयति' संहारयति 'प्रस्थापयति' प्रेरयति 'आच्छादयति' अज्ञानेनावृतं करोति 'प्रकाशयति' जीवकर्तृकानुभवेन जीवं संयोजयति 'विमोचयति' स्वप्रापितबन्धादित्यर्थः । सर्वत्रान्वयार्थं स इति द्विरुक्तिः । नेत्यनेन सिद्धान्तप्रतिज्ञाया उक्तत्वात् तत्राश्रुतेरिति पदच्छेदेनोक्तं हेतुं योजयति— अश्रुतत्वादिति । 'तद्विलाप्य व्युत्तिष्ठते' इत्याद्युक्तयोदाहृतश्रुतितोऽपि ब्रह्मलयो नेति ज्ञायते । न चान्यतो ब्रह्मलयः श्रुतः । अतः कस्यामपि श्रुतौ ब्रह्मलयस्याश्रुतत्वादित्यर्थः । परमात्मनः प्रकृतत्वात्तल्लयस्येत्येतावता पूर्तौ ब्रह्मेत्युक्तिः कालापरिच्छिन्नत्वरूपयुक्तिसूचनार्था ।

(२) नन्वन्तस्तमसि निलीन इति ब्रह्मलयस्य श्रुतत्वात्कथमुच्यते अश्रुतत्वमित्यत आह— निलीनेति ॥ अपिहितत्वमाच्छादितत्वम् । उपलक्षणमेतत् । इतरादृश्यत्वमित्यपि द्रष्टव्यम् । अत एव पैङ्गिश्रुतावदृश्यत्वमुच्यते । यथोक्तं बृहद्भाष्ये

लौकिकव्यवहारो यो भूम्याद्यर्पणादिकः ।
तददृष्टिं विना नान्यो लयः कृष्णादिनां क्वचित् ॥ इति ॥

लौकिको लोकविषयकः । कुतो निलीनशब्दोऽपिहितत्वार्थकः, येनाश्रुतत्वं

'स एतस्मिंस्तमसि निलीनः प्रकृतिं पुरुषं कालं चानुपश्यति नैनं पश्यति कश्चन' इति पैङ्गिश्रुतिः।

(४) 'नित्यो नित्यानां चेतनश्चेतनानाम्' (कठ. ५-१३.)
'स नित्यो निर्गुणो विभुः परः परमात्मा'

सिध्येत् इत्यतस्तदुत्तरत्वेनापि श्रुतेरिति छेदेनोक्तां श्रुतिं दर्शयति—तुच्छेनेति। श्रुतेरिति। समाख्यारूपश्रुतेरित्यर्थः। 'स इदं सर्वं विलाप्य' इत्यादेः 'व्युत्तिष्ठते' इत्यन्तस्य 'नासदासीत्' इत्यादेः 'महिना जायतैकम्' इत्यन्तस्य च समर्थनार्थत्वादिति भावः। श्रुतेरित्यस्य पूर्वेणान्वयः। व्याख्यातेयं श्रुतिः आनुमानिकनये। निलीनत्वमिहापिहितत्वमेव न त्वन्यदिति॥

अत्र न केवलं समाख्यानं, किंतु वाक्यमपीत्याशयेन श्रुतेरित्यनेनोक्तं श्रुतिवाक्यं चाह—स इति॥ अत्र पूर्वोत्तरवाक्यार्थपर्यालोचनया वाक्यलक्षणप्रमाणेन अर्थात् निलीनशब्दोऽपिहितार्थे प्रयुक्त इति ज्ञायते। केचिदियमपि प्रयोगरूपश्रुतित्वात्समाख्यैव, समाख्यादीनामिति टीका तु वस्तुस्थितिकथनपरेत्याहुः। 'सः' परमात्मा 'एतस्मिन्' प्रकृतिरूपे तमसि 'निलीनः' छन्नः स्वयं प्रकृतिजीवकालाननुपश्यति एनं तु न कोऽपि पश्यतीत्यर्थः। 'पैङ्गिश्रुतेः' पैङ्गितां वाक्यात्। अस्यापि निलीनशब्देनेति पूर्ववाक्येनान्वयः॥

(४) ननु किमर्थमेवं निलीनश्रुतेरर्थान्तरं परिकल्प्यते अस्याः लय एवार्थः किं न स्यात्। न च समाख्यादिविरोधः। तस्य श्रुतितो दुर्बलत्वात्। न च 'नित्यो नित्यानाम्' इति श्रुत्यन्तरबलात्तस्याः प्रामाण्योपपत्तेरित्यतः प्रवृत्तं नित्यत्वाच्च ताभ्य इत्यंशं व्याचष्टे—नित्य इति॥

नित्यो नित्यानां चेतनश्चेतनानां
एको बहूनां यो विदधाति कामान्।
तमात्मस्थं येऽनुपश्यन्ति धीराः
तेषां शान्तिः शाश्वती नेतरेषाम्॥

इति कठश्रुतेरयमर्थः—'नित्यानां' स्वरूपतः अविनाशिनां सकाशात् 'नित्यो' देहतोऽपि नित्यः परमनित्य इति यावत्। नित्यानां नित्यत्वप्रद

'नित्यो विभुः कारणो लोकसाक्षी परो गुणैस्सर्वदृक् शाश्वतश्च' ( ) इत्यादि श्रुतिभ्यो नित्यत्वाच्च ॥ १७ ॥

॥ इत्यात्माधिकरणम् ॥१०॥

॥ ११. ज्ञाधिकरणम् ॥

(१) 'नित्यो नित्यानाम्' (कठ. ५-१३.) इति जीवस्यापि नित्यत्वमुक्तम् । 'सर्व एते चिदात्मानो व्युच्चरन्ति' इत्युत्पत्तिरुच्यते ।

इति वा । एवं 'चेतनानां' ज्ञातृणामपि 'चेतनः' परमचेतनः, तेषां चैतन्यप्रद इति वा । यश्च स्वयमेक एव 'बहूनां' पुरुषाणां 'कामान्' काम्यान् 'विदधाति' करोति तं हृदयस्थं ये धीराः अनुपश्यन्ति तेषां 'शाश्वती' पुनरावृत्तिशून्या 'शान्तिः' मोक्षो भवेन्नेतरेषामिति । 'स नित्यः' इत्यन्यश्रुतिवाक्यम् । सः परमात्मा देहतोऽपि नित्यः, यतो 'निर्गुणः' सत्त्वादिगुणावद्धो विभुः परो विलक्षणोऽत इत्यर्थः । 'नित्यो विभुः' इत्यन्या श्रुतिः । नित्यत्वे हेतुर्विभुरित्यादिकं । 'कारणः' कारणं जगत इति शेषः । 'गुणैः' गुणेभ्यस्सत्त्वादिभ्यः 'परो' मुक्तः गुणमयदेहादिवर्जितः 'सर्वदृक्' सर्वज्ञः 'शाश्वतो' निर्विकार इत्यर्थः । आदिशब्देन नित्यत्वबोधकवाक्यान्तरं गृह्यते । ताभ्य इत्यस्य व्याख्या श्रुतिभ्य इति । नित्यत्वादिति । देहतोऽपि नित्यत्वावगमादित्यर्थः । ब्रह्मण इत्यनुषज्यते । अस्यापि निलीनशब्देनापिहितत्वमुच्यत इति पूर्वेणान्वयः । चशब्दो हेतुसमुच्चये । तथा च बाहुळ्येन 'नित्यः' इत्यादिश्रुतीनां प्राबल्यान्नेतरश्रुतिविरोधेन अप्रामाण्यं शङ्क्यमिति नश्रुतिविरोधान्निलीनश्रुतेरर्थान्तरकल्पनं युक्तमिति भावः ॥

॥ इत्यात्माधिकरणम् ॥ १० ॥

॥ ११. ज्ञाधिकरणम् ॥

(१) अत्राधिकरणे जीवजन्मविषयश्रुतिविरोधः परिह्रियते । सन्देहबीजं श्रुतिविरोधं दर्शयति—नित्य इति ॥ न केवलं परस्येत्यपिशब्दार्थः । नित्यत्वमिति । अविनाशित्वमित्यर्थः । उक्तमिति । पूर्वाधिकरणोदाहृतवाक्येनेति शेषः । न चोत्पत्तिश्रुतिप्रतियोग्यनादित्वश्रुतेरेवोदाहर्तव्यतया

अतो विरोध इति ।

(२) अत आह—

सू—ॐ ॥ ज्ञोऽत एव ॥ ॐ ॥ १८॥

जीवोऽप्यत एव परमेश्वरादुत्पद्यते, शब्दादेव । 'ते वा एते चिदात्मानोऽविनष्टाः परं ज्योतिर्निविशन्त्यविनष्टा एवोत्पद्यन्ते न विनश्यन्ति कदाचन' इति कापायणश्रुतिः ॥ १८ ॥

नित्यत्वश्रुत्युदाहरणमसङ्गतमेवेति वाच्यम् । भावस्य सतः नित्यत्वोक्त्यनुपपत्तित एव प्रागभावाप्रतियोगित्वरूपानादित्वस्याप्युक्तप्रायत्वात् । इतीति । इति श्रुत्यन्तरेणेत्यर्थः । 'आत्मानो' जीवाः 'व्युच्चरन्ति' मातृदेहात् निस्सरन्ति जायन्त इत्यर्थः । ततः किमित्यत आह—अत इति । यत एवं श्रुतिद्वयेन विरुद्धार्थद्वयमुक्तं, अतः श्रुत्योर्विरोध इत्यर्थः ।

(२) अनुत्पत्तिज्ञापकनित्यत्वश्रुत्युपन्यासेनैव जीवोऽनुत्पत्तिमान् प्रागभावाप्रतियोगित्वरूपानादित्वात् ईश्वरवदिति सयुक्तिकपूर्वपक्षो लब्धो भवतीत्याशयवान् सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ जीव इत्यनेन जानातीति व्युत्पत्त्या ज्ञो जीव इति ज्ञशब्दो व्याख्यातः । पूर्वसूत्रादनुवृत्तस्य चशब्दस्यार्थोऽपीति । न केवलं वियदादिः किन्तु जीवोऽपीति तस्यार्थः । यद्वा—नित्यत्वेनोक्तोऽपीत्यर्थः । अत इत्यनुवादेन परमेश्वरादिति व्याख्यानम् । परमेश्वरादेवेत्येवकारान्वयः । सर्वसूत्रेषु तस्यैव प्रकृतत्वादिति भावः । उत्पद्यत इति सूत्रे शेषोक्तिः । एवकारस्यात्राप्यन्वयः । उत्पद्यत इत्यावर्तते । अनेन जीवोऽपि उत्पद्यत एव, उत्पद्यमानश्चेश्वरादेव उत्पद्यत इति प्रतिज्ञाद्वयं सूचितं भवति । उभयत्र हेतुमाह—शब्दादेवेति । अनेनातश्शब्दस्यावृत्तिस्सूचिता । न तत्र प्रमाणान्तरं गवेषणीयमिति एवशब्दार्थः । तमेव शब्दमुदाहरति—त इति । वाशब्दोऽवधारणे । 'ते' प्रसिद्धाः 'एते' जीवाः यतः 'चिदात्मानो' ज्ञानस्वरूपाः अतस्स्वरूपतोऽविनष्टास्सन्तो 'ज्योतिः' प्रकाशरूपं 'परं' ब्रह्म निविशन्ति प्रळये मुक्तौ च । तर्हि अनादिनित्यत्वश्रुतिविरोध इत्यत आह—अविनष्टा इति । स्वरूपतः अनादिनित्या एवेत्यर्थः । कादाचित्कनाशोऽपि नेत्याह—

(३) सू—ॐ ॥ युक्तेश्च ॥ ॐ ॥ १९ ॥

नित्यस्यापि हि जीवस्योपाध्यपेक्षयोत्पत्तिर्युज्यते ।

(४) उत्पद्यन्ते चिदात्मानो नित्या नित्यात्परात्मनः ।
उपाध्यपेक्षया तेषां उत्पत्तिरपि गीयते ॥
इति च व्योमसंहितायाम् ॥ १९ ॥

॥ इति ज्ञाधिकरणम् ॥

नेति । स्वरूपत इति शेषः । 'कदाचन' महाप्रळयेऽन्यदा वेत्यर्थः । इति श्रुतिरित्यनन्तरं अस्ति हीति शेषः ॥

(३) नन्वनादिनित्यस्य जीवस्योत्पत्तिः श्रुताऽपि कथं युज्यते वन्ध्यात्वमभ्युपगम्य मातृत्ववचनवत् नित्यत्वमभ्युपगम्य पुनरुत्पत्तिवचनस्य व्याहतत्वादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—युक्तेश्चेति॥ 'नित्यस्यापि' अनादिनित्यस्यापि । अपिः यद्यपितथापीत्यर्थे । अनेन सूत्रे ज्ञस्येति विपरिणतमनुषज्यते । चोऽप्यर्थः । स च विशेषणसमुच्चयार्थोऽपीत्युक्तं भवति । 'उपाध्यपेक्षया' बाह्यशरीराख्योपाध्युत्पत्त्यपेक्षया तद्विषयकतया उत्पत्तिवचनं युज्यत इत्यर्थः । शरीरादेरुपाधित्वं न प्रतिफलनाधिकरणत्वम्, किन्तु उत्पत्त्यादिरूपविकारविशेषापादकत्वम्, अत एवाह—उत्पत्तिरिति । युज्यत इति । अनेन नायं युक्तिशब्दो लिङ्गार्थः, किन्तु योगार्थको विवक्षार्थकश्चेति सूचितम् । सावधारणं चैतत् । तेन सौत्रचशब्दो व्याख्यातः । अवधारणेन नेदमुपचारमात्रम्, किन्तु मुख्यमेव । पराधीनविशेषावासिरूपोत्पत्तेरेवात्र विवक्षितत्वादिति सूचितम् । अनेन—अनादिनित्यस्यापि ज्ञस्य पराधीनविशेषावासिरूपोत्पत्तेः योगान्न तदुक्तिव्याघात इति सूत्रार्थ उक्तो भवति ॥

(४) अत्र स्मृतिसम्मतिमाह—उत्पद्यन्त इति ॥ चिदात्मत्वमनादिनित्यत्वे हेतुः । तथा च यद्यपि यतश्चिदात्मानो जीवा अतोऽनादिनित्याः, तथापि देहतोऽपि नित्यात्परात्मन उत्पद्यन्ते । व्याहतिमाशङ्क्याह—उपाधीति । बाह्योपाध्युत्पत्त्यपेक्षयेत्यर्थः । 'तेषां' जीवानां, न केवलमनादिनित्यत्वमित्यपिशब्दार्थः । व्योमसंहितायामित्यनन्तरं नित्यस्यापीत्यादिशब्देनोक्तं युक्तमिति वाक्यशेषः ॥

॥ इति ज्ञाधिकरणम् ॥ ११ ॥

॥ १२. उत्क्रान्त्यधिकरणम् ॥

(१) 'व्याप्ता ह्यात्मानश्चेतना निर्गुणाश्च सर्वात्मानः सर्वरूपा अनन्ताः' इति कापायणश्रुतौ व्याप्तत्वं प्रतीयते। 'अणुर्ह्येष आत्मा यं वा एते सिनीतः। पुण्यं च पापं च' इति गौपवनश्रुतावणुत्व-मित्यतो विरोध इति ॥

(२) अतो ब्रवीति—

॥ १२. उत्क्रान्त्यधिकरणम् ॥

(१) धर्मिणि जीवे उत्पत्त्यनुत्पत्तिश्रुतिविरोधपरिहारानन्तरमत्राधि-करणे जीवधर्मे परिमाणेऽणुत्वश्रुतिविरोधः परिह्रियते। तत्र श्रुतिविरोध-रूपं संशयबीजं दर्शयति—व्याप्ता हीति ॥ हिशब्दः प्रसिद्धौ। 'आत्मानः' परमात्मरूपविशेषाः 'व्याप्ताः' परममहत्परिमाणाः 'चेतनाः' ज्ञानरूपाः 'निर्गुणाः' सत्त्वादिगुणशून्याः 'सर्वात्मानः' सर्वस्यादानादिकर्तारः 'सर्वरूपाः' पूर्णस्वरूपाः। 'सर्वः पूर्ण गुणत्वतः' इत्युक्तेः। 'अनन्ताः' कालतो गुणतश्चापरिच्छिन्ना इति सिद्धान्तरीत्या श्रुत्यर्थः। पूर्वपक्षे त्वात्मशब्दो जीवपरः। विशेषणानि च तस्यैवेत्याह—व्याप्ता ह्यात्मान इति। समग्रोदाहरणं तु सिद्धान्तानुकूलतया ब्रह्मलिङ्गानि सूचयितुम्। व्याप्तत्वं देशतो महत्त्वमिति यावत्। प्रतीयते। जीवस्येत्यनुषज्यते। 'एषः' इति श्रुतौ हिशब्दः प्रसिद्धौ। चावन्योन्यसमुच्चये। तथा च 'एष आत्मा' जीवोऽणुः यं जीवं एते 'सिनीतो' बद्धीतः। एते इत्येतदेव विवृणोति—पुण्यं च पापं चेति। अत्राप्यणुर्ह्येष आत्मेत्येतावदेव उदा-हर्तव्ये वाक्यशेषोद्धारो जीवत्वज्ञापनार्थः। अणुत्वमित्यत्रापि प्रतीयत इत्यनुषज्यते। जीवस्येति चास्ति। ततः किमित्यत आह—अत इति। विरुद्धार्थद्वयप्रतीतित एवेत्यर्थः। 'विरोधः' श्रुत्योः प्रतीयत इत्यनुवर्तते ॥

(२) युक्तिसहितव्याप्तत्वश्रुतिबलात् व्याप्त एव जीव इति पूर्वपक्षे सिद्धान्तयत्सूत्रमवतार्य तच्छेषमेव पूरयति—अत इति ॥ हेतूनामित्युक्ति रुत्क्रान्त्यादेः लिङ्गताबोधनाय। तथापि विभक्तिं विना हेतुताऽनवग-मात्तदर्थं सकाशादिति शेषः कृतः। हेतूनामिति तु अनुवादो न दोषः। अणुरेवेति तु प्रकरणलब्धसाध्योक्तिः। जीव इति वर्तते। तेन सूत्रे ञ

सू—ॐ ॥ उत्क्रान्तिगत्यागतीनाम् ॥ ॐ ॥२०॥

हेतूनां सकाशादणुरेव ।

(३) 'सोऽस्माच्छरीरादुत्क्रम्यामुं लोकमभिगच्छत्यमुष्मादिमं लोकमागच्छति स गर्भीभवति स प्रसूयते स कर्म कुरुते' इति पौष्यायणश्रुतेः ॥ २० ॥

(४) तत्र स्वातन्त्र्यप्रतीतेः,

एकः प्रसूयते जन्तुरेक एव प्रमीयते ।

इत्यस्यानुषङ्गस्सिध्यति। अनेन जीवः अणुरेव न व्याप्तः। कुतः? उत्क्रान्तिगत्यागतिमत्त्वात्, पतत्रिशरीरवदित्यनुमानप्रयोगस्सूचितः। न च मध्यमपरिमाणत्वेनान्यथासिद्धिरस्यात्। तस्यानित्यत्वप्रसङ्गेन निराकृतत्वादिति भावेनाप्येवकारः प्रायोजि ॥

(३) विभुत्वबाधकानामणुत्वसाधकानां हेतूनामसिद्धिमाशङ्क्य तत्र तत्सद्भावे श्रुतिमाह—स इति ॥ स जीवो बाह्यशरीरबन्धादुत्क्रम्यामुं लोकं 'अधिगच्छति' प्राप्नोति। 'अमुष्मादिमं लोकं' भूलोकं प्रत्यागच्छति। अनन्तरं 'स गर्भीभवति' पूर्वमगर्भः, अधुना गर्भस्सम्पद्यते मातुरुदरं प्रविशतीति यावत्। अथ 'प्रसूयते' उत्पद्यते। अथ पुण्यपापसाधनं कर्म करोतीति श्रुत्यर्थः। श्रुतेरित्यनन्तरं सिद्धानामिति शेषः। अस्य हेतूनामित्यनेनान्वयः ॥

(४) एवमुत्क्रान्त्यादिहेतुभ्यो जीवस्याव्याप्तत्वे सिद्धे अणुत्वसाधकाधिकरणमध्ये अन्तर्भेदाधिकरणत्वेन किञ्चित्प्रसङ्गात् चिन्त्यते। किमिदमुत्क्रान्त्यादिकं जीवस्य परमेश्वरेण? स्वयमेवेति। तत्र पूर्वपक्षमाह—तत्रेति ॥ 'सोऽस्मात्' इत्युदाहृतश्रुतावित्यर्थः। तत्रेत्यावर्तते। तस्योत्क्रान्त्यादाविति्यर्थः। जीवस्येत्यनुवर्तते। प्रतीतेरित्यस्य स्वयमेवेत्यनेनान्वयः। स्वयमेवेत्यनन्तरं तस्योत्क्रान्त्यादीति साध्यमध्याहार्यम्। नेश्वरेणेत्येवशब्दार्थः। नन्वस्यां श्रुतौ जीवस्योत्क्रान्त्याद्येव श्रूयते, न त्वन्याधीनताविधिः निषेधो वाऽस्ति। अतो नानया दृढनिर्णय इत्यत आह—एक इति। 'एकः' स्वतन्त्रो 'जन्तुः' जीवः 'प्रसूयते' उत्पद्यते

एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम् ॥
इत्यादेश्च स्वयमेवेति ।

(५) अतो वक्ति—

सू—ॐ ॥ स्वात्मना चोत्तरयोः ॥ ॐ॥ २१ ॥

'स एतेनैव स्वात्मना परेणेमं गर्भमनुप्रविशति परेण जायते परेण कर्म कुरुते परेण नीयते परेणोन्नीयते तं वा एतमभिवदन्ति स्वात्मा' इति, 'एषह्यानन्दमादत्ते एष ह्येनं जीवमभिजीवयत्येष

'प्रमीयते' नश्यति । एवशब्दस्य द्विर्ग्रहणं सर्वत्रान्वयज्ञापकम् । दुष्कृतं चेत्यन्वितः चशब्दः समुच्चये । अनुभुङ्क्ते इत्यत्रापि सम्बध्यते । 'इत्यादेः' एवमादिस्मृतिवचनाच्चेत्यर्थः । न केवलं प्रतीतेरिति चार्थः । तथा च स्मृत्यनुसारेण श्रुतेरपि जीवस्योत्क्रान्त्यादेः पराधीनतानिषेधोऽर्थ इति भावः ॥

(५) एवं पूर्वपक्षे तन्निराकरणाय सूत्रमवतार्य व्याचष्टे—अत इति ॥ 'स एतेन' इत्याद्येकं श्रुतिवाक्यम् । 'एष ह्यानन्दम्' इत्यन्यत् । अनेनोत्तरयोरित्यनेन ज्ञापितं वाक्यद्वयमुदाहृतं भवति । 'सः' जीवः 'एतेन' स्वस्थितेन 'स्वात्मना' स्वरूपभूतमानन्दमादत्ते इति व्युत्पत्त्या स्वात्मशब्दवाच्येन परमात्मनाऽनुगृहितः इमं मातृदेहस्थं गर्भं प्रविशति । परेणैव तत्प्रेरित एव जायते । तेनैव लोकान्तरं 'नीयते' म्रियते 'उन्नीयते' मोक्षायोर्ध्वं नीयते । तमेतं विष्णुं स्वात्मेत्यभिवदन्ति विद्वांस इत्यर्थः । अनेन स्वात्मशब्दस्य विद्वद्रूढिर्दर्शिता । 'एषः' परमात्मा आनन्दं जीवकृतशुभकर्मफलं 'आदत्ते' गृह्णाति स्वरूपानन्दमनुभवतीति वा । 'अभि जीवयति' धृतप्राणं करोति संस्थापयति । 'उद्गमयति' देहान्निर्गमयति ऊर्ध्वं परलोकं गमयतीति वा । 'आगमयति' देहं प्रवेशयति । इमां भूमिमागमयतीति वेत्यर्थः । यद्यप्येषह्येनं जीवमित्यारभ्यैव द्वितीयवाक्यमुदाहर्तव्यम् । तस्यैव प्रकृतोपयुक्तत्वात् । तथापि द्वितीयवाक्ये स्वात्मशब्दाभावात् कथमुत्तरयोरित्यनेन द्वितीयवाक्यं गृह्यत इत्याशङ्क्य मैवं द्वितीयवाक्ये स्वात्मशब्दाभावेऽपि तद्वद्याख्यानरूपैष ह्यानन्दमादत्त इति वाक्यसद्भावादिति भावेन तत्पूर्ववाक्यमप्युदाहृतम् । अत एव सूत्रे

उद्गमयत्येष आगमयति' (पौष्यायण) इत्युत्तरयोर्वाक्ययोः परमात्मनैवोत्क्रान्त्यादयः ॥ २१ ॥

(६) सू—ॐ ॥ नाणुरतच्छ्रुतेरिति-चेन्नेतराधिकारात् ॥ ॐ ॥ २२ ॥

'व्याप्ता ह्यात्मानश्चेतना निर्गुणाश्च' इति व्याप्तिश्रुतेर्नाणुर्जीव इति चेत्—

(७) न, 'स आत्मेदं सृजति स द्विधेदं विभर्ति अन्तर्बहिश्च। स

उभयोदाहरणम्। इत्युत्तरयोरिति। पौष्यायणश्रुतौ सोऽस्मादिति वाक्यापेक्षयोत्तरयोरित्यर्थः। सकाशादिति शेषः। यद्वा—सप्तमीयं न षष्ठी। तथात्वे सूत्रे वचनादिति शेषः। भाष्ये तृच्यन्त यत इति शेषः। आद्ये तु भवन्तीति। एवं हेतुं व्याख्याय इदानीं स्वात्मना चेति प्रतिज्ञांशं व्याचष्टे—परमात्मनैवेति॥ स्वात्मनेत्यनुक्त्वा परमात्मनेत्युक्त्या परं पूर्णं स्वरूपभूतमानन्दं आदत्त इति व्युत्पत्त्या स्वात्मशब्दो व्याख्यातः। उत्क्रान्त्यादय इत्यनेन सूत्रे उत्क्रान्तिगत्यागतय इति पूर्वसूत्राद्विपरिणतपदस्यानुवृत्तिः सूचिता। अल्पाक्षरत्वायादिशब्दप्रयोगः। तथा च सोऽस्मादिति पूर्ववाक्यमप्येतदर्थकमेव। स्मृतिस्तु प्रलयादिदुःखानुभवे परमात्मदत्तस्वातन्त्र्यमाहेति न तद्विरोध इति भावः॥

(६) उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याक्षेपांशं तावद्व्याचष्टे—नेति॥ इति व्याप्तिश्रुतेरित्यनेनातच्छ्रुतेरिति पूर्वपक्षहेत्वंशस्याणुत्वविरुद्धव्याप्तत्वश्रुतेरित्यर्थ उक्तो भवति। बहुवचनश्रवणादियं श्रुतिः परमात्मनि निरवकाशा, उत्क्रान्त्यादिकं तु मनोगतं जीवात्मन्युपचर्यत इति भावः। नाणुर्जीव इत्यनेन 'ज्ञोऽतः' इत्यतो ज्ञ इति पदानुवृत्त्या प्रतिज्ञांशो व्याख्यातः॥

(७) परिहारांशं व्याचष्टे—नेति॥ नैतच्छ्रुतिबलेन जीवस्य व्याप्तत्वं वक्तव्यमित्यर्थः। कुतो नेत्यतस्तत्र तस्याः परमात्मविषयत्वेन सावकाशत्वादिति हेतूपस्कारमभिप्रेत्य तदपि कुत इत्याशङ्कायां तत्र हेतुत्वेनेतराधिकारादित्यंशं योजयति—स इति। इतीति। वाक्य इत्यर्थः। यद्वा—

बहुधेदमनुप्रविश्यात्मनोऽभिनयति । स आत्मा स आत्मानः स ईशः स विष्णुः स परः परोवरीयान् ' इति परमात्माधिकारत्वात् ।

इत्यादिवाक्यस्येत्यर्थः । इति परमात्माधिकारत्वादित्यनेनेतराधिकारादित्यस्येतरस्याधिकारः, इतराधिकारस्तस्मात् । यद्वा—इतरमधिकरोतीतीतराधिकारः, भावप्रधानश्चायम् । तथा च 'सः' इति वाक्ये 'इतरस्य' प्रकृतजीवाद्भिन्नस्य परमात्मनः 'अधिकारात्' पठितत्वात् प्रकृतत्वादिति यावत् । तत एव च 'व्याप्ता ह्यात्मानः' इत्यादिवाक्यसन्दर्भस्य 'इतराधिकारात्' परमात्माधिकारत्वात्तत्प्रकरणत्वात् । अत एवास्य 'व्याप्ताः' इत्यस्य 'इतराधिकारत्वात्' परमात्मपरत्वादित्यर्थत्रयमुक्तं भवति । तथा च प्रकरणबलाद्व्याप्ता इति श्रुतिर्विष्णुपरैव, न तु जीवपरा । न च बहुवचनविरोधः । परमात्मन्येव स इति श्रुतावात्मान इति बहुवचनान्तशब्दप्रयोगेणात्रत्यबहुवचनस्यापि तस्मिन्नेव सावकाशत्वात् । निर्गुणा इति गुणसम्बन्धराहित्योक्तेश्च । अत एव नोत्क्रान्त्यादीनां औपचारिकत्वं कल्प्यमेतच्छ्रुतेरबाधकत्वादिति भावः । 'सः' परमात्मा 'इदं' जगत् सृजति । सोऽन्तर्गतो बहिर्गतश्चेति द्विधा भूत्वाऽन्तर्बहिश्चेदं जगद्बिभर्ति । बहुधा भूत्वा इदमनुप्रविश्य 'आत्मनः' स्वस्य स्वत एवाभितः आभिमुख्येन 'नयति' स्वक्रियानुकूलक्रियं करोति । यद्वा—'आत्मनः' आत्मरूपानभितो नयति । 'स आत्मा स आत्मानः' तादृशैकवचनबहुवचनान्तशब्दबोध्यः 'परोवरीयान्' सर्वोत्तम इति श्रुत्यर्थः । न चैवं विरोधः पौनरुक्त्यं वा, बहुरूपत्वात्तात्पर्यज्ञापकत्वाच्च । सृष्ट्यादिकर्तृत्वाभिधायिपूर्वांशस्य 'स ईशः' इत्याद्युत्तरांशस्य चोदाहरणमेतच्छ्रुतिस्थतच्छब्दानां विष्णवैकविषयत्वसाधनार्थम् । तदेतत्सर्वमभिप्रेत्योक्तं तत्त्वप्रदीपे—बहुरूपेरिदं जगत्प्रविश्य स्वत एवाभितो नयति । स आत्मा स आत्मानः इत्येकस्यैव बहुरूपत्वं पुनः पुनस्तात्पर्यादुपदिशति । विष्णुश्रुतिः सृष्ट्यादिकर्तृत्वरूपतल्लिङ्गोक्त्या स इति तच्छब्दानां विष्णुविषयत्वमेवेति साधयति । परोवरीयस्त्वोक्त्या चात्मशब्दितस्य विष्णोरवरत्वं दूरीकरोतीति ।

(८) एकशब्दैर्द्विशब्दैश्च बहुशब्दैश्च केशवः ।
एक एवोच्यते वेदैस्तावता नास्य भिन्नता ॥
इति भविष्यत्पुराणे ।

(९) 'तदयं प्राणोऽधितिष्ठति । तदुक्तमृषिणा—आ तेन यातम्' (ऐ.आ. २-३-८.) इत्यादि च ॥ २२ ॥

---

(८) ईश्वरस्य बहुवचनवाच्यत्वे भेदः स्यादित्यत आह—एकशब्दैरिति ॥ 'केशवः' सृष्टिसंहारयोर्ब्रह्मरुद्रनियोजको विष्णुरेक एवाभिन्न एवानेकरूपत्वात् 'वेदैः' वेदगतैः 'एकशब्दैः' एकवचनान्तशब्दैर्द्विवचनान्तशब्दैर्बहुवचनान्तशब्दैश्चोच्यते । तावताऽस्य विष्णोर्भिन्नता नाशङ्क्येत्यर्थः । भविष्यत्पुराणे इत्यनन्तरमुक्तं अतो न भेदप्रसिक्तिदोष इति वाक्यशेषः ।

(९) एकस्मिन्नेकशब्दप्रयोगं सम्प्रतिपन्नस्थले दर्शयति—तदिति ॥ व्याख्यातमेतद्वाक्यं प्राणनये । ऐतरेयश्रुतिः तदयमिति वाक्येन परमात्मनः एकस्यैव शरीररथाधिष्ठातृत्वमुक्त्वा तत्र द्विवचनयुक्तौ मन्त्रौ प्रमाणयति तदित्यनेन । तत्तन्मन्त्रार्थे मन्त्रद्रष्टृऋषिणा हयग्रीवेण प्रमाणमुक्तमित्यर्थः । तन्मन्त्रद्वयं पठति—आनेनेति । इत्यादीति । इत्याद्युदाहरणं च निर्भेदेऽपि हरौ बहुरूपत्वापेक्षया बहुवचनं युक्तमित्येतमर्थं गमयतीति । तृतीयान्तपाठे इत्यादिना करणेनैतमर्थं गमयतीत्यध्याहारेणान्वयो द्रष्टव्यः । न केवलं भविष्यत्पुराणोक्तिमात्रमिति चशब्दार्थः । आदिशब्देन समग्रो मन्त्रः 'निमिषश्चित्' इति मन्त्रान्तरं च गृह्यते । तत्र—

आ तेन यातं मनसो जवीयसा
रथं यं वामृभवश्चक्रुरश्विना ।
यस्य योगे दुहिता जायते दिव
उभे अहनी सुदिने विवस्वतः ॥ (ऋ. १०-३९-१२.)

इति प्रथममन्त्रस्यायमर्थः-हे अश्विनौ आशुगतिमत्त्वाद्वयास्यत्वान्निमित्ताद्वा अश्विशब्दवाच्यौ विष्णुवायू 'ऋभवः' सर्वदेववाचकोऽयंशब्दः । तथा च सर्वे देवा यं रथं 'वां' युवयोरर्थे 'चक्रुः' कृतवन्तो 'यस्य' च देहाख्यस्य रथस्य 'योगे' सम्यग्योगे । निमित्तसप्तमीयम् । मनोवाक्कायकर्मभिस्सह

(१०) सू—ॐ ॥ स्वशब्दोन्मानाभ्यां च ॥ॐ॥ २३॥

एषो ह्यात्माऽध्युद्गतो मानशक्तेस्तथाऽप्यसौ प्रमितिं याति वेदैः।

भगवदर्पणाख्यैककियासम्बन्धात् मनोवाक्कायकर्मणां भगवदर्पणात्तेषां तदधीनत्वज्ञानात् इति यावत। 'विवस्वतो' विविधं वासवत्वात् निमित्तात् तद्वाच्याद्विष्णोः तत्प्रसादात् 'दिवो' रमाभिमन्यमानायाः विद्यायाः 'दुहिता' तज्जन्यं सरस्वत्यभिमन्यमानं विष्णुतत्त्वापरोक्षज्ञानं जीवस्य जायते। तथा 'सुदिने' साध्ये उभे अहनी जीवन्मुक्तिमुक्तयवस्थे 'जायेते' भवतः तेन मनसोऽपि 'जवीयसा' वेगेन मनसोऽपि पटुतरेण रथेन अध्यात्मं देहाख्येन अधिदैवं प्रसिद्धरथरूपेण रथेन 'आयातं' आगच्छतमिति यथोक्तमैतरेयभाष्ये—ऋभव इति देवानां साधारणं नाम।

आदित्या वसवो रुद्राः विश्वे ऋभव इत्यपि।
सर्वदेवसमाख्या च द्वादशाष्टादिकेष्वपि॥

इति शब्दनिर्णये। सुखं ददत इति सुदिने। 'विवस्वतो' विष्णोस्सकाशात् दिवो दुहिता अहनी च जायन्ते। अहनी इति द्विवचनेन द्वित्वसिद्धेऽपि उभे इति वचनं अध्यात्माधिदैवयोरुभयोरपि वचनार्थमिति। भागवततात्पर्ये तु—'यत्रोभयोस्सशब्दस्स्यात् तत्र द्विवचनेऽप्युभे' इत्युक्तम्। 'सशब्दः' समानशब्दः। केचित्तु—यस्य मनोवाक्कर्मभिः योगे भगवत्सम्बन्धादिति व्याचख्युः। तत्तु ऐतरेयभाष्यतट्टीकाविरुद्धम्।

निमिषश्चिज्जवीयसा रथेनायातमश्विना।
अन्तिषद्भूतु वामवः॥ (ऋ. ८·६२·२.)

इति द्वितीयमन्त्रस्यायमर्थः—हे अश्विनौ 'निमिषश्चित्' चक्षुर्निमेषादपि 'जवीयसा' अत्यन्तं वेगवता देहाख्यरथेनायातम्। 'वां' युवयोस्सकाशात् यत् 'अवः' अवनं तत् 'अन्तिषत्' समीपे विद्यमानं अस्मदन्तिके स्थितं 'भूतु' भवत्विति।

(१०) यदुक्तं व्यासिश्रुतिरीश्वरविषया तत्प्रकरणादिति, तदयुक्तम्, भाष्यपेक्षया प्रकरणस्य दुर्बलत्वात्, तस्मात्तेन बहुवचनश्रुतेः ईश्वरविषयत्वेन सङ्कोचरूपबाधायोगादित्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—स्वेति॥ इति वाक्यशेष इति। इत्येवं रूपे काषायणवाक्यशेष इत्यर्थः।

पूर्णोऽचिन्त्यः सर्ववेदैकयोनिः सर्वाधीशः सर्ववित्सर्वकर्ता ॥
इति वाक्यशेषे आत्मशब्दोन्मानाभ्यां च ।
(११) आत्माऽमेयः परंब्रह्म परानन्दादिकाभिधाः ।
वदन्ति विष्णुमेवैकं नान्यत्रासाङ्गतिः क्वचित् ॥
इति च कौर्मे ॥ २३ ॥

श्रुताभ्यामिति शेषः । आत्मशब्दोन्मानाभ्यामिति । आत्मशब्दोन्मानत्वलिङ्गाभ्यामित्यर्थः । अस्य व्याप्तत्वश्रुतेः ईश्वरविषयत्वेन सावकाशत्वादिति पूर्वाध्याहृतवाक्येनान्वयः । न केवलं 'इतराधिकारात्' इत्युक्तप्रकरणात्, किंतु आत्मश्रुत्युन्मानत्वलिङ्गाभ्यां चेति चशब्दार्थः । तथा च श्रुतिलिङ्गसहितप्रकरणेन केवलाया बहुवचनश्रुतेः बाधो युक्त एवेति भावः । आत्मशब्दोन्मानाभ्यामित्यनेन सूत्रे स्वेतिशब्दः स्वशब्दः, स्वस्य ब्रह्मणः शब्द इति वा विग्रहः । तेन च तत्पर्यायात्मशब्दो गृह्यते । उन्मानशब्दश्च भावप्रधानः । तेन च अपरिमितत्वलिङ्गमुच्यते । 'परमतस्सेतून्मान' इतिवत् इत्यभिप्रैति । 'एषः' इति श्रुतौ उत्तरार्धेन पूर्वार्धोदितमुपपाद्यते । तथा च—'एषः' हरिः 'हि' यतः गुणैः पूर्णः अचिन्त्यश्च, तथा 'स सर्ववेदैकयोनिः' सर्वे वेदाः एकं केवलं योनयो व्यक्तिकारणानि यस्य स तथोक्तः सर्वाधीशः सर्वज्ञः सर्वकर्ता च, अतो 'मानशक्तेः' पुरुषगतपरिमाणशक्तेः अध्युद्गतः परिमाणातीतः पूर्ण इत्यर्थः । अत एव तत्त्वप्रदीपे मानशक्तेः अधिकत्वेनोद्गतः सर्वेभ्यो गुणाधिकत्वेन मानशक्तिमतिलङ्घ्य वर्तते कैश्चिदपि न मानशक्त्या मीयत इत्युक्तम् । यद्वा—'मानशक्तेः' वेदगतयथार्थज्ञानजननशक्तेरुद्गतः तदविषय इत्यर्थः । यद्यप्येवं, तथापि 'असौ' परमात्मा विषयतया 'वेदैः प्रमितिं याति' वेदजन्यज्ञानविषयो भवतीत्यर्थः । अपरिमितस्यापि विभोः वेदैः एकदेशप्रमितिः तत्प्रसादात् भवतीति भावः । यद्वा—वेदानां स्वशक्त्यविषयस्यापि विष्णोः तत्प्रसादात् ज्ञानकरणत्वं भवतीति भावः । अथ वा—द्रष्टुश्चक्षुः इतिवत् विष्णुः प्रमितिं स्वप्रमितिं याति यापयति स्वातन्त्र्यादित्यर्थः ।

(११) आत्मश्रुतेरुन्मानत्वलिङ्गस्य च कुतो वैष्णवत्वमित्यत आह—आत्मेति ॥ 'अमेयः' अपरिमितः । स्मृतेः विष्णुविषयत्वोपपादनाय

(१२) सू—ॐ ॥ अविरोधश्चन्दनवत् ॥ ॐ॥ २४ ॥

अणोरपि जीवस्य सर्वशरीरव्याप्तिर्युज्यते । यथा हरिचन्दन-विप्रुष एकदेशपतितायाः सर्वशरीरव्याप्तिः ।

परंब्रह्मेत्याद्युपन्यासः । एकपदमिदं, परानन्देत्यनन्तरं विसर्गलोपः आर्षो बोध्यः । इतिशब्दोऽत्राध्याहार्यः । इत्यादिका एवमाद्या अभिधा अभिधायकाः शब्दाः विष्णुमेवैकं मुख्यतो वदन्ति । 'आसां' अभिधानां 'अन्यत्र' जीवादौ क्वचिदपि 'गतिः' वृत्तिः मुख्यतो नास्तीत्यर्थः । इति च कौर्मे इते । न केवलं वाक्यशेषे श्रुतमात्राभ्यां, किंतु कौर्मे वचनं विष्ण्वेकनिष्ठत्वेन निश्चिताभ्यामप्यात्मशब्दोन्मानाभ्यामित्यन्वयः । यद्यपि 'व्याप्ता ह्यात्मानः' इति श्रुतावात्मशब्दानन्त्ययोः श्रवणात् पृथग्वाक्यशेषग्रहणं व्यर्थम् । तथापि 'व्याप्ता ह्यात्मानः' इति वाक्ये बहुवचनसमभिव्याहारात् अन्यार्थताया एव झडिति प्रतिभासाद्वाक्यशेषे च तदभावेनास्य स्मृतिगतामेयपदव्याख्येयोद्वतोमानशक्तेरितिपदयुक्तत्वेन च निश्चितार्थत्वात्तदर्थं पृथगुपन्यासो युक्तः ।

(१२) नन्वथापि न जीवस्याणुत्वं युक्तम्, अणोस्तस्य शरीरैकदेशस्थत्वेन तदन्यत्राभावेन कस्याप्यप्राप्तकरणेन क्रियानिर्वर्तकत्वाभावेन सर्वशरीरगतस्पर्शज्ञानायोगात् तत्रतत्र चक्षुरादिषु तैस्तैर्युगपद्रूपादिपरिज्ञानायोगाच्चेत्याशङ्कां परिहरत्सूत्रं पठित्वा व्याचष्टे—अविरोध इति ॥ अणोरपि जीवस्येत्यादिना सूत्रे ह्यस्य जीवस्येत्यस्यानुवृत्त्या विरोधपदावृत्त्या च यतो जीवस्य अणुत्वव्याप्त्यविरोधः अणुत्वेऽप्यंशैः सर्वशरीरव्याप्तिर्युज्यते, अतो 'विरोधः' तत्र तत्र परिज्ञानयोगाख्यविरोधो नेति योजना दर्शिता । अपिस्तु यद्यपितथापीत्यर्थः, समुच्चयार्थो वा । उभयादृष्टिबाधपरिहाराय प्रवृत्तं चन्दनवदिति दृष्टान्तांशं चन्दनेषु श्रेष्ठत्वाद्विशेषपरतया विवृणोति—यथेति । हरिचन्दनेति । 'गन्धसारो मलयजो हरिचन्दनम्' इत्युक्तेः गन्धसाराख्यमलयगिरितरुकाष्ठकृतद्रव्यबिन्दोरित्यर्थः । विप्रुष इत्यनेन अणुत्वं ज्ञापितम् । 'एकदेशपतितायाः' अंशैः शरीरैकदेशनिपतितायाः । अस्य तथेति पदाध्याहारेण अणोरपीति पूर्ववाक्येनान्वयः ।

(१३) अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति ।
यथा व्याप्य शरीराणि हरिचन्दनविप्रुषः ॥
इति च ब्रह्माण्डपुराणे ॥ २४ ॥

(१४) सू—ॐ॥ अवस्थितिवैशेष्यादिति-
चेन्नाभ्युपगमाद्धृदि हि ॥ॐ॥२५॥

सम्यगसम्यगवस्थानविशेषाद्युज्यते चन्दनस्येति चेत्—
(१५) न, 'हृदि ह्येष आत्मा' (प्र. ३-६.) इति जीवस्यापि

---

(१३) ननु नियामकं विना न दृष्टान्तमात्रेण अर्थसिद्धिः, एतत्प्रतिकूलदृष्टान्तस्यापि वचनसम्भवादित्यत आह—अणुमात्रोऽपीति ॥ अणुपरिमाणोऽपीत्यर्थः । अपिः पूर्वोक्तार्थकः । अंशैरिति शेषः । 'शरीराणि' शरीराङ्गानि 'हरिचन्दनविप्रुषो' गन्धद्रव्यबिन्दवः एकदेशपतिताः तिष्ठन्ति, तथेति शेषः । ब्रह्माण्डपुराणे उक्तमिति शेषः । तथा च अस्यैव नियामकत्वान्नोक्तदोष इति भावः ।

(१४) उक्तमाक्षिप्य समादधत्सूत्रमुपन्यस्याक्षेपांशं तावद्व्याचष्टे—अवस्थितीति ॥ विप्रुष इत्यनुषज्यते । तथा नेति वाप्यत्रान्वीयते । सर्वशरीरव्याप्तिरिति चास्ति । तथा च चन्दनस्य विप्रुषः सर्वशरीरव्याप्तिर्युज्यते । कुतः ? 'सम्यगसम्यगवस्थानविशेषात्' चन्दनबिन्दोः सांशत्वेन शरीरैकदेशे सम्यगवस्थानस्य अन्यत्र असम्यगवस्थानस्य च विशेषस्यानुभवसिद्धत्वात् न तथा जीवस्य । कुतः ? यतोऽयं न तथा सांशः, तथा सत्यनित्यत्वप्रसङ्गादिति योजना । विशेषादित्युक्त्या सूत्रे स्वार्थे ष्यञिति ज्ञापितम् ।

(१५) परिहारांशं व्याचष्टे—नेति ॥ न जीवस्य शरीरे सम्यगसम्यगवस्थानाभाव इत्यर्थः । येन दृष्टान्तवैषम्यं स्यादिति भावः । कुतो नेत्यतस्तत्र हेतुतया अभ्युपगमादित्यंशं योजयति—जीवस्येति ॥ अनेन सूत्रे अस्य जीवस्येत्यस्य अनुवृत्तिस्सूचिता । न केवलं चन्दनबिन्दोः किंतु जीवस्यापीत्यपेरर्थः । 'तथाऽभ्युपगमात्' चन्दनबिन्दुवदेहे हृदयतदितरस्थानयोः सम्यगसम्यगवस्थानाभ्युपगमात् । कथमेतत् 'तथाऽभ्युप-

तथाऽभ्युपगमात् ॥ २५ ॥

(१६) सू—ॐ॥ गुणाद्वाऽऽलोकवत् ॥ॐ॥ २६ ॥

गमात् ' चन्दनविन्दुवज्जीवस्यापि सांशत्वाभ्युपगमादित्यर्थः। न चानित्यत्वप्रसङ्गः। यतो न सांशत्वमात्रमनित्यत्वे प्रयोजकम्, किन्त्वारम्भकांशवत्त्वं, तच्च न जीवेऽस्ति। अन्यथा प्रकृत्यादेरपि दशदिक्सम्बन्धेन सांशत्वादनित्यत्वप्रसङ्गादिति भावः। अयं च भावस्तत्त्वप्रदीपे सूचितः। कुतस्तथाऽभ्युपगम इत्यतस्तत्र हेतुतया हृदि हीत्यंशं योजयति—हृदीति। श्रुतेरिति शेषः। हृदि हीति श्रुतिप्रतीकग्रहणम्। हृदयेऽवस्थितिवैशेष्याभ्युपगमादिति स्थलोक्तिरूपं वा। ' हि ' यतः 'एषः आत्मा' जीवो 'हृदि' हृदये स्वरूपेणास्ति अतो नेन्द्रियवृत्तिं विनाऽणोस्तस्य विषयसङ्गतिरिति षट्प्रश्नश्रुतिवाक्यार्थः। अनेन — चन्दनवज्जीवस्य 'अविरोधः' स्वरूपतदंशाभ्यां सर्वशरीरव्याप्तिर्युज्यते। कुतः? चन्दनविन्दोरात्मनस्सकाशात् 'अवस्थितिवैशेष्यात्' शरीरैकदेशे सम्यगवस्थानस्य अन्यत्र असम्यगवस्थानस्य च विशेषस्य अनुभवसिद्धत्वादस्य च जीवेऽभावादिति चेत्—न, कुतः? जीवस्यापि हृदि तदन्यत्र च तथाभावाभ्युपगमात्। सोऽपि कुतः? ' हृदि हि ' इति श्रुतेरिति सूत्रयोजना विरोधपदानुवृत्त्या नञावृत्त्या तथाशब्दाध्याहारेण च दर्शिता भवति। इदं त्ववधेयम्—सांशानां देवादीनामेकस्मिन् देहे हृदि नवनीतपिण्डवत्सान्द्रद्रव्यरूपेण सम्यगवस्थानं तदन्यत्रासम्यगवस्थानमिति। यथोक्तं बृहद्भाष्ये—

हृदये संस्थितो जीवो विशेषेण हरिस्तथा।
चक्षुरादिषु रूपाणि जाग्रत्काले तयोस्सदा॥
बहूनि सन्ति तान्येव यदैकीभावमाप्नुयुः॥

हृदयस्थितेन रूपेणेति। विशेषेण सान्द्रद्रव्यरूपेणेत्यर्थः।

(१६) एवं स्वरूपतदंशाभ्यां आत्मनः शरीरव्याप्यव्यापी सदृष्टान्तमुक्त्वा प्रकारान्तरेणापि तदुपपादकं सूत्रमुपन्यस्य व्याचष्टे—गुणाद्वेति॥ यथा 'आलोकस्य' प्रदीपस्य प्रकाशाख्यगुणेनेति। अनेनालोकस्यालोकगुणेन व्याप्तिवदिति दृष्टान्तांश आवृत्त्या व्याख्यातः। ' ज्योतीरूपेण ' प्रदीपरूपेण ' अव्याप्तिः ' दीपिकादावेव सम्यगवस्थानं अन्यत्र तदभाव इत्यर्थः।

यथाऽऽलोकस्य प्रकाशगुणेन व्याप्तिर्ज्योतीरूपेणाव्याप्तिः एवं चिद्गुणेन व्याप्तिर्जीवरूपेणाव्याप्तिरिति वा ।

(१७) स्कान्दे च—

असम्यक्सम्यगिति च व्यवस्थाभेदतस्सुराः ।
व्याप्त्यव्याप्तियुतास्त्वन्ये चिद्गुणेनैव नान्यथा ।

(१८) चिद्गुणस्य स्वरूपत्वात्तद्व्याप्तिश्चेति युज्यते ।

'चिद्गुणेन' ज्ञानाख्यगुणेनेति । अनेन पञ्चमी तृतीयार्थे गुणव्याप्तिमपेक्ष्येति ल्यब्लोपनिमित्तेत्युक्तं भवति । शरीराङ्गेषु हृदि च व्याप्तिरव्याप्तिरिति । अनेन सूत्रे ज्ञस्याविरोध इति पदानुषङ्गेणाऽणोरपि जीवस्य व्याप्यव्याप्त्यविरोध इति दार्ष्टान्तिकांशो व्याख्यातः । इति चेत्यनन्तरमविरोध इतिपदमनुषञ्जनीयम् । एवं वा विरोधपरिहारः कार्य इत्यर्थः । अनेन—जीवस्य गुणिनोऽणुत्वेऽपि 'आलोकवत्' प्रदीपप्रकाशवत् गुणात् चिद्गुणस्य व्याप्तियोगादविरोधः । न तत्र तत्र परिज्ञानायोगाख्यविरोध इति चेतीतिशब्दाध्याहारेण सूत्रार्थ उक्तो भवति ।

(१७) नन्वविरोधसूत्रोक्तांशव्याप्तिः गुणाद्वेत्युक्तप्रकाशव्याप्तिश्चैकत्र विरुद्धेत्यत आह—स्कान्दे चेति ॥ यथाऽविरोधस्तथोक्तमिति शेषः । चशब्दो वचनान्तरसमुच्चये । यथोक्तं तत्त्वप्रदीपे—न केवलं स्कान्दे, किन्त्वन्यत्र चेति । किमुक्तमित्यतस्तत्पठति—असम्यगिति । 'हि' यतः 'सुराः' देवा असम्यक्सम्यगित्यवस्थाभेदत एकस्मिन्नेव शरीरे हृदयादितरस्थानेष्वंशैरसम्यगवस्थानं, हृदये तु अंशिस्वरूपेण सम्यगवस्थानमित्यवस्थाभेदमपेक्ष्यैव व्याप्त्यव्याप्तियुताः, एवं देवांशा अर्जुनादयोऽपि प्रत्येकं हृदयादितरत्रासम्यक्तस्मिंश्च सम्यगवस्थानेन व्याप्त्यव्याप्तियुताः । एवमंश्यपेक्षयाऽप्यव्याप्तियुताः असम्यगवस्थिताश्चांशिनस्त्वंशापेक्षया सम्यगवस्थिताः व्याप्तियुताश्च, न त्वन्यथा । देवादिभ्योऽन्ये नरास्तु प्रकाशगुणेनैव व्याप्तियुताः, न देववत्सान्द्रव्याप्तिभाजः । अतो जीवानामणुत्वेऽपि न तत्र तत्र परिज्ञानायोगाख्यविरोधावकाश इत्यर्थः ।

(१८) नन्वस्तु गुणस्य व्याप्तिः, गुणिनः कुत इत्यत आह—चिद्गुणस्येति ॥ ज्ञानाख्यगुणस्येत्यर्थः । 'स्वरूपत्वात्' अनपायित्वेन गुण्यभिन्न-

शक्तियोगात्सुराणां तु विविधा च व्यवस्थितिः ॥
इति ॥ २६ ॥

॥ इत्युत्क्रान्त्यधिकरणम् ॥ १२ ॥

त्वात्। तद्व्याप्तिरित्यावर्तते। तथा च 'तद्व्याप्तिः' गुणव्याप्तिः गुणिव्याप्तिर्भवति। तर्हि कथं व्यवहारभेद इत्यतोऽप्याह—तद्व्याप्तिरिति। गुणव्याप्तिर्गुणिव्याप्तिश्चेति व्यवहारभेदोऽपि युज्यते। कुतः? 'चिद्गुणस्य स्वरूपत्वात्' सविशेषाभिन्नत्वात्। सम्यगसम्यगवस्थाभेदेन व्याप्यव्याप्तियुक्तत्वं च न देवेषु सर्वत्रैकविधमित्याह—शक्तियोगादिति। 'सुराणां' देवानां तु 'शक्तियोगात्' गन्धर्वादिभ्योऽधिकशक्तयाख्यादुपायात्तेभ्यः उत्कृष्टा व्यवस्थितिः युक्ता। देवेष्वपि केषांचिदधमेभ्योऽधिकशक्तियोगात्कदाचिद्बहुस्थानेषु प्रायः सम्यगवस्थानम्। अत्युत्तमानां भगवत्प्रसादादिच्छया सम्यगवस्थानं व्याप्तिश्चाभ्यधिका। तेषामित्युक्तेः अवतारेष्वपि केषांचित्परमार्थपरायणानां महात्मनां तत्त्वविद्याचार्यवर्याणां मूलरूप इव सौष्ठवसार्वज्ञसौलक्षण्यादिगुणाः परिदृश्यमानाः युज्यन्ते। यथा मध्वाचार्यवर्याणामिति। एवं 'विविधा' नानाविधा 'व्यवस्थितिः' विशिष्टावस्थावस्थानं युक्तमेवेत्यर्थः। न चैवं 'अणूनामपि जीवानां प्रकाशो व्यापको भवेत्। अण्डमात्रे बहिश्चापि देवतानां यथाक्रमम्' इति माण्डूकभाष्यविरोधः। तत्र देवानां प्रकाशव्याप्त्युक्तेरिति वाच्यम्। देवतानां जीवानामिति सामानाधिकरण्येन अस्य वाक्यस्य देवमात्रपरत्वेऽपि देवानां अंशपरित्यागेन केवलं प्रकाशव्याप्त्यभावेऽपि अंशसहभावेन प्रकाशव्याप्तेरपि सत्त्वात्। यद्वा—प्रकाशशब्दः अंशस्याप्युपलक्षकः। मात्रशब्दोऽवधारणार्थः। तथा च अणूनामपि जीवानां देवेतरेषामण्डमात्रे यथाक्रमं प्रकाशो व्यापकः। अत एव तत्त्वप्रदीपे—'तद्यथाहाणुनश्चक्षुषः प्रकाशो व्याप्त एवमेवास्य पुरुषस्य प्रकाशो व्याप्तः' (शाण्डिल्य.) इति श्रुतिमुदाहृत्य जीवमात्रस्य शरीराद्बहिरपि प्रकाशव्याप्तिरस्तीत्युक्तम्। अतात्त्विकदेवानामण्डमात्रे यथाक्रममंशो व्यापकः। तात्त्विकदेवानां तु यथाक्रमं बहिरपि अंशो व्यापक इत्युभयपरं वाक्यमिति न विरोधः।

॥ इत्युत्क्रान्त्यधिकरणम् ॥ १२ ॥

॥ १३. व्यतिरेकाधिकरणम् ॥

(१) 'स नित्यो निरवयवः पुण्ययुक् पापयुक् च स इमं लोकममुं चावर्तते स विमुच्यते स एकधा न सप्तधा न दशधा न शतधा' इति गौपवनश्रुतावेकस्यावहुत्वं प्रतीयते। 'स पञ्चधा स सप्तधा स दशधा भवति स शतधा च सहस्रधा स गच्छति स मुच्यते' इति पाराशर्यायणश्रुतौ वहुरूपत्वं प्रतीयते।

(२) अतो विरोधं परिहरति—

॥ १३. व्यतिरेकाधिकरणम् ॥

(१) अत्राधिकरणे जीवस्यैकरूपत्वानेकरूपत्वविषयश्रुतिविरोधः परिह्रियते। सन्देहबीजं श्रुतिविगानं दर्शयति—स इति॥ 'सः' जीवो नित्यः। तत्र हेतुः—यतो निरवयव इति। तत्रैव हेत्वन्तरम्—पुण्ययुक्पापयुक्चेति। तत्फलभोक्तेत्यर्थः। तथा च नित्यत्वाभावे कृतहानाकृताभ्यागमप्रसङ्गात्तदेष्टव्यमिति भावः। अत एव तेषां वद्धक्रमत्वान्न पृथक् तच्छब्दाभावः। 'इमं' भूलोकं 'प्रत्यावर्तते' पुण्यपापक्षये पुनः पुनरागच्छति। एवममुं परलोकं 'प्रत्यावर्तते' तदा तदा गच्छति 'स विमुच्यते' वन्धात्। 'स एकधा भवति' एकरूप एव भवति। नानेकरूप इत्यर्थः। यद्यपि स एकधेत्याद्येवोदाहार्यम्। तथापि तच्छब्दवोध्यस्य जीवत्वज्ञापनाय, निरवयवत्वादंशवाहुल्येनाप्यनेकरूपत्वं न सम्भवतीति पूर्वपक्षयुक्तिज्ञापनाय च श्रुतेरीश्वरविषयत्वनिवारणाय 'पुण्ययुक्' इत्यादिवाक्यस्य, 'स नित्यः' इति तदादिवाक्यस्य चोदाहरणं कृतम्। एकस्य जीवस्येति शेषः। 'अवहुत्वं' अवहुरूपत्वं एकरूपत्वमिति यावत्। स जीवः 'पञ्चधा' पञ्चरूपः। एवमुत्तरत्रापि। 'गच्छति' परं लोकं प्रति। अत्रापि जीवत्वज्ञापनाय 'स मुच्यते' इति शेषोदाहरणम्। अत्र श्रुतिद्वयेऽपि प्रतिपाद्यो योगिजीवः। स एवेह विचारविषय इति ध्येयम्।

(२) सयुक्तिकावहुरूपत्वश्रुतिविरोधेन वहुरूपत्वश्रुतेः अप्रामाण्यात्तत्साम्याज्जगत्कारणत्वश्रुतेः अप्रामाण्यात् न हरौ श्रुतिसमन्वयो युक्त इति प्राप्ते सिद्धान्तयत्सूत्रमवतारयति—अत इति॥ यतो विरोधो द्वेधा श्रुति-

सू—ॐ ॥ व्यतिरेको गन्धवत्तथा च दर्शयति ॥ ॐ ॥ २७ ॥

यथापुष्पाद्गन्धः पृथग्गच्छत्येवमंशिनो जीवादंशाः पृथग्गच्छन्ति ।

(३) 'अथैक एव सन् गन्धवद्व्यतिरिच्यते । अथैकीभवति । अथ

मूलकः संशयबीजमस्ति, अतः संशयनिवृत्त्यै तं विरोधं परिहरति सूत्रकृदित्यर्थः । सूत्रं व्याचष्टे—यथेति ॥ यथा 'गन्धः' गुणः वायुनाऽऽकृष्टः 'पुष्पात्' पुष्पं विहाय 'पृथक्' पार्थक्येन प्रदेशान्तरस्थितं घ्राणदेशं गच्छति तथा ये योगिजीवांशाः अंशिनो जीवात् पृथग्विभक्ताः सन्तस्तत्र तत्र स्वकार्याय गच्छन्तीत्यर्थः । यद्वा—गन्धशब्दो गन्धवद्द्रव्यावयवपरः । अतएव प्रमेयदीपे 'वायुर्गन्धानिव' इत्यत्र गन्धवतोऽवयवानिति व्याख्यातम् । पृथगित्यनेन व्यतिरेकशब्दस्य पृथग्भावार्थत्वमभिप्रेति । अंशिनोऽशा इत्यनेन सूत्रे ह्रस्येति विपरिणतपदस्यानुवृत्तिरंशैरित्यध्याहारश्च सूचितः । अत एव टीकायाम्—प्राथम्यसाम्येन गुणत्वोक्तिरित्युक्तम् । एतेन 'यथा गन्धस्य भूमेश्च न भावो व्यतिरेकतः' इति तृतीयस्कन्धविरोधोऽपि निरस्तः । न चैवं दीपं विहाय वृत्तेर्द्रव्यत्वसाधकताविवादादिति पूर्वाधिकरणटीकोक्तया गन्धादिगुणानामपि गुणिनं विहाय गमनावगमनात् तथा द्रव्यत्वसाधकगमनदृष्टकचन्द्रिकया च विरोध इति वाच्यम् । गमनोक्तेः सूक्ष्मावयवविषयत्वात्, दृष्टणोक्तेश्च स्थूलावयवविषयत्वात्, पक्षद्वयस्याप्यविरुद्धत्वात् । अत्र भाष्यटीकयोः आलोकगन्धयोर्गुणत्वोक्तिर्मुख्या । द्रव्यत्वोक्तिस्त्वमुख्येति द्रष्टव्यम् ।

(३) ननु विभक्तांशवाहुल्येन जीवस्य बहुरूपत्वाभ्युपगमेऽपि 'स एकधा' (गौपवन.) इति श्रुतिविरोध इत्यतस्तत्र तस्याः स्वरूपैक्यविषयत्वादिति परिहारम्, न च भिन्नांशशून्यत्वादनेकरूपत्वानुपपत्तिरित्यतस्तत्र योगसम्पदोपपत्तेरिति परिहारम्, न चेश्वरेण साम्यापात इत्यतस्तत्र योगिनामपि बहुरूपत्वशक्तेः योगाराधितेश्वरप्रसादायत्तत्वादिति परिहारम्, न चेश्वरस्याप्येतदशक्यमित्यतस्तत्र तस्याचिन्त्यशक्तित्वादिति परिहारं चाभिप्रेत्य कुत एतत्सर्वं ज्ञायत इत्यतस्तत्र प्रमाणप्रदर्शक

वह्वीभवति। तं यथा यथेश्वरः प्रकुरुते तथा तथा भवति सोऽचिन्त्यः परमो गरीयान्' इति शाण्डिल्यश्रुतिः।

(४) अचिन्त्ययेशशक्त्यैव ह्येकोऽवयववर्जितः।
आत्मानं बहुधा कृत्वा क्रीडते योगसम्पदा॥
इति च पाद्मे॥ २७॥

॥ इति व्यतिरेकाधिकरणम्॥ १३॥

तया तथा च दर्शयतीति सूत्रखण्डो योज्य इत्याशयेन तत्सूचितश्रुतिमुदाहरति—अथेति॥ प्रमेयान्तरारम्भार्थोऽथशब्दः। जीवः स्वरूपत एक एव सन् 'गन्धगुणवद्द्रव्यतिरिच्यते' अंशिनं विहायांशैः पृथग्भवति 'अथैकीभवति' पुनः पुनरंशैरैक्यं सम्पद्यते। अथ योगसम्पदा 'वह्वीभवति' बहुरूपस्सम्पद्यते। 'तं' जीवं 'यथा यथा' एकधाऽनेकधा च, तथा तथा भवति जीवः। ईश्वरः अचिन्त्यशक्तिः कुतः। यतः 'परमो' लोकोत्तरो 'गरीयान्' गुरुतमो महत्तम इत्यर्थः। अत्रैक एवेत्युक्तया स्वरूपैक्यमुक्तम्। एकीभवतीत्युक्तया भिन्नांशशून्यत्वमुक्तम्। अथ वह्वीभवतीत्यनेन योगसम्पदा बहुरूपत्वमुक्तम्। तमित्यादिना योगिनां बहुरूपत्वशक्तेः योगाराधितेश्वरप्रसादाधीनत्वमुक्त्वा तत्साम्यं निराकृतम्। सोऽचिन्त्यशक्तिरितीश्वरस्याचिन्त्यशक्तित्वोक्तया ईश्वरस्याप्यशक्यमिदमित्याशङ्का निवारिता। परमो गरीयानित्यनेन लोकविरोधः परिहृतः। श्रुतिरित्यनन्तरमुक्तार्थे प्रमाणमिति शेषः।

(४) भिन्नांशशून्यत्वस्य योगसम्पदा इत्यस्य च श्रुतौ कण्ठतोऽनुक्तेस्तदर्थं अत्रार्थे चशब्दसूचितां स्मृतिं दर्शयति—अचिन्त्ययेति॥ स्वरूपत एक एव जीवः 'अवयववर्जितो' भिन्नांशशून्योऽपि अचिन्त्ययेश्वरशक्तया प्राप्तया 'योगसम्पदा' योगश्च सा सम्पच्च परमयोगशास्त्रोक्तयोगाख्यसम्पदा अचिन्त्यशक्तीश्वरप्रसादागतध्यानोपायाख्यसम्पत्त्या स्वात्मानं बहुधा कृत्वा क्रीडत इत्यर्थः। 'एतेन योगः' इत्यत्रेतरयोगशास्त्रस्यैव दृष्टार्थविषये अप्रामाण्यमुक्तं भगवता, न तु परमयोगस्येति तत्त्वप्रदीप एवोक्तम्। इति पाद्मे इत्यनन्तरं सूत्रकृदुक्तमुक्तमिति शेषः।

॥ इति व्यतिरेकाधिकरणम्॥ १३॥

॥ १४. पृथगधिकरणम् ॥

(१) 'तत्त्वमसि' (छा. ६-८-७.) 'अहं ब्रह्मास्मि' (बृ. ३-४-१०.) इत्यादिषु जीवस्य परेणाभेदः प्रतीयते। 'नित्यो नित्यानां चेतनश्चेतनानां' (श्वे. ६-१३.) 'द्वा सुपर्णा' (श्वे. ४-६.) इत्यादिषु भेदः।

(२) अत उच्यते—

सू—ॐ ॥ पृथगुपदेशात् ॥ ॐ ॥ २८ ॥

'भिन्नोऽचिन्त्यः परमो जीवसङ्घात्पूर्णः परो जीवसङ्घोऽल्पपूर्णः।

॥ १४. पृथगधिकरणम् ॥

(१) अस्मिन्नधिकरणे जीवस्य परमात्माभिन्नत्वादिविषयश्रुतिविरोधः परिह्रियते। संशयबीजं श्रुतिविज्ञानं दर्शयति—तत्त्वमसीति ॥ 'इत्यादिषु' एवमादिश्रुतिवाक्येषु। आदिशब्देन 'स यो हवै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' (मु. ३-२-९.) इत्यादिकं गृह्यते। 'परेण' परमात्मना। 'नित्यो नित्यानाम्' इत्यत्र 'चेतनश्चेतनानाम्' इत्यत्र च निर्धारणषष्ठ्या जीवस्य भेदः प्रतीयते। 'द्वा सुपर्णा' इत्यत्र तु अभेदविरोधिद्वित्वसङ्ख्यया भेदवाचकद्विशब्देनैव वा भेदोऽवगम्यत इति ध्येयम्। 'तत्त्वमसि' इत्येतदानन्दमयाधिकरणे, 'नित्यो नित्यानाम्' इत्येतत् 'नात्मा' इत्यत्र, 'द्वा सुपर्णा' इत्येतत् द्युभ्वाधिकरणे व्याख्यातम्।

(२) 'तत्त्वमसि' इत्यादिश्रुतेः पड्विधतात्पर्यलिङ्गोपेतत्वेन प्रबलत्वात् परमात्माभिन्न एव जीव इति पूर्वपक्षे सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ उपदेशादित्यस्यार्थः श्रुतेरिति। नन्वभेदश्रुतेरभिन्नो जीव इत्यपि सुवचत्वादवधारणानुपपत्तिरित्यतः सोपपत्तिकेति हेतुविशेषणमदायि। विरुद्धधर्माधिकरणत्वरूपयुक्तियुक्तेत्यर्थः। सावधारणस्य पृथगिति साध्यपदस्यार्थो भिन्न एवेति। स्वात्मनेतिप्रकृतपरमात्मन इति शेषः। च इत्यस्य अनुवृत्तपदस्यार्थो जीव इति। श्रुतिसूत्रयोः प्रतिज्ञावाक्यादित्वेऽपि हेतुगर्भा प्रतिज्ञाऽपि उपपत्तिज्ञापिकेति प्रमाणलक्षणोक्तेरनियमपक्षमाश्रित्य हेतुगर्भप्रतिज्ञैवेह प्रदर्शिता। एवमन्यत्रापि द्रष्टव्यम्। यतः 'परः'

यतस्त्वसौ नित्यमुक्तो ह्ययं च बन्धान्मोक्षं तत एवाभिवाञ्छेत्' इति सोपपत्तिककौशिकश्रुतेर्भिन्न एव जीवः ॥ २८ ॥

(३) सू—ॐ ॥ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ ॐ ॥ २९ ॥

परमात्माऽचिन्त्यः साकल्येन 'जीवसङ्घात्' जीवसमुदायात् 'परमः' उत्तमः पूर्णः गुणैः। जीवसङ्घस्तु चिन्त्यः परमत्वावधिभूतोऽपूर्णश्च 'हि' प्रसिद्धः। किञ्च—यतोऽसौ हरिर्नित्यमुक्तः, अयं जीवश्च संसरति बन्धान्मोक्षं 'ततः' परमादेव स्वम्याभिवाञ्छति 'हि' प्रसिद्धम्। अतो जीवविरुद्धधर्मत्वात् ततो भिन्न एवेति श्रुत्यर्थः। यद्यपि श्रुतावीश्वरधर्मिकभेदस्यैव श्रवणात् 'जीवैक्यं परमात्मनः' इत्यनुव्याख्याने तथैवोक्तत्वाच्च ईश्वरो जीवाद्भिन्न इति प्रतिज्ञातव्यम्। तथापि जीवपेटिकात्वादेकवित्तिवेद्यतया विरुद्धधर्मोक्तिद्वारा जीवधर्मिकभेदस्यापि श्रुत्युक्तत्वादेवमुक्तम्। अत एव सुधायां—यतो विष्णुः जीवात् जीवश्च विष्णोः पृथगिति साध्यनिर्देशः कृतः।

(३) नन्वेवं सति 'तत्त्वमसि' इत्याद्यद्वैतश्रुतेर्निर्विषयतयाऽप्रामाण्यं स्यादित्याशङ्क्य परिहरन्सूत्रमुपन्यस्य व्याचष्टे—तदिति ॥ ज्ञानानन्दादिब्रह्मगुणा एवेत्युक्त्या अभेदेन्युक्त्या च तदिति तच्छब्दद्वयेन स्वात्मनेतिप्रकृतस्य परमात्मनः परामर्शः, तस्य गुणास्तद्गुणा इति विग्रहः, तद्गुणशब्दस्तद्गुणसदृशगुणपरः, द्वितीयतच्छब्दो भावप्रधान इति च सूचितम्। अस्येत्यनेन ज्ञस्येति विपरिणतपदस्य सूत्रेऽनुवृत्तिस्सूचिता। न चायोग्यस्य जीवस्य ज्ञानानन्दादिगुणाभाव इति वाच्यम्। अस्य शास्त्रस्य विशिष्टाधिकारिकत्वेन तं प्रत्येव 'तत्त्वमसि' इत्याद्युपदेशप्रवृत्तेः अस्य सज्जीवस्येत्यर्थाभ्युपगमात्। सारपदमनूद्य व्याचष्टे—सारः स्वरूपमिति। न च ज्ञानानन्दादिरूपब्रह्मगुणानां कथं जीवस्वरूपत्वमिति वाच्यम्। ब्रह्मगुणा इत्यस्य तद्गुणसदृशगुणा इत्यर्थाभ्युपगमात्। एवं सूत्रेऽपि गुणशब्दस्तद्गुणसदृशगुणपरः। अत इति सावधारणम्। अनेन सौत्रतुशब्दो व्याख्यातः। तद्व्यपदेश इत्यस्य पर्यवसितार्थोऽभेदव्यपदेश इति। 'तत्त्वमसि' इत्यादि-

ज्ञानानन्दादिब्रह्मगुणा एवास्य यतः सारः स्वरूपमतोऽभेदव्यपदेशः। यथा सर्वगुणात्मकत्वात्सर्वात्मकत्वं ब्रह्मण उच्यते 'सर्वं खल्विदं ब्रह्म' (छा. ३-१४-१.) इति।

(४) भविष्यत्पुराणे च—

भिन्ना जीवाः परो भिन्नस्तथाऽपि ज्ञानरूपतः।
प्रोच्यन्ते ब्रह्मरूपेण वेदवादेषु सर्वशः॥ इति॥ २९॥

॥ इति पृथगधिकरणम्॥ १४॥

परब्रह्मैक्योक्तिरित्यर्थः। ज्ञानानन्दादीत्यादिवाक्यं च यतो जीवस्य ब्रह्मगुणसदृशगुणस्वरूपत्वं, अतस्तद्विवक्षयैव गौण्या वृत्त्या जीवे ब्रह्माभेदोक्तिः अभेदप्रापकतदादिपदप्रयोगो, न त्वभेदाभिप्रायेण। यत एवमभेदव्यपदेशोऽन्यथोपपन्नः, अतो न तस्याप्रामाण्यमिति साध्याध्याहारेणावृत्त्या योज्यम्। एवं यतस्तद्व्यपदेशो जीवस्य तद्गुणसारत्वमपेक्ष्योपपन्नोऽतो नाभेदश्रुतेरप्रामाण्यमिति प्रतिज्ञाध्याहारेण सूत्रयोजना द्रष्टव्या। सर्वगुणात्मकत्वादिति। समस्तजगद्गुणसदृशगुणस्वरूपत्वमपेक्ष्य यथा 'सर्वं खल्विदं ब्रह्म' इति छन्दोगश्रुतौ प्रकृष्टज्ञातृत्वान्निमित्तात् प्राज्ञशब्दोक्तस्य ब्रह्मणः 'सर्वात्मकत्वं' जडजगदभेदः 'उच्यते' व्यपदिश्यते तथैवेत्यर्थः। यथेत्यादिना प्रज्ञ एव प्राज्ञः तद्वत् तस्य सर्वाभेदोक्तिवदिति दृष्टान्तांशो व्याख्यातः। यद्यपि छान्दोग्यभाष्ये 'इदं ब्रह्मातिसामीप्यात् सर्वं पूर्णगुणत्वतः' इति वचनानुसारेणेदंसर्वपदयोः परमात्मनि मुख्यवृत्तिरभिहिता, न तु गौणी वृत्तिः। तथापि पदसमन्वयाभिप्रायेण तस्य प्रवृत्तत्वात्, वाक्यान्वयाभिप्रायेणात्र गौणवृत्त्यभिधानात् न विरोधः।

(४) अत्रैव स्मृतिसम्मतिमाह—भविष्यदिति॥ न केवलं सूत्रकृता सूत्र एवैतदुक्तम्, किंतु स्पष्टोक्तिरूपे भविष्यत्पुराणे चोक्तमित्यर्थः। किमुक्तमित्यतस्तत्पठति—भिन्ना इति। यद्यपि जीवाः परमात्मनो भिन्नाः, परमात्माऽपि जीवेभ्यो भिन्नः। तथापि सर्वेषु 'वेदवादेषु' 'तत्त्वमसि' इत्यादिषु 'ब्रह्मरूपेण' परब्रह्माभेदेन 'प्रोच्यन्ते' व्यपदिश्यन्ते। कस्मात्? 'ज्ञानरूपतः' तदुपलक्षितब्रह्मगुणसदृशगुणस्वरूपत्वादित्यर्थः। अनेन

॥ १५. यावदधिकरणम् ॥

(१) जीवस्याप्युत्पत्तिरुक्ता । अतस्तस्य 'सोऽनादिना पुण्येन पापेन चानुबद्धः । परेण निर्मुक्त आनन्त्याय कल्प्यते' ( ) इत्यनादिकर्मसम्बन्ध आनन्त्यावाप्तिश्च न युज्यत इति ।

(२) अत आह--

सू—ॐ ॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ॐ ॥ ३० ॥

जीवब्रह्माभेदोक्तेः नित्यादिसाम्यं निमित्तमित्युक्तं भवति । इति भविष्यत्पुराणे इतीतिशब्दान्वयः ।

॥ इति पृथगधिकरणम् ॥ १४ ॥

॥ १५. यावदधिकरणम् ॥

(१) अत्राधिकरणे जीवानित्यत्वविषयश्रुतिविरोधः परिह्रियते । सफलं पूर्वपक्षमाह--जीवस्येति ॥ सोऽत इत्यत्रेति भावः । न केवलं वियदादेः, किंतु जीवस्यापीति वा, न केवलं जीवोत्पत्तेः किंतु जीवस्यापीति वाऽयमर्थः । न केवलं पूर्वोक्तन्यायेनोत्पत्तिमात्रं जीवस्य, किंतु उत्पत्तिमतो भावस्य विनाशित्वरूपानित्यत्वनियमादनित्यत्वमपि प्राप्तमित्यपिशब्दाभिप्रायः । अनेन सयुक्तिकपूर्वपक्षः प्रदर्शितः । ततः किमित्यत आह--अत इति । इतिशब्दानन्तरं श्रुत इति शेषः । तथा च यतस्तस्य जीवस्योत्पत्तिमत्त्वं, अतोऽत्र श्रुतोऽनादिकर्मसम्बन्धो न युज्यते । एवं यतो विनाशित्वं, अतोऽविनाशित्वप्राप्तिरूपानन्त्यावाप्तिर्मुक्तिश्च न युज्यत इति योजना । अनेन पूर्वपक्षफलं दर्शितम् । 'सः' जीवः । अनादिनेत्येतत् बन्धकपुण्यपापयोरुभयोरपि विशेषणम् । परेणेत्येतत् परमात्मना बद्धः, परेण बन्धाद्बन्धककर्मणा निर्मुक्तः, इत्युभयत्रान्वेति । 'आनन्त्याय' अविनाशाय मोक्षाय 'कल्प्यते' समर्थो भवति । तत्प्राप्नोतीति श्रुत्यर्थः ।

(२) सिद्धान्तयन्सूत्रमवतार्य व्याचष्टे—अत इति ॥ परमात्मेत्यनेन आत्मशब्दो व्याख्यातः । 'सिद्धति' इत्यनेन भाविशब्दः । 'अनाद्यनन्तत्वेन' उत्पत्तिनाशशून्यत्वेनेति सत्त्वप्रकार उक्तः । 'एवं' तावत्कालं

यावत्परमात्मा तिष्ठत्यनाद्यनन्तत्वेनैवं जीवोऽपि ।

(३) 'नित्यः परो नित्यो जीवोऽनित्यास्तस्य धातवः । अत उत्पद्यते च म्रियते च विमुच्यते च' इति च आग्निवेश्यश्रुतिः ।

(४) आत्मा नित्यस्सुखदुःखे त्वनित्ये, जीवो नित्यो धातुरस्य

जीवोऽपि निष्ठतीत्यनेन सूत्रे शइत्यनुवृत्तिस्सूचिता । न केवलं परमात्मा किंतु जीवोऽपीति समुच्चये अपिशब्दः । अनेन बिम्बस्य परमात्मनोऽनाद्यनन्तत्वात् जीवस्वरूपोपाधेश्च यावदात्मभावित्वात् परमात्मनोऽनन्तत्वेन बिम्बोपाधिसन्निधेरनाद्यनन्तत्वात् नित्यत्वादिति हेतुसमुच्चायकतया सौत्रचशब्दो व्याख्यातः । न दोष इति साध्यांशः अनादिकर्मसम्बन्धः आनन्त्यावाप्तिश्च न युज्यत इत्युक्तो दोषो नेति पूर्वपक्षफलकथनपरभाष्येणैव व्याख्यातप्रायत्वात् पुनर्न व्याख्यातः । अनेनैव 'सोऽनादिना' इति श्रुत्यप्रामाण्यदोषोऽपि नेत्यपि व्याख्यातः ।

(३) कुत एतदखिलं सिद्धमित्यतः तत्र प्रमाणप्रदर्शकतया तद्दर्शनादिति सूत्रखण्डं योजयति—नित्य इति ॥ बिम्बभूतः 'परः' परमात्मा नित्यः । तथा 'जीवः' प्रतिबिम्बोपाधिभूतः जीवस्वरूपप्रकाशो 'नित्यो' यावत्परमात्मभावी । न चैवं 'ब्रह्मन् लयमभ्युपैति' इति जीवस्य ब्रह्मणि लयश्रुतिविरोध इत्याह—अनित्या इति । यतस्तस्य जीवस्य 'धातवो' बाह्यदेहाः अनित्याः अतो जीवा उत्पद्यन्ते 'म्रियन्ते' नश्यन्ति इत्युच्यन्ते । तथा च श्रुतेरुपाधिविषयत्वात् न तद्विरोध इति भावः । स्वरूपतोऽविनाशित्वादेव जीवो देहबन्धात् 'विमुच्यते' आनन्त्यावाप्तिरूपमुक्तिभागी च भवतीति श्रुत्यर्थः । चशब्दः क्रियासमुच्चये ।

(४) सूत्रे दर्शनाच्चेत्यपि चशब्दान्वयेन सूचिते स्मृती दर्शयति—आत्मेति ॥ सुखदुःखपदाभ्यां बाह्योपाधिरुपलक्ष्यते । अत एव टीकायाम्—धात्वादिपदोदितेत्युक्तम् । भारते आत्मेति पादः एकस्थानस्थितः । आत्मेत्यस्य सुखदुःखेत्यस्य च व्याख्यानरूपो जीवधातुपदघटितोऽन्यः पादः स्थलान्तरगतः । अत एव न पुनरुक्तिः । धातुस्त्वित्यन्वयः । उभयत्रापि तुशब्दो वैलक्षण्यद्योतकः । भारत इत्यनन्तरं वचनमिति शेषः । आग्नि-

त्वनित्यः । इति च भारते ॥ ३० ॥

॥ इति यावदधिकरणम् ॥ १५ ॥

॥ १६. पुंस्त्वाधिकरणम् ॥

(१) 'विज्ञानात्मा सह देवैश्च सर्वैः' (प्र. ४-११.) 'स आनन्दः स परेणामुं लोकं नीयते स विमुच्यते' इति जीवस्य ज्ञानानन्दादिरूपत्वमुच्यते । 'स दुःखाद्विमुक्त आनन्दी भवति । सोऽज्ञानाद्विमुक्तो ज्ञानीभवति । सोऽबलाद्विमुक्तो बलीभवति । स

वेद्यश्रुतिवचनमित्युभयत्रापि यत इति शेषः । अस्यैवं जीवोऽपीति पूर्वेणान्वयः । चशब्दः श्रुतिस्मृतिसमुच्चयार्थः ।

॥ इति यावदधिकरणम् ॥ १५ ॥

॥ १६. पुंस्त्वाधिकरणम् ॥

(१) अत्राधिकरणे जीवस्य आनन्दादिरूपत्वतदभावश्रुत्योर्विरोधः परिहियते । श्रुतिविरोधरूपं सन्देहबीजं दर्शयति—विज्ञानात्मेति ॥

विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र ।
तदेतदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेश ॥

इति पदप्रश्नश्रुतिः । 'स आनन्दः' इति श्रुत्यन्तरम् । इतीति । इत्यादिश्रुतिभिरित्यर्थः । सोम्येति कम्यचित्सम्बोधनम् । तुशब्दोऽवधारणे । तथा च 'विज्ञानात्मा' विज्ञानस्वरूपो जीवः 'प्राणाः' चक्षुराद्याः तद्विषयाश्च रूपादयः 'भूतानि' पृथिव्यादीनि तन्मात्राश्च 'सर्वैर्देवैः' अभिमानिभिः सूर्यादिभिः सह 'यत्र' यस्मिन् अक्षरे ब्रह्मणि सम्प्रतिष्ठन्ति । तदेतदक्षरं यः पुरुषो 'वेदयते' विजानाति 'सः' उक्तप्रकारेण सर्वज्ञः 'सर्वं' पूर्णं परं ब्रह्म 'आविवेशैव' ध्रुवमाविशत्येवेति प्रथमश्रुत्यर्थः । 'सः' जीवः 'आनन्दः' आनन्दरूपः । एवं बलरूपः ओजोरूपः 'परेण' परमात्मनाऽमुमामुष्मिकं लोकं प्रति नीयते । तत्पूर्वं तेनैव देहसम्बन्धाद्विमुच्यत इति द्वितीयश्रुत्यर्थः । आनन्दादिगुणानां प्रत्येकमभेदे तात्पर्यज्ञापनार्थं स इत्यभ्यासः । स परेणेत्यधिकांशोदाहरणं अस्य ईश्वरतात्पर्यज्ञापनार्थं स इत्यभ्यासः । स परेणेत्यधिकांशोदाहरणं अस्य ईश्वर-

नित्यो निरातङ्कोऽवतिष्ठते' इति पैङ्गिश्रुतावनानन्दादिरूपत्वं प्रतीयते।

(२) अत आह—

सू—ॐ ॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ॐ ॥ ३१ ॥

विषयतानिरासाय। एवं पूर्ववाक्यस्यापि 'प्राणा भूतानि' इत्युत्तरवाक्यबलात् ईश्वरविषयता निराकार्या। 'सः' जीवः। आनन्दीभवतीत्येकं पदम्। पूर्वमनभिव्यक्तानन्दरूपो मुक्तावभिव्यक्तानन्दरूपः सम्पद्यत इत्यर्थः। अज्ञानादबलादितिच्छेदः। ज्ञानीभवति बलीभवतीत्यस्यापि उक्त एवार्थः। केचित्तु—इतः परमानन्दवान् ज्ञानवान् भवतीति इनिप्रत्ययान्ततया भिन्नपदत्वाश्रयेण व्याचक्षते। तत्तु 'आनन्दीभवति स्फुटम्' इत्यनुव्याख्याने आनन्दस्य स्वभावसिद्धत्वाद्भवतीति कथमित्यतः—स्फुटमित्युक्तमिति सुधाविरुद्धम्। अनया आनन्दीभवतीत्येकपदप्रतीतेः। स जीवो 'निरातङ्को' निर्भयस्सन् नित्योऽवतिष्ठते मुक्ताविति श्रुत्यर्थः। 'अनानन्दादिरूपत्वं' आनन्दादिरूपत्वाभावः श्रुतौ प्रतीयत इति। करणे अधिकरणत्वोपचारः। पूर्वं ज्ञानस्य प्रथमं ग्रहणात् तत्र तद्विरुद्धस्यैव ग्रहणे कर्तव्ये श्रुत्यनुसारादनानन्देत्युक्तम्। पूर्वत्राप्ययमेव हेतुः।

(२) न जीवो ज्ञानादिरूपः, तथाश्रुतेरानन्दादिरूपत्वस्य अननुभवाच्चेति प्राप्ते सिद्धान्तयन्सूत्रमवतार्य व्याचष्टे—अत इति॥ बालस्येति। स्त्रीपुंसरूपचेतनस्येत्यर्थः। सामान्योक्त्या सौत्रादिशब्दः स्त्रीत्वार्थकतया व्याख्यातः। सदेवेति। बाल्ये विद्यमानमेवेत्यर्थः। न तु पूर्वं असदित्येवार्थः। 'पुंस्त्वं' अपत्योत्पादनशक्तिः। स्त्रीत्वस्याप्युपलक्षणमेतत्। 'यौवने' यौवनावस्थायाम्। अनेन पुंस्त्वादिवदिति दृष्टान्तांशो व्याख्यातः। सूत्रे अवधारणार्थकतुशब्दस्य सतस्त्विति सम्बन्धं, अस्येत्यस्य प्रकृततद्गुणसारत्वप्रविष्टगुणपरामर्शकत्वमभिप्रेत्य स्वरूपतया मुक्तेः पूर्वमपि सतामेव आनन्दादीनामित्युक्तम्। यद्यपि सूत्रानुसारात्सत एव आनन्दादेरिति वक्तुमुचितम्। तथापि ज्ञानानन्दादेरोजोबलादेर्बहुधर्मस्य सङ्ग्रहाय

यथा बालस्य सदेव पुंस्त्वं यौवनेऽभिव्यज्यते एवं सतामेवानन्दादीनां व्यक्त्यपेक्षया तदुक्तिः ।

(३) बलमानन्द ओजश्च सहो ज्ञानमनाकुलम् ।
स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्भिभोः ॥
इति गौपवनश्रुतिः ॥ ३१ ॥

बहुवचनप्रयोगः । 'व्यक्त्यपेक्षयैव' मुक्तौ सम्यगभिव्यक्तिनिमित्तेनैव, न तूत्पत्तिनिमित्तेनेत्येवकारार्थः । सम्यग्व्यक्त्यपेक्षयेत्यनेन योगशब्दो निमित्तार्थः, अम्बुवदग्रहणादित्यत्रैव तुशब्दो विशेषार्थोऽपीत्युक्तं भवति । तदुक्तिरिति । आनन्दीभवतीत्यादिव्यपदेश इत्यर्थः । उपपद्यते यत इति शेषः । अनेन सूत्रे तद्व्यपदेशस्येति विपरिणतपदस्य अनुषङ्गः, योगादित्यस्य आवृत्तिश्च सूचिता । अस्य हेतोः न 'दोषः' न श्रुतिविरोधाख्यो दोष इति पूर्वसूत्रादनुषक्तसाध्येनान्वयः । अनेन—'पुंस्त्वादिवत्' यथा पुरुषयोषिदादीनामपत्योत्पादनशक्तेः स्वरूपत्वेऽपि यौवने अभिव्यक्तेः अन्यदा अनभिव्यक्तेश्च इदानीं पुमान् पूर्वं तु नेति व्यवहारविशेषोपयोगिता, तथा ज्ञस्य जीवस्य मुक्तेः पूर्वमपि सतोऽस्य ज्ञानानन्दादिगुणसमुदायस्य मुक्तौ 'सतः' प्रसन्नादीश्वरात्तत्प्रसादेन सम्यगभिव्यक्तिरूपयोगान्निमित्तादेव आनन्दीभवतीत्यादिव्यपदेशस्य पूर्वमानन्दाद्यननुभवस्य मुमुक्षुप्रयत्नस्य च योगादुपपत्तेर्न दोषो न श्रुत्यादिविरोधः । अतो भवत्येव जीव आनन्दादिरूप इति सूत्रार्थ उक्तो भवति ।

(३) ननु प्रागसतामुत्पत्तिवादिनी श्रुतिः किं न स्यात्, किमभिव्यक्तिकल्पनयेत्यत आह—बलमिति ॥ 'ओजः' पराक्रमः । 'सहः' सहनशक्तिः । 'अनाकुलं' असंशयविपर्ययं ज्ञानम् । एतानि जीवस्य स्वरूपाण्येव मुक्तौ 'परमाद्भिभोः' विष्णोः तत्प्रसादात् महत्तया व्यज्यन्त एव, न तु प्रागसन्ति अपूर्वतया उत्पद्यन्त इत्यर्थः । अत एव बृहद्ब्राह्मे—

अल्पं तेजस्तथैवाल्पं जीवरूपं हि संसृतौ ।
तथैव सुमहत्तेजः करोति भगवान् महत् ॥ इति ॥

स्वरूपस्यैव तेजसो मोक्षे भगवतः सम्यग्व्यक्तिरेवोक्ता न तूत्पत्तिः । 'अल्पं तेजः सुमहत्करोति' अल्परूपं परिमाणतो महत्करोति मुक्तावित्यर्थः । एतच्च

(४) सू—ॐ ॥ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॥ ॐ ॥ ३२ ॥

सज्जीवविषयम्। एवं तमोयोग्यानां दुःखादिरूपत्वं नित्यसंसारिणां मिश्रत्वं च ज्ञातव्यमिति। गौपवनश्रुतिरिति। यत इति शेषः। अस्यातः सतां व्यक्तिमेव आनन्दीभवतीत्यादिश्रुतिराह न तूत्पत्तिमित्यध्याहृतसाध्येनान्वयः।

(४) यदुक्तं जीवस्वरूपभूतानामानन्दादीनां प्रागनभिव्यक्तानां मोक्षे अभिव्यक्तिरिति तदयुक्तम्। जीवस्वरूपस्य नित्याभिव्यक्तत्वेन तत्स्वरूपभूतानामीश्वरप्रसादेन अभिव्यक्त्ययोगादिति चेत्—तत्र प्रष्टव्यम्, किं जीवस्यानन्दादिरूपत्वमङ्गीकृत्य तदावरणाभावात्तन्निवृत्तिर्नाभ्युपगम्यते ? किं वा आनन्दादिरूपत्वमेवानङ्गीकृत्येदमुच्यते ? प्रथमपक्षदूषणाय (न च जीवस्वरूपस्याप्यानन्दादेः आवरणनिमित्तात्प्रागनभिव्यक्तिः, ईश्वरप्रसादेन आवरणनिवृत्तौ तदभिव्यक्तिर्भवतीति तन्निवृत्त्यर्थात्यर्थप्रसादार्थं मुमुक्षुप्रयत्नो युक्त इति वाच्यम्। आवरणाभावेन तन्निवृत्तेरनभ्युपगमादित्याशङ्कां परिहर्तुं) सूत्रमुपन्यस्य व्याचष्टे—नित्येति ॥ सौत्रान्यथाशब्दार्थमाह—व्यक्त्यनङ्गीकार इति। जीवस्य आनन्दादिरूपत्वमङ्गीकृत्य आवरणाभावान्मोक्षे आवरणनिवृत्तिरूपव्यक्तेरनङ्गीकारे आवरणस्यैवानङ्गीकार इति यावत्। तत्त्वप्रदीपे तु पूर्वं सतोऽप्यव्यक्तस्य ज्ञानानन्दादेः पश्चाद्व्यक्तिरित्यनङ्गीकार इत्यन्यथाशब्दार्थ उक्तः। तस्याप्ययमेवाशयः। इदं चापाद्यत्रयेऽप्यन्वेति। 'देवानां' मुक्तियोग्यानामिति। अनेन सूत्रे ज्ञानानामित्यस्यानुवृत्तिस्सूचिता। त्रिविधाधिकारिनिर्देशेन वाशब्दो व्यवस्थितविकल्पार्थ इति सूचितम्। अस्येत्यनुवृत्तपदव्याख्यानं—आनन्दादीनामिति सर्वत्रान्वेति। उत्तरत्र आनन्दादिर्वैषयिको ग्राह्यः। प्रसज्येते इत्येतद्विपरिणामेन पूर्वत्रापि सम्बध्यते। तथा च व्यक्त्यनङ्गीकारे देवानामानन्दादीनां देवसम्बन्ध्यानन्दज्ञानादीनां 'नित्योपलब्धिः' नित्यमनुभवः प्रसज्यते। एवं व्यक्त्यनङ्गीकारे 'असुराणां' मोक्षायोग्यानामानन्दादीनां 'अनुपलब्धिः' आनन्दाद्युपलब्धिविरुद्धदुःखाद्युपलब्धिर्नित्यं स्वरूपदुःखोपलब्धिरेव प्रसज्यते, न तु कदाचिद्विषयसुखाद्यनुभवः। एवं व्यक्त्य-

व्यक्तयनङ्गीकारे देवानां नित्योपलब्धिरानन्दादीनामसुराणां नित्यानुपलब्धिर्मनुष्याणां च नित्योपलब्ध्यनुपलब्धी प्रसज्येते ॥

नङ्गीकारे 'मनुष्याणां' मध्यमानां आनन्दादीनां नित्योपलब्ध्यनुपलब्धी प्रसज्येते इति योजना । नित्योपलब्ध्यनुपलब्धी इत्यनेन अन्यतरशब्दः उभयार्थतया व्याख्यातः । चः समुच्चये । अत्रानुपलब्धिशब्देन केवलायाः दुःखाद्यनुपलब्धिविशिष्टायाः सुखाद्युपलब्धेरभावो विवक्षितः । तथा च सुखाद्यनुपलब्ध्यापादनेन दुःखानुपलब्धिरेव आपादिता भवति । एवं च मध्यममनुष्याणां मिश्ररूपत्वात्स्वरूपभूतस्य सुखस्य दुःखस्य चोपलब्धिः समैव स्यात्, न तु कदाचिद्विषयसुखदुःखोपलब्धिः, आवरणाभावे अनुभवाभावायोगादिति भावः । अनेन असुरपक्षे अनुपलब्ध्यापादनमयुक्तम्, तेषां स्वरूपानन्दादेरभावादेव अनुपलब्ध्युपपत्तेः । अनावरणस्य अविद्यमानानन्दानुपलब्धि प्रत्यप्रयोजकत्वादिति शङ्का, एवं मध्यममनुष्यपक्षेऽप्यनुपलब्ध्यापादनमयुक्तम, आवरणाभावस्योपलब्ध्यभावं प्रत्यप्रयोजकत्वादितिशङ्का च निरस्ता । असुरपक्षे सूत्रे अनुपलब्धिपदेन आसुराविद्येत्यादाविव प्रकृतसुखाद्युपलब्धिविरुद्धदुःखानुपलब्धेरेव विवक्षितत्वात् । मध्यममनुष्यपक्षेऽप्यनुपलब्धिपदेन निरवधारणाया दुःखाद्युपलब्धेरेव विवक्षितत्वात्। अत एव टीकायामेतच्च सज्जीवविषयम्, केषांचिद्दुःखादिरूपत्वं मिश्रत्वं च ज्ञातव्यमित्युक्तम्। अत्र केचित्-- 'नित्यानन्दः' इत्यादिप्रमाणानुसारेण अन्यतरशब्दस्वारस्याच्च देवानामित्यादिभाष्यं सौत्रक्रममुल्लङ्घ्य 'अन्यतरनियमः' इत्यस्य व्याख्यानरूपं 'नित्योपलब्ध्यनुपलब्धी' इत्येतन्नित्योपलब्ध्यनुपलब्धिप्रसङ्ग इत्यस्य व्याख्यानरूपं, सूत्रे उक्तिलाघवाय मध्यमर्जीवानां प्रथममापादनम्। एवमसुरपक्षे अनुपलब्धिरुपलब्ध्यभाव एव, न तु दुःखोपलब्धिः, सा तु साक्षादापाद्या, परम्परया तु सुखोपलब्धेरभाव इति व्याचक्षते। तन्न-- 'नित्यानन्दः' इति प्रमाणस्योक्तपक्ष एवानुगुणत्वात्, वक्ष्यमाणरीत्या अन्यतरशब्दस्योभयपरत्व एव स्वारस्याच्च, भाष्यटीकातत्त्वप्रदीपाननुगुणत्वाच्च । भाष्यटीकयोर्देवदानवमिश्रक्रमेणापादनात् । तत्त्वप्रदीपेऽपि व्यक्तयनङ्गीकारे मुक्तियोग्या विनैव साधनसम्पत्त्या नित्यव्यक्तानन्दा

(५) 'नित्यानन्दो नित्यज्ञानो नित्यबलः परमात्मा नैवमसुरा एवमनेवं च मनुष्याः' इति ह्याग्निवेश्यश्रुतिः ।

(६) भविष्यत्पुराणे च—

नित्यानन्दज्ञानबला देवा नैवं तु दानवाः ।
दुःखोपलब्धिमात्रास्ते मानुषास्तूभयात्मकाः ॥

भवेयुः, तमोयोग्याः संसृतावपि सुखलेशहीनाः नित्यदुःखिनः स्युरित्यादिना देवादिकमेणैवानुरूपक्षे दुःखोपलब्धेरेव च आपादनात् ।

(५) द्वितीयपक्षं प्रमाणविरोधेन निराचष्टे—(ननु यदि जीवानां आनन्दादिरूपत्वं न्यात्तदा तस्य संसृतौ अनभिव्यक्तयर्थं ज्ञानाभावातिरिक्ताविद्यावरणं भगवत्प्रसादेन तन्निवृत्तिश्च अङ्गीकार्या स्यात्तदेव नास्ति। तदनङ्गीकारे दोषाभावादित्याशङ्क्य प्रमाणविरोधेन निराचष्टे) नित्येति ॥ 'नित्यानन्दः' यथार्थज्ञानादिरूपः परमात्मेत्यर्थः । परमात्मेत्यनन्तरं एवं सुरा इत्यध्याहारोऽभिप्रेतः । अत एव स्मृतौ 'नित्यानन्दज्ञानबला देवाः' इत्युक्तम् । तत्त्वप्रदीपे तु परमात्मनो नित्यानन्दत्वोक्त्या देवानां च नित्यानन्दत्वं विवक्षितम्, देवभागत्वात्तस्येत्युक्तम् । तस्याभिप्रायस्तु अत्र परमात्मशब्देन उत्तमजीवराशिर्विवक्षित इति सुधायामुक्तम् । चन्द्रिकायामपि तथैवोक्तम् । 'असुराः' तमोयोग्याः 'नैवं' मुक्तियोग्यवन्न, किंतु तद्विरुद्धदुःखमिथ्याज्ञानस्वरूपा इत्यर्थः । 'मनुष्याः' मध्यमास्तु 'एवं' आनन्दादिरूपाः 'अनेवं' दुःखरूपाश्चेत्यर्थः । इति हीति । हिशब्दः प्रसिद्धौ । श्रुतिरित्यनन्तरं जीवस्य आनन्दादिरूपत्वं वक्तीति वाक्यशेषः । तथा च जीवस्यानन्दादिरूपत्वानङ्गीकारे श्रुतिविरोधापत्तेः तस्य तदङ्गीकार्यमिति भावः । यद्यप्यत्रार्थे 'विज्ञानात्मा' इति प्रागुदाहृतश्रुतिरतिदेष्टुं युक्ता । 'बलमानन्द ओजः' इति श्रुतिर्वोदाहर्तुं युक्ता । तथापि त्रिविधस्यापि जीवस्वरूपस्यानुक्तेः श्रुत्यन्तरोदाहरणम् ।

(६) अधिकरणार्थं स्मृतिं चाह—भविष्यदिति ॥ श्रुतिसमुच्चये चशब्दः । नित्यत्वमानन्दादेर्विशेषणम् । 'देवाः' मुक्तियोग्याः 'दानवाः' तमोयोग्याः 'एवं' देववन्न, किं तर्हीत्यत आह—दुःखोपलब्धीति । 'ते' दानवाः 'दुःखोपलब्धिमात्राः' दुःखानुभवमात्रयोग्या इत्यर्थः । योग्यत्वं तु

(७) तेषां यदन्यथा दृश्यं तदुपाधिकृतं मतम् ।
विज्ञानेनात्मयोग्येन निजरूपे व्यवस्थितिः ॥

(८) सम्यग्ज्ञानं तु देवानां मनुष्याणां विमिश्रितम् ।
विपरीतं तु दैत्यानां ज्ञानस्यैवं व्यवस्थितिः ॥ इति ॥ ३२ ॥

॥ इति पुंस्त्वाधिकरणम् ॥ १६ ॥

संसृतावप्यस्ति । मात्रशब्देन सुखोपलब्धिर्व्यावर्त्यते । मध्यममानुषास्तु 'उभयात्मकाः' सुखदुःखमिश्रस्वरूपाः ।

(७) ननु देवानां सुखज्ञानादिरूपत्वमनुपपन्नम्, संसारे दुःखस्याप्यनुभवात् विपरीतज्ञानस्यापि दर्शनाच्च । एवं दैत्यानां दुःखोपलब्धिमात्रत्वमप्यनुपपन्नम्, संसारे सुखस्याप्यनुभवात् । एवं मनुष्याणां मिश्रत्वमप्ययुक्तम्, संसारे केवलसुखदुःखयोरप्यनुभवादित्यत आह—तेषामिति ॥ उपाधिर्बाह्यः । तथा च 'तेषां' देवानां यत्स्वरूपात् 'अन्यथा' अन्यत् 'दृश्यं' दुःखादि 'तदुपाधिकृतम्' जीवस्वरूपोपाध्यतिरिक्तबाह्यदेहनिमित्तम् । उपाधिनिवृत्तिः कुत इत्यत आह—विज्ञानेति । यतः 'आत्मयोग्येन' स्वयोग्येन 'विज्ञानेन' विशेषज्ञानेन तृतीयार्थे सप्तमी । आविर्भूतस्वस्वरूपेण व्यवस्थितिर्भवतीत्यर्थः । विज्ञानेनात्मयोग्येनेत्यादिना नित्यसंसारिणामप्यावरणाभाते अनिष्टप्रसङ्गोक्त्या च तेषामपि आवरणनिवृत्त्या स्वरूपाविर्भावोऽस्तीति सूचितम् ।

(८) किं तन्निजरूपमित्यत उक्तं विवृणोति—सम्यगिति । तुशब्दोऽवधारणे । 'देवानां' मुक्तियोग्यानां सम्यग्ज्ञानमेवेति । 'विमिश्रितं' विपरीतमिति । अत्र ज्ञानमित्यनुषज्यते । दैत्यानां त्वित्यन्वितस्तुशब्दो विशेषार्थः । 'ज्ञानस्य' स्वरूपज्ञानस्य 'एवं' उक्तप्रकारेण 'व्यवस्थितिः' स्थितिरित्यर्थः । इतिशब्दस्य भविष्यत्पर्वणीति पूर्वेणान्वयः । अधिकरणार्थ उक्त इति शेषः ।

॥ इति पुंस्त्वाधिकरणम् ॥ १६ ॥

॥ १७. कर्तृत्वाधिकरणम् ॥

(१) ईश्वरस्यैव कर्तृत्वमुक्तं 'यत्कर्म कुरुते तदभिसम्पद्यते' (बृ. ६-४-५.) इति जीवस्योपलभ्यते ।

(२) अत आह—

सू—ॐ ॥ कर्ता शास्त्रार्थवत्त्वात् ॥ ॐ ॥ ३३ ॥

जीवस्य कर्तृत्वाभावे शास्त्रस्याप्रयोजकत्वप्राप्तेर्जीवोऽपि कर्ता ॥३३॥

॥ १७. कर्तृत्वाधिकरणम् ॥

(१) अत्राधिकरणे जीवकर्तृत्वविषयश्रुतिविरोधः परिहियते । श्रुतिविरोधं संशयबीजं दर्शयति—ईश्वरस्येति ॥ 'नान्यः कर्ता' इत्यादिश्रुतावन्यनिषेधादीश्वरस्यैव कर्तृत्वमुक्तमित्यर्थः । इतीति । इति श्रुताविति यावत्यर्थः । 'जीवस्य' जीवस्यापि 'उपलभ्यते' प्रतीयते । कर्तृत्वमित्यनुषङ्गः । यादृशं कर्म कुरुते जीवः तादृक्कर्मफलं 'अभिसम्पद्यते' प्राप्नोतीति याज्ञसनेयश्रुत्यर्थः । श्रुतेः जीवैकनिष्ठत्वज्ञापनाय तदिति फलवाक्यशेषोदाहरणम् । ईश्वरस्यैवेति सावधारणया संशयबीजोक्त्या स्वातन्त्र्येण पारतन्त्र्येण वा केनापि रूपेण न जीवः कर्ता, किं त्वीश्वर एवेति पूर्वपक्षो जीवकर्तृत्वाभावस्य श्रुतत्वादिति युक्तिश्च सूचिता । योजना तु न जीवः कर्ता यतः श्रुताविश्वरस्यैव कर्तृत्वमुक्तं न चान्यत्रापि 'यत्' इति श्रुतिरस्तीति वाच्यम् । यत ईश्वरस्यैव कर्तृत्वमुक्तं इतरव्यपदेशादित्यादावनन्ययोगेन समर्थितम् । तथा च फलवच्छ्रुत्यपेक्षया सयुक्तिकश्रुतेः प्राबल्यात् अनया अन्यस्या बाध इति भाव इति ।

(२) एवं प्राप्ते सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ कर्तृत्वाभाव इति । कर्तृत्वसामान्याभाव इत्यर्थः । शास्त्रस्येति । 'यजेत स्वर्गकामः' 'ब्राह्मणो न हन्तव्यः' इत्यादिविधिनिषेधरूपशास्त्रस्येत्यर्थः । अप्रयोजकत्वेति । प्रयुज्यतेऽनेन पुरुषः शास्त्रे इति व्युत्पत्त्या प्रयोजकं प्रयोजनं ततो बहुव्रीहिः, तथा च वैयर्थ्यप्रसङ्गादित्यर्थः । न हि कर्तारमन्तरेणारण्यरोदनायमानशास्त्रस्य सार्थक्यं भवतीति भावः । अनेन जीवस्य कर्तृत्वाङ्गीकार एव 'शास्त्रार्थवत्त्वात्' शास्त्रस्यार्थवत्त्वसिद्धेः

(३) सू—ॐ ॥ विहारोपदेशात् ॥ ॐ ॥ ३४ ॥

'स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वा' (छा. ८-१२-३.) इत्यादि मोक्षेऽपि ॥ ३४ ॥

(४) सू—ॐ ॥ उपादानात् ॥ ॐ ॥ ३५ ॥

अन्यथाऽसिद्धेरिति हेत्वंशो विपक्षे हेतूच्छित्तिरूपबाधकोक्तिमुखेन व्याख्यातः। अनुवृत्तस्य च इत्यस्यार्थो जीवोऽपीति। 'कर्ता' कर्तैव न त्वकर्ताऽङ्गीकार्य इति शेषः। अपीत्यनेन सूत्रेऽप्यर्थकचशब्दस्यानुवृत्तिः सूचिता।

(३) ननु जीवस्य स्वतः कर्तृत्वाभावेऽपि परगतकर्तृत्वे स्वीयत्वाग्रहोऽस्त्येव। अतः काल्पनिककर्तृत्ववन्तं जीवं प्रति विधिनिषेधशास्त्रं प्रवर्तताम्इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—विहारेति ॥ जीवः कर्तेत्यनुषज्यते। तत्त्वत इति शेषः। अनेन सूत्रेऽप्यनुवृत्तिशेषौ सूचितौ। अपिशब्दो विशेषणसमुच्चयार्थः। आदिशब्दात् 'सोऽश्नुते सर्वान्' (तै. २-१.) इत्यादिकं गृह्यते। तथा च 'अपि' विगलिताखिलकल्पनेऽपि मोक्षे 'स्त्रीभिर्वा' इत्यादिना विहारपदोक्तस्वैरणक्रीडाकाम्यप्राप्त्यादिकर्तृत्वोक्तेः। 'तत्त्वतः' परमार्थत एव जीवः कर्ता न कल्पनयेति योजना। अस्य मोक्षप्रकरणत्वं तु छान्दोग्ये तैत्तिरीये च 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छा. ८-३-४.) 'ब्रह्मविदाप्नोति परम्' (तै. २-१.) इति च मोक्षं प्रस्तुत्याम्नातत्वात् ज्ञायते। श्रुतिस्तु दहरनये व्याख्याता।

(४) नन्वस्तु मोक्षे जीवस्य स्वाभाविकं कर्तृत्वं प्रामाणिकत्वात्। संसारे तु काल्पनिकमेव किं न स्यात्। तावता शास्त्रसार्थक्यादित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—उपादानादिति ॥ साधनेति। मोक्षस्वर्गाद्यर्थं वेदविचारयागादिरूपेत्यर्थः। आदिशब्देन तदितिकर्तव्यता गृह्यते। यद्वा—तत्त्वप्रदीपरीत्या छेदाद्यर्थकुठारादिकं साधनपदोक्तं आदिपदेन काष्ठादिरूपविषय उक्त इति ध्येयम्। उपादानं अनुष्ठानं सम्पादनमिति यावत्। तस्य प्रतीतेः प्रत्यक्षसिद्धत्वाज्जीवस्येत्यर्थः। ततश्च फलदर्शनादिति चशब्दार्थः। अस्यापि जीवोऽपि कर्तेति पूर्वसाध्येनान्वयः। यद्वा—

साधनाद्युपादानप्रतीतेश्च ॥ ३५ ॥

(५) सू—ॐ ॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ॐ ॥ ३६ ॥

'आत्मानमेव लोकमुपासीत' (बृ. ३-४-१५.) इति क्रियायां व्यपदेशाच्च ।

(६) अन्यथाऽऽत्मैव लोकमिति निर्देशः स्यात् ॥३६॥

तत्त्वप्रदीपे न केवलं शास्त्रार्थवत्त्वाज्जीवस्य कर्तृत्वं प्रतिपद्यामहे, अपि तु प्रत्यक्षत एव तत्सिद्धमित्याहेत्यवतार्य चशब्दान्न च तद्वाघो दृश्यत इत्युक्तहेतुसमुच्चयार्थत्वस्योक्तत्वात् टीकाकारस्याप्ययमेव चशब्दार्थोऽभिप्रेतः। अत एवोत्तरटीकायामेवमुपपत्त्या प्रत्यक्षेण चेत्युक्तम्। चशब्दप्रयोगेन सूत्रेऽपि चशब्दोऽनुषञ्जनीय इति सूचितम्। केचित्तु—अत्र सूत्रे पूर्वसूत्रे च क्रमेण शङ्काद्वयपरिहारात् न चशब्दः, मौक्ताकाल्पनिकत्वसांसारिकाकाल्पनिकत्वरूपविषयभेदात्। तथापि अवान्तरसाध्यभेदेऽपि अकाल्पनिकत्वसामान्यस्य पूर्वसूत्रे युक्त्या अत्र तु प्रत्यक्षेण चोपादानात् भाष्ये चशब्दः प्रयुक्त इत्याहुः। तत्तु उत्तरटीकातत्त्वप्रदीपविरुद्धम्। तत्र कर्तृत्वस्यैवेह साध्यत्वेनोक्तेः।

(५) एवं संसारे शास्त्रार्थवत्त्वरूपयुक्त्या साधनाद्युपादानप्रत्यक्षेण च साधितं जीवकर्तृत्वं श्रुत्याऽपि समर्थयत्सूत्रमुपन्यस्य व्याचष्टे—व्यपदेशाच्चेति ॥ इतीति। उपासनाख्यक्रियायां उपासीतेत्यात्मनः कर्तृत्वोक्तेरित्यर्थः। अस्य हेतोर्जीवोऽपि कर्तेति पूर्वसाध्येनान्वयः न केवलं युक्तिप्रत्यक्षाभ्यां, किंतु श्रुतेश्चेति चशब्दार्थः। तथा चोक्तं भारततात्पर्यनिर्णये—

प्रत्यक्षैषा कर्तृता जीवसंस्था।
तथाऽऽगमादनुमानाच्च सर्वम् ॥ इत्यादि ॥

'लोकं' सर्वाश्रयं प्रकाशमानं वा 'आत्मानं' विष्णुमुपासीत जीव इति बृहदारण्यकछन्दोगश्रुत्यर्थः।

(६) ननु अत्र जीव उपासीतेत्युक्त्यभावात् कथमयं जीवस्य कर्तृत्व-

(७) तर्हि कथमीश्वरस्यैव कर्तृत्वमित्यतो वक्ति—

सू—ॐ ॥ उपलब्धिवदनियमः ॥ ॐ ॥ ३७ ॥

व्यपदेशस्स्यादित्यतस्तदुपपादनाय विपक्षे बाधकोक्तिपरं न चेदित्यंशं व्याचष्टे—अन्यथेति ॥ जीवस्य उपासनाक्रियायां कर्तृत्वेन श्रुत्यनभिमतत्वे क्रियाया अकर्तृकत्वजडकर्तृकत्वयोरसम्भवाच्छ्रुतिवैयर्थ्यापत्त्या तत्परिहाराय परमात्मन एव क्रियाकर्तृत्वेन तदभिमतत्वे चेत्यर्थः। आत्मेत्येतेनेन निर्देशविपर्ययपदं तद्विन्यासव्यत्यासपरमिति सूचितम्। अस्मिन् पक्षे आत्मा परमात्मैव स्वात्मानमन्यं वा लोकमुपासीतेति श्रुत्यर्थप्राप्तेरिति भावः। अत्रात्मानमिति पक्षे टीकायां कर्तृत्वेनेत्यस्य कर्तृत्वेनापीत्यर्थः। कर्मत्वेनेत्यस्य केवलकर्मत्वेनेत्यर्थोऽवगन्तव्यः। अन्यमिति पक्षे तु यथा श्रुतैव व्याख्या। अन्यथेत्यनेन न चेदित्यस्यार्थ उक्तः। स्यादिति शेषोक्तिः। तथाचास्य कर्तृत्वान्नास्ति चासौ विपरीतनिर्देशः तस्मान्न जीवोऽकर्ता किं तु कर्तैवेति विपर्ययपर्यवसाने जीवस्यापि कर्तृतासिद्धिरिति भावः। न च जीवपरयोरुभयोरपि कर्तृत्वे गौरवं दोषः, प्रामाणिकत्वात्।

(७) नन्वेवं जीवस्यापि कर्तृत्वे कथमितरव्यपदेशादित्यादौ ईश्वरस्यैव कर्तृत्वं समर्थितम्। कथं च 'नान्यः कर्ता' इति श्रुतिरुपपद्यते। अतस्तद्विरोधोऽस्त्येवेत्याशङ्क्य तत्परिहाराय सूत्रमवतार्य व्याचष्टे—तर्हीति ॥ जीवस्यापि कर्तृत्व इत्यर्थः। उक्तमिति 'नान्यः कर्ता' इति श्रुताविति शेषः। यद्वा—इतरव्यपदेशादित्यादौ कथं समर्थितमित्यर्थः। यथा ज्ञाने इत्यनेन सूत्रे सप्तम्यन्ताद्वतिरिति सूचितम्। ज्ञास्यामीत्यनन्तरं इच्छत इति शेषः। कर्मणीत्यनेन क्रियायामित्यस्य जीवस्येत्यनेन ज्ञस्येति विपरिणतपदस्य च अनुवृत्तिस्सूचिता। जीवस्येत्यनन्तरं अनुपक्तानियमपदं नियमस्याप्युपलक्षकम्। दृष्टान्तसमुच्चये विशेषणसमुच्चये वाऽपिशब्दः। तथा चाहमिदं सुरूपं सुगन्धं सुस्वरं वा ज्ञास्यामि, विपरीतं न पश्यामि न जिघ्रामि न शृणवानीत्येवं स्पृहयतो जीवस्य यथोपलब्धौ ज्ञाने 'अनियमः' स्वेच्छानुसारेण न ज्ञानलाभः प्रतीयते। एवं तथा क्रियायां 'कर्मण्यपि' करिष्यामीति सङ्कल्पितेऽपि व्यापारे अनियमः प्रत्येतव्यः। तद्दृष्टान्तेनात्रानियमः साध्य इति यावत्। ईश्वरस्य तु ज्ञाने

ज्ञाने इदं ज्ञास्यामीत्यनियमः प्रतीयते एवं कर्मण्यपि जीवस्य ।

(८) 'य आत्मानमन्तरो यमयति' (माध्यन्दिनपाठः)

इति च श्रुतिः ॥ ३७ ॥

(९) कुतः—

सू—ॐ ॥ शक्तिविपर्ययात् ॥ ॐ ॥ ३८ ॥

अल्पशक्तित्वाज्जीवस्य ॥ ३८ ॥

कर्मणि च नियम इति योजना। तथा च यत एवं जीवस्य कर्मणि नियमाभावः, ईश्वरस्य तु तद्भावस्मिद्धोऽतोऽनन्याधीनकर्तृत्वविवक्षया ईश्वरस्यैव कर्तृत्वं न जीवस्येत्युक्तं प्राक्। न तु सर्वथा कर्तृत्वाभावेनेति न पूर्वोक्तविरोध इति भावः। ज्ञास्यामीति इच्छन इत्यनेन च दृष्टान्तः साध्यविकल इति शङ्का परिहृता। कथमिति चेत्—न हि जिज्ञासुर्ज्ञाने साक्षाद्व्याप्रियते, येन नियमेन ज्ञानप्राप्तिः, किं तु ज्ञानक्रियासाधन एव, न तु फलेच्छया साधनानुष्ठाने फलाव्यभिचारोऽदृष्ट इति टीकोक्तरीत्येति गृहाण।

(८) ईश्वरस्यैव नियमनकर्तृत्वं, न जीवस्येत्यत्र प्रमाणमाह—य इति ॥ इति च श्रुतिरिति। इति श्रुतिरप्येवमेवाह, न केवलं सूत्रमिति चार्थः। यः चतुर्मुखादिजीवं तत्तदन्तर्गतो नियमयति एष परमात्मा तवान्तर्यामीति वाजसनेयश्रुत्यर्थः। अत्रेश्वरस्य जीवनियामकत्वोक्त्या तत्प्रेरणां विना जीवानां नियमेन कर्तृत्वाभावः स्वेच्छानुसारिकर्तृत्वाभावः, ईश्वरस्य तु नियामकत्वात् तद्भावोऽवगम्यते।

(९) ननूभयोः कर्तृत्वाविशेषेऽपि ईश्वरस्यैव नियमेन कर्तृत्वं, न जीवस्येत्येतद्वैलक्षण्यं किं निमित्तमिति पृच्छति—कुत इति ॥ नियमानियमौ ईशजीवयोः 'कुतः' किंनिमित्तकावित्यर्थः। अत्र स्वातन्त्र्यपारतन्त्र्यनिमित्तौ नियमानियमाविति परिहारं वक्तुं ईशजीवयोः स्वातन्त्र्यपारतन्त्र्ये साधयत्सूत्रं पठित्वा व्याचष्टे—शक्तीति ॥ अल्पशक्तित्वादित्यनेन मुख्यत्वाच्छक्तिशब्दः पूर्णशक्तिपरः विपर्ययशब्दस्तु तद्विपरीताल्पशक्तिपर इति सूचितम्। ज्ञस्येत्यनुवृत्तपदस्यार्थो जीवस्येति।

(१०) सू—ॐ ॥ समाध्यभावाच्च ॥ ॐ ॥ ३९ ॥

समाधानाभावाच्च अस्वातन्त्र्यं प्रतीयते अतः ॥ ३९ ॥

(११) सू—ॐ॥ यथा च तक्षोभयथा ॥ ॐ ॥ ४० ॥

यथा तक्षणः कारयितृनियतत्वं कर्तृत्वं च विद्यते एवं जीवस्यापि ॥ ४० ॥

उपलक्षणमेतत्। ईश्वरस्य पूर्णशक्तित्वादित्यपि द्रष्टव्यम्। अस्वातन्त्र्यं स्वातन्त्र्यमिति वक्ष्यमाणमत्रापि सम्बध्यते।

(१०) युक्त्यन्तरेणेशजीवयोः स्वातन्त्र्यपारतन्त्र्ये समर्थयत्सूत्रमुपन्यस्य व्याचष्टे—समाध्यभावाच्चेति ॥ समाधानमल्पबुद्धिरपूर्णकामत्वमिति यावत्। न केवलमल्पशक्तित्वादिति चार्थः। जीवस्येति वर्तते। सूत्रे तु ज्ञस्येति वर्तते उपलक्षणमेतत्। समाधिभावाच्चेश्वरस्य स्वातन्त्र्यमित्यपि द्रष्टव्यम्। चशब्द उक्तानुक्तहेतुसमुच्चायकः। अस्मृतहेतुभ्यः ईशजीवयोः स्वातन्त्र्यपारतन्त्र्यसिद्धिः। तावता नियम्यनियमयोः किंनिमित्तकत्वमुक्तं भवतीत्यत आह—अत इति। नियम्यनियमाविति शेषः। तथा च यत एवमीशजीवयोः स्वातन्त्र्यपारतन्त्र्ये प्रतीयेते अतस्तयोस्ताभ्यां निमित्ताभ्यां कर्मणि नियम्यनियमौ प्रतिपत्तव्यावित्यर्थः। तत्त्वप्रदीपे तु अत इत्यस्य 'यथा च तक्षोभयथा' इति सूत्रेणान्वयमभिप्रेत्य अतोऽस्वातन्त्र्यप्रमाणेभ्यः कर्तृत्वमानेभ्यश्च यथा च तक्षोभयथा व्यपदिश्यते एवं जीवोऽस्वतन्त्रः कर्ता चेति व्यपदिश्यत इत्युक्तम्।

(११) ननु यदि जीवस्य न स्वातन्त्र्येण कर्तृत्वम्, अपि तु ईश्वरेच्छयैव, तर्हि कथं जीवः कर्तोच्यते, स्वतन्त्रः खलु कर्तेत्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—यथेति ॥ यथा च 'तक्षणो' वर्धकेः प्रासादकारयितृराजादिप्रेरितत्वं तत्कर्तृत्वं च अस्ति, एवं जीवस्यापि ईश्वरनियतत्वं घटादिकर्तृत्वं चास्तीत्यध्याहारेण योजना। कारयितृनियतत्वं कर्तृत्वमित्यनेनोभयथेत्युक्तप्रकारद्वयं दर्शितम्। एवं जीवस्यापीत्यनेन चशब्दस्य दार्ष्टान्तिकसमुच्चयार्थत्वमभिप्रेति। केचित्तु—सूत्रे उभयथा चेति चशब्दसम्बन्धमभिप्रेत्य भाष्ये कर्तृत्वं चेत्युक्तमित्याहुः। तन्न,

(१२) सू—ॐ ॥ परात्तु तच्छ्रुतेः ॥ ॐ ॥ ४१ ॥

सा च कर्तृत्वशक्तिः परादेव ।

(१३) कर्तृत्वं करणत्वं च स्वभावश्चेतना धृतिः ।
यत्प्रसादादिमे सन्ति न सन्ति यदुपेक्षया ॥
इति पैङ्गिश्रुतिः ॥ ४१ ॥

तद्भाप्यस्योभयथेत्युक्तप्रकारद्वयसमुच्चयपरत्वेन चशब्दार्थप्रदर्शकत्वाभावात्। तथा चेश्वराधीनेऽपि जीवे दृष्टान्तबलात्कारकाप्रयोज्यत्वरूपामुख्यस्वातन्त्र्यगर्भितकर्तृत्वव्यपदेशो युज्यत एवेति भावः ।

(१२) ननु किं तक्ष्ण इव जीवस्य कर्तृत्वशक्तिर्जीवाधीनैव, ईश्वराधीनत्वं तु वचनचेतनदानादिवत्। उत कर्तृत्वशक्तिरपीश्वराधीना। यद्याद्यः तर्हीश्वरस्यैव कर्तृत्वमिति गतः पक्षः । द्वितीये न जीवस्य कर्तृत्वशक्तिरित्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—परादिति ॥ सेति प्रकृतत्वोपपादकं, या शक्तिसूत्रे प्रकृता, या च तक्षकदृष्टान्तेन उपपादितेत्यर्थः । चोऽप्यर्थः । कर्तृत्वेत्यतः प्राक् जीवस्येत्युपस्कार्यम्। शक्तिरित्यनेन तदिति भिन्नपदस्यार्थ उक्तः । सामर्थ्यमिति वक्तव्ये शक्तिरिति तच्छब्दपर्यायशब्देनार्थकथनम् । शक्तिसूत्रगतशक्तिशब्दविवक्षयेति ध्येयम्। केचित्तु —सूत्रे शक्तिरिति शेषः । तच्छ्रुतेरित्येकं पदं, तथा च ईशाधीनत्वेन श्रुतेरिति तदर्थ इत्याहुः । 'परादेव' परमात्मनः सकाशादागतैव तदधीनैव न जीवाधीनेत्यर्थः । अनेन सौत्रतुशब्दोऽवधारणार्थतया व्याख्यातः । तस्मान्नापसिद्धान्त इति वाक्यशेषः ।

(१३) कुत इत्यनस्तत्र हेतुत्वेन श्रुतेरित्येतद्योजयति—कर्तृत्वमिति ॥ कर्तृत्वकरणत्वपदाभ्यां तच्छक्तिरुपलक्ष्यते । तत्राद्यं जीवस्य द्वितीयमिन्द्रियादेः । 'स्वभावः' प्रकृत्यादीनां परिणामादिः । अल्पज्ञत्वाल्पशक्तित्वादिरूपो वा । 'चेतना' चेतसो व्याप्तिः 'बहुस्मरणशक्तिस्तु चेतनेत्यभिधीयते' इत्युक्तेश्चैतन्यं वा । 'धृतिः' देहादिधारणसामर्थ्यम्। आहत्य 'इमे' भावाः 'यत्प्रसादात्' यस्य परमात्मनोऽनुग्रहादिच्छया सन्ति 'यदुपेक्षया' यत्कटाक्षाभावे न सन्ति इत्यर्थः । अनेनेश्वरस्य कर्तुमकर्तु-

(१४) सू—ॐ ॥ कृतप्रयत्नापेक्षस्तु विहितप्रतिषेधावैयर्थ्यादिभ्यः ॥ ॐ ॥ ४२ ॥

ततोऽप्रयोजकत्वं शास्त्रस्य नापद्यते कृतप्रयत्नापेक्षत्वात्तत्प्रेरकत्वस्य।

मन्यथा कर्तुं चास्ति सामर्थ्यम्, सङ्कल्पाभावात् तथा न करोतीत्युक्तं भवति। अस्य यच्छब्दस्य तत्र प्रकृतेन तच्छब्देनान्वयः। 'हि' यतः श्रुतिरित्यस्य परादेवेति साध्येनान्वयः।

(१४) नन्वस्मिन् पक्षेऽपि दोष उक्तः, यदि कर्तृत्वशक्तिरीश्वराधीना तर्हि तस्यैव कर्तृत्वम्, न जीवस्य दारुप्रतिमावदन्याधीनस्येति पुनश्शास्त्रवैयर्थ्यमित्याशङ्कां परिहरन्सूत्रमुपन्यस्य व्याचष्टे—कृतेति ॥ 'ततः' कर्तृत्वशक्तेरीश्वराधीनत्वादपि 'शास्त्रस्य' विधिनिषेधात्मकस्य 'अप्रयोजकत्वं' न विद्यते प्रयोजकं प्रयोजनं यस्य तस्य भावो वैयर्थ्यं 'नापद्यते' न प्रसज्यते। कुतः? 'ततः' तदवैयर्थ्यायैव 'तत्प्रेरकत्वस्य' तस्येश्वरस्य जीवप्रेरकत्वस्य 'कृतप्रयत्नापेक्षत्वात्' पूर्वकर्मप्रयत्नयोग्यतासापेक्षत्वादिति योजना। तत इत्यनेन विहितेति चतुर्थ्यन्तं पदं व्याख्यातम्। कृतेत्यादिना कृतेति हेतुसमर्पकशब्दो व्याख्यातः। तत्प्रेरकत्वस्येत्यनेन सूत्रे पूर्वसूत्रात्पर इति विपरिणतपदस्य द्वितीयान्तशब्दस्य चानुवृत्तिः प्रेरयतीत्यध्याहारः सूचितः। सूत्रे तुशब्दोऽवधारणेऽप्यर्थे चेत्यभिप्रेत्यादिशब्दार्थमाह—आदिशब्देनेति। 'अवैषम्यादि' सङ्गृहीतमिति शेषः। अत्रादिशब्देनानैर्घृण्यं गृह्यते। अनेन—न ततोऽपि जीवशक्तेरीश्वराधीनत्वादपि शास्त्रस्य वैयर्थ्यमापद्यते। कुतः? यतोऽयं परमात्मा 'विहितप्रतिषेधावैयर्थ्यादिभ्यस्तु' विधिनिषेधशास्त्रावैयर्थ्यायैव, न तु स्वस्य सहायार्थं तथा स्वस्य वैषम्यनैर्घृण्यपरिहाराय च 'कृतप्रयत्नापेक्षस्तु' जीवस्यानादिकर्मप्रयत्नसापेक्ष एव जीवं भोगे प्रेरयति, तद्योग्यतामपेक्ष्य तु कर्मणि, न तु तदनपेक्ष इति सूत्रार्थ उक्तो भवति। अत एवोक्तं भारततात्पर्यनिर्णये—

एतानपेक्ष्यैव फलं ददानी-
त्यस्यैव सङ्कल्प इति स्वतन्त्रता ॥ इति ॥

अत्रायं चन्द्रिकोक्तो भावः—जीवस्य विधिवाक्यतदर्थज्ञाने तज्जन्यसाधन-

आदिशब्देनावैषम्यादि ।

(१५) पूर्वकर्मप्रयत्नं च संस्कारं चाप्यपेक्ष्य तु ।
ईश्वरः कारयेत्सर्वं तच्चेश्वरकृतं मतम् ॥
अनादित्वाददोषश्च पूर्णशक्तित्वतो हरेः ।
इति भविष्यत्पर्वणि ।

फलेच्छयोः साधनविषयककृतौ च भगवत्प्रेर्यत्वेऽपि न विधिविषयत्वकर्मफलभाक्त्वयोरनुपपत्तिरिति न शास्त्रप्रवृत्तिवैयर्थ्यम् । राजभट्टाद्युत्पादितेच्छादिमतोऽपि त्रिवर्णादेर्विष्टिगृहीतस्य च सन्ध्योपासनादौ भारवहनादौ च विध्यादिदर्शनेन तद्धेत्वात्मतन्त्रकर्तृतामात्रेण तयोरुपपत्तेरिति । उक्तं हि गीताभाष्ये—अकर्तृत्वेऽपि विधिद्वारा ईशप्रसादादिच्छोत्पत्त्योक्तकारणैः कर्मद्वारा मोक्षो भवतीति न प्रवृत्तिविधिवैयर्थ्यमिति । विवृतं चैतत्प्रमेयदीपे—जीवस्यापराधीनकर्तृत्वाभावेऽपि स्वसम्बन्धितया विधिज्ञानस्येश्वरप्रसादायत्तयोः कर्मफलं चोद्दिश्येच्छाप्रयत्नयोरधिष्ठानादिकर्मकारणसन्निधानस्य कर्मसम्बन्धस्य तत्फलभाक्त्वस्य च विधिविषयताप्रयोजकस्य सत्त्वात्तस्य विधिविषयत्वोपपत्तिरिति । एतच्च प्रयोजकं नेश्वरमुक्तजीवजडेष्वस्तीति न तेषां विधिविषयत्वं किंतु संसारिजीवस्येति चोक्तम् । यद्यपि वैषम्यादिपरिहारः पूर्वमेव वैषम्यसूत्रे कृतः । तथापि स एव कर्तृत्वशक्तेरीश्वराधीनत्वप्रयुक्तवैषम्यादिशङ्कापरिहारायेहादिशब्देन स्मारयितुं पुनरुक्त इति न पौनरुक्त्यम् ।

(१५) सूत्रार्थं स्मृतिमाह—पूर्वेति ॥ 'संस्कारो' योग्यता । चशब्दौ परस्परसमुच्चये । तुशब्दोऽवधारणे । 'सर्वं' पुण्यपापादिकर्म जीवेन कारयति तत्करणाय तं प्रेरयतीत्यर्थः । यद्वा—कारयति भोजयतीत्यर्थद्वयमपि विहितकारिणं पुण्यं भोजयति कारयति च पुण्यं, निषिद्धकारिणं दुःखं भोजयति पुनः पापं कारयति चेति तत्त्वप्रदीपोक्तम् । नन्वीश्वरस्य जीवकर्मापेक्षया प्रेरकत्वे तस्य तत्कर्माकर्तृकत्वं स्यादित्यत आह—तच्चेति । अपेक्ष्यं च कर्मेत्यर्थः । स्वयं साक्षात्तर्हि तत्प्रेरणे ईश्वरस्यापेक्ष्यकर्माभाव इत्यत आह—अनादित्वादिति । कर्मणः कार्यकारणीभूतकर्मपरम्परायास्त्वनादित्वान्नापेक्ष्याभावकृतवैषम्यादिदोष इत्यर्थः । तर्हि कार्यकारण-

(१६) एतदेवं न चाप्येवमेतदस्ति न चास्ति च ॥
इति मोक्षधर्मे ॥ ४२ ॥

॥ इति कर्तृत्वाधिकरणम् ॥ १७ ॥

॥ १८. अंशाधिकरणम् ॥

(१) अंशा एव हीमे जीवाः अंशी हि परमेश्वरः ।
स्वयमंशैरिदं सर्वं कारयत्यचलो हरिः ॥

रूपाणां पूर्वपूर्वकर्मणामनन्तत्वात्कथं तत्कारयितृत्वमीश्वरस्योपपद्यत इत्यत आह—पूर्णेति । तथा च हरेरमितशक्तित्वादनन्तकर्मकारयितृत्वं तस्य सम्भवत्येवेति न दोष इति भावः । भाष्यस्थपदेषु 'कृत' इति सूत्रार्थं उक्त इति शेषः ।

(१६) अधिकरणार्थं स्मृतिं चाह—एतदिति ॥ यतः 'एतत्' जीवस्य कर्तृत्वं 'एवं' प्रामाणिकं ईश्वरवत्स्वातन्त्र्येण चैतदेवं न, अत एतत्कर्तृत्वमस्वातन्त्र्येणास्ति स्वातन्त्र्यविवक्षया नास्तीति 'नान्यः कर्ता' इति श्रुतावुच्यते अत इत्यर्थः । इतीति । एवंरूपमोक्षधर्मवचनेऽधिकरणार्थं उक्त इत्यर्थः ।

॥ इति कर्तृत्वाधिकरणम् ॥ १७ ॥

॥ १८. अंशाधिकरणम् ॥

(१) अत्राधिकरणे जीवविषये श्रुतिविरोधः परिह्रियते । तत्र जीवस्येश्वरांशत्वमनंशत्वं वेत्यनिर्णयपूर्वपक्षमभिप्रेत्य विरुद्धश्रुतिद्वयरूपमनिर्णयकारणं दर्शयति—अंशा एव हीति ॥ 'इमे' प्रमिता जीवाः अंशा एव पितापुत्रादिसम्बन्धैः केवलं तदुपजीव्यत्वेन तच्छेषभूता एवेत्यर्थः । यद्वा—ततो न्यूनत्वे सति किञ्चित्तत्सदृशत्वरूपांशत्वोपेता इत्यर्थः । न तु निरुक्तांशत्वरहिता इत्येवशब्दार्थः । एवेत्यनेनांशत्वानंशत्वयोर्विकल्पोऽपि निरस्तः । हिशब्दौ उभयत्र प्रसिद्धिद्योतकौ । ननु जीवानामप्यंशत्वे कथं तर्हि हरिरंशेन जगत्सृजतीति व्यपदेश इत्यत आह—स्वयमिति । साक्षादंशैरनिरुद्धाद्यैः 'सर्वं' जगत् 'कारयति' सृजतीत्यर्थः । तथा च

इति गौपवनश्रुतौ अंशत्वं जीवस्योपलभ्यते ।

(२) नैवांशो न सम्बन्धो नापेक्ष्यो जीवः परस्य ।
तथापि तु यथायोगं फलदः प्रभुरेकराट् ॥
न नियम्यस्य कस्यापि स सर्वस्य नियामकः ॥
इति भाल्लवेयश्रुतौ ।

स्वरूपांशविषयं तद्वचनम् । जीवास्तु भिन्नांशा इति न तेषां तद्विषयत्वमिति भावः । यद्वा—स्वयं साक्षाद्भिन्नांशैर्विरिञ्चादिजीवैः स्वपदादभ्रष्टत्वान्निर्विकारत्वाद्वाऽचलो हरिः सृष्ट्यादि कारयतीत्यर्थः ।

(२) एवमंशत्वश्रुतिमुदाहृत्यानंशत्वश्रुतिमुदाहरति—नैवेति ॥ सिद्धान्तरीत्याऽयं श्रुत्यर्थः—जीवः 'परस्य' परमात्मन अंशो न भवति, किन्त्वनंश एव । अनेन विकल्पो निरस्तः । कुत इत्यत आह—न सम्बन्ध इति । यतो लोकपितृवत्पोषयितृत्वादिरूपसम्बन्धरहितोऽत इत्यर्थः । ननु पितृत्वादिरूपसम्बन्धाभावेऽपि उपकर्तृत्वादिरूपसम्बन्धः किं न स्यादित्यतो न सम्बन्ध इत्येतद्विवृणोति—नापेक्ष्य इति । जीवः परस्य 'अपेक्ष्यः' उपकर्ताऽपि न भवतीत्यर्थः । नन्वत्र परशब्दो नेश्वरपरः, किंतु जीवान्तरपर इत्याशङ्क्य वाक्यशेषोदाहरणेन परिहरति—तथाऽपीति । यद्यप्येवं, तथाऽपीश्वरस्य जीवेनानुपकृतत्वेऽपि स ईशः सर्वस्य जीवजातस्य 'यथायोगं' योग्यतामनतिक्रम्य तामपेक्ष्य स्वर्गमोक्षादिफलदो भवत्येव । योग्यतापेक्षायां स्वातन्त्र्यभङ्ग इत्यत उक्तम्—'एकराट्' स्वतन्त्र इति । तत्कथमित्यतः—प्रभुः समर्थ इत्याह । तथा च स्वार्थीनयोग्यतापेक्षायां न स्वातन्त्र्यहानिरिति भावः । अनेन जीवस्यानुपकर्तृत्वमीश्वरस्य तु उपकर्तृत्वमेवेत्युक्तं भवति । नन्वस्वीश्वरः उपकर्ता, तथापि लोके स्वामिभृत्यादेरन्योन्योपकार्योपकारकभावदर्शनात्तद्वदीश्वरस्यापि कदाचित् जीवोपकार्यत्वं किं न स्यादित्यत आह—न नियम्य इति । 'सः' ईश्वरः केनाप्युपकार्यो न भवतीत्यर्थः । अनेनानंशत्वश्रुतिः जीव उपकर्तव्य एव, न तूपकर्ता, ईश्वरस्तु उपकर्तैव न तूपकर्तव्य इत्यभिप्राया, भिन्नांशत्वनिषेधपरा वा, एवमसम्बन्धश्रुतिरपीश्वरस्य लोकपितृवत्पोषकत्वाभावाभिप्राया, तथाऽनपेक्ष्यत्वश्रुतिरपि परमात्मनः उपकार्यत्वा-

(३) अतो ब्रवीति—

सू—ॐ ॥ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ ॐ ॥४३॥

भावाभिप्रायेण्युक्तं भवति। पूर्वपक्षी तु जीवा अंशा एव, जीवोऽनंश एवेति आपाततो विरुद्धसावधारणश्रुतिद्वयदर्शनेनानिर्णयं मन्यते। श्रुतावित्यस्यानंशत्वं जीवस्योपलभ्यते प्रतीयत इत्यनुषक्तवाक्येनान्वयः।

(३) अथ सिद्धान्तयत्सूत्रमुपन्यस्य व्याचष्टे—अत इति ॥ यत एवं श्रुतिद्वये विरुद्धोक्तिस्संशयबीजमस्ति, अतस्तत्परिहारार्थमन्यतरकोटिनिर्णयरूपसिद्धान्तमाह सूत्रकार इत्यर्थः। सौत्रहेतुव्याख्यानाय नानाव्यपदेशान् दर्शयति—मां रक्षन्निति। 'विभुः' हरिः। अहमित्युक्तस्य जीवस्य स्पष्टं परमात्मपुत्रत्वप्रतिपादकत्वादादौ स्मृतिमुदाहृत्याथश्रुतिरूपव्यपदेशं दर्शयति-अव इति। अव इत्येकदेशग्रहणेनास्य ब्रह्मपरत्वस्फोरकः 'कर्वायमानः क इह प्रवोचद्देवं मनः कुतो अधि प्रजातम्' (ऋ. १०.१६४-१८.) इत्युत्तरभागोऽपि ग्राह्यः। इत्यादिनेति। एवमादिवाक्येन जीवस्य पितृत्वपुत्रत्वादिरूपनानाप्रकारेण परमात्मसम्बन्धित्वोक्तेरित्यर्थः। ह्रपदानुवृत्त्या प्रतिज्ञावाक्यं दर्शयति—अंश इति। अत्रांशत्वं द्विविधम्। उपजीवकत्वरूपतच्छेषत्वं तन्न्यूनत्वे सति तत्सदृशत्वं चेति। अत एवोभयविधांशत्वमभिप्रेत्य सादृश्यं चांशताऽस्त्वित्यनुव्याख्यानं चशब्दात्तदधीनत्वं चेति सुधा च प्रवृत्ता। अत्राद्ये अंशत्वे साध्ये अन्यथाऽपीत्यंशसहितो नानाव्यपदेशादित्यंशो हेतुः तत्रान्यथेत्यस्योपजीव्यत्वराहित्येन व्यपदेशादित्यर्थः। इदं च विशेषणं परमात्मनि व्यभिचारपरिहारकम्। न च पूर्वत्राप्यन्यथेत्यस्यान्वये ज्ञापकाभावः। 'नासौ' इत्यादिनानाव्यपदेशविरुद्धसम्बन्धप्रतिपादकांशोदाहरणस्यैव ज्ञापकत्वात्। अन्यथा तद्वैयर्थ्यापत्तेः। अत एव चान्यथा चेत्युभयत्रान्वयज्ञापकचशब्दप्रयोगः। न च चशब्दो वक्ष्यमाणभेदसमुच्चायक एवास्तु, न सम्बन्धसमुच्चायकोऽपीति वाच्यम्। तस्यापि शब्देनैव लाभात्। अत एवाभेदेनापीति भाष्ये अपिशब्दः। न च नानाव्यपदेशाख्योक्तहेतुसमुच्चायकोऽपिरिति वाच्यम्। एकेनैवोभयलाभात्। टीकायां सुधायां चान्यथेत्यस्य वक्ष्यमाणेन सम्बन्धो-

मां रक्षतु विभुर्नित्यं पुत्रोऽहं परमात्मनः ।
'अवः परेण पितरं यो अस्यानुवेद पर एनावरेण'

क्तिरपि वक्ष्यमाणेनापि सम्बन्धाभिप्रायिका, न तु पूर्वत्रासम्बन्धाभिप्रायिका । न च तत्सम्बन्धित्वरूपांशत्वे सम्बन्धाभावव्यपदेशस्यापि हेतुत्वेऽनंशत्वश्रुतेर्गतिं चाहेत्युत्तरभाष्यविरोधः, तत्रासम्बन्धश्रुतेः गत्यनुक्तेरिति वाच्यम् । तद्भाष्यस्य भेदाभेदव्यपदेशप्रयुक्तांशत्वप्रतियोग्यनंशत्वविषयत्वेनासम्बन्धरूपानंशत्वविषयत्वाभावात् । अत एव असम्बन्धश्रुतेरुपकर्तृत्वाभावविषयत्वेनाद्यसूत्रभाष्य एव गतेरुक्तत्वान्न तद्विरोधोऽशत्वश्रुतेर्न वा पौनरुक्त्यम् । द्वितीये अंशत्वे साध्ये तूत्तरत्राप्यन्वितेनान्यथा-चापीत्यंशसहितेन दाशकितवादित्यादिनोक्तो हेतुर्योज्यः । हेत्वन्तरेणैतत्समर्थयत इति टीकायां एतच्छब्दोऽप्यंशत्वसामान्यपर इति चन्द्रिकाकाराः । भाववोधकारास्तु अत्र तदधीनत्वे सति तत्सादृश्यमंशत्वं परमात्मनः पुत्रत्वं पुत्रान्नो नरकात्त्राणकर्तृत्वेन जीवनियामकत्वरूपमेव । जीवस्य परमात्मपितृत्वमपि तज्ज्ञानेन तत्संरक्ष्यत्वेन तदधीनत्वमेव । तत्र तदधीनत्वरूपसम्बन्धित्वांशे नानाव्यपदेशो हेतुः । तत्सदृशत्वांशे तु अन्यथाचापीत्यादिः हेतुः । अन्यथा चापीत्यत्रचशब्दो वक्ष्यमाणाभेदव्यपदेशसमुच्चायकः । अपिशब्दस्तु भेदाभेदव्यपदेशाख्यहेतोर्नानाव्यपदेशरूपपूर्वोक्तहेतुना सह समुच्चयार्थः । यथा च 'अन्यः परोऽन्यो जीवः' (पाराशर्या) इत्यंशोऽन्यथाशब्दोक्तभेदव्यपदेशः । तथा 'नासावस्य कुतश्चन' 'नायं तस्यापि कश्चन' इत्यंशोऽपि । 'असौ' परमात्मा 'अस्य' जीवस्य 'कुतश्चन' केनापि प्रकारेणोपकर्तव्यो न, किन्तूपकर्तैव । 'अयं' जीवोऽपि तस्य परमात्मनः कश्चनोपकर्ता न, किन्तूपकर्तव्य एवेति जीवपरमात्मनोः सदोपजीव्योपजीवकत्वकथनेन भेदव्यपदेश एव नासम्बन्धव्यपदेशः । हेत्वन्तरेणैतत्समर्थयत इति टीकाऽप्यंशत्वान्तर्गततदधीनत्वसाधकनानाव्यपदेशरूपहेत्वपेक्षया हेत्वन्तरेण तदन्तर्गततत्सदृशत्वांशं साधयतीत्यभिप्रायकेत्याहुः । 'अवः परेण' इति ऋङ्मन्त्रे तृतीया पञ्चम्यर्थे । जात इति उच्यत इति ब्रह्मेति च शेषः । अधीत्यस्याधिक्येनेत्यर्थः । प्रेत्युपसर्गस्तु उत्पत्तावतिशयमाह । यद्वा—अधीत्यस्य ब्रह्मेत्यर्थः । कुत इति तसिः षष्ठ्यर्थे । तथा च यतः 'परेण' पराद्धरेः 'अवः' अवमः यो

(ऋ. १-१६४-१८.) 'यस्तद्वेद सपितुष्पिताऽसत्'
(महाना. २-४.) 'यस्ता विजानात्स पितुष्पिताऽसन्'
(ऋ. १-१६४-१६.) 'द्वा सुपर्णा सयुजा सखाया'

जीवः 'अस्य' जगतः स्वस्य वा 'पितरं' परमात्मानं 'अनुवेद' यथावज्जानाति। अतोऽयं 'परः' परमात्मा 'एन' एतेनानेन 'अवरेण' जीवेन 'जातः' उत्पन्न इति व्यपदिश्यत इत्यर्थः। ननु तज्ज्ञातत्वात्तज्ज्ञातत्वोक्तौ देवदत्तज्ञाने यज्ञदत्तेऽपि तज्ज्ञाततोक्तिः स्यादित्यतः तज्ज्ञानं दुर्लभमित्याह — कवीयमान इति। 'इह' लोके 'कवीयमानः' सर्वज्ञकल्पः तत्त्वेनाभिमतः को नु को वा इह प्रजासु ब्रह्म प्रावोचत् न कोऽपि। तथा 'कुतः' कस्य च 'देवं' देवसम्बन्धि परब्रह्मविषयं 'मनो' ज्ञानमाधिक्येन समुत्पन्नम्। न कस्यापीत्यर्थः। तथा च परमात्मज्ञानवदेवदत्तादिज्ञानस्य दुर्लभत्वाभावान्न तज्ज्ञातृषु तत्पितृत्वादिव्यपदेशप्रसङ्ग इति भावः। तत्त्वप्रदीपे तु योऽवरोऽस्य स्वस्य जगतो वा पितरं यथावद्वेद 'परेण' परमात्मप्रसादेन, न तु स्वतः स तु जीवः परो भवति। अनेन परमात्मनाऽवरभूतेन निमित्तेनावरभूतपरमात्मप्रसादेनेति यावत्। कथं परमात्मनोऽवरत्वम? दर्शनक्रममपेक्ष्य, जीवः स्वस्वरूपदर्शनानन्तरं हि भगवन्तं पश्यति। तथा चान्ते दृश्यमानत्वादवरत्वमिति व्याख्यातम्। 'त्रीणि पदा निहिता गुहासु यस्तद्वेद स पितुष्पिता सत्' (महा. १-१-४.) इति तैत्तिरीयश्रुतेरयमर्थः। यस्य 'त्रीणि पदानि' स्वरूपाणि नारायणवासुदेववैकुण्ठाख्यानि गूहितत्वात् 'गुहासु' श्वेतद्वीपादिषु निहितानि। तद्ब्रह्म यो वेद 'सः' जीवः 'पितुः' जगत्पितुः ब्रह्मणः पिता 'असत्' अभवदित्यर्थः।

स्त्रियः सतीस्तां उ मे पुंस आहुः पश्यदक्षण्वान्न विचेतदन्धः।
कविर्यः पुत्रः स ईमाचिकेत यस्ता विजानात्स पितुष्पिताऽसत्॥

इति ऋङ्मन्त्रस्यायमर्थः—'सतीः' सत्यः निर्दुष्टाः स्त्रियः स्त्रीलिङ्गशब्दवाच्याः 'मे' मदुपास्याः या भगवन्मूर्तयः 'तां उ' तानेव ता एव 'पुंसः' परमपुरुषानाहुः। वेदादयो या देवतेत्यादिस्त्रीलिङ्गशब्दैः प्रतिपादयन्ति ता एव पुरुषादिपुल्लिङ्गशब्दैरपि प्रतिपादयन्तीति भावः। विधेयविवक्षया तान् पुंस इति पुल्लिङ्गप्रयोगः। योऽधिकारी ताः 'पश्यत्' पश्यति स

(मु. ३-१-१.) इत्यादिना नानाव्यपदेशादंशो जीवः ।

(४) तथा च पाराशर्यायणश्रुतिः—

अंशो ह्येष परस्य योऽयं पुमानुत्पद्यते च म्रियते च

चक्षुष्मान् । यो 'न विचेतत्' न विजानाति सोऽन्धः । यो भगवन्मूर्तीः पश्यति जीवः तच्चक्षुरेव सफलं तदन्यन्निष्फलमविद्यमानप्रायमेवेति भावः । 'यः कविः' सर्वज्ञो भगवत्पुत्रोऽपि विरिञ्चः 'स ईं' स एव 'आ' समन्तात्सम्यक् 'चिकेत' जानाति । यश्च 'ताः' मूर्तयो 'विजानात्' व्यजानात् विजानाति सः 'पितुः' जगत्पितुः विष्णोरभिव्यञ्जकत्वा-न्निमित्तात् 'पिता' जनकः 'असत्' भवेदिति । म इत्यमाच्छब्देन दीर्घतमा नाम ऋषिः गृह्यते । अस्य तद्दृष्टत्वात् । तत्त्वप्रदीपे तु याः 'सतीः' निर्दुष्टाः स्त्रियो वेदाभिमानिन्यस्तान् परमपुरुषानाहुः वेदादिशब्दै-र्ज्ञानिनः, श्रुतिरित्यादिस्त्रीलिङ्गशब्दवाच्या एव मद्दृष्टाः वेदाभिमानि-देवताः वेद इत्यादिपुल्लिङ्गशब्दवाच्यानाहुरिति यावत् । अभिमानिव्यपेक्षया चायं व्यपदेशः । 'अक्षण्वान्' ज्ञानदृष्टिमानेव तान् पश्यति नाज्ञानी । यः कविः 'पुत्रो' ब्रह्मा स एव

'यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै' (श्वे. ६-१८.) इति श्रुतेः ।

'तेने ब्रह्म हृदा य आदिकवये' इत्यादिस्मृतेश्च । 'आ' समन्ताद्वेद यः तानि छन्दांसि विशिष्टत्वेन जानाति साक्षाद्विष्णुवाचकत्वेन सः 'पितुः' विष्णोः पिता भवति । व्यञ्जकत्वाच्छन्दसां तज्ज्ञात्वापुरुषस्येति भाव इति वेदाभिमानिदेवतापरतया व्याख्यातम् । 'द्वा सुपर्णा' इत्याथर्वणश्रुतिस्तु द्युभ्वाधिकरणे व्याख्याता ।

(४) यन्नानाव्यपदेशादंशो जीव इति सूत्रकृदाह, तत्र श्रुतिं चाह—तथा चेति ॥ चशब्दो भिन्नक्रमः । न केवलं सूत्रकृतैव नानाव्यपदेशेनांशत्वं साधितम्, किंतु श्रुत्याऽपीति चशब्दार्थः । तां श्रुतिं पठति—अंश इति । हिशब्दः प्रसिद्धौ । एष इति क इत्यपेक्षायामाह—य इति । तथा च य उत्पत्तिनाशवान्पुरुषः प्रसिद्धोऽयं जीवः परमात्मनोंऽश इति प्रतिज्ञार्थः ।

नाना ह्येनं व्यपदिशन्ति । पितेति पुत्रेति भ्रातेति सखेति च, इति ।

(५) 'अन्यः परोऽन्यो जीवो नासावस्य कुतश्चन ।
नायं तस्यापि कश्चन' इत्यन्यथा च कापायणश्रुतिः ।

(६) 'ब्रह्म दाशा ब्रह्म कितवाः, ब्रह्मैवेमे दाशाः' इत्यभेदेनाप्येकेऽधीयते ।

चशब्दो परस्परसमुच्चये । कुत इत्यत आह—नानेति । हि यतः 'एनं' जीवं परस्य पितेत्यादिनानाप्रकारेण व्यपदिशन्ति वेदा अत इत्यर्थः । इतिशब्दाः प्रकारवचनाः । चशब्दो द्विर्गृहीतः सर्वत्रान्वितः प्रकाराणां परस्परसमुच्चयमाह । इतीत्यस्य इति पाराशर्यायणश्रुतिरिति पूर्वेणान्वयः ।

(५) हेत्वन्तरेणांशत्वं समर्थयते—अन्यथेति ॥ तमंशं व्याख्याति—अन्य इति । टीकायामन्य इतीति प्रायिकः पाठः । अन्यथेतीति पाठः सूत्रांशप्रतीकग्रहणरूपः स्वरसः । 'अन्यथा च' वक्ष्यमाणाभेदापेक्षया परमात्मभिन्नत्वेनेति यावत् । श्रुतिरित्यनन्तरं एनं व्यपदिशतीति शेषः । चशब्दार्थः प्रागेवोक्तः । इयं च श्रुतिः नासावित्यस्य वैयर्थ्यपरिहाराय भेदे असम्बन्धे च प्रमाणम् । अर्थस्तु प्रागेवोक्तः ।

(६) भेदप्रतियोग्यभेदव्यपदेशं दर्शयति—ब्रह्मेति ॥ ब्रह्मैवेमे दाशा इत्युपसंहारस्थं वाक्यान्तरं शाखान्तरस्थं वा । यद्वा—ब्रह्मैवेमे दाशा इत्यादिपदार्थपरश्रुतिवाक्योदाहरणम् । अत्र ये दाशाः नौतारकाः कैवर्ताः ते, ये च 'कितवाः' द्यूतकृतः, ये चामी 'दासाः' स्वामिप्यात्मानं उपक्षिपन्तः ते सर्वेऽपि ब्रह्मैवेति दाशकितवाद्युद्देशेन ब्रह्माभेदो विधीयत इत्यस्याभेदव्यपदेशोपपत्तिरिति भावेन दाशकितवादिन्वमित्यस्य तात्पर्यार्थमाह—अभेदेनापीति । न केवलं 'अन्यः परः' इति भेदेन, किन्त्वभेदेनापीत्यपिशब्दार्थः । अधीयत इत्यनन्तरं ब्रह्मसूत्रे आथर्वणिका इति शेषः । तथा चैतच्छ्रुतिद्वये जीवेशयोर्भेदाभेदोक्तेरन्यतरश्रुतिबाधस्य चायोगात् साक्षाद्भेदाभेदयोश्च विरोधादनुपपत्तेः श्रुतिद्वयान्यथाऽनुपपत्त्या भेदमङ्गीकृत्याभेदस्थाने अंशत्वं च वक्तव्यमिति भावः ।

(७) तथा चाग्निवेश्यश्रुतिः-- 'अंशो ह्येष परस्य भिन्नं ह्येनमधीयिरे अभिन्नं ह्येनमधीयिरे' इति ।

(८) वाराहे च—

पुत्रभ्रातृसखित्वेन स्वामित्वेन यतो हरिः ।
बहुधा गीयते वेदैर्जीवोंऽशस्तस्य तेन तु ॥

(९) यतो भेदेन तस्यायमभेदेन च गीयते ।

---

(७) नानाव्यपदेशहेतुनांशत्वसाधनस्य यथा श्रुतिसमाख्योक्ता, तथा भेदाभेदोक्त्यन्यथाऽनुपपत्त्याऽप्यंशो जीव इत्यत्रापि श्रुतिसमाख्यामाह--तथाचेति ॥ अन्यथेत्यादिना यथा सूत्रकृदाह, तथा श्रुतिरप्याहेत्यर्थः । तां श्रुतिमुदाहरति—अंश इति । आद्यो हिः प्रसिद्धौ । 'एषः' जीवः परस्य 'अंशः' ततो न्यूनत्वे सति तत्सदृशत्वरूपांशत्ववानिति प्रतिज्ञार्थः । द्वितीयतृतीयहिशब्दौ भेदाभेदव्यपदेशयोरुभयोरपि हेतुत्वज्ञापकौ । तथाचैनं जीवं परस्य सकाशाद्यतो भिन्नमभिन्नं चाधीयिरे शाखिनः अत इत्यर्थः ।

(८) समस्तसूत्रार्थं स्मृतिं चाह—वाराहे चेति ॥ न केवलं सूत्रकृतैव उक्तमिदं, किंतु 'वाराहे' वराहपुराणवचनेऽप्युक्तमित्यर्थः । पुत्रेत्यादिना बहुधेत्येतद्विवृतम् । यद्वा—पुत्रेत्यादिः संक्षेपः बहुधेति विस्तरः । जीवस्येति शेषः । त्वप्रत्ययस्य प्रत्येकं सम्बन्धः । प्रकारे तृतीया । उपलक्षणमेतत् । असम्बन्धित्वे चेत्यपि द्रष्टव्यम् । 'गीयते' प्रतिपाद्यते 'तेन' हेतुना । तुरेव । जीवस्तस्य हरेरंश एवेति सम्बन्धः ।

(९) एवं नानाव्यपदेशादंशो जीव इत्युक्त्वा यदन्यथेत्यादिनोक्तं भेदाभेदव्यपदेशस्यांशत्वाक्षेपकत्वं तदाह—यत इति ॥ आद्यश्चः प्रकारसमुच्चये, द्वितीयो हेतुसमुच्चये तथा च यतोऽयं जीवस्तस्य हरेस्सकाशात् 'भेदेन' भिन्नत्वेनाभेदेन च प्रकारेण 'गीयते' प्रतिपाद्यते अतोऽस्य जीवस्यांशत्वं 'उद्दिष्टं' आक्षिप्तमिति योजना । ननु भेदाभेदव्यपदेशान्यथाऽनुपपत्त्या भेदमङ्गीकृत्य अभेदस्थाने तन्न्यूनत्वे सति तत्सदृशत्वरूपांशत्वं किमर्थमङ्गीकर्तव्यम्, मुख्यतो भेदाभेदावेव किं न स्यातामित्यत आह—भेदाभेदाविति । 'मुख्यतः' साक्षाद्विरोधादिति भावः । इतीत्यस्य

अतश्चांशत्वमुद्दिष्टं भेदाभेदौ न मुख्यतः ॥ इति ॥ ४३ ॥

(१०) सू—ॐ ॥ मन्त्रवर्णात् ॥ ॐ ॥ ४४ ॥

'पादोऽस्य विश्वा भूतानि' (ऋ. १०-९०-३.) इति ॥ ४४ ॥

(११) सू—ॐ ॥ अपि स्मर्यते ॥ ॐ ॥ ४५ ॥

'ममैवांशो जीवलोके जीवभूतस्सनातनः' (गी. १५-७.) इति ॥ ४५ ॥

इति वाराह इति पूर्वेणान्वयः । ततश्चायं चन्द्रिकारीत्या सूत्रार्थः—'नानाव्यपदेशात्' पितृत्वपुत्रत्वादिनानाप्रकारेण जीवस्य परमात्मोपकर्तव्यत्वेन तत्सम्बन्धित्वोक्तेः 'अन्यथा च' 'न सम्बन्धः परस्य, नासावस्य' इत्यसम्बन्धित्वेनाप्युक्तः जीवः परस्यांश इवांशस्तदुपजीवित्वेन तच्छेषभूतः । किञ्च—यतः 'एके' शाखिनो 'अन्यथा' वक्ष्यमाणभेदापेक्षया पराद्धदेनैनं जीवं 'अधीयते' पठन्ति । एवं 'एके' परे शाखिनः परब्रह्मणः 'दाशकितवादित्वं' दाशकितवदासादिरूपजीवभावं दाशकितवादेर्ब्रह्मत्वं तदभेदमधीयते, अतोऽपि जीवः परस्य 'अंशः' तन्न्यूनत्वे सति तत्सदृशत्वरूपांशत्वोपेत इति ।

(१०) एवमुपपत्त्या जीवस्येश्वरांशत्वं प्रसाध्य श्रुत्याऽपि तत्साधयत्सूत्रं पठित्वा तां श्रुतिमुदाहरति—मन्त्रेति ॥ मन्त्रवर्णः श्रुतिः । चशब्दोऽत्राकर्षणीयः । ज्ञः अंश इति च वर्तते । तथा च न केवलमुपपत्तेः, किंतु 'पादोऽस्य' इति मन्त्रवर्णाच्च जीवः परस्यांश इति योजना । 'विश्वा भूतानि' सर्वे जीवाः 'अस्य' परमात्मनः 'पादः' अंश इति श्रुत्यर्थः प्रागेवोक्तः ।

(११) स्मृत्यापि जीवस्य परमात्मांशत्वं साधयत्सूत्रं पठित्वा तां स्मृतिमुदाहरति—अपीति ॥ न केवलं जीवस्य परमात्मांशत्वं श्रूयते, किंतु 'स्मर्यते' स्मृत्याप्युच्यते, अतोऽपि जीवः परस्यांश इत्यन्वयः । 'जीवलोके' जीवच्छरीरे स्थितः 'सनातनः' नित्यो 'जीवभूतः' जीवभावोपेतः जीवाख्यो यो ब्रह्मादिचेतनराशिः सः 'ममांश एव' मदुपजीव्य एव मदधीनत्वे सति मत्सदृश एव वा, न तु अभिन्नांशोऽनंशोवेत्यर्थः ।

(१२) अनंशत्वश्रुतेर्गतिं चाह—

सू—ॐ ॥ प्रकाशादिवन्नैवं परः ॥ ॐ ॥ ४६ ॥

अनंशत्वेऽपि न मत्स्यादिरूपी पर एवंविधः ।

(१३) यथा तेजोंऽशस्यैव कालाग्नेः खद्योतस्य च नैकप्रकारता ।

कृष्णवाक्यमेतत् । कुतः ? यत ईश्वर एव जीवस्य विषयानुभवार्थं मनष्टानि । बहुव्रीहिः । 'प्रकृतिस्थानि' मूलकारणस्थानि शरीरस्थानि वा ज्ञानेन्द्रियाणि 'कर्षति' आकर्षति अत इत्यर्थः । ईश्वरश्चाहमेवेति भावः । तत्र च विवेकः—ईश्वरो जीवस्य शरीरावाप्तौ मूलकारणादिन्द्रियाणि कर्षति, तदुत्क्रमणे तु शरीरात्, स्थितौ तु गोलकादिभ्य इति प्रमेयदीपोक्तो ज्ञातव्यः ।

(१२) ननु जीवस्येशांशत्वं न युक्तम्, तथा सति अंशत्वाविशेषात् जीवानां मत्स्यादिसाम्यापातात्, अनंशत्वश्रुतिविरोधाच्चेत्याशङ्कां परिहरत्सूत्रमवतारयति—अनंशत्वेति ॥ 'नैवांशः' इत्यादिश्रुतेरित्यर्थः । 'गतिं' विषयं, मत्स्याद्यसाम्यं चशब्दार्थः । 'आह' अर्थात्साक्षाच्चेति भावः । अंशत्वश्रुतेः तद्विरोधशान्त्यर्थमिति शेषः । पूर्वसूत्रादपिशब्दमनुवर्त्य नैवं पर इति सूत्रांशं व्याचष्टे—अंशत्वेऽपीति । जीवानां मत्स्यादीनां च भगवदंशत्वाविशेषेऽपीत्यर्थः । पर इत्यस्यार्थो—'मत्स्यादिरूपी परः' परमात्मेति । एवमित्यस्यार्थः—एवंविध इति । जीवेन सर्वथा समो न, कुतः ? यतः 'एवंविधो न' जीववद्भिन्नांशो न, किंतु एवंविधः स्वरूपांश इत्यनुवृत्त्या योजना । केवलांशत्वं तु सर्वसाम्ये न प्रयोजकमिति भावः ।

(१३) ननु जीवेषु भेद एव मत्स्यादिष्वभेद एवेति वैषम्यमनुपपन्नम्, उभयोरंशत्वे विशेषाभावादित्याशङ्कोत्तरत्वेन प्रवृत्तं प्रकाशादिवदित्यंशं

अभिन्नांशास्तु मत्स्याद्यास्तेजसः कालवह्निवत् ।
जीवा भिन्नांशकास्तत्र तेजसः प्रतिबिम्बवत् ॥

इति तत्त्वार्थदीपोक्तप्रमाणानुसारेण विवृणोति—यथेति ॥ एवकारो व्यर्थः । चशब्दः समुच्चये । 'एकप्रकारता' उभयोरभिन्नांशत्वाभिन्नांशत्वाख्यैकप्रकारता न, किंतु प्रलयकालीनाग्नेरभिन्नांशत्वं, खद्योतशब्दितकीट-

यथा जलांशस्यामृतसमुद्रस्य मूत्रादेश्च ।
तथा च पृथिव्यंशस्य मेरोर्विष्ठादेश्च ।
(१४) अभिमानिदेवतापेक्षयैतत् ॥ ४६ ॥

(१५) सू—ॐ ॥ स्मरन्ति च ॥ ॐ ॥ ४७ ॥

विशेषस्य भिन्नांशत्वमिति भिन्नप्रकारतेत्यर्थः । सौत्रादिशब्दगृहीत-दृष्टान्तान्तरं विवृणोति—यथा जलांशस्येति । जलांशस्यापीत्यर्थः । जलांशत्वाविशेषेऽपीति यावत् । 'अमृतसमुद्रस्य' शुद्धोदकसमुद्रस्य । मूत्रादेश्चेत्यनन्तरं नैकप्रकारतेत्यनुषज्यते । किन्त्वमृतसमुद्रस्याभिन्नांशत्वं मूत्रादेर्भिन्नांशत्वमेवेति भावः । आदिपदेन कश्मलोदकं गृह्यते । आदिपद-गृहीतदृष्टान्तान्तरं विवृणोति—यथा पृथिव्यंशेति । अत्राप्यर्थकैवकारोऽनुषज्यते, नैकप्रकारतेति च । किंतु मेरुगिरेः पृथिव्यभिन्नांशत्वं विष्ठाशब्दिता-शुद्धादेस्तु भिन्नांशत्वमेवेति भावः । तथेति शेषः । पूर्वेणान्वयः ।

(१४) ननु कालाग्निद्योतयोः तेजोलक्षणभूतकार्यत्वात् मूत्रामृत-समुद्रयोरब्लक्षणभूतकार्यत्वात् मेरुविष्ठयोश्च पृथिवीलक्षणभूतकार्यत्वात् कार्यकारणानां च सिद्धान्तिभिर्भेदाभेदाभ्युपगमेन भेदाभेदसाम्यात् कथमेतन्मत्स्यादीनामभिन्नांशत्वे जीवानां च भिन्नांशत्वे दृष्टान्ता भवेर-न्नित्यत आह—अभिमानेति ॥ प्रकाशाद्यभिमानिदेवतापेक्षयेत्यर्थः । 'एतत्' प्रकाशादिवदिति दृष्टान्ताभिधानं एतेषां दृष्टान्तत्वं वा । तथा च तेजो-जलपृथिव्यभिमानिनीनां सूर्यवरुणधराणां कालाग्नेयमृतसमुद्रमेध्यभि-माननां तदंशानां च क्रमेणान्योन्यमभिन्नत्वात्, खद्योतमूत्रविष्ठाद्यभि-मानिनीनां अपभ्रष्टाख्यदेवतानां तु क्रमेण तेजोजलपृथिव्यभिमानिभ्यो भिन्नत्वात् युक्तं दृष्टान्तत्वमिति भावः । अनेन सूत्रे प्रकाशादिशब्द उभयविधतेजोंशादिपरोऽभिमानिदेवतापरश्च । तथा च प्रकाशादि-वदित्यस्य कालाग्निखद्योतादिषु तेजआद्यंशष्वेव भिन्नत्वाभिन्नत्ववैषम्य-वदित्यर्थ इत्युक्तं भवति । अनेनैवानंशत्वश्रुतेरभिन्नांशत्वनिषेधपरत्वेन गतिरुक्ता भवति । अत एवांशत्वश्रुतेः तद्विरोधोऽपि परिहृतः ।

(१५) ननु दृष्टान्तमात्रस्यानिर्णायकत्वात् तत्र तथात्वेऽपि जीवानां मत्स्यादीनां च स्वरूपांशत्वमभेदश्च किं न स्यादित्याशङ्क्य स्मृतिभिः

(१६) एते स्वांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।

परिहरत्सूत्रमुपन्यस्यति—स्मरन्ति चेति ॥ न केवलं दृष्टान्तमात्रादेतदुच्यते, किंतु यतः स्मृतिकर्तारो जीवस्य भिन्नांशत्वं मत्स्यादेरभिन्नांशत्वं च स्मरन्त्यतोऽपीत्यर्थः ।

(१६) सूत्रकृदभिप्रेताः स्मृतीरुदाहरति—एत इति ॥ भागवते प्रथमस्कन्धे

जगृहे पौरुषं रूपं भगवान्महदादिभिः ।
सम्भूतं षोडशकलमादौ लोकसिसृक्षया ॥

इत्यनेन यो भगवान् प्राक् जगत्संहृत्य चिन्प्रकृत्यात्मके प्रलयोदके श्रीपर्यङ्के प्रकृतिमयतमसा निगूढः स्थितः स एव लोकसृष्टीच्छया आदौ पुनः सृष्टिकाले स्वगृहकं तमः पीत्वा प्रलये सूक्ष्मरूपेण स्वोदरनिविष्टंमहदहङ्कारादिभिः सहितमेकादशेन्द्रियपञ्चभूताख्यषोडशकलायुक्तं प्राणादिषोडशकलान्वितं वा 'पौरुषं' परमपुरुषाख्यं रूपं 'जगृहे' व्यक्तमकरोत् इत्यण्डसृष्टेः पूर्वं परमपुरुषाख्यं रूपं अभिधायाथ 'यस्याम्भसि शयानस्य' इत्यनेन अण्डसृष्ट्यनन्तरं महदादितत्त्वदेवस्तमहाण्डान्तःप्रविष्टात्तस्मादेव परमपुरुषाच्चतुर्मुखजनकपद्मयुङ्नाभियुतशेषशायिपद्मनाभाख्यरूपस्याभिव्यक्तिमभिधाय 'यस्यावयवसंस्थानैः' इत्यनेन अन्तरिक्षादिलोकजनकपरमपुरुषाख्यविराट्रूपं चाभिधाय 'यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः' इत्यनेन सर्वे परमपुरुषांशविभागरूपत्वेनावतिष्ठन्ते तत्सामर्थ्यैकदेशेन जायन्ते चेत्यभिहितं, के ते अंशा इत्याकांक्षायां 'द्वितीयं तु भवायास्य' इत्यारभ्य 'अथासौ युगसन्ध्यायाम्' इत्यन्तेन सविस्तरं वराहादीनां भगवदंशत्वमुक्त्वा,

ऋषयो मनवो देवाः मनुपुत्रा महौजसः ।
कलाः सर्वे हरेरेव सप्रजापतयस्स्मृताः ॥

इत्यनेन ऋष्यादीनां प्रियव्रतादिमनुपुत्राणां दक्षादिप्रजेश्वराणां च जीवानामपि कला इत्यनेन भगवदंशत्वमुक्तम् । तत्र किमविशेषेण सर्वे अंशा इत्याशङ्कानिरासाय भगवदवतारेषु जीव इव कलात्वस्योपचरितत्वशङ्कावारणाय च 'एते' इत्यनेन वराहादीनां स्वरूपांशत्वमभिधीयते । 'एते'

इन्द्रारिव्याकुलं लोकं मृडयन्ति युगेयुगे ॥

(१७) अतः परं यदव्यक्तमव्यूढगुणबृंहितम् ।
अदृष्टाश्रुतवस्तुत्वात्स जीवो यः पुनर्भवः ॥

(१८) स्वांशश्चाथो विभिन्नांश इति द्वेधांश इष्यते ।

वराहाद्या अवताराः 'पुंसः' परमपुरुषस्य नारायणस्य 'स्वांशकलाः' कल्प्यन्त इति कलाः स्वरूपांशरूपा एव विभागाः, न तु भिन्नांशाः, उपचारेण कला इव कला वा । भेदवद्भेदाभेदावपि नेत्याह—कृष्ण इत्यादिना । कृष्णशब्दोऽयं 'कृष्णो मुक्तैरिज्यते वीतमोहैः' इत्यादाविव नारायणेऽस्ति । तुशब्दोऽवधारणे । तथा च एते न स्वांशकला इत्येतावन्मात्रं, किंतु 'स्वयं' साक्षात् भगवान् कृष्णो मूलरूप्येव तदत्यन्ताभिन्नोऽपि । उक्तं हि प्रमेयदीपे—एते वराहाद्याः पुंसः स्वांशकलाः । कोऽर्थः ? कृष्णः परमपुरुषो भगवान् स्वयमेव एत इति स्वांशकला इत्यस्यैव भेदाभेदशङ्कावारणायार्थकथनं, कृष्ण इत्यादीत्यस्याभिप्रायः । आदिसृष्टाववतीर्णाः एते वराहादय एव इन्द्रारिभिः दैत्यैर्व्याकुलं पीडितं जनं 'युगेयुगे' पुनरवतीर्य 'मृडयन्ति' रक्षन्ति सुखयन्ति चेत्यर्थः । यथोक्तं गीताभाष्ये—'रूपाण्यनेकान्यसृजत् प्रादुर्भावभवाय सः' इति । सः नारायणः 'असृजत्' व्यभजत् । उत्तरत्रेति शेषः ।

(१७) एवं वराहादीनां स्वरूपांशत्वमुक्त्वा ऋषय इत्यादिना भगवदंशत्वेनोक्तानां जीवानां भिन्नांशत्वमुच्यते—अतः परमित्यादिना ॥ यत् 'अतः' परमपुरुषात् जडाच्च 'परं' भिन्नं 'अव्यक्तं' अकार्यं सूक्ष्ममिति वा 'अव्यूढगुणबृंहितं' अनादिकालात्कदाचिदपि अनपगतसत्त्वादिगुणयुक्तं चैतन्यं यच्च 'अदृष्टाश्रुतवस्तुत्वात्' श्रुतपदं मननादेरप्युपलक्षणम् । तथा च अश्रुतामतानुपासितासाक्षात्कृतपरमात्मस्वरूपत्वात् 'पुनर्भवः' पौनःपुन्येन जायमानो म्रियमाणश्च संसारी स जीव इत्यर्थः । तत्त्वप्रदीपे तु अदृष्टाश्रुतवस्तुत्वादित्यस्य अव्यूढगुणबृंहितमित्यनेन अन्वय उक्तः । पुनर्भव इत्यनन्तरमिति भागवते इति शेषः ।

(१८) न केवलमसंसारित्वसंसारित्वाभ्यां रक्षकत्वरक्ष्यत्वाभ्यां गुणबन्धागुणबन्धाभ्यां मत्स्यादीनां जीवानां चांशिनोऽभेदभेदावसाम्यं च,

अंशिनो यत्तु सामर्थ्यं यत्स्वरूपं यथा स्थितिः ॥
तदेव नाणुमात्रोऽपि भेदः स्वांशांशिनोः क्वचित् ।
विभिन्नांशोऽल्पशक्तिस्स्यात्किञ्चिन्साद्दश्यमात्रयुक् ॥
इति वाराहे ।

(१९) न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः । (गी. ११-४३.)
इति च ॥ ४७ ॥

किंतु मत्स्यादीनां स्वरूपांशलक्षणयुक्तत्वात् जीवानां तु भिन्नांशलक्षणयोगित्वात् अंशिना भेदाभेदावसाम्यं चेति भावेन स्वरूपास्वरूपांशविभागपूर्वकं तयोर्लक्षणं तावत् स्मृत्या दर्शयति—स्वांशश्चेति ॥ स्वरूपांश इत्यर्थः । चशब्दो द्वैधंवेत्यवधारणार्थः । अथो इत्यर्थान्तरे । 'सामर्थ्यं' जगत्सृष्ट्यादिलक्षणं, तुश्चार्थः । 'यत्स्वरूपं' यथा ज्ञानानन्दादि 'यथा स्थितिः' यथा सर्वोत्तमत्वादि । सुधारीत्या सर्वगतत्वादिपरिमाणं वा, देशतः कालतो गुणतः व्याप्तत्वेन स्थितिरिति वा । तदेव स्वरूपांशस्य भवतीति शेषः । न तु ततो भिन्नमित्येवार्थः । कुत इत्यत आह—न भेदस्स्वांशांशिनोरिति । स्वरूपांशांशिनोः 'क्वचिदपि' काले भेदो नास्तीत्यर्थः । ननु केवलभेदाभावेऽपि अभेदसहितः किं न स्यादित्यत आह—अणुमात्रोऽपीति । अभेदसहितोऽपीत्यर्थः । विभिन्नांशलक्षणमाह—विभिन्नांश इति । किञ्चिन्साद्दश्यमात्रयुगित्येतत् सुधारीत्या परमैश्वर्येण चित्त्वादिरूपेण किञ्चिन्साद्दश्यमात्रयुगिति, अंशिशब्दमुख्यवाच्येन मत्स्यादिना किञ्चिन्साद्दश्यं तत्सत्तयैव सत्तावत्त्वरूपं तन्मात्रयुगिति च द्वेधा व्याख्येयम् । मात्रशब्देन सर्वथा साद्दश्यमभेदो भेदाभेदौ च निरस्तौ ।

(१९) एतच्च स्वरूपांशत्वलक्षणं कृष्णावतारेऽस्तीति स्मृत्याऽऽह—नेति ॥ त्वत्समोऽन्यो नास्ति कुतोऽधिक इत्यर्थः । कृष्णं प्रति पार्थवचनमेतत् । गीतायामिति शेषः । सप्तम्यन्तानां स्मरन्तीत्यनेनान्वयः । जीवेषु भिन्नांशलक्षणवत्त्वं साक्ष्यनुभवसिद्धमिति न तत्र प्रमाणमुदाहृतम् । अनेन—यतः स्मृतिकर्तारो मत्स्यादीनां जीवानां च भगवदंशत्वं स्वरूपास्वरूपांशत्वे तल्लक्षणे मत्स्यादीनां तद्योगित्वं च 'स्मरन्ति' भागवतादि-

(२०) सू—ॐ ॥ अनुज्ञापरिहारौ देह-सम्बन्धाज्ज्योतिरादिवत् ॥ ॐ ॥ ४८ ॥

परानुज्ञया प्रवृत्तिः परतो बन्धनिवृत्तिश्च जीवस्य प्रतीयते, अंशत्वेऽपि देहसम्बन्धात् ।

(२१) 'य आत्मानमन्तरो यमयति' (माध्यन्दिनशा०) 'तमेवं

स्मृतिषु प्रतिपादयन्ति अतोऽपि नोभयेषां अविशेष इति सूत्रार्थ उक्तो भवति ।

(२०) एवं जीवानां मत्स्यादीनां च अंशिना क्रमेण भेदाभेदसद्भावा नैकविधतेत्युक्तम् । युक्तयन्तरेण च एकविधतां परिकुर्वन्सूत्रमुपन्यस्य व्याचष्टे—अनुज्ञेति ॥ परानुज्ञया प्रवृत्तिरित्यनेन सूत्रे परपदान्वयः, जीवस्य प्रवृत्तये परानुज्ञेति तत्त्वप्रदीपोक्तेः । अनुज्ञापदं अनुज्ञानाध्य-प्रवृत्तिपरमिति सूचितम् । परतो बन्धनिवृत्तिरित्यनेन अत्रापि परपदान्वयः, बन्धस्य योग्यतया सम्बन्धः, अनुज्ञा च परिहारश्चेति विग्रहश्च सूचितः । जीवस्य प्रवृत्तिमोक्षयोरुभयोरपीश्वराधीनत्वज्ञापनायोभयत्र परशब्द-प्रयोगः । केचित्तु—परितो हारः परिहारः सर्वकर्मणि जीवस्य प्रवृत्तिः, बन्धनिवृत्तिश्च परिहारः, परिहारश्च परिहारश्च परिहारौ, अनुज्ञया परिहारौ अनुज्ञापरिहाराविति तृतीयातत्पुरुष इति परानुज्ञेत्यादि-भाष्यानुज्ञासूत्रांशयोरर्थ इत्याहुः । चस्समुच्चये । सूत्रे जस्येत्यनुवृत्तपद-स्यार्थो जीवस्येति । विमतजीवस्येत्यर्थः । समुदायैकवचनमिदम् । अनु-वृत्तस्यापेरर्थमाह—अंशत्वेऽपीति । जीवानां मत्स्यादीनां चांशत्वाविशेषेऽ-पीत्यर्थः । प्रतीयत इत्यस्य प्रत्येकमन्वयः । यत इति शेषः । अस्यातोऽपि नैवं नैकविधतेत्यनुवृत्तसाध्येनान्वयः । प्रतीयते चेत्यप्यन्वयेन सूत्र-चशब्दानुवृत्तिस्सूचिता । केन हेतुना प्रतीयत इत्यतः तत्र देहसम्बन्धा-दित्येतद्योजयति—देहेति । स्वांशिकर्मानिर्मितदेहसम्बन्धित्वादित्यर्थः । स्वांशिपदं परमात्मरूपभिन्नांशिस्वरूपांश्युभयपरम् । तेन नार्जुनादौ व्यभिचारः, न वा पक्षे विमतजीवेऽप्रसिद्धिरिति ध्येयम् ।

(२१) न केवलं देहसम्बन्धाज्जीवस्यानुज्ञापरिहारौ प्रतीयेते, किंतु

विद्वान्' (तै. आ. ३-१२.) इत्यादिना । न तु परस्य ।

(२२) 'वासुदेवस्सङ्कर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मो वराहो नारसिंहो वामनो रामो रामः कृष्णो बुद्धः कल्किरहं शतधाऽहं सहस्रधाऽहममितोऽहमनन्तोऽहं नैवते जायन्ते न म्रियन्ते नैषामनुज्ञा न बन्धो न मुक्तिस्सर्व एव ह्येते पूर्णा अजरा अमृताः पराः परानन्दाः' इति चतुर्वेदशिखायाम् ॥

श्रुत्याऽपीत्याशयेन तत्र क्रमेण श्रुती आह—य इत्यादिना ॥ 'यः' इति श्रुतिः कर्त्रधिकरणे 'तम्' इति श्रुतिश्च जिज्ञासाधिकरणे व्याख्याता । इत्यादिनेत्यस्य प्रतीयत इत्यनेनान्वयः । चशब्दोऽत्राध्याहार्यः । मत्स्यादीनामपि प्रवृत्तिमोक्षयोरीश्वराधीनत्वात् कथं नैकविधतेत्यत आह—नेति । परानुज्ञापरिहारौ नेत्यर्थः । तुर्विशेषे । 'परस्य' मत्स्यादेः ।

(२२) नेत्येतत्कुतः इत्यतो देहासम्बन्धादेवेति सिद्धेऽप्यत्र श्रुतिं चाह—वासुदेव इति ॥ विष्णुवाक्यमेतत् । अहं वासुदेवादिचतुर्मूर्तिः, अहं मत्स्यादिदशमूर्तिः 'रामो' भार्गवः, पुनश्च 'रामो' दाशरथिः, कल्किशब्द इकारान्तोऽप्यस्ति । अहं 'शतधा' नारायणादिशतरूपी अष्टोत्तरनामवाच्यस्य नारायणादेः अल्पत्वादप्राविवक्षया शतधेत्युक्तिः । उक्तं हि तत्त्वप्रदीपे—शतधा नामाष्टशतवाच्यत्वेन शतर्चिन इतिवत् सामीप्यादविरोध इति । अहं 'सहस्रधा' विश्वादिसहस्रनामवाच्यत्वेन सहस्ररूपी । 'सहस्रधा' सहस्रनामवाच्यत्वेनेति तत्त्वप्रदीपोक्तेः । अहं 'अमितः' परादिबहुरूपी 'अहमनन्तः' अजिताद्यनन्तरूपीत्यर्थः । तदुक्तं बृहदारण्यकभाष्ये—

शतं नारायणाद्यात्मा विश्वाद्यात्मा सहस्रकम् ।
परादिरूपो बहुधा सोऽनन्तात्माऽजितादिकः ॥ इति ।

'एते' वासुदेवाद्याः । 'एषां' वासुदेवादीनां 'अनुज्ञा' प्रवृत्त्यर्थं परानुज्ञा परानुज्ञया प्रवृत्तिः 'मुक्तिः' बन्धात् । अत्र निषेधवाक्यपञ्चकेन जीवनिष्ठानां जननादीनां भगवदवतारेषु प्रत्येकं निषेधात् मत्स्यादीनामनेकधा जीववैषम्यमुपपादितम् । अनेन सूत्रे अनुज्ञापरिहारशब्दौ जननादीनामपि उपलक्षकाविति युक्तं भवति । निषेधपञ्चकेऽपि हेतुमाह—एते सर्वे

(२३) युज्यते च ज्योतिरादिवत्। यथाऽऽदित्यो वियद्गतस्तत्प्रकाशश्चैकप्रकारः।

(२४) 'शुक्लं कृष्णं कनीनिका' (ऐ. आ. २-१-५.) इति तदंश-

पूर्णा इति। 'अमृताः' नित्यमुक्ताः। हिशब्दो हेतौ। विधिपञ्चकेनापि मत्स्यादिषु ईश्वरस्वरूपांशलक्षणोक्तया अतथाभूतानां मत्स्यादिवैषम्यमुपपादितं भवति। चतुर्वेदशिखायामित्यनन्तरं वचनादिति शेषः। अस्य न तु परस्य परतोऽनुज्ञापरिहारौ स्त इति पूर्ववाक्येनान्वयः।

(२३) यदुक्तं जीवः अंशिपरमात्माधीनप्रवृत्त्यादिमान् स्वांशिकर्मानिर्मितदेहसम्बन्धित्वादिति, तत्र युज्यते व्याप्त्यभावादित्यतः प्रवृत्तं दृष्टान्तांशं सशेषं योजयति—युज्यते चेति॥ एतदिति शेषः। अनेन सूत्रे युज्यते चैतदित्यध्याहारस्सूचितः। 'एतत्' साधनम्। सूत्रे ज्योतिरादिवदित्युक्तया मत्स्यादिः स्वांश्यधीनप्रवृत्तिर्न भवति स्वांशिकर्मानिर्मितदेहासम्बन्धित्वात् वियद्गतप्रकाशाद्यभिमानिवदिति यत् प्रयोगान्तरमप्यभिप्रेतं, तदपि युज्यत इत्याशयेन दृष्टान्तवचनमेव स्फुटयति—यथेति। 'वियद्गतः' अन्तरिक्षगतः 'आदित्यः' तन्मण्डलाभिमानी सूर्यः अंशी तत्प्रकाशः सूर्यप्रकाशाभिमानी सूर्यांशश्च 'एकप्रकारः' एकविधः द्वावेकलक्षणोपेतौ, अत एवांशः अंश्यधीनानुज्ञादिरहित इत्यर्थः। तथा परो मत्स्यादिश्चैकप्रकार इति वाक्यशेषः।

(२४) एवं ज्योतिरादिवदित्यंशं देहसम्बन्धित्वहेतोर्व्यतिरेकव्याप्तौ तदसम्बन्धित्वहेतोरन्वयव्याप्तौ दृष्टान्तपरतया व्याख्याय वैपरीत्येन तदुभयव्याप्तिदृष्टान्तपरतयाऽपि व्याचष्टे—शुक्लमिति॥ यथेत्यत्रापि संयोज्यम्। इतीत्यनन्तरं श्रुताविति शेषः। तदंशस्यापीति। सूर्यमण्डलांशत्वेनोक्तस्यापीत्यर्थः। यद्वा—मण्डलाभिमान्यंशत्वेन उक्तस्यापीत्यर्थः। एवमक्षिपदमपि चक्षुस्तदभिमान्यपभ्रष्टाख्यदेवतोभयपरतया व्यख्येयम्। यद्यपितथार्पात्यर्थेऽपिशब्दः। अयं भावः—छान्दोग्ये 'अथ यदेतदादित्यस्य शुक्लं भाः सैव ऋक्, अथ यन्नीलं परः कृष्णं तत्साम .... अथ यदेतदक्ष्णश्शुक्लं भाः सैव ऋक्, अथ यन्नीलं परः कृष्णम्' (छा. १-६, ७.) इत्यधिदैवताध्यात्मप्रकरणगतवाक्यद्वयेनाक्ष्यादित्यमण्डलयो-

स्याप्यक्ष्णो देहसम्बन्धान्न तादृशी शक्तिः । तदनुग्राह्यत्वं तेनैवावृतिपरिहारश्च ॥

(२५) यथा बाह्यामृतजलस्यामृतसमुद्रस्य चैकत्वं तदंशस्यापि

रुभयोरपि शुक्लादिरूपत्रयवत्त्वोक्त्या साम्यं सिद्धम्। एवं च चक्षुषि श्रुत्यन्तरसिद्धशुक्लादिरूपत्रयवत्त्वरूपादित्यमण्डलसाम्यस्य 'त्रिवृदिव वै चक्षुः शुक्लं कृष्णम्' (ऐ.आ. २-१-५.) इत्यंतरेये कथितत्वात्। तत एव तयोरंशांशित्वे सिद्धे तदभिमानिनोरपि तत्सिध्यत्येवेति। तत्त्वप्रदीपे तु—भाष्ये 'शुक्लं कृष्णं कनीनिका' इति न श्रुतिग्रहणम्, किंतु स्ववचनेनाक्ष्यादित्ययोः साम्यप्रदर्शनमेव। साम्यप्रदर्शकश्रुत्यनन्तरं तदाहर्तव्यमित्यभिप्रेत्य 'शुक्लं कृष्णं कनीनिका' इत्यादित्यसादृश्यात्तदंशत्वमक्ष्णः 'अथ यदेतदादित्यस्य शुक्लं भाः सैव ऋक्' इत्यादिश्रुतेरित्युक्तम्। ऐतरेयश्रुताविवशब्दः एवार्थः। त्रित्वेन वर्तत इति त्रिवृत्। तथा च चक्षुश्शुक्लकृष्णकनीनिकाकृष्णतारावभासिपुरुषरूपेण त्रिवृदेव वा इत्यर्थः। श्रुत्यन्तरमपि ऋक्सामशब्दितार्धनारीनरात्मकवाणीवायुपरतया व्याख्येयम्। परः कृष्णमित्येतत्तु कनीनिका परः कृष्ण इति तत्त्वप्रदीपे व्याख्यातम्। न तादृशीति। प्रभाभिमानिनोर्यादृशी न तादृशीत्यर्थः। अपभ्रष्टाख्यदेवतानां परदेहसम्बन्धप्रयुक्तपरदेहगतदोषैः दुष्टत्वादिति भावः। तासां देवतात्वं तु अन्तर्धानशक्त्येति सुधायामुक्तम्। न केवलं चक्षुर्देवस्य तादृशशक्त्यभावमात्रं, किंतु तेनांशिना अनुग्राह्यत्वम्। तेनैवावृतेरावरणस्य विषयावृतिभूतस्य तमसो निवृत्तिश्च भवतीत्यर्थः। तथा जीवानामपि देहसम्बन्धात् मत्स्यादिवच्छक्त्यभाव ईश्वरानुग्राह्यत्वं, तत एव बन्धनिवृत्तिश्च भवेत्। न तु मत्स्यादीनां तदसम्बन्धित्वादिति वाक्यशेषः। अनेन सूत्रे ज्योतिश्शब्दः सूर्यतदभिन्नभिन्नांशपर इत्युक्तं भवति।

(२५) सौत्रादिशब्दगृहीतं दृष्टान्तं विवृणोति—यथा बाह्येति॥ अण्डाद्बाह्यशुद्धजलाभिमानिवरुणस्यांशिन इत्यर्थः। गृहावरणाद्बाह्यकूपादिजलाभिमानिनो भिन्नत्वात्तद्व्यावृत्त्यर्थममृतेति। बहिरावरणोदकस्य बहुत्वात्समुद्रत्वं, 'अमृतसमुद्रस्य' सप्तमसमुद्राभिमानिनो वरुणांशस्येत्यर्थः। 'एकत्वं' एकविधत्वमेकशक्त्युपेतत्वमिति यावत्। लवणादिसमुद्राभि-

श्लेष्मणस्तदनुग्राह्यत्वं तेनैव विरोधिनिवृत्तिश्च ।

(२६) मोक्षधर्मे च—

यत्किञ्चिदिह लोकेऽस्मिन् देहबद्धं विशाम्पते ।
सर्वं पञ्चभिराविष्टं भूतैरीश्वरबुद्धिजैः ॥

मानिनां भिन्नांशानामपि सत्त्वात् तद्व्यावृत्त्यर्थमत्राप्यमृतेत्युक्तम् । एवं देहसम्बन्धित्वासम्बन्धित्वहेतोरादिशब्दगृहीतव्यतिरेकान्वयदृष्टान्तावुक्त्वा तयोरेव तच्छब्दगृहीतान्वयव्यतिरेकदृष्टान्तावाह—तदंशस्येति । अमृत-त्वाभिमानिवरुणांशस्येत्यर्थः । यथेत्यादौ योज्यम् । अपिशब्दार्थः पूर्ववत् । 'श्लेष्मणः' तदभिमान्यपभ्रष्टदेवतायाः इत्यर्थः । तच्छब्दद्वयेन वरुणो गृह्यते । विरोधीति । 'श्लेष्मा पित्तस्य विरोधी पित्तं श्लेष्मणः' इति श्लेष्मविरोधिनः पित्तधातोः निवृत्तिर्भवतीत्यर्थः । अत्र पूर्वत्र च तथेति दार्ष्टान्तिकवाक्याध्याहार उक्तरीत्या कर्तव्यः ।

(२६) ननु यदुक्तं जीवस्य स्वांशिकर्मानिर्मितदेहसम्बन्धित्वादप-भ्रष्टवदीशाधीना प्रवृत्तिः, ततो बन्धनिवृत्तिश्चेति । यच्च यथेत्यादिना दृष्टान्तविवरणेन अभिसंहितं देहासम्बन्धित्वाद्धियद्वतप्रभाभिमानिवत् मत्स्यादेरीश्वरार्धीनप्रवृत्त्यभाव इति । तद्द्वयमप्यनुपपन्नम् । आद्ये मत्स्यादौ व्यभिचारात्, द्वितीये दृष्टान्तासिद्धेरित्यत आह—मोक्षधर्मे चेति ॥ चशब्दः शङ्काव्यावर्तकः । युधिष्ठिरं प्रति भीष्मवचनमेतत् । हे 'विशां' प्रजानां पते अस्मिन् 'लोके' जगति यत्किञ्चिज्जीवजातं देहबद्धं वर्तते, तदीश्वरबुद्धिजैः तन्निमित्तकैः पञ्चभिर्भूतैः 'आविष्टं' बद्धमित्यर्थः । एवं जीवानां भौतिकदेहसम्बन्धमुक्त्वा ईश्वरस्य तदसम्बन्ध उच्यते—ईश्वरो हीति । हिर्हेतौ, प्रसिद्धौ वा । हेतूनेवाह—महदिति । महच्च तद्भूतं च महद्भूतं भूतेभ्यो महदिति वा 'महत्' पूज्यं अपरिच्छिन्नं 'भूतं' सदा स्थितं निर्विकारं वा । 'ईश्वरो हि जगत्स्रष्टा' इति गीताभाष्ये पठितम् । स चेश्वरो नान्यः, किंतु 'नारायणः' मुक्ताश्रयो विष्णुः विशेषेण राजत इति 'विराट्' नित्याभिव्यक्तरूपः । 'भूतान्तरात्मा' सर्वजीवान्तर्यामी 'वरदो' मोक्षदः । विज्ञेय इति क्वचित्पाठः । 'सगुणः' ऐश्वर्यादिगुणोपेतः 'निर्गुणः' सत्त्वादिगुणाकार्यदेहः । अपिचौ समुच्चये ।

ईश्वरो हि महद्भूतं प्रभुर्नारायणो विराट् ।
भूतान्तरात्मा वरदः सगुणो निर्गुणोऽपि च ॥
भूतप्रलयमव्यक्तं शुश्रूषुर्नृपसत्तम ॥ इति ॥

पुनर्जीवस्वरूपमुच्यते--भूतेति । तस्येति शेषः । अस्य नमिति यावत् । नृपश्चासावतिशयितसज्जनश्च, तस्य सम्बुद्धिः नृपसत्तमेति । हे नृपसत्तम भूतसम्बन्धाधीनप्रलयोपेतमकार्यत्वादव्यक्तशब्दितं जीवचैतन्यं तस्य नारायणस्य 'शुश्रूषुः' जिज्ञासुर्भवतीति जीवकर्तृकशुश्रूषां प्रति प्रकृतो नारायणः कर्मत्वेन सम्बध्यत इति चन्द्रिकाकारः । प्रमेयदीपिकायां तु--भूतप्रलयस्थानभूता श्रीः 'तस्य' प्रकृतस्य नारायणस्य शुश्रूषुः 'ये चाप्यक्षरमव्यक्तम्' इति स्मृतेरिति तत्त्वप्रदीपानुसारात् कृष्णस्य मानुषतनुत्वं कुतो नेत्यवतार्य शरीराणि हि भौतिकानि भवन्ति । भूतानि चेश्वरबुद्धिजानि तत्कथं तानि सम्बध्नीयुः । भूतानि प्रलीयन्ते यस्मिन् तदव्यक्तं तदभिमानिदेवता तस्य शुश्रूषुः लिङ्गव्यत्ययः छान्दस इति व्याख्यातम् । तत्र चन्द्रिकोक्तः टीकाभिप्रायः स्वरसः । ईश्वरस्य जीववैलक्षण्यप्रतिपादनार्थं प्रवृत्ते मोक्षधर्मवचने तस्यैव प्रतिपादनीयतया लक्ष्मीवैलक्षण्यप्रतिपादनस्येहासङ्गतत्वात् । तत्त्वप्रदीपप्रमेयदीपोक्तं त्विहानभिप्रेतमपि योजनान्तरमित्यभिप्रेत्योक्तं चन्द्रिकायां तत्त्वप्रदीपे योजनान्तरमुक्तमिति । इतीत्यस्य इति मोक्षधर्म इत्यन्वयः । उक्तेः न व्यभिचारासिद्धी इति वाक्यशेषः । तथा च मोक्षधर्मे जीवानां भौतिकदेहसम्बन्धस्योक्तत्वादाद्यहेतोः भौतिकत्वविशेषणेन मत्स्यादौ व्यभिचारो निरस्तः । द्वितीयस्य स्वांशिकर्मानिर्मितत्वविशेषणात् दृष्टान्ते असिद्धिः परिहृतेति भावः । द्वितीयहेतौ च पक्षे भौतिकत्वविशेषितदेहसम्बन्धित्वरूपविशेष्याभावेन दृष्टान्ते स्वांशिकर्मानिर्मितत्वरूपविशेषणाभावेन विशिष्टाभावरूपहेतुसत्त्वोपपादनाय नञ्द्वयप्रयोग इति ध्येयम् । न च 'ईश्वरो हि' इत्यादिनांशिनो नारायणस्यैव निर्गुणादिपदैः देहासम्बन्धः उक्तः, नांशानां मत्स्यादीनामिति कथं तत्र हेतुसिद्धिरिति वाच्यम् । 'यत्तद्दृशिवान् ब्रह्मरूपं हयशिरोधरम्' इति हयग्रीवावतारप्रसङ्ग एवास्योक्तत्वेनास्यावतारविषयत्वात् । नारायणशब्दस्तु अंशानां तदभेदाभिप्राय इति न तदनुपपत्तिः ।

(२७) वाराहे च—

अंशाश्च देहयोग्यत्वाज्जीवा बन्धादिसंयुताः ।
अनुग्राह्याश्चेश्वरेण न तु मत्स्यादिको हरिः ॥
अदेहबन्धयोग्यत्वाद्यथा सूर्यप्रभाक्षिणी ।
यथाऽमृतसमुद्रस्य श्लेष्मादेश्च द्विरूपता ॥
अनुग्राह्यत्वमन्यस्य तेनैवावृतिरोधनम् ॥ इति ॥ ४८ ॥

(२८) सू—ॐ ॥ असन्ततेश्चाव्यतिकरः ॥ ॐ ॥ ४९ ॥

अपूर्णशक्तित्वाच्च जीवस्य न मत्स्यादिसाम्यम् ।

---

(२७) सूत्रार्थं स्मृतिं चाह—वाराहे चेति ॥ न केवलं श्रुतिसूत्राभ्यामुक्तोऽयमर्थः, किंतु वाराहे चेति चशब्दार्थः । जीवाः अंशा अपीति चशब्दार्थः । देहयोग्यत्वादित्यनेन मुक्ता अपि आद्यानुमाने पक्षत्वेन सङ्गृहीताः । अनेन देहसम्बन्धित्वहेतोस्तत्र भागासिद्धिश्च परिहृता । अदेहेति । देहसम्बन्धायोग्यत्वादित्यर्थः । अनुमानद्वये व्युत्क्रमेण दृष्टान्तमाह—यथेति । सूर्यप्रभा चाक्षि चेति विग्रहः । नैकप्रकारे इति शेषः । 'अमृतसमुद्रस्य' शुद्धोदकसमुद्रस्य 'द्विरूपता' भिन्नप्रकारता । 'अन्यस्य' अक्षिश्लेष्मादेः भिन्नांशस्य 'तेनैव' अंशिनैव आवृतिः तमःपित्तादिः । तस्य रोधनं निवृत्तिर्भवतीत्यर्थः । इति वाराहे इत्यन्वयः । सूत्रोक्तमुक्तमिति शेषः ।

(२८) युक्त्यन्तरेण मत्स्यादीनां जीवानां चैकविध्यं पराकुर्वन्सूत्रं पठित्वा व्याचष्टे—असन्ततेश्चेति ॥ अपूर्णशक्तित्वादित्यनेनासन्ततेरित्यस्य सम्यक्तनिः सन्ततिः पूर्णताशक्तयेति योग्यतयाऽन्वये नञ्सम्बन्धे चापूर्णशक्तित्वादित्यर्थ उक्तः । सूत्रे भाष्ये चशब्दो न केवलमंश्यधीनप्रवृत्तितदभावादिना जीवानां मत्स्यादीनां च नैकविधता, किन्त्वसन्ततेश्चेति युक्तिसमुच्चये । अनुवृत्तपदस्यार्थमाह—जीवस्येति । 'न मत्स्यादिसाम्यम्' सर्वसाम्यमिति । अनेनाव्यतिकर इत्यस्य नैवं पर इत्युक्तस्य व्यत्यासाभाव इति वा, जीवानां मत्स्यादीनां च शास्त्रोक्तस्वरूपस्याव्यत्यास इति वार्थ उक्तो भवति ।

(२९) तथा च चतुर्वेदशिखायाम्—

'तस्य ह वा एतस्य परमस्य त्रीणि रूपाणि कृष्णो रामः कपिल इति । तस्य ह वा एतस्य परमस्य पञ्चरूपाणि दशरूपाणि सहस्ररूपाण्यमितरूपाणि । तानि ह वा एतानि सर्वाणि पूर्णानि सर्वाण्यनन्तानि सर्वाण्यसम्मितानि सर्वाण्यमितानि । अथावरास्सर्व एवापूर्णाः सर्व एव बध्यन्ते अथ मुच्यन्ते च केचन' इति ॥ ४९ ॥

---

(२९) मत्स्यादीनां पूर्णशक्तित्वं, न जीवस्येत्येतत्कुत इत्यत आह—तथाचेति ॥ परावरभेदेन चेतनद्वैविध्यमभिधाय तत्र परो नारायण इत्यप्यभिधाय तस्य व्यूहरूपाण्युच्यन्ते—तस्येत्यादिना । 'तस्य' प्रसिद्धस्य 'एतस्य' प्रकृतस्य 'परमस्य' नारायणस्य कृष्णो रामः कपिल इति त्रीणि रूपाणीत्यन्वयः । तस्येत्यादेः सर्वत्रान्वयग्रहणाय द्विर्ग्रहणम् । कृष्णादित्रयं कश्चन व्यूहः । न तु 'पञ्चात्मकः' इत्युक्तसप्तव्यूहान्तर्गतम् । केचित्तु—कृष्णादिकस्तु न व्यूहः नातिरिक्तव्यूह इति टीकार्थमाश्रित्य सप्तव्यूहान्तर्गतमेवैतदित्याहुः । 'पञ्च' नारायणाद्यनिरुद्धान्तानि 'दश' मत्स्यादीनि 'शतं' नारायणाद्यष्टोत्तरशतनामवाच्यानि । विश्वादीनि सहस्राणि । अजितादीन्यनन्तानि रूपाणि पूर्णानि देशकालाभ्यामनन्तानि गुणतः 'असम्मितानि' निरुपमानि । अथेति प्रतिज्ञान्तरम् । 'अवराः' चेतनाः । उच्यन्त इति शेषः । तेषां गुणानाह—सर्व इति । 'अपूर्णाः' देशकालगुणैः 'बध्यन्ते' पञ्चभिर्भूतैः । अथ मुच्यन्ते तेभ्य एव । अपूर्णत्वबन्धयोः सर्वजीवसाधारण्याद्द्विः सर्वशब्दप्रयोगः । बद्धेषु सर्वमुक्तौ संसाराभावापत्त्या केचनेत्युक्तम् । न च क्रमेण सर्वमुक्तौ संसाराभावप्रसङ्ग इत्याशङ्कापरिहाराय सर्वे जीवाः अनन्ता इति विपरिणामेनात्रापि संयोज्यम् । सङ्ख्यातोऽनन्ता इत्यर्थः । अपूर्णाः बध्यन्ते अथ मुच्यन्त इत्यनेन जीवानामपूर्णत्वबद्धत्वानित्यत्वमुक्तत्वानि ईश्वरानिष्ठानि सामान्यान्युक्तानि भवन्ति । इति चतुर्वेदशिखायामित्यन्वयः । यत उक्तमतो न हेत्वसिद्धिरिति शेषः ।

(३०) सू—ॐ ॥ आभास एव च ॥ ॐ ॥ ५० ॥

'रूपं रूपं प्रतिरूपो बभूव' (ऋ. ६-४७-१८.) इति प्रतिबिम्बत्वाच्च न साम्यम् ।

---

(३०) युक्त्यन्तरेणोक्तमर्थं साधयत्सूत्रमुपन्यस्य व्याचष्टे—आभास एवेति ॥ 'रूपं रूपम्' इति श्रुत्युदाहरणेनाभासत्वहेतोरसिद्धिः परिहृता । प्रतिबिम्बत्वादिति । प्रतिबिम्बांशकत्वादित्यर्थः । अनेन आभासपदार्थोऽभिहितः । यत इति शेषश्च सूचितः । आभासपदस्य तदधीनसत्ताप्रतीतिकत्वरूपप्रतिबिम्बत्वोपेतार्थकत्वं च भाच्च सा च भासे आ सर्वकालवर्तिन्यौ भासे आभासे, अस्य परशब्देनान्वये परमात्मार्थीने आभासे प्रतीतिसत्ते यस्यासौ पराभास इति सुधोक्तरीत्येति द्रष्टव्यम् । चशब्दः पूर्वोक्तहेतुसमुच्चये । एवं सूत्रेऽपि । एवशब्दस्तु अनाभासत्वव्यावर्तकः, अव्यभिचारसूचकश्च । सूत्रे नैवमित्यनुवृत्तसाध्यांशस्यार्थमाह—न साम्यमिति । अंशत्वाविशेषेऽपि न मत्स्यादिसाम्यमित्यर्थः । जीवस्येत्यनुवर्तते । साम्यमेकविधत्वम् ।

रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥

(ऋ. ६-४७-१८.)

इति ऋङ्मन्त्रस्यायमर्थः—'शृण्वे वीरः' (ऋ. ६-४७-१६.) इत्यादिना प्रकृतः त्रिविधजीवसमुदायः अस्य परमेश्वरस्य रूपंरूपं प्रति 'प्रतिरूपः' प्रतिबिम्बो 'बभूव' प्रतिबिम्बो भूत्वा वर्तते । तद्बिम्बरूपमस्य प्रतिबिम्बत्वेनोक्तस्य योग्यजीवस्य मुक्त्यर्थं 'प्रतिचक्षणाय' साक्षात्काराय भवति तद्विषयो भवति । स च 'इन्द्रः' परमेश्वरः 'मायाभिः' स्वसामर्थ्यैः इच्छाभिर्वा 'पुरुरूपः' अनन्तजीवबिम्बरूपः 'ईयते' ज्ञायते । 'अस्य' ईश्वरस्य 'शतमनन्तं भवति' इति वचनात् शतानि अजिताद्यनन्तरूपाणि, एवं दशशतानि विश्वादिसहस्ररूपाणि, एवं शतानि 'नरायणो नरः शौरिः' इत्यादीनि, दश मत्स्यादीनि, एवं दश बहूनि परादीनि, 'हरयो' हरिनामकानि रूपाणि 'युक्ताः' व्यूहशः सन्ति 'हि' प्रसिद्धमिति ।

(३१) वाराहे च—

द्विरूपावंशकौ तस्य परमस्य हरेर्विभोः ।
प्रतिविम्बांशकश्चाथ स्वरूपांशक एव च ॥
प्रतिविम्बांशका जीवाः प्रादुर्भावाः परे स्मृताः ।
प्रतिविम्बेष्वल्पसाम्यं स्वरूपाणीतराणि तु ॥ इति ॥

(३२) सोपाधिरनुपाधिश्च प्रतिविम्बो द्विधेयते ।
जीव ईशस्यानुपाधिरिन्द्रचापो यथा रवेः ॥
इति पैङ्गिश्रुतिः ॥

---

(३१) सूत्रार्थं स्मृतिं चाह—वाराहे चेति ॥ अंश एवांशक इति स्वार्थे कप्रत्ययः । एवमुत्तरत्रापि । 'परे' स्वरूपांशाः 'प्रादुर्भावाः' मत्स्याद्यवतारा इत्यर्थः । ननु जीवानां प्रतिविम्बांशत्वं मत्स्यादीनां तु स्वरूपांशत्वमिति कुतः ?. उभयोः स्वरूपांशत्वं किं न स्यादित्यत आह—प्रतिविम्बेष्विति । यत इति शेषः । सर्वसाम्ये स्वरूपत्वमेव स्यादतोऽल्पेत्युक्तम् । 'स्वरूपाणि' स्वरूपांशरूपाणि प्रादुर्भावात्मकानि मत्स्यादीनि 'इतराणि' अल्पसाम्यवद्भिन्नानि यावत्साम्यवन्तीत्यर्थः । तुशब्दोऽवधारणे । इति वाराह इत्यन्वयः । सूत्रार्थ उक्त इति शेषः ।

(३२) ननु न जीवस्य परमात्मप्रतिविम्बांशत्वं युक्तम्, जीवस्वरूपातिरिक्तप्रतिविम्बोपाध्यभावादित्यत आह —सोपाधिरिति ॥ इति शब्दोऽध्याहार्यः । 'ईयते' ज्ञायते । 'इन्द्रचापः' तत्संज्ञका वृष्टिसूचकधनुराकृतिः 'रवेः' सूर्यस्य तत्तेजसो यथा निरुपाधिप्रतिविम्बः विम्बातिरिक्तोपादानोपाध्यभावात्, अत एव न तस्य सूर्यात्यन्तसादृश्यम्, तथा जीवः परस्य हरेः 'अनुपाधिः' स्वरूपातिरिक्तोपाधिरहितप्रतिविम्ब इत्यर्थः । अत्र दृष्टान्ते विम्बातिरिक्तोपाध्यभावः । दार्ष्टान्तिके तु प्रतिविम्बातिरिक्तोपाध्यभावः । अतिरिक्तोपाध्यभावस्तु उभयत्र सम इति द्रष्टव्यम् । सोपाधिप्रतिविम्बस्य दर्पणादिप्रतिविम्बितत्वं प्रसिद्धमेवेति नोदाहृतम् । केचित्तु—सोपाधिप्रतिविम्बस्य इन्द्रचाप उदाहरणं, तस्य च मेघमण्डलं वा सूर्यतेजो वोपाधिः । उपादानं च तदेव । निरुपाधिप्रतिविम्बस्य तु

(३३) 'यथैषा पुरुषे छाया एतस्मिन्नेतदाततम्' (प्र. ३-३.) इति च श्रुतिः ॥ ५० ॥

॥ इत्यंशाधिकरणम् ॥ १८ ॥

॥ १९. अदृष्टाधिकरणम् ॥

(१) प्रतिविम्बानां मिथो वैचित्र्ये कारणमाह—

जीव उदाहरणमिति यथाशब्दावृत्त्या वाक्यद्वयमपि दृष्टान्तपरतया योजयन्ति। तत्तु चन्द्रिकाननुगुणत्वान्मूलाभावाच्चोपेक्ष्यम्। अनेन सूत्रपञ्चकेन जीवस्य मत्स्यादिवत्स्वरूपांशत्वाभावोक्त्याऽनंशत्वश्रुतेः स्वरूपांशत्वाभावविषयत्वेन गतरुक्ता भवति। श्रुतिरित्यस्य जीवस्य प्रतिविम्बत्वमुक्त्वाऽनिरिक्तोपाध्यभावमपि वक्तीति शेषः। अतो नातिरिक्तोपाध्यभावेऽपि प्रतिविम्बत्वहानिरिति भावः।

(३३) जीवस्य निरुपाधिप्रतिविम्बत्वे छायारूपदृष्टान्तान्तरप्रतिपादकं षट्प्रश्नवाक्यं पठति—यथेति ॥ यथा पुरुषस्य देहस्य छाया 'पुरुषे' देहे 'आतता' तदधीना तत्प्रतिरूपा भवतीति यावत्। तद्वत् 'एतस्मिन्' पुरुषोत्तमे विष्णौ 'एतत्' प्रतिविम्बरूपं विश्वं जीवजातं वा 'आततं' आयत्तं तदधीनतया वर्तते तत्प्रतिविम्बभूतमित्यर्थः तत्त्वप्रदीपोक्तो ध्येयः। अत्र सर्वस्यापि शरीरस्य छायया ग्रस्तत्वात् उपहितानुपहितांशद्वयाभावाच्छायाया इन्द्रचापवन्निरुपाधिप्रतिविम्बत्वोक्तिः। छायोपादानं तु नीरूपि द्रव्यान्तरमिति चन्द्रिकाकाराः। इति चेति। इति श्रुतिश्चोक्तार्थमाहेत्यर्थः। चस्समुच्चये।

॥ इत्यंशाधिकरणम् ॥ १८ ॥

॥ १९. अदृष्टाधिकरणम् ॥

(१) अत्राधिकरणे जीवस्येश्वरप्रतिविम्बविषयश्रुतिविरोधः परिह्रियते। विरुद्धश्रुतिद्वयस्येह भाष्ये अनुपन्यासेऽप्यव्यवहितसूत्रभाष्ये 'रूपं रूपम्' इत्यस्योदाहृतत्वात् सैका व्यवहितातीतसूत्रभाष्ये उदाहृता 'नैवांशो न सम्बन्धः' (भाल्लवेय.) इतिश्रुतिरन्या संशयबीजभूतेति द्रष्टव्यम्। द्वितीयश्रुतौ स्फुटमप्रतिविम्बत्वस्याप्रतिपादनात् टीकायामनुमितत्वोक्तिः। न

सू—ॐ॥ अदृष्टानियमात् ॥ ॐ ॥ ५१ ॥

अनादिविद्याकर्मादिवैचित्र्याद्वैचित्र्यम् ॥ ५१ ॥

(२) सू—ॐ॥ अभिसन्ध्यादिष्वपि चैवम् ॥ ॐ ॥ ५२ ॥

जीवाः भगवत्प्रतिबिम्बाः तथा श्रुतेः, न जीवा एकप्रतिबिम्बाः अन्योन्यं भेदवत्त्वाद्दर्पणादिप्रतिबिम्बितघटपटवदित्यनुमानाच्च। अतः सयुक्तिकानुमितश्रुतिविरोधान्प्रतिबिम्बत्वश्रुतिरप्रमाणमिति नोक्तसमन्वयसिद्धिरित्येवं प्राप्ते सिद्धान्तयन्सूत्रमवतारयति—प्रतिबिम्बानामिति ॥ प्रतिबिम्बत्वेनोक्तानां जीवानां तदभ्युपगम्य तेषां 'मिथः' परस्परं 'वैचित्र्ये' सुरनरतिर्यगादिरूपभेदे 'कारणं' कारणान्तरं बिम्बवैचित्र्यादन्यत्। यद्वा—अप्रतिबिम्बत्वापेक्षयाऽन्यत्। अथवा—ईशशक्त्यपेक्षया कारणान्तरं अदृष्टादिवैचित्र्यमाह सूत्रकार इत्यर्थः। विद्याकर्मेत्युक्त्या अदृष्टशब्दो विद्योपलक्षकतया व्याख्यातः। तेन 'यथा प्रजं हि सम्भवाः' इत्यादिश्रुतिः सूचिता। वैचित्र्यादित्युक्त्या अनियमशब्दो व्याख्यातः। पुनर्वैचित्र्यमित्युक्त्या अनियमपदस्यावृत्तिस्सूचिता। पूर्वपूर्वादृष्टवैचित्र्यादुत्तरोत्तरादृष्टवैचित्र्योपपत्तेः नादृष्टवैचित्र्यासम्भावनाशङ्क्येत्याशयेन—अनादीत्युक्तम्। उपपद्यते जीवानां यत इति शेषः। अनेन यत एकेश्वराभासानामपि जीवानामदृष्टानियमाद्देवदानवादिवैचित्र्यमुपपद्यते, अतो न तदन्यथाऽनुपपत्त्या एकस्य ज्ञस्य प्रतिबिम्बत्वमुपेत्यान्येषां तदभावो वाच्यः, किंतु सर्वोऽपि ज्ञः पराभास इति सूत्रार्थ उक्तो भवति।

(२) देवदानवादिवैचित्र्यस्य रागद्वेषमोहाख्यदोषनिमित्तकत्वोपपत्तेः किमदृष्टकारणकत्वकल्पनयेत्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—अभिसन्धीति॥ न केवलं सुरनरादिवैचित्र्यं, किंतु इच्छादिवैचित्र्यं चेति चशब्दार्थः। 'इच्छा' रागः। आदिशब्देन मोहो गृह्यते। वैचित्र्यमिति अनुवृत्तानियमपदव्याख्यानम्। एवमित्युक्तं व्यनक्ति—अदृष्टादिति। अदृष्टवैचित्र्यादित्यर्थः। भवतीति शेषः। न कारणान्तरादित्येवार्थः। नन्वस्माभिरपि सिद्धान्तिवत्पूर्वपूर्वदोषवैचित्र्यमेव उत्तरोत्तरदोषवैचित्र्ये

इच्छाद्वेषसुखदुःखादिवैचित्र्यं चादृष्टादेव ।
चशब्देन प्रतिक्षणवैचित्र्यं च ॥ ५२ ॥

(३) सू—ॐ ॥ प्रदेशादिति चेन्नान्तर्भावात् ॥ ॐ ॥ ५३ ॥

न स्वर्गनरकभूम्यादिप्रदेशविशेषाद्वैचित्र्यम्, तत्प्राप्तेरदृष्टापेक्षत्वात् ।

कारणमित्यङ्गीकारान्न काऽप्यदृष्टवैचित्र्यापेक्षेत्यतः प्रवृत्तं चशब्दं व्याचष्टे—चशब्देनेति । प्रतिक्षणेति । पुरुषविशेषनिष्ठप्रतिक्षणवैचित्र्यमित्यर्थः । सङ्गृहीतमिति शेषः । चः समुच्चये । अनेन—यतो न केवलमाभासे देवदानवादावनियमोऽदृष्टानियमात्, किंतु अभिसन्ध्यपदोक्तरागादिष्वनियमोऽपि तत एव भवति, न रागाद्यनियमात् । अतो न तस्मात्सुरासुरादिवैचित्र्यं वाच्यम् । न केवलमभिसन्ध्यादिषु वैचित्र्यमदृष्टानियमात्, किन्त्वेकपुरुषनिष्ठप्रतिक्षणवैचित्र्यं च 'एवं' अदृष्टानियमादेव भवति, न कारणान्तरादिति सूत्रार्थ उक्तो भवति । दोषवैचित्र्याभावेऽपि एकस्मिन् पुंसि प्रतिक्षणवैचित्र्यदर्शनेन कारणान्वेषणे तत्कारणतयाऽदृष्टवैचित्र्यस्यैवाङ्गीकार्यत्वावश्यकत्वात् जीववैचित्र्येऽपि तदेव कारणमिति भावः ।

(३) ननु स्वर्गस्थाः सुराः, भूमिस्थाः नराः, इत्यादिरूपेण स्थानवैचित्र्यादेव सुरनरादिवैचित्र्योपपत्तेः किमदृष्टवैचित्र्येणेत्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—प्रदेशादिति ॥ अत्र प्रदेशपदं तद्वैचित्र्यपरमित्याह—स्वर्गेति । 'प्रदेशः' स्थानं 'वैचित्र्यं' सुरनरादिभेदः । प्रतिविम्बानामिति वाच्यमिति शेषः । कुतो न वाच्यमित्यतः प्रवृत्तमन्तर्भावादित्येतत्तात्पर्यतो व्याचष्टे—तत्प्राप्तेरिति । विचित्रप्रदेशप्राप्तेरप्यदृष्टसापेक्षत्वादित्यर्थः । अदृष्टस्यापेक्षा यस्यामिति विग्रहः । न केवलमाभासवैचित्र्यस्येत्यपिशब्दार्थः । निष्कारणस्थानवैचित्र्यस्यैवानुपपत्त्या तत्कारणान्वेषणे अन्ततोऽदृष्टस्यैव तत्कारणतयाऽङ्गीकार्यत्वादिति भावः । अनेन प्रदेशवैचित्र्यकारणस्यादृष्ट एवान्तर्भावात्तस्यैतद्रूपत्वादिति सूत्रखण्डार्थं उक्तो भवति । युक्तयन्तरमाह—एकेति । एकस्थाने स्थितानामेव सुरनरादिजीवानामित्यर्थः । मिथ इति शेषः । तथा च इतोऽप्यदृष्टवैचित्र्यं

एकदेशस्थितानामेव वैचित्र्यदर्शनाच्च ॥ ५३ ॥

॥ इत्यदृष्टाधिकरणम् ॥ १९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते
ब्रह्मसूत्रभाष्ये द्वितीयाध्यायस्य
तृतीयः पादः

॥ ॐ ॥

कारणतयाऽङ्गीकार्यमिति भावः । अनेनैकस्थानस्थितानां मिथो वैचित्र्य-कारणस्यादृष्ट एवान्तर्भावादिति सूत्रखण्डस्यार्थान्तरमुक्तं भवति । अनेन 'न सम्बन्धः' इति प्रतिबिम्बत्वनिषेधकश्रुतेः स्वरूपातिरिक्तोपाधि-निमित्तकप्रतिबिम्बत्वाभावविषयत्वान्न तद्विरोधो जीवप्रतिबिम्बत्वश्रुते-रित्युक्तं भवति ।

॥ इत्यदृष्टाधिकरणम् ॥ १९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सच्चेतन्यस्वतन्त्राणां
श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण
श्रीमज्जगन्नाथयतिना कृतायां
श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां
द्वितीयाध्यायस्य तृतीयः पादः

॥ ॐ ॥

॥ १. प्राणोत्पत्त्यधिकरणम् ॥

(१) युक्तिसहितश्रुतिविरोधं श्रुतीनामपाकरोत्यनेन पादेन ।

'प्राणा एवेदमग्र आमुस्तेभ्यो भूतानि जज्ञिरे । भूतेभ्योऽण्ड-मण्डस्यान्तस्त्रिमे लोकाः । अथ प्राणा एवानादयः प्राणा नित्याः'

इति कापायणश्रुतौ प्राणानामनुत्पत्तिश्रूयते ।

(२) नोपादानं ह्यीन्द्रियाणां अतोऽनुत्पत्तिरिष्यते ।

उपादानकृता सृष्टिः सर्वलोकेषु दृश्यते ॥

इति भविष्यत्पर्वणि ।

'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' (मु. २-१-३.)

इति च ।

॥ १. प्राणोत्पत्त्यधिकरणम् ॥

(१) एतत्पादार्थं दर्शयति—युक्तीति ॥ सिद्धान्त्यभिहितानां श्रुतीनां युक्तिसहिताभिः श्रुतिभिर्विरोधं 'अनेन' चतुर्थपादेन निराकरोति सूत्रकार इत्यर्थः । अत्राधिकरणे इन्द्रियोत्पत्तिविषयश्रुतिविरोधः परिह्रियते । तत्र किमिन्द्रियाण्युत्पद्यन्ति न वेति संशयबीजं श्रुतिविरोधं दर्शयन् पूर्वपक्षं च दर्शयति—प्राणा इति ॥ 'इदं' अस्य जगतः 'अग्रे' प्रलये 'प्राणाः' इन्द्रियाण्येव 'आसुः' बभूवुरित्यर्थः । 'तेभ्यः' इन्द्रियेभ्यः पञ्च 'भूतानि' आकाशादीनि जज्ञिरे । भूतेभ्यो ब्रह्माण्डं, अण्डस्यान्तः 'इमे' चतुर्दश-लोका आसुः । यतएवं 'अथ' तस्मात्सर्वकारणत्वेन प्रलयेऽवस्थानात् प्राणाः 'अनादयः, उत्पत्तिशून्या एव' अत एव नित्या इत्यर्थः । अत्रानादि-त्वोपपादनाय पूर्वांशोदाहरणम् ।

(२) एवमिन्द्रियाणामनुत्पत्तिश्रुतिमुपन्यस्य तस्याः प्राबल्यायानुत्प-त्तावुपादानशून्यत्वादिति युक्तिमभिप्रेत्य तस्या असिद्ध्यादिपरिहाराय स्मृतिमाह—नेति ॥ 'हि' यतः 'उपादानं' परिणामिकारणं, 'अतो' निरुपादानत्वात् । ब्रह्मवदित्यन्वयदृष्टान्तसम्भवेऽपि व्यभिचारशङ्कानिरा-सायोक्तहेतोर्व्यतिरेकव्याप्तिं दर्शयति—उपादानकृतेति । तन्निमित्तेत्यर्थः ।

(३) अत उच्यते—

सू—ॐ ॥ तथा प्राणाः ॥ ॐ ॥ १ ॥

यथाऽऽकाशादयः परमात्मन उत्पद्यन्ते तथा प्राणा अपि ॥१॥

(४) सू—ॐ ॥ गौण्यसम्भवात् ॥ ॐ ॥ २ ॥

अनादित्वश्रुतिर्गौणानादित्वापेक्षया, मुख्यासम्भवात् ।

'सर्वलोकेषु' घटादिकार्येषु। इतीति। युक्तिरुक्तेति शेषः। इतीति। प्राणानामुत्पत्तिश्च श्रूयत इति सम्बन्धः। श्रुतिस्त्वग्रे व्याख्याता।

(३) सिद्धान्तयत्सूत्रमवतारयति—अत इति॥ यतः श्रुतिविरोधः संशयकारणमस्ति अतस्तत्परिहाराय सिद्धान्त उच्यते सूत्रकृतेत्यर्थः। सूत्रे तथाशब्दः पूर्वोक्तयुक्तीनां साध्यस्य च परामर्शक इत्यभिप्रेत्य सूत्रं व्याचष्टे—यथेति। यैर्हेतुभिरित्यर्थः। 'उत्पद्यन्ते' उत्पत्तिमत्त्वेन सिध्यन्ति 'तथा' तैरेव हेतुभिः 'उत्पद्यन्ते' पराधीनविशेषावाप्तिरूपोत्पत्तिमन्त एव सिध्यन्तीत्यर्थः। हेतवस्तु वियदधिकरण एवोक्ताः। तेजआदेर्ब्रह्मान्यकार्यत्वे घर्मात्स्वेददृष्टिवत् अत्र पुनः प्राणानां तदन्यकार्यत्वे प्रापकहेत्वभावेन विप्रतिपत्त्यभावात् अत एव प्राणानां कारणस्याविवादात् सिद्धवत्कृत्य परमात्मन इत्युक्तम्।

(४) नन्वाकाशोत्पत्तिसिद्ध्यर्थमनुत्पत्तौ श्रुत्यभावाख्यो हेतुरुक्तः। न चासाविह सम्भवति। 'प्राणाः' एवेत्यनुत्पत्तिश्रुतेर्विद्यमानत्वादित्याशङ्कां परिहरत्सूत्रमुपन्यस्यति—गौणीति॥ प्रतिज्ञांशं व्याचष्टे—अनादीति। 'प्राणा अनादयः' (काषायण.) इति अनादित्वप्रतिपादकश्रुतिरित्यर्थः। गौणानादित्वापेक्षयेति। अमुख्यानादित्वविवक्षयेत्यर्थः। प्रवृत्ता यत इति शेषः। अतो मुख्यानुत्पत्तौ श्रुत्यभाव इति प्रतिज्ञावाक्यशेषश्च कर्तव्यः। कुत इत्यतः प्रवृत्तमसम्भवादिति हेतुसाधकहेतुं व्याचष्टे—मुख्येति। श्रुतेर्मुख्यानुत्पत्तिवाचित्वासम्भवात्। सोऽपि कुतः? इन्द्रियाणां मुख्यानुत्पत्तेरसम्भवात् 'एतस्मात्' इत्यादिश्रुत्यन्तरासम्भवाच्च, अकारवाच्याद्विष्णोः सम्भवाच्चेत्यर्थः।

(५) नित्यान्येतानि सौक्ष्म्येण हीन्द्रियाणि तु सर्वशः ।
तेषां भूतैरुपचयः सृष्टिकाले विधीयते ॥
परेण साम्यमम्प्राप्तैः कस्य स्यान्मुख्यनित्यता ॥

---

(५) ननु प्राणानां गौणानादित्वं किं नाम, यत्परा श्रुतिर्भवेत् । कथं च गौणार्थग्रहणहेतुर्मुख्यासम्भवः । प्रत्युत उत्पत्तिरेव न सम्भवत्युपादानाभावादित्यत आह नित्यानीति ॥ 'सर्वेशः' सर्वाणीन्द्रियाणि 'सौक्ष्म्येण' सूक्ष्मेण रूपेण 'नित्यानि' चकारादनादीनि च । न च सृष्टिवाक्यविरोधः । 'हि' यतः 'तेषां' इन्द्रियाणां सृष्टिकाले 'भूतैः' पञ्चमहाभूतैः 'उपचयो' वृद्धिः स्थूलभावो 'विधीयते' परेण क्रियते । तर्ह्युपचयात्पूर्वमसमर्थानीन्द्रियाणि न संसारकारणानि स्युरित्याशङ्क्य तत्परिहाराय —सृष्टिकाल इत्याह । प्रलये वियुक्तांशानां तेषां प्रतिसृष्टिकालं उपचयो विधीयत इत्यर्थः । तथा च यस्मिन् लयकालेऽनुपचयः तदा न समर्थान्येव । यस्मिंस्तु सृष्टिकाले समर्थानि तदाऽन्येवोपचयः । स च न कादाचित्कः, किंतु प्रतिसृष्टिकालं भावीति नोक्तदोष इति भावः । मुख्यानादित्वासम्भवे हेतुमाह —'परेण' परमात्मनेति । साम्यं स्वातन्त्र्याविभक्तत्वादिधर्मेण । कस्य स्यात्, न कस्यापि भवेदित्यर्थः । मुख्यनित्यतेति । देहस्वरूपविशेषैः अविकृतत्वरूपेत्यर्थः । उपलक्षणमेतत् । मुख्यानादिता चेत्यपि द्रष्टव्यम् । अनेन सूक्ष्मरूपेण अनादित्वमेव गौणानादित्वम् । अनादित्वश्रुतिरपि तत्परैव । जन्मश्रुतिस्तूपचितस्थूलेन्द्रियपरा । भूतान्येवोपादानानीति न तदभावोऽपि । स्वातन्त्र्याद्यापत्तेः न मुख्यानादित्वादिसम्भवोऽपीति सर्वेस्योत्तरमुक्तं भवति । परेण साम्येत्यनेन यावद्विकारमित्यादियुक्तयो गृहीता भवन्ति । भविष्यपर्वणीत्यस्य उक्तत्वादित्यध्याहारेणानादीनि पूर्ववाक्येनान्वयः । नन्विन्द्रियाणां भूतैरुपचयाभ्युपगमे

तैजसात्तु विकुर्वाणादिन्द्रियाणि दशाभवन् ।
तैजसानीन्द्रियाण्याहुः ॥

इत्यादितैजसाहङ्कारकार्यत्ववाचिभागवतादिवाक्यविरोध इति चेत्—न, भूतैरुपचयोक्तावप्यत्र अहङ्कारकारणकत्वस्यानिषेधात् ।

इति हि भविष्यत्पर्वणि ॥ २ ॥

(६) सू—ॐ ॥ प्रतिज्ञानुपरोधाच्च ॥ ॐ ॥ ३ ॥

'स इदं सर्वमसृजत' (तै. २-६) इति ॥ ३ ॥

॥ इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

तथापि

तथा विशिष्टकार्यत्वाद्वा वैकारिकाः स्मृताः ।
अतिजाज्वल्यमानत्वात्तैजसानीन्द्रियाण्यपि ॥
तामसानि तु भूतानि ततस्तावदभूत्रयम् ॥

इति पाद्मस्मृतौ भूतानां तामसाहङ्कारकार्यत्वोक्तेः। 'तेभ्यो भूतानि जज्ञिरे' (कायायण.) इति श्रुतौ च तेषां प्राणशब्दितेन्द्रियकार्यत्वोक्तेर्विरोध इति चेत्—न, अहङ्कारोत्पन्नभूतानामपि सूक्ष्मप्राणैरुपचयाभ्युपगमात्। ननु तथापि 'तेषां भूतैरुपचयः' इतीन्द्रियाणां भूतकार्यत्वोक्तेः 'तेभ्यो भूतानि' इति भूतानामिन्द्रियकार्यत्वोक्तेः विरोध इति चेत्—न, यतः 'तेभ्यो भूतानि' इति वाक्यं भूतेभ्योऽपि पूर्वमुत्पन्नानां महदादितत्त्वाभिमानिनां देवानां इन्द्रियादिव्यापारैः भूतोत्पत्तिपरम्, न तु तत्त्वरूपेन्द्रियैः। यथोक्तं तत्त्वप्रदीपे—तात्त्विकदेवोत्तमानां प्राकृतदेहाधिष्ठितेन्द्रियव्यापारपूर्वकत्वाद्भूतसृष्टेः भूतकारणत्वव्यपदेशोपपत्तिरिति। यद्वा—सूक्ष्मप्राणैरिति टीकोक्तेः तत्त्वरूपेन्द्रियैरेव सूक्ष्मैर्भूतानामुपचयः। 'तेषां भूतैरुपचयः' इत्यनेन तु सूक्ष्मसृष्टिकाले जीवेन्द्रियाणां भूतसूक्ष्मैरेवोपचयः कथ्यते इति न तत्त्वरूपेन्द्रियाणां, तेषां पूर्वोत्पन्नत्वेन पश्चादुत्पन्नभूतैरुपचयायोगात्। न च जीवेन्द्रियाणामपि कथं भूतैरुपचयः, तदकार्यत्वादिति वाच्यम्। जीवानां सूक्ष्मसृष्ट्युक्तेरेव तज्ज्ञापकत्वात्। यद्वा—तत्त्वरूपाणां अहङ्कारोत्पन्नानां भूतानां सूक्ष्मप्राणैरुपचयवत् तत्त्वरूपेन्द्रियाणामपि भूतसूक्ष्मैरुपचयोऽस्तु, अन्योन्यसूक्ष्मैरुपचये बाधकाभावात्।

(६) वियदधिकरणोक्तप्रतिज्ञाहानियुक्त्या इन्द्रियाणां उत्पत्तिं समर्थयत्सूत्रं पठित्वा व्याचष्टे—प्रतिज्ञेति॥ इतीत्यन्तस्य सूत्रेणान्वयः। चशब्दोऽनेन स्मारितप्रतिज्ञाहान्याख्यपूर्वोक्तयुक्तिसमुच्चये विभक्तशक्तित्वादियुक्तिसमुच्चये वा। हेतोः पूर्वेणान्वयः। तथाच प्राणानां उत्पत्त्यङ्गीकारे 'स

॥ २. तत्प्रागधिकरणम् ॥

(१) ' द्विधा हैवेन्द्रियाणि नित्यान्यनित्यानि च ।
तत्र नित्यं मनोऽनादित्वात् । न ह्यमनाः पुमांस्निष्टत्यनित्यान्य
न्यानि ' इति गौपवनश्रुतौ मनसोऽनुत्पत्तिः सयुक्तिका श्रूयते ।

इदम् ' इति प्रतिज्ञानुपरोधात् अनुपहतेस्तदनुसाराच्चोत्पत्तिमन्तः प्राणा इति सूत्रार्थः । ' स इदम् ' इति श्रुतिस्तु वियदधिकरणे व्याख्याता ।

॥ इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

॥ २. तत्प्रागधिकरणम् ॥

(१) अत्राधिकरणे मनोजन्मविषयश्रुतिविरोधः परिह्रियते । पूर्वपक्षयति—द्विधेति ॥ अत्र मनसोऽनुत्पत्तिरिति पूर्वपक्षप्रतिज्ञा । कुत इत्यतः तत्र हेतुत्वेन द्विधेत्यादिकं योजनीयम् । यत इति शेषः । तथाच यतो गौपवनश्रुतौ मनसोऽनुत्पत्तिः 'श्रूयते' प्रतिपाद्यते अत इति योजना । न चात्र नित्यत्वमेवोच्यते, नानुत्पत्तिरिति वाच्यम् । नित्यमित्यस्यानुत्पत्तिमदित्यर्थाश्रयणात् । न च साध्यविशेषः, अनादित्वादित्यस्य अनादिपुरुषसम्बन्धित्वादित्यर्थाश्रयणात् । यद्वा—अनादित्वादित्यस्यैव अनुत्पत्तिमत्त्वादित्यर्थाश्रयणादत एवानुत्पत्तिसिद्धिः । तत एव टीकायां ' नित्यं मनोऽनादित्वात् ' इति श्रुतेरिति हेतुवाक्यमपि गृहीतम् । ननु 'एतस्मात्' इति श्रुत्यनुसारेणेन्द्रियानुत्पत्तिश्रुतिवदनादित्वश्रुतेः गौणार्थत्वं किं न स्यादित्यत आह—सयुक्तिकेति । युक्त्यभिधानसहितेत्यर्थः । अनुत्पत्तिश्रुतेः विशेषणमेतत् । द्विधेवेति सम्बन्धः । हिशब्दः प्रसिद्धौ । ' तत्र ' नित्यानित्ययोर्मध्ये । तथा च ' द्विधा ' इति वाक्ये मनोभिन्नेन्द्रियाणामनित्यत्वमुक्त्वा विशिष्य मनसो नित्यत्वाभिधानात् अनादित्वहेतोरसिद्धिशङ्कायां ' न ह्यमनाः ' इति विपर्ययपर्यवसानसूचितात्कदाचिन्मनोहीनेन अनादिपुरुषेण अवस्थातव्यं स्यात्, तथात्वे च तदा संसाराभावप्रसङ्गादित्यनिष्टप्रसङ्गाभिधानाच्च युक्तिरुक्तेति भावः । अनेन युक्तियुक्तानादित्वश्रुतेः प्राबल्यात्तद्विरोधेनोत्पत्तिश्रुतेरप्रामाण्यात् न श्रुतिसमन्वयेनेश्वरस्य जगत्कारणत्वसिद्धिरिति पूर्वपक्षो दर्शितः ।

(२) अत आह---

सू—ॐ ॥ तत्प्राक् श्रुतेश्च ॥ ॐ ॥ ४ ॥

'मनस्सर्वेन्द्रियाणि च' (मु. २-१-३.) इति पूर्वोक्तत्वान्ना नुत्पत्तिर्मनसो युज्यते ।

(३) पूर्वं मनस्समुत्पन्नं ततोऽन्येषां समुद्भवः ।
तदनुत्पत्तिवचनमल्पोपचयकारणात् ॥

---

(२) सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ इतीति । इति श्रुतावन्येन्द्रियेभ्यः पूर्वोत्पन्नतयोक्तत्वान्नानुत्पत्तिर्मनसो युज्यत इत्यन्वयः । नेत्यादिना प्रतिज्ञाध्याहारो दर्शितः । अत्रोत्पन्नत्वेनोक्तत्वमेव लिङ्गम् । पूर्वोत्पन्नत्वं तु पृथगभिधानस्य वैयर्थ्यशङ्कापरिहारकमिति ध्येयम् ।

(३) ननु कुतो मनसः पूर्वोत्पत्तिस्सिध्यति । न च श्रुतौ पूर्वनिर्देशात्तत्सिद्धिः, तस्याप्रयोजकत्वात् । कथं चोत्पत्त्यङ्गीकारे श्रुतियुक्तिविरोधपरिहार इत्यतः तदुत्तरत्वेन चशब्दं व्याचष्टे—पूर्वमिति ॥ अन्येन्द्रियेभ्यः पूर्वमित्यर्थः । 'समुत्पन्नं' उपचितरूपेणेति शेषः । 'ततो' मनउत्पत्त्यनन्तरं 'अन्येषां' मनोभिन्नेन्द्रियाणां 'समुद्भवः' समुत्पत्तिः । तर्हि श्रुत्यादिविरोध इत्यत आह—तदिति । यतस्तस्य मनसोऽनुत्पत्तिवचनं नित्यत्ववचनं अनादित्ववचनं वा 'अल्पोपचयकारणात्' इतरेन्द्रियवन्मनसो भूतादिवदुभागैरुपचयाभावान्निमित्तादनेन ज्ञापितादितरेन्द्रियवत्प्रलयेऽपि सूक्ष्मरूपेण सत्त्वाद्धेतोरुपपद्यते । एवं 'तदनुत्पत्तिवचनं' विशिष्य मनसो नित्यत्वाभिधानरूपा युक्तिः 'अल्पोपचयकारणात्' अन्येन्द्रियेभ्योऽल्पोपचयान्निमित्तादुपपद्यते । अतो न तद्विरोध इत्यर्थः । अनेनानादिनित्यत्ववचनस्य सूक्ष्मरूपविषयत्वमुक्तं भवति । न च सूक्ष्मरूपेणानादिपुरुषसम्बन्धिनोऽपि मनसः कदाचिदेवोपचयरूपोत्पत्त्यङ्गीकारे उपचयात्पूर्वं संसाराभावप्रसङ्गः, उपचितमनस एव संसारयोग्यत्वादिति वाच्यम् । प्रतिसृष्टिकालं उपचयसत्त्वात् तदैव हि संसारो, न प्रलये, तदा उपचयाभावेऽपि दोषाभावादित्युक्त एव परिहारः । 'वायुप्रोक्तवचनम्' वायुप्रोक्ताख्यग्रन्थवचनं सौत्रचशब्देन सूचितमित्यर्थः । अनेन—नानुत्पत्ति-

इति वायुप्रोक्तवचनं चशब्देन सङ्गृहीतम् ॥ ४ ॥

॥ इति तत्प्रागधिकरणम् ॥ २ ॥

॥ ३. तत्पूर्वकत्वाधिकरणम् ॥

(१) 'नित्ययाऽनित्यया स्तौमि परमात्मानमच्युतम् । इति ।

र्मनसो युज्यते । कुतः ? 'तच्छ्रुतेः' 'मनस्सर्वेन्द्रियाणि च' इत्युत्पत्तिश्रुतिसद्भावात् । न च छत्रिन्यायेनेयमुपचरितेति वाच्यम् । 'तत्प्राक्छ्रुतेः' तस्य मनसः पृथग्जन्मश्रुतेः । अस्याः राजा छत्री याति, अन्ये छत्रिणो यान्तीतिवद्विशेषश्रुतित्वेनेन्द्रियाणि जायन्ते इत्येतावन्मात्रोक्तिरूपसामान्योक्तित्वाभावादिति भावः । न चेतरेन्द्रियवन्मनसोऽप्युत्पत्तिमत्त्वे पृथगुत्पत्तिश्रुतिर्व्यर्थेति वाच्यम् । 'तत्प्राक्छ्रुतेश्च' तच्छ्रुतेश्च मनसः पृथगुत्पत्तिश्रुतेरपि तेभ्योऽन्येभ्यः प्रागुत्पन्नत्वाभिप्रायेणोपपन्नत्वात् । ननु कुतो मनसः पूर्वोत्पत्तिः ज्ञायते, श्रुतौ प्राङ्निर्देशमात्रस्य नियामकविशेषप्रमाणं विना प्रागुत्पन्नत्वानिश्चायकत्वादित्याशङ्कापरिहारकवायुप्रोक्तवचनसङ्ग्रहाय चशब्द इति सूत्रार्थ उक्तो भवति ।

॥ इति तत्प्रागधिकरणम् ॥ २ ॥

॥ ३. तत्पूर्वकत्वाधिकरणम् ॥

(१) अत्राधिकरणे वागुत्पत्तिश्रुतेरनुत्पत्तिश्रुत्या विरोधः परिहियते । पूर्वपक्षयति—नित्ययेति ॥ वाचोऽनुत्पत्तिरेव भवेत् । कुतः ? यतो 'नित्यया' इति पौष्यायणश्रुतौ 'वाग्वाव नित्या न ह्येषोत्पद्यते' इति वाक्येन वाचोऽनुत्पत्तिरुच्यत इत्यन्वयः । अत्र नित्यत्वमविनाशित्वं, तत्र हेतुः—न हीति । नन्वनुत्पत्तिवदुत्पत्तेरपि 'सर्वेन्द्रियाणि च' इति श्रुत्युक्तत्वात् सत्प्रतिपक्षितेयं श्रुतिर्न निर्णयकरीत्यत आह—सयुक्तिकमिति । 'अस्यां हि' इति वाक्यैवोध्यनित्यवेदाश्रयस्यानित्यत्वासम्भवरूपतर्कसहितश्रुत्याश्रयत्वरूपयुक्तिसाहित्येनेत्यर्थः । उच्यत इति क्रियाविशेषणमेतत् । तथा चानुत्पत्तिश्रुतेः अधिकबलत्वात् न सत्प्रतिपक्षितत्वमिति भावः ।

'वाग्वाव नित्या न ह्येषोत्पद्यतेऽस्यां हि श्रुतिरवतिष्ठते'
इति सयुक्तिकं पौष्यायणश्रुतौ वाचोऽनुत्पत्तिरुच्यते ।

ननु

नित्ययाऽनित्यया स्तौमि ब्रह्म तत्परमं पदम् । इति ॥
श्रुतिर्वाव नित्या अनित्या वाव स्मृतयः ॥

इति पैङ्गिब्राह्मणे 'नित्यया' इति मन्त्रमुदाहृत्य तद्गतनित्यानित्यशब्दयोः श्रुतिस्मृतिविषयत्वेन व्याख्यातत्वात् तत्समाख्यानात् सामान्यवाक्शब्दस्य विशेषार्थकल्पनोपपत्तेरुत्पत्तिश्रुत्यानुकूल्याच्चात्रत्यवाक्शब्दो वेदपर एव, न वागिन्द्रियपरः। तथा च नेयं वागनुत्पत्तिसाधिकेत्यतोऽप्याह—सयुक्तिकमिति। श्रुतिविशेषणमेतत्। तथा च विशेषश्रुतित्वाख्ययुक्तिसहितश्रुतावित्यर्थः। तथा च 'अस्यां हि श्रुतिरवतिष्ठते' इति वाक्यशेषे वेदे असम्भाव्यमानवेदाश्रयत्वोक्त्या तद्बलात् 'वाग्वाव' इति श्रुतेः विशेषश्रुतित्वात् अत्रत्यवाक्शब्दो वागिन्द्रियपर एव, न वेदपर इति भवत्येवेयं श्रुतिः अनुत्पत्तिसाधिकेति भावः। नन्वियं श्रुतिः इतरेन्द्रियवत् वाचस्सूक्ष्मरूपानादित्वपरा किं न स्यात्। न च नित्याश्रयत्वयुक्तिविरोधः। तस्या अपि सूक्ष्मरूपनित्यत्वेनोपपत्तेः। एवमुत्पत्तिश्रुत्यानुकूल्यादुपचयोऽप्यस्तीत्यतो वाऽऽह—सयुक्तिकमिति। यतः 'सयुक्तिकं' श्रुत्याश्रयत्वयुक्तिसहितं यथा भवति तथा अनुत्पत्तिरुच्यते अत इत्यर्थः। अयं भावः—अस्यां हीति वाक्यशेषे तावच्छ्रुत्याश्रयत्वमुच्यते। श्रुत्याश्रयत्वं नाम नित्यं श्रुत्युच्चारणसामर्थ्यमेव, न तु श्रुत्याधारत्वमात्रम्। अन्यथा श्रुतेर्वर्णात्मकत्वात् वर्णानां च नित्यसर्वगतत्वात् विशिष्यवागाश्रयत्वोक्तिर्व्यर्था स्यात्। नित्यं वेदोच्चारणसामर्थ्यं च सूक्ष्मरूपानादित्वे न घटते। तथा सत्युपचयदशायामेव वाचः श्रुत्युच्चारणसामर्थ्यं नान्यदेति स्यात्, किंतु स्वरूपानादित्वे। एवं चेन्नोपचयः कल्प्यः व्यर्थत्वात्। तथा चात्र श्रुतश्रुत्याश्रयत्वान्यथाऽनुपपत्त्या स्वरूपानादित्वपरैव अनुत्पत्तिश्रुतिः, न सूक्ष्मरूपानादित्वपरा, अतस्तद्विरोधादुत्पत्तिश्रुतिः अप्रमाणमेवेति। श्रुतौ नित्यया अनित्ययेतिपदच्छेदः। स्तौमीति मन्त्रद्रष्टृऋषिणा उच्यते। परमात्मानमित्यनेन पैङ्गिश्रुतिव्याख्येयमन्त्रादयमन्यो मन्त्रः तद्गतब्रह्मपदविवरणरूप इति सूचितम्। अच्युतमित्यनेन तत्रत्यं परमं पदं इत्येतद्विवृतम्। नाश-

(२) अतो ब्रवीति—

सू—ॐ ॥ तत्पूर्वकत्वाद्वाचः ॥ ॐ ॥ ५ ॥

'तस्मान्मन एव पूर्वरूपं वागुत्तररूपम्' (ऐ. आ. ३-१-१.)

इति मनःपूर्वकत्वाद्वाचो नानुत्पत्तिः ।

(३) वागिन्द्रियस्य नित्यत्वं श्रुतिसन्निधियोग्यता ।

रहितस्यैव मुख्यतो गम्यत्वात् । इतिशब्दो मन्त्रप्रतीकग्रहणार्थः । एवं मन्त्रमुदाहृत्य तद्गतनित्यशब्दविशेष्यं दर्शयति—वाग्वावेति । निपातसमुदायः प्रसिद्धौ । नित्यत्वे हेतुमाह—नेति । हिः हेतौ । 'एषा' वागित्यर्थः । केचित्तु—इह नित्यत्वमनुत्पत्तिमत्त्वं, तत्र अनुत्पन्नत्वेन प्रसिद्धत्वं हेतुः । प्रसिद्धिर्हिशब्दार्थः । अवधारणार्थो निपात इत्याहुः ।

(२) सिद्धान्तयन्सूत्रमवतार्य व्याचष्टे—अत इति ॥ इतीत्यनन्तरं श्रुताविति शेषः । मनःपूर्वकत्वादिति । मनःकारणकत्वोक्तेरित्यर्थः । 'वाचो' वागिन्द्रियस्य 'नानुत्पत्तिः' नाकार्यत्वमित्यर्थः । कारणवतः कार्यत्वनियमादिति भावः । अनेन सूत्रे नेत्यध्याहार्यम् । तथा च वाचः 'तत्पूर्वकत्वात्' प्रकृतमनःकारणत्वोक्तेर्नानुत्पत्तिरिति सूत्रार्थ उक्तो भवति । यद्यपि 'तस्मान्मन एव पूर्वरूपं वागुत्तररूपम्' इति भाष्योदाहृतैतरेयश्रुतेः तद्भाष्ये मनोवाङ्नामकतदन्तर्गतरूपयोर्विष्णुनामगतपूर्वोत्तरवर्णदेवतात्वपरत्वमुक्तमिति नाम्याः प्रकृतोपयोगिता । तथापि 'मनः पूर्वरूपं वागुत्तररूपम्' इति प्रतिज्ञावाक्योपपादके 'मनसा वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरति' (ऐ.आ ३-१-१.) इति वाक्ये भाष्यस्थेनेतिशब्देन गृहीते वाक्यशब्दस्य साधारणतापरिहाराय टीकाकृतोदाहृते वाक्ये स्थितयोः पूर्वोत्तरशब्दयोः कार्यकारणपरत्वात्प्रकृतोपयोगितोपपत्तिः । यद्वा—भगवद्रूपाधिष्ठानयोरपि मनोवागिन्द्रिययोः इह वाच्यत्वात्तद्विवक्षया कार्यकारणभाव इहोक्त इति प्रकृतसङ्गतिः । अत एव टीकायां अत्र पूर्वोत्तरशब्दावित्युक्तम् । उपपादकवाक्ये वा प्रतिज्ञावाक्ये वेति तदर्थः । अस्मिन्नधिकरण इत्यध्यर्थः ।

(३) वागिन्द्रियस्योत्पत्त्यङ्गीकारे 'न ह्येषोत्पद्यते' (पैप्पायण.) इति श्रुतिविरोधः, 'अस्यां हि' (पैप्पायण.) इत्युक्तयुक्तिविरोधश्चेत्यत आह—

उत्पत्तिर्मनसो यस्मान्न नित्यत्वं कुतश्चन ॥
इति वायुप्रोक्ते ॥ ५ ॥

॥ इति तत्पूर्वकत्वाधिकरणम् ॥ ३ ॥

वागिन्द्रियस्येति ॥ यतो नित्यश्रुतिसन्निधियोग्यता (नित्यं श्रुत्युच्चारण-हेतुता योग्यत्वम्) वागिन्द्रियस्य नित्यत्वं नित्यत्वादित्वोक्तेरुपचरितत्वे बीजमस्ति, अतो वागिन्द्रियस्य नित्यत्ववचनं प्रवृत्तम, न तु मुख्यनित्यत्वं तदर्थः। तथा च श्रुतेरुपचरितार्थत्वान्न तद्विरोध इति भावः। ननु कादाचित्कं श्रुतिसन्निधानं कथं सार्वकालिकनित्यत्वोक्तेरुपचारबीजं भवतीत्यतो योग्यतेत्युक्तम्। तथा च श्रुतिसन्निधेः कादाचित्कत्वेनोपचार-बीजत्वानुपपत्तावपि तद्योग्यत्वस्य सार्वकालिकत्वाद्भवत्युपचारबीजत्वम्। अत एव श्रुत्याश्रयत्वमपि न नित्यदा, किंतु तद्योग्यतैव। अतो न नित्या-श्रयत्वमात्रेणाश्रयनित्यत्वाक्षेपः, अनित्यस्यापि तत्सम्भवात्, अपि तु नित्यदा नित्याश्रयत्वं, तच्च वाचि नास्त्येवेति न तेन नित्यत्वाक्षेपो युक्तः। अत एव नोपचयवैयर्थ्यम्। उपचयदशायामेव श्रुत्याश्रयत्वात् श्रुत्युच्चारण-सामर्थ्यवादन्यदा सामर्थ्याभावादिति भावः। अनेन नित्यं श्रुत्युच्चारण-सामर्थ्यस्यासिद्धिरुक्ता भवति। कुत एवं कल्प्यते? स्वरूपनित्यत्वमेव किं नेष्यत इत्यत आह—उत्पत्तिरिति। मनस इति न षष्ठी, किंतु पञ्चमी। वागिन्द्रियस्येत्यस्ति। ज्ञायत इति शेषः। 'कुतश्चन' 'न हि' इति विशेषश्रुत्या श्रुत्याश्रयत्वयुक्त्या चेत्यर्थः। सिध्यतीति शेषः। यद्वा—यस्माद्वागिन्द्रियस्य मनस उत्पत्तिरवगम्यते तस्मादेवमभ्युपगम एव 'नित्यत्वं' 'वाग्वाव' इति नित्यत्वश्रुतिरुपचरितनित्यत्वार्थतयोपपन्ना भवति, न मुख्यनित्यत्वे 'कुतश्चन' कथमप्युपपद्येत्यर्थः। न चोत्पत्ति-मत्त्वेनानुत्पत्त्यभाव एव साध्यो नानुत्पत्तिरिति तस्यैव प्रतिज्ञातत्वात्, नानित्यत्वं ध्वंसे व्यभिचारादिति वाच्यम्। अत्र सर्वत्र नित्यानित्य-शब्दयोरनुत्पत्त्युत्पत्तिमदर्थकत्वात्। इतीति। इत्येवं वायुप्रोक्ताख्यग्रन्थे उक्तत्वान्न विरोध इत्यर्थः। अनेन सिद्धान्ते वाङ्नित्यत्वोक्तेरुपचारबीजोप-पादकं 'अस्यां हि' इति वाक्यं 'अस्यां हि स्मृतिरवतिष्ठते' इत्यनित्य-त्वोपचारबीजकथनवाक्यस्याप्युपलक्षकम्। तथा च अहं नित्यवेदाश्रय-

॥ ४. सप्तगत्यधिकरणम् ॥

(१) 'सप्त प्राणाः प्रभवन्ति तस्मात्' (मु. २-१-८.) इति श्रुतिः।

सप्तैव मारुता बाह्ये प्राणास्सप्त तथाऽऽत्मनि ।
अधिदैवे तथाऽध्यात्मे सङ्ख्यासाम्यं विदो विदुः ॥

इति च स्कान्दे ।

(२) 'द्वादश वा एते प्राणा द्वादश मासा द्वादशादित्याः ।

त्वान्नित्यया अनित्यपुराणाद्याश्रयत्वादनित्यया वाचा परमात्मानं स्तौमीति श्रुत्यर्थ उक्तः। एतेन ब्रह्मशब्दघटितसमाख्याश्रुत्यनुरोधोऽपि दर्शितः । नित्यानित्यशब्दयोर्वेदपुराणाद्यर्थकत्वाविघातेनैवास्या व्याख्यानात्।

॥ इति तत्पूर्वकत्वाधिकरणम् ॥ ३ ॥

॥ ४. सप्तगत्यधिकरणम् ॥

(१) अत्र प्राणसङ्ख्याविषयश्रुतिविरोधः परिह्रियते। सन्देहबीजश्रुतिविगानं दर्शयन् पूर्वपक्षं सूचयति--सप्तेति ॥ आथर्वणीयं श्रुतिः। 'प्राणाः' इन्द्रियाणि 'तस्मात्' परमात्मनः। श्रुतिरित्यनन्तरं प्राणानां सप्तत्वं वक्तीति शेषः। न केवलमिन्द्रियाणां सप्तत्वं श्रुतिसिद्धं, किंतु युक्तिसिद्धं चेत्याशयेन प्रमाणोक्त्या तां दर्शयति—सप्तैवेति। यस्मात् 'बाह्ये' देहाद्बहिः स्थिताः 'मारुताः' मरुत्संज्ञिकाः इन्द्रियाभिमानिनो देवाः सप्तैव। तथा तस्य 'आत्मनि' देहे स्थिता अपि प्राणास्सप्तैवेत्यर्थः। नन्वप्रयोजकोऽयं हेतुरित्यत आह—अधिदैव इति। तथाशब्दः समुच्चये। तथा च यस्मात् 'अधिदैवे' देहाद्बहिर्गतेष्वभिमानिदेवेषु 'अध्यात्मे' देहान्तर्गतेष्वभिमन्यमानेषु च 'सङ्ख्यासाम्यं' समसङ्ख्याकत्वं 'विदो' ज्ञानिनो 'विदुः' जानन्ति तस्मादित्यर्थः। स्कान्द इत्यनन्तरं उक्तिश्चेति शेषः।

(२) 'द्वादश वा' इति श्रुतौ वैशब्दः प्रसिद्धौ। प्राणशब्दितेन्द्रियाणां द्वादशत्वं कुत इत्यतस्तत्र हेतुमाह—द्वादशेति ॥ इदं च यतो मासादयो द्वादशैव, अतः प्राणा अपि द्वादशैवेति हेतुहेतुमद्भावेन योज्यम्। अत्राप्रयोजकताशङ्कायां 'द्वादश मासाः' इति श्रुतेर्मासादीनां प्राणानां चादि-

द्वादश राशयो द्वादश ग्रहाः' इति कौण्डिन्यश्रुतौ द्वादश प्राणा दृश्यन्ते ।

(३) अतो वक्ति—

सू—ॐ ॥ सप्त गतेर्विशेषितत्वाच्च ॥ ॐ ॥ ६ ॥

त्याख्यसमसङ्ख्यदेवताकत्वाभिप्रायेण प्रवृत्ततया प्राणाभिमानिनां द्वादशत्वावगतेस्तेषां च द्वादशत्वे तदभिमन्यमानानां प्राणानामपि द्वादशत्वसिद्धेरिति हेतुरभिप्रेतो बोध्यः । अत एव 'द्वादश मासाः' इत्यादिवाक्यशेषोपन्यासः । 'ग्रहाः' सोमस्य द्वादशऋतुयाजग्रहाः मध्वादिद्वादशमासोद्देश्या इति तत्त्वप्रदीपोक्तेः । तस्याः षड्ऋतुप्रविष्टत्वेन ऋतुशब्दवाच्यमध्वादिशब्दितचैत्रादिद्वादशमासदेवतोद्देश्यकयागार्थाः सोमरसग्रहणार्थपात्रविशेषा इत्यर्थः । 'ऋत्वधिपो विष्णुः केशवादिस्वरूपतः । ग्रहान् सोमस्य' इति ऋग्भाष्योक्तेः । एकैकस्य ऋतोर्मासभेदेन द्विरूपत्वाद्देवतानां केशवादीनां तदुद्देश्यानां ग्रहाणामपि द्वादशत्वमिति भावः । चन्द्रिकायां तु ज्योतिष्टोमे सोमरसग्रहणार्थाः सूक्ष्मोलूखलाकाराः पात्रविशेषाः द्वादश सन्ति । अत एव ग्रहणक्रिया अपि द्वादशसङ्ख्याकाः । तेचोपांश्वन्तर्यामैन्द्रवायवमैत्रारुणाश्विनाः पञ्च, शुक्रामन्थिनौ द्वौ, ऋतुपात्रे द्वे, अतिग्राह्या नाम त्रयः इत्येवंरूपाः । यद्यप्यंश्वदाभ्यावपि तत्र ग्रहौ स्तः । तथापि तयोः अनित्यत्वात् सदनोपस्थानाद्यभावाच्च नित्यसदनादियुक्तग्रहविवक्षया द्वादशत्वोक्तिरित्युक्तम् । अत्र तत्त्वप्रदीपे 'षड्ऋतुनेति यजन्ति प्राणमेव तद्यजमाने दधति । चत्वारि ऋतुभिरित्यपानमेव तद्यजमाने दधति । द्व्यर्तुनेत्युपरिष्टात्' ( ) इति श्रुत्युदाहरणात् ज्योतिष्टोमयागादन्ययागार्थाः पात्रविशेषाः इहोपात्ता इति प्रतीयते । अत्र विशेषो नावबुद्धः । दृश्यन्त इत्यनन्तरं अतो विरोध इति वाक्यशेषः ।

(३) सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ ज्ञानेन्द्रियापेक्षयेत्यनेन सूत्रे सप्तेति श्रुतिप्रतीकग्रहणम् । गतेरिति ल्यब्लोपनिमित्ता पञ्चमी । गतिशब्दश्च ज्ञानसाधनेन्द्रियपरः । तथाच गतिमपेक्ष्यज्ञानकरणेन्द्रियाण्यपेक्ष्य 'सप्तत्वम्' सप्तेतिश्रुतिः प्रवृत्तेति सौत्रप्रतिज्ञांशो

ज्ञानेन्द्रियापेक्षया सप्तत्वम् 'गुहाशयां निहिताः सप्त सप्त' (मु. २-१-८.) इति विशेषणात् ॥

(४) सप्तप्राणास्त्ववगतेः पञ्च प्राणाश्च कर्मणः ।

व्याख्यातः । 'गतेः' ज्ञानस्य सम्बन्धिनः प्राणास्सप्तेति व्याख्या तु न भाष्यटीकानुसारिणी । सप्तत्वमित्यनन्तरं अतो न विरोध इति वाक्यशेषः । श्रुत्युक्तानां सप्तानां ज्ञानेन्द्रियत्वं कुतः इत्यतः प्रवृत्तं विशेषितत्वादित्यंशं व्याख्याति--गुहाशयामिति । आथर्वणे

'सप्त प्राणाः प्रभवन्ति तस्मात्' इत्यनन्तरं श्रुते

सप्तार्चिषः सप्तसमिधः सप्त होमाः ।
सप्तमे लोका येषु चरन्ति प्राणाः
गुहाशयां निहितास्सप्तसप्त ॥ (मु. २-१-८.)

इति वाक्यशेषे श्रोत्रचक्षुःस्पर्शनरसनघ्राणमनोबुद्धीनां सप्तानामिन्द्रियाणां ज्ञानार्थत्वविशेषणेन विशेषितत्वादित्यर्थः । श्रुतौ गुहाशयामिति पदं 'गुहाशयां' गुहाशयायां बुद्धौ तदर्थं निहिताः 'समाने लोपः' इति एकयकारलोप इत्याथर्वणभाष्योक्तरीत्या तादर्थ्यसप्तम्यन्ततया व्याख्येयम् । यद्वा—गुहाशयामित्युद्देश्यद्वितीया । तां बुद्धिं प्रतीति तत्त्वप्रदीपोक्तेः । अथवा—गुहाशयेति प्रथमा द्वितीयार्थे, सप्तम्यर्थे वा । सप्तम्यर्थे प्रथमेति तत्त्वप्रदीपोक्तेः । प्राणानां प्रतिपुरुषं भेदात् सप्तसप्तेति वीप्सा । तथाच 'तस्मात्' 'पुमान् रेतस्सिञ्चति योषितायाम्' (मु. २-१-५.) इति पूर्ववाक्ये प्रकृतात् तस्माच्छब्दयोषिति गर्भाधानकर्तुः परमपुरुषात् 'सप्त' सप्तसङ्ख्याकाः 'प्राणाः' इन्द्रियाणि 'प्रभवन्ति' प्रजज्ञिरे । एवं 'सप्तार्चिषः' सप्तेन्द्रियवृत्तयः 'समिधो' विषयाः 'सप्तहोमाः' सप्त विषयेन्द्रियसम्बन्धाः प्रजज्ञिरे । 'गुहाशयां' गुहा हृदयं आशयः स्थानं यस्याः बुद्धेः सा तथोक्ता तस्यां तदर्थं तां प्रति तदर्थमिति वा । तथाच प्रतिशरीरं बुद्ध्यर्थं ये परमपुरुषात् 'निहिताः' स्थापिताः 'सप्तसप्त' प्राणाः ते 'यत्र' येषु लोकेषु गोलकेषु सञ्चरन्ति, त इमे लोकाः सप्तेति श्रुत्यर्थः ।

(४) नन्वस्तु सप्तानामिन्द्रियाणां ज्ञानविशेषणबलेन ज्ञानार्थत्वं, तथापि ते प्राणाः सप्तसङ्ख्याका एव किं न स्युः । किमिति तेषां द्वादशत्वमङ्गीकृत्य

एवं प्राणद्वादशकं शरीरे नित्यसंस्थितम् ।
इति भविष्यत्पर्ववचनं चशब्दात् ॥ ६ ॥

(५) सू—ॐ॥ हस्तादयस्तु स्थितेऽतो नैवम् ॥ॐ॥७॥

हस्तादीनां कर्मविषयत्वान्न सहपाठः ॥

(६) संसारस्थितिहेतुत्वात्स्थितं कर्म विदो विदुः ।

सप्तश्रुतेः सावकाशत्वकल्पनमित्याशङ्क्य चशब्दोपात्तस्मृत्या निराह—सप्तेति ॥ चशब्दादिति । सौत्रचशब्दादित्यर्थः । सङ्गृहीतमिति शेषः । 'अवगतेः' ज्ञानस्य सम्बन्धिनः प्राणाः सप्त । एवं क्रियारूपकर्मणः सम्बन्धिनस्तज्जनकाः प्राणाः पञ्च । एवं प्राणद्वादशकं प्रतिशरीरं नियमेन संस्थितमित्यर्थः । तुशब्दो विशेषद्योतकः । चशब्दस्समुच्चयार्थः । यद्यपीयं स्मृतिः ज्ञानेन्द्रियत्वकर्मेन्द्रियत्वरूपावच्छेदकप्रदर्शनेन सप्तत्वपञ्चत्वोक्त्योः सावकाशत्वं कथयन्ती बाधकपरिहाररूपैव, न तु द्वादशत्वसाधिका । तथाऽप्यनया सप्तश्रुतौ सावकाशायां 'द्वादश वा एते प्राणाः' (कौण्डिन्य) इति पूर्वोदाहृतश्रुत्यैव द्वादशत्वं सिध्यतीति साऽपि चशब्दसङ्गृहीताऽत्रोदाहर्तव्या ।

(५) ननु सप्तभ्योऽन्येषां प्राणानां सद्भावेऽत्राथर्वणश्रुतौ तेषां परमात्मजन्यत्वेनोच्यमानैः सप्तभिः 'सह सप्त पञ्च प्राणाः' इति पाठस्स्यात् । अत्र सहपाठाभावो द्वेधा भवेत् अनादित्वेन वा ? परमात्मनस्तदकारणत्वेन वा ? तदुभयमपि 'तथा प्राणाः' (सू. २-४-१०) इत्युक्तिविरुद्धम् । न चासहपाठे कारणान्तरं पश्यामः, न वा परमात्मनः तदकारणत्वे कारणान्तरं पश्यामः । अकारणकार्योत्पत्तिश्चायुक्ता । तस्मात्सहपाठाभावात् न सप्तभ्योऽन्ये प्राणाः सन्तीत्याशङ्क्य परिहरत्सूत्रं पठित्वा व्याचष्टे—हस्तादय इति ॥ आदिशब्देन पादपायुगुह्यवाचो गृह्यन्ते । 'कर्मविषयत्वात्' कर्मार्थत्वादिति अतःशब्दव्याख्यानम् । विषयेत्यनेन सप्तम्यर्थः कर्मेत्यनेन स्थितशब्दार्थश्च दर्शितः । सहपाठ इत्यनेनैवंशब्दार्थ उक्तः । हस्तादीनां सप्तभिरिति शेषः । अनेन सूत्रे तुशब्दो वैलक्षण्यार्थः । यत इति शेष इति सूचितम् ।

(६) ननु पूर्वसूत्रगतो गतिशब्दो ज्ञानार्थस्सन् तद्द्वारा तत्करण-

तस्मादुद्गतिहेतुत्वात् ज्ञानं गतिरिहोच्यते ॥
इति च वायुप्रोक्ते ॥ ७ ॥

॥ इति सप्तगत्यधिकरणम् ॥ ४ ॥

॥ ५. अण्वधिकरणम् ॥

(१) 'दिवीव चक्षुराततम्' (ऋ. १-२२-२०.) इति व्याप्तिः

बोधकः। द्वितीयसूत्रगतश्च स्थितशब्दः कर्मवाचीत्येतत्कुत इत्यत आह—संसारेति ॥ पुरुषस्य संसारस्थितौ हेतुत्वादित्यर्थः। 'तस्मान्' संसारात् उद्गतिरुत्थितिर्मोक्षः तत्कारणत्वादित्यर्थः। ननु मुक्तानां परमा गतिर्हरिरेव। सतां गतिरित्यादौ गतिशब्दस्य गम्यार्थत्वात्कथं ज्ञानार्थत्वमित्यत आह—इहेति। एतत्सूत्रे तदनुकूलप्रमाणे चेत्यर्थः। कर्म मानुषमिहाभिप्रेतं, ज्ञानं च तत्त्वविषयमिति तत्त्वप्रदीपोक्तेरत्र कर्मशब्देन मानुषकर्तृकं प्रवृत्तिकर्मोच्यते। तस्यैव बन्धकत्वात्। ज्ञानशब्देन ब्रह्मज्ञानम्। न च निवृत्तिकर्मणि अब्रह्मज्ञाने च कथं स्थितगतिशब्दौ, उक्तनिमित्ताभावादिति वाच्यम्। यथा 'तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं ·· तस्मात्प्रपदे तस्मात्प्रपदं इत्याचक्षते' (२.१-४.) इत्यैतरेयश्रुत्युक्तस्य परमात्मकर्तृकतच्छब्दोक्तचतुर्मुखप्राप्तिकरणत्वरूपस्य प्रपदशब्दप्रवृत्तिनिमित्तस्य चतुर्मुखपादतलोपरिगतत्वेऽपि तत्सजातीये पुरुषान्तरसम्बन्धिन्यपि पादतलोपरिभागे प्रपदशब्दः प्रयुज्यते। तथेहापि संसारस्थितिहेतुप्रवृत्तिसजातीये निवृत्तिकर्मण्यपि स्थितशब्दः प्रयुज्यते। एवं संसारोद्गतिहेतुब्रह्मज्ञानसजातीये घटादिज्ञानेऽपि गतिशब्दप्रयोगोपपत्तिः। वायुप्रोक्ते ग्रन्थे स्थितगतिशब्दौ कर्मज्ञानार्थावित्युक्तमिति वाक्यशेषः।

॥ इति सप्तगत्यधिकरणम् ॥ ४ ॥

॥ ५. अण्वधिकरणम् ॥

(१) पूर्वाधिकरणे प्राणसङ्ख्याविषयश्रुतिविरोधः परिहृतः। अत्राधिकरणे तत्परिमाणविषयश्रुतिविरोधः परिह्रियते। सन्देहबीजं श्रुतिविगानं दर्शयन् पूर्वपक्षं सूचयति—दिवीवेति ॥ इति श्रुताविति शेषः। 'व्याप्तिः' प्राणानामिति शेषः। चक्षुःपदेन इन्द्रियमात्रोपलक्षणया समान-

प्रतीयते । दूरश्रवणदर्शनादियुक्तिश्च ।

(२) 'अणुभिः पश्यत्यणुभिः कृणोति प्राणा वा अणवः प्राणैर्ह्येतद्भवति' इति च कौण्डिन्यश्रुतिः ।

न्यायविषयत्वेन वेति भावः । नन्वणुत्वश्रुत्या सत्प्रतिपक्षितेयं श्रुतिरिति शङ्कापरिहाराय दिवीवेत्यंश उदाहृतः । अनेनास्यां श्रुतौ विष्णोर्व्यापित्वे दृष्टान्तत्वेन चक्षुःपदोपलक्षितेन्द्रियव्यापिरुक्तत्वात् सा सिद्धेति प्राणानां व्याप्तौ युक्तिरुक्ता भवति । तथा च व्यापित्वश्रुतेर्युक्तियुक्तत्वान्न सत्प्रतिपक्षितत्वमिति भावः । व्याप्तिश्रुतेः प्राबल्योपपादनायैवेन्द्रियव्याप्तौ युक्त्यन्तरमाह—दूरेति । चस्समुच्चये । तथा च किञ्चिद्दूरस्थवस्तुदर्शनं तथा दूरस्थशब्दश्रवणं, आदिशब्दात् दूरस्थवस्तुस्मरणं गृह्यते । एतद्रूपा युक्तिः प्राणानां व्याप्तिं साधयतीत्यर्थः । इन्द्रियाणां प्राप्यकारित्वेन व्याप्तिं विना चक्षुःश्रोत्रमनसामुक्तकार्यजनकत्वादिति भावः । यथा चक्षुः 'दिवि' आकाशे 'आततं' व्याप्तमपि न दृश्यते, किंतु विषयोपलब्धिलक्षणेन फलेनानुमीयते, तथा परमेश्वरस्वरूपं सर्वगतमपि न दृश्य, किन्त्वस्यतच्चाणां पदार्थानां सत्ताप्रतीतिप्रवृत्तिभिर्ज्ञायत इति श्रुतितात्पर्यार्थो ऋग्भाष्यटीकायामुक्तः । अनेनैव व्याप्ता एव प्राणास्तथा श्रुतेर्युक्तेश्चेति सयुक्तिकपूर्वपक्षः सूचितो भवति ।

(२) एवं व्याप्तिश्रुतिमुदाहृत्याणुत्वेऽपि श्रुतिमुदाहरति—अणुभिरिति॥ चः समुच्चये । श्रुतिः प्राणानामणुत्वं वक्तीति शेषः । पुरुषः 'अणुभिः' ज्ञानेन्द्रियैः 'पश्यति' तत्तदिन्द्रिययोग्यं वस्तु जानाति । एवं 'अणुभिः' कर्मेन्द्रियैः तत्तद्योग्यं कार्यं 'कृणोति' करोतीत्यर्थः । भाववोधे तु अणुभिः शृणोतीतिपाठमभिप्रेत्य ज्ञानकर्मकरणत्वलिङ्गादिति टीकावाक्येन 'अणुभिः शृणोति' इत्येतत्सर्वेन्द्रियोपलक्षणमित्युक्तं भवतीत्युक्तम । के तेऽणव इत्यतोऽणून् दर्शयति—प्राणा वा अणव इति । ते चाणवः 'प्राणाः' इन्द्रियाणीत्यर्थः । कुतोऽणवः प्राणा इत्यत आह—प्राणैरिति॥ 'हि' यस्मात् 'एतत्' पश्यतिकृणोतीत्याभ्यामुक्तं ज्ञानकर्माख्यकार्यं 'प्राणैः' इन्द्रियैरेव भवति तस्मादित्यर्थः ।

(३) अतो वक्ति—

सू—ॐ ॥ अणवश्च ॥ ॐ ॥ ८ ॥

'तद्यथा ह्यणुनश्चक्षुषः प्रकाशो व्यातत एवमेवास्य पुरुषस्य प्रकाशो व्याततोऽणुर्ह्येव पुरुषो भवति' इति शाण्डिल्यश्रुतिः ॥ ८ ॥

॥ इति अण्वधिकरणम् ॥ ५ ॥

॥ ६. श्रेष्ठाधिकरणम् ॥

(१) 'नैष प्राण उदेति नास्तमेत्येकल एव मध्ये स्थाता ।

---

(३) सिद्धान्तयन्सूत्रमवतारयति—अत इति ॥ सूत्रे चोऽवधारणे, समुच्चये च । प्राणा इत्यस्ति । तथा च प्राणाः स्वरूपतोऽणव एव । न चोक्तश्रुतियुक्तिविरोधः । अतो न केवलमणवः, किंतु प्रकाशतो व्यापाश्चेति सूत्रार्थः । अतिसुदृढार्थश्रुतिसिद्धे व्यातत्वे सति कुतोऽणुत्वं प्राणानां, तेजसा व्याप्तिश्चेत्यत आह—तद्यथेति । 'तत्' वक्ष्यमाणं निदर्शनं यथेत्यर्थः । 'अणुनः' स्वरूपेण 'चक्षुषः' चक्षुषः 'प्रकाशः' तेजो 'व्यातनः' व्याप्तं 'एवं' 'पुरुषस्य' जीवस्य प्रकाशो व्याप्तः । नन्वस्तु अणुत्वात् चक्षुषः प्रकाशव्याप्तिः । जीवस्य कुत इत्यतोऽन्याप्यणुत्वादित्याह—अणुरिति । 'हि' यस्मात् इति श्रुतिः चक्षुःपदोपलक्षितानां प्राणानामणुत्वं प्रकाशव्याप्तिं च वक्तीति शेषः । अतो न सूत्रकृदुक्तन्यूनभावः शङ्क्य इति वाक्यशेषः । यद्यप्यत्र श्रुतौ प्रकाशव्याप्तावेव चक्षुषः दृष्टान्तत्वं प्रतीयते, न तु जीवस्याणुत्वेऽपि । तथापि प्रकाशव्याप्तिसाधकाणुत्वस्य जीवेऽपि 'अणुर्ह्येषः' इत्यनेनोक्तत्वात्तदंशेऽपि दृष्टान्तत्वमभिप्रेतमिति भावः ।

॥ इति अण्वधिकरणम् ॥ ५ ॥

॥ ६. श्रेष्ठाधिकरणम् ॥

(१) अत्राधिकरणे मुख्यप्राणजन्मविषयश्रुतिविरोधः परिहियते । 'एतेन' इत्यधिकरणे बाह्यमुख्यवायूत्पत्तिविचारः कृतः । इह तु आध्या-

अथैनमाहुर्मध्यमः' इति मुख्यप्राणस्यानुत्पत्तिः श्रूयते ।

(२) यत्प्राप्तिर्यत्परित्याग उत्पत्तिर्मरणं तथा ।
तस्योत्पत्तिर्मृतिश्चैव कथं प्राणस्य युज्यते ॥

इति च युक्तिर्वायुप्रोक्ते । 'आत्मत एष प्राणो जायते' (प्र. ३-३.) इति च ।

त्मिकमुख्यवायूत्पत्तिविचार इति वा तत्र भूतप्रकरणत्वात् भूतमुख्यवायोः सम्मुग्धो विचारः । अत्र पुनः केवलो मुख्यविषय इति वा पूर्वस्मादस्य भेद इत्युक्तं तत्त्वप्रदीपे । मुख्यप्राण उत्पत्तिमान्न वेति सन्देहबीजं श्रुतिविरोधं दर्शयन् पूर्वपक्षं च दर्शयति—नेति ॥ 'एषः' मुख्यप्राणो 'नोदेति' नोत्पद्यते 'अस्तं' नाशं च 'नैति' नाप्नोति, किंत 'एकलः' प्रधानः एकप्रकारो वा 'मध्ये' जननमरणयोर्मध्यावस्थायां उदयास्तमययोर्मध्ये यौवने देहमध्ये वा स्यादित्यर्थः । अथवा 'एकल एव मध्ये स्याता' इति छान्दोग्यवाक्यव्याख्यानरूपेकलः प्रलये स्यादिति भाष्योक्तदिशा 'मध्ये' स्थितिसृष्टिकालमध्ये प्रलय इत्यर्थः । यस्मादेवं 'अथ' तस्मान्मध्यावस्थां गतत्वात् 'एनं' मुख्यप्राणं मध्यम इत्याहुर्विद्वांस इत्यर्थः । इतीति । इति श्रुतावित्यर्थः । 'श्रूयते' उच्यते । अनेन मुख्यप्राणो नोत्पत्तिमानिति पूर्वः पक्षः सूचितो भवति ।

(२) तन्वनुत्पत्तिश्रुतेः मुख्यवाय्वनुत्पत्तिश्रुतिवत् स्वरूपानुत्पत्तिपरतया सावकाशत्वान्नोत्पत्तिश्रुत्यपेक्षया प्राबल्यमिति नैतद्बाधकत्वमित्यतः प्राबल्यहेतुभूतां युक्तिं प्रमाणोक्तया दर्शयति—यदिति ॥ यस्य यद्देहप्राप्तिः यद्देहसंयोगः सा तज्जीवस्य उत्पत्तिः तत्कारणं, तथा यद्देहपरित्यागः सैव तद्देहिनो मृतिः तत्कारणम् । यद्वा —यस्य देहप्राप्तिः संयोगः अखिलोत्पत्तिः, यस्य परित्यागः सर्वेषां मरणं तस्याखिलजीवोत्पत्तिमरणकारणस्य मुख्यप्राणस्य उत्पत्तिर्मरणं च कथं युज्यते, न कथमपीत्यर्थः । दुःखहेतवे स्वजननाय स्वप्रवृत्त्ययोगादिति भावः । अनेन मुख्यप्राणस्यानुत्पत्तावखिलोत्पत्तिमरणकारणत्वादिति युक्तिरुपन्यस्ता भवति । उत्पत्तिश्रुतिं दर्शयति—आत्मत इति । 'एषः' मुख्यप्राणः परमात्मनो जायत इति षट्प्रश्नश्रुत्यर्थः ।

(३) अत आह—

सू—ॐ ॥ श्रेष्ठश्च ॥ ॐ ॥ ९ ॥

'सौक्ष्म्येण ह वा एषोऽवतिष्ठते स्थूलत्वेनोदेति सूक्ष्मश्चाथो स्थूलश्च। प्रकृतितः सूक्ष्मोऽन्यतः स्थूलोऽथैनमाहुः सादिरनादिरिति' गौपवनश्रुतेः ॥ ९ ॥

(४) सू—ॐ ॥ न वायुक्रिये पृथगुपदेशात् ॥ॐ॥१०॥

---

(३) सिद्धान्तयन्सूत्रमवतारयति—अत इति ॥ सूत्रे चः समुच्चये। तथाच यथेतरे प्राणाः परमात्मन उत्पद्यन्ते तथा प्राणेषु 'श्रेष्ठो' मुख्यप्राणोऽपि परमात्मन उत्पद्यत इत्यर्थः। तत्त्वप्रदीपे तु उत्पद्यतेऽनुत्पद्यते चेति चशब्दार्थ उक्तः। ननु कुतो मुख्यप्राणस्योत्पत्तिः। तदङ्गीकारे अनादित्वश्रुतिविरोध इत्यत आह—सौक्ष्म्येणेति। सूक्ष्मरूपेणेत्यर्थः। हेत्यास्वादने, प्रसिद्धौ वा। वैशब्दोऽवधारणे। 'एषः' मुख्यप्राणः 'अवतिष्ठते' सर्वदा तिष्ठति। 'स्थूलत्वेन' स्थूलभावेन तद्रूपेण 'उदेति' कदाचिदुत्पद्यते 'अथो' तस्मात् सूक्ष्मभावेन सर्वदा स्थितत्वात् स्थूलरूपेण कदाचित् उदितत्वाच्चासौ प्राणः सूक्ष्मः स्थूलश्चेत्युच्यते। परमात्मसमुच्चयौ चौ। ननु स्थूलादिभावस्य स्वरूपत्वात्कथं तस्योत्पत्त्यादीत्यत उक्तम्—प्रकृतित इति। स्वभावत इत्यर्थः। 'अन्यतः' शरीरादितः। तथाच स्थौल्यादिकं न स्वरूपमिति भावः। यद्यप्यस्येतरजीवसाधारण्यान्न विशेषत्वम्। तथापि शरीरादिष्वेवायं स्थूलो, न त्वितरजीवानामिव चैतन्ये। तदभिमानकृतक्रियाविशेषवानिति भवति विशेषः। 'अथ' तस्मात्स्वरूपेणानुत्पत्तिमत्त्वात्स्थूलरूपेणोत्पत्तिमत्त्वाच्च 'एनं' मुख्यं सादिरनादिरित्याहुर्विद्वांस इत्यर्थः। श्रुतेरित्यस्य श्रेष्ठश्चोत्पद्यते अनुत्पद्यते चेति गम्यत इति सूत्रेणान्वयः।

(४) ननु प्राणानुत्पत्तिश्रुतिः सयुक्तिकत्वेन प्रबला, अतः कथमुत्पत्तिश्रुतिमात्रानुसारेणान्यथा व्याख्यायते। अपि तु उत्पत्तिश्रुतिरेव चेष्टावाह्यवायुविषयतया व्याख्यातव्या। तयोरपि 'चेष्टायाम्' इति वाक्ये प्राणशब्दवाच्यत्वोक्तेरेतयोरनुत्पत्तिवचनाभावेन उत्पत्त्यङ्गीकारे विरोधा-

चेष्टायां वाह्यवायौ च मुख्यप्राणे च गीयते ।
प्राणशब्दस्त्रिषु ह्येषु मुख्ये मुख्यः प्रकीर्तितः ।
इति वायुक्रिययोरपि व्यपदेशादुत्पत्तिश्रुतिस्तयोर्नस्यात् ।
(५) 'स प्राणमसृजत .... खं वायुर्ज्योतिरापः .... तपो मन्त्राः

भावात् इत्याशङ्कां परिहरत्सूत्रमुपन्यस्य व्याचष्टे—नेति ॥ चेष्टा स्पन्दनम्। बाह्यो भूतवायुः। चौ परस्परसमुच्चये। 'गीयते' प्रयुज्यते एषु त्रिषु मध्ये 'मुख्ये' मुख्यप्राणे 'मणिर्मुख्यं प्रधानश्चेत्युत्तमस्य वचो भवेत्' इत्यभिधानात् 'मुख्यः' मुख्यवृत्तिमान् प्रकीर्तितो वृद्धैरित्यर्थः। इति व्यपदेशादित्यन्वयः। प्राणशब्दस्येति शेषः। तथाच प्राणशब्दस्य 'चेष्टायाम्' इति वाक्ये वायुक्रिययोरपि 'व्यपदेशात्' वृत्त्युक्तेः 'उत्पत्तिश्रुतिः' 'प्राणोऽजायत' इत्युत्पत्तिवाक्यं 'तयोरुत्पत्तिश्रुतिः स्यात्' तयोरुत्पत्तिवादिनी स्यादिति नोपपद्यते इति योजना। अनेन वायुक्रिये इति साध्यांशो व्याख्यातः।

(५) कृतो नेत्यतस्तत्र हेतुतया पृथगुपदेशादित्येतद्योजयति स इति ॥ अत्र 'उपदेशात्' 'आत्मतः' इति वाक्यापेक्षया अव्यवहितात् 'स प्राण मसृजत' इति स्पष्टवाक्यादिति प्रथमं योज्यम्। अत्रापि चेष्टादिकं वाच्यं किं न स्यादित्याशङ्कायां तत्र हेतुत्वेन पृथगुपदेशादिति समग्रं योजनीयम्, तथाच इति षट्प्रश्नश्रुतौ स प्राणमित्युक्तात् प्राणाद्वायुकर्मणोः पृथगभिधानादित्यन्वयः। तथाच 'सः' इति श्रुतेरपि वायुक्रियोत्पत्तिपरत्वे पुनः वायुः कर्म चेति वायुचेष्टयोः पृथगुत्पत्त्यभिधानं पुनरुक्तं स्यात्, अतो न तस्यास्तद्विषयत्वमितिभावः।

स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियम्।
मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम च ॥

इति मन्त्रस्यायमर्थः—'सः' प्रकृतः परमपुरुषो भगवान् पुरुषं 'प्राणं' जीवकलाभिमानिनमसृजत्। 'प्राणाच्छ्रद्धां' प्राणं निमित्तीकृत्य जीवस्यास्तिक्यनिष्ठां भारतीमसृजत्। ततश्च 'खं' आकाशं वायुः 'ज्योतिः' तेज आपः पृथिवी इत्येतानि शरीरोपादानभूतानि पञ्चभूतान्यसृजत्। ततः 'इन्द्रियं' जीवस्य प्रवृत्त्युपकरणानि चक्षुरादीन्द्रियाणि प्रधानकरणं मनः

कर्म' (प्र. ६-४.) इति पृथगुपदेशात् ।

(६) भूतानि चेष्टामन्त्राश्च मुख्यप्राणादिदं जगत् ।
मुख्यप्राणः परस्माच्च न परः कारणान्वितः ॥
इति वायुप्रोक्ते ॥ १० ॥

॥ इति श्रेष्ठाधिकरणम् ॥ ६ ॥

तत्स्थितिकारणमन्नं चासृजत्। तस्मादन्नं निमित्तीकृत्य शरीरहेतुभूतं 'रीर्यं' रेतोऽसृजत्। ततो जीवस्य ज्ञानादिहेतुतया सुखसाधनं तपोऽसृजत्। ततो 'मन्त्राः' जीवस्य साक्षात् ज्ञानादिहेतवो ये ऋगाद्याः तानसृजत्। यच्च सुखादिनिमित्तं पुण्यापुण्यलक्षणं कर्म तच्चासृजत्। 'लोकाः' गोळकाः इन्द्रियाश्रयभूतास्तान्, लोकेषु सृष्टेषु सत्सु तं निमित्तीकृत्य देवदत्तादिनाम चासृजदिति। अत्र प्राणादिशब्दाः षोडशकलावाचिनः तत्तत्कलाभिमानिमुख्यप्राणादिवाचिनश्चेति।

विष्णोः प्राणस्ततः श्रद्धा तस्या रुद्रो मनोभिधः।
ततस्त्विन्द्रस्त्विन्द्रियात्मा तस्य सोमोऽन्नदेवता ॥

इति षट्प्रश्नभाष्ये स्पष्टम्। पूर्वपूर्वोत्पन्नकलाः उत्तरोत्तरकलोत्पत्तौ निमित्तभूता इत्येतदपि तत एव ज्ञातव्यम्।

(६) न केवलमर्थापत्त्यैव प्राणादिशब्दा भिन्नार्थाः, किंतु स्मृत्याऽपीत्यभिप्रेत्य श्रुत्यर्थनिर्णयात्मिकां स्मृतिं चाह—भूतानीति ॥ 'खं वायुः पृथिवी' इत्यन्तस्यार्थो—भूतानीति। कर्मेत्यस्य—चेष्टेति। एवमादीति शेषः। 'स प्राणमसृजत' इत्यस्य व्याख्यानं—मुख्यप्राणः 'परस्मात्' पराद्विष्णोरिति। आर्षस्स्मादादेशः। इति वायुप्रोक्ते इत्यस्य पृथगुपदेशादित्यनेनान्वयः। प्राणादिशब्दानां भिन्नार्थत्वोक्तेरिति तदर्थः। अत्र 'स प्राणमसृजत, मुख्यप्राणः परस्मात्' इति श्रुतिस्मृतिभ्यां पूर्वपक्ष्युक्तयुक्तिविरोधोऽपि परिहृतः। ननु श्रुतिस्मृतिभ्यां मुख्यप्राणस्य विष्णुजातत्वाभिधानेऽपि कथं युक्तिविरोधपरिहार इत्याशङ्क्य 'न परः कारणान्वितः' कारणजन्य इति स्मृत्यंशेन परिहृता। 'यत्प्राप्तिः' इत्याद्युक्तमाहात्म्यवतोऽपि मुख्यप्राणस्य स्वापेक्षया कारणाजन्यत्वादिरूपातिमाहात्म्योपेत-

॥ ७. चक्षुरादयधिकरणम् ॥

(१) 'प्राणादिदमाविरासीत्प्राणो धत्ते प्राणे लयमभ्युपैति न प्राणः किञ्चिदाश्रितः' इत्याग्निवेश्यश्रुतौ ।

(२) यदाश्रयादस्य चेष्टा सोऽन्यं कथमुपाश्रयेत् ।
यथा प्राणस्तथा राजा सर्वस्यैकाश्रयो भवेत् ॥
इति च युक्तिर्भारते ।

विष्णूत्पन्नत्वोपपत्तेः । तथाच मुख्यप्राणस्याखिलोत्पादकत्वं स्वनियम्यसर्वोत्पादकत्वे पर्यवस्यतीति न युक्तिविरोध इति भावः ।

॥ इति श्रेष्ठाधिकरणम् ॥ ६ ॥

॥ ७. चक्षुरादयधिकरणम् ॥

(१) अत्राधिकरणे मुख्यप्राणस्वातन्त्र्यास्वातन्त्र्यश्रुतिविरोधः परिह्रियते । मुख्यप्राणः स्वतन्त्रः परतन्त्रो वेति सन्देहबीजं श्रुतिविरोधं दर्शयन् पूर्वपक्षं च सूचयति—प्राणादिति ॥ 'प्राणात्' मुख्यात् 'इदं' प्राणव्यक्तिरिक्तं जगत् 'आविरासीत्' अजायत । इदमित्येतत् धत्ते एतीत्यत्रापि सम्बध्यते । श्रुताविति यन्तरं प्राणस्य स्वातन्त्र्यं प्रतीयत इति शेषः । न किञ्चिदाश्रित इत्यनेनानन्याश्रयत्वरूपस्वातन्त्र्यहेतूक्तेरिति भावः । अनेन मुख्यप्राणः स्वतन्त्र एव, तथा श्रुतेरिति सयुक्तिकपूर्वपक्षः सूचितः ।

(२) स्वातन्त्र्यश्रुतेरितरश्रुत्या सत्प्रतिपक्षितत्वशङ्कावारणाय युक्तिसाहित्येन प्राबल्यं स्मृत्या दर्शयति—यदिति ॥ 'अस्य' जगतः 'सः' प्राणः अन्यं कथमुपाश्रयेदित्यनन्तरं तस्मात्सकलजगच्चेष्टकत्वादत एवानन्याश्रयत्वात्प्राणः स्वातन्त्र्येण सर्वाश्रय इति वाक्यशेषः । अत एवाखिलजगच्चेष्टकत्वेन सिद्धानन्याश्रयत्वरूपयुक्तियुक्ततयेति टीकार्थो द्रष्टव्यः । अस्य दृष्टान्तत्वेनोपादानाच्चैतत्सिद्धमित्याह—यथेति । 'एकाश्रयो' मुख्याश्रयः, भवेदिति प्रार्थनायां लिङ् । तथाचात्र राज्ञः स्वातन्त्र्येण सर्वाश्रयत्वे मुख्यप्राणस्य दृष्टान्तीकरणात् सिद्धस्यैव दृष्टान्तत्वादिति । अनेन लिङ्गेन प्राणस्य स्वातन्त्र्येण सर्वाश्रयत्वं सिद्धमिति भावः । यथा राजा सर्व-

(३) प्राणस्यैतद्वशे सर्वं प्राणः परवशे स्थितः ।
न परः किञ्चिदाश्रित्य वर्तते परमो यतः ॥
इति पैङ्गिश्रुतिः ।

(४) अत आह—

सू—ॐ ॥ चक्षुरादिवत्तु तत्सह शिष्ट्यादिभ्यः ॥ ॐ ॥ ११ ॥

चक्षुरादिवन्मुख्यप्राणोऽपि परमात्मवश एव । 'सर्वं ह्येवैतत्पर-

---

स्यैकाश्रयः तथा प्राणः सर्वस्यैकाश्रयः इति भाष्ययोजना तु शेषकरणटीका-विरुद्धा । युक्तिश्चेति सम्बन्धः । न केवलं श्रुतिरिति चार्थः । भारते उक्तोऽस्तीति शेषः ।

(३) पारतन्त्र्ये श्रुतिमुदाहरति — प्राणस्येति ॥ 'एतत्' सर्वं जगत्प्राणस्य मुख्यस्य वशेऽस्तीत्यर्थः । 'परः' परमात्मा 'न परः किञ्चिदाश्रितः' इत्यनेन तस्य स्वातन्त्र्यमाह । 'श्रुतिः' प्राणस्य पारतन्त्र्यं वक्तीति शेषः ।

(४) सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ अपिशब्दो यथेतरे प्राणास्तथा मुख्यप्राणोऽपीति समुच्चये । मुख्यप्राण इत्यनेन सूत्रे श्रेष्ठ-पदानुवृत्तिः सूचिता । परमात्मवश इत्यनेन दृष्टान्तोक्तया लब्धः साध्यभागो दर्शितः । एवेत्यनेन तुशब्दोऽवधारणेऽपीति सूचितम् । परमात्मवश इत्यावर्तते । तद्वशत्वेन शासनादित्यप्यावर्तते । तथाचेत्थं भाष्ययोजना— मुख्यप्राणोऽपि 'परमात्मवशः' तदधीन एव, न तु स्वतन्त्रः । कुतः ? 'तद्वशत्वेन शासनात्' 'प्राणः परवशे स्थितः' इति तस्य तद्वशत्वेन श्रुत्युक्तत्वात् । न चोत्पत्तावित्र पारतन्त्र्येऽपि काचन व्यवस्था, अपि तु चक्षुरादिवदेव सर्वात्मना । कुतः ? 'सर्वं ह्येतत्परमेऽवतिष्ठते' इति श्रुतौ चक्षुरादिभिः सह तद्वशत्वेन परमात्माधीनत्वेन प्रकारेण 'शासनात्' प्रतिपादनादिति । अनेन तस्यां तैस्सह तेन प्रकारेण तस्य शासनादिति तच्छब्दो बहुधा व्याख्यातः । तद्वशत्वेनैवेत्यनेन तुशब्दार्थावधारणस्य तच्छब्दितप्रकारेणाप्यन्वयः सूचितः । सूत्रे शिष्टीति शासुधातोरुपादाना-

मेऽयनिष्ठते प्राणश्च प्राणाश्च प्राणिनश्च । स ह्येक एवैतान्नयत्युभयति वशीकरोति' इति गौपवनश्रुतौ चक्षुरादिभिः सह तद्वशत्वेनैव शासनात् ॥

(५) सर्वकर्ताऽपि मन्प्राणः परमाधारतस्थितः ।
कथमेवान्यथा स स्याद्यतो नैवेश्वरद्वयम् ॥

द्धाप्येऽपि शासनादिति स एव गृहीतः । श्रुत्युक्तत्वादिति टीकानुसाराच्छंसनादिति पाठः स्वरसः । तथात्वे धातोरर्थान्तरोक्तिः । अनेन—श्रेष्ठोऽपि परवश एव, कुतः ? 'तच्छ्रेष्ठः' 'प्राणः परवशे स्थितः' इति तथा श्रुतेः । ननु प्राणस्योत्पत्तौ प्रकृतितः सूक्ष्मो देहतः स्थूल इति यथा व्यवस्था, एवं पारतन्त्र्येऽपि न स्वभावोपाधिकृतव्यवस्था, अपि तु चक्षुरादिवत्सर्वात्मनैव । कुतः ? 'तत्सहशिष्ट्यादिभ्यः' तस्यां 'सर्वम्' इति श्रुतौ तस्य श्रेष्ठस्य तैश्चक्षुर्घ्राणादिभिस्सह तेन परवशत्वेनैव प्रकारेण शिष्टेरुक्तत्वादिति सूत्रार्थ उक्तो भवति । श्रुत्यर्थस्तु सर्वमेतज्जगत् 'परमे' परमात्मन्यवतिष्ठते 'हि' प्रसिद्धम् । किं तत्सर्वमित्यतो विवृणोति—'प्राणो' मुख्यप्राणः 'प्राणाः' इतरेन्द्रियाणि 'प्राणिनो' जीवा इति । चशब्दाः मिथः समुच्चये । अत्र हेतुमाह—स ह्येति । 'हि' यस्मात् 'सः' परमात्मा 'एक एव' स्वतन्त्र एव 'एतान्' प्राणादीन् 'नयति' जन्मादिकं प्रापयति 'उन्नयति' ऊर्ध्वं नयति मोचयतीति यावत् । 'वशीकरोति' स्ववशवर्तिनः करोतीति ।

(५) ननु प्राणस्वातन्त्र्येऽखिलचेष्टकत्वयुक्तियुक्तायाः 'न प्राणः किञ्चिदाश्रितः' इति श्रुतेः सद्भावात् 'प्राणः परवशे स्थितः' 'सर्वं ह्येतत्' इति श्रुतिमात्रेण न पारतन्त्र्यनिर्णय इत्यत आह—सर्वेति ॥ अपिर्यद्यपीत्यार्थे, विशेषणसमुच्चये वा । 'परमाधारतः' परमात्माधारकत्वेन स्थितः । तथा च स्वभिन्नसर्वचेष्टकत्वाभ्युपगमान्न युक्तिविरोध इति भावः । तर्हि 'प्राणादिदमाविरासीत्प्राणो धत्ते' इति सर्वेश्वरत्वापरपर्यायसर्वकर्तृत्वश्रुत्या 'न प्राणः किञ्चिदाश्रितः' इत्यनन्याश्रयत्वश्रुत्या च विरोध इत्यत आह—कथमिति । 'अन्यथा' परमात्माधारत्वं विना 'सः' मुख्यप्राणः कथमेव स्वतन्त्रस्स्यात्, न कथंचित् । कुतः ? यतो मुख्यप्राणस्वातन्त्र्याङ्गीकारे

(६) अवान्तरेश्वरत्वेन तस्येश्वरवचो भवेत् ।
अतो मध्यमतामाहुस्तस्य वेदेषु वेदिनः ॥
(७) अनन्येश्वरता प्राणे तदन्येश्वरवर्जना ।
यतो विशेषवाक्येन ह्रियते समतावचः ॥
(८) 'नान्योऽतोऽस्ति द्रष्टा' (बृ. ५-७-२३.) 'नान्यदतोऽस्ति

'सर्वं ह्येतत्परमेऽवनिष्टते' इति श्रुत्युक्तभगवन्मात्रतत्त्वस्य ह्रातुमशक्यत्वेन ईश्वरद्वयमङ्गीकार्यम्, तच्चानुपपन्नम्, अन्योन्यानुरोधानुरोधयोः सर्वैश्वर्यहानेः, अतः। तथाच ईश्वरद्वयानुपपत्तिरूपयुक्तिविरोधात् सर्वेश्वरत्वानन्येश्वरत्वश्रुतिर्बाध्यत इति भावः।

(६) ननु श्रुतेर्बोधायोगात् अर्थान्तरं वक्तव्यम्, स क इत्यत आह—अवान्तरेति॥ मध्यमेश्वरत्वरूपवाक्येन निमित्तेनेत्यर्थः। 'तस्य' मुख्यप्राणस्य 'ईश्वरवचः' ईश्वरत्वबोधकं 'प्राणो भवति' इत्यादिसर्वकर्तृत्ववचनम्। ननु मुख्येश्वरत्वमेव तदर्थः किं न स्यादित्यत आह—अत इति। अवान्तरेश्वरत्वादेव 'तस्य' मुख्यस्य 'वेदिनो' ज्ञानिनः वृद्धाः 'वेदेषु' 'मध्यमः प्राणो' 'मध्ये स्थाता' इत्यादिरूपेषु 'मध्यमतां' प्राहुरित्यर्थः। अन्यथा तन्न स्यादिति भावः।

(७) एवमीश्वरश्रुतेर्गतिमुक्त्वा अनन्येश्वरत्वश्रुतेरपि गतिमाह—अनन्येति॥ 'तदन्येश्वरवर्जना' भगवद्व्यतिरिक्तेश्वरराहित्यमेव अनन्येश्वरता। तथाच 'न प्राणः किञ्चिदाश्रितः' इत्यनन्याश्रयताऽपरपर्यायानन्येश्वरतावोधकवाक्यस्य प्राणो भगवद्व्यतिरिक्तं किञ्चिन्नाश्रित इत्यर्थ इति भावः। तदन्येश्वरवर्जनादिति पञ्चम्यन्तपाठेऽप्ययमेवार्थः। न केवलं यतो नेत्युक्तेश्वरद्वयानुपपत्तिरूपयुक्तिविरोधात् 'प्राणादिदमाविरासीत्' इति श्रुतेः अन्यार्थता, किंतु विशेषश्रुतेरपीत्याह—यत इति। 'विशेषवाक्येन' 'प्राणस्यैतद्वशे सर्वम्' इति विशेषवाक्येन च 'समतावचः' समतया साधारण्येन युक्तं वचः, स्वार्थे तल्वा, साधारणवचनं 'प्राणात्' इत्येतत् 'ह्रियते' अवान्तरेश्वरत्वाद्यर्थान्तरपरतया नीयत इत्यर्थः। इति यतोऽत उक्त एवार्थ इति शेषः।

(८) इदानीं सहशासनरूपवाक्यापेक्षया भिन्नं सौत्रादिशब्दगृहीत-

द्रष्टृ' (बृ. ५-८-११.) इत्यादिवचनयुक्तयश्चादिशब्दोक्ताः ॥ ११ ॥

(९) सू—ॐ॥ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ ॐ ॥ १२ ॥

इतरेषां प्राणानां करणत्वान्मुख्यस्याकरणत्वाच्च तस्यान्येभ्य उत्तमत्वं युज्यते ।

(१०) माण्डव्यश्रुतिश्च 'तानि ह वा एतानि सर्वाणि करणान्यथ प्राण

मुदाहरति—नेति ॥ अत्र वाक्यद्वये 'अतः' भगवत्सकाशादन्यः स्वातन्त्र्येण द्रष्टा नास्तीति भगवदितरस्य स्वातन्त्र्येण द्रष्टृत्वाभाव उच्यते इत्यस्य प्रकृतोपयोगिता । वचनेति वचनानि च युक्तयश्च वचनयुक्तयः, वचनोक्ता युक्तय इति वा । 'यतः' इत्यनेन ईश्वरद्वयायोगादिति युक्तेः, 'अतो मध्यमतामाहुः' इत्यनेन मध्यमत्वादियुक्तेः, द्वितीयेन 'यतः' इत्यनेन सामान्यवाक्यस्य विशेषवाक्यबलेन नेयत्वादिति युक्तेः, 'नान्यः' इत्यादिनाऽन्यस्य स्वातन्त्र्येण द्रष्टृत्वादेरभावादिति युक्तेश्च उक्तत्वादिति भावः ।

(९) ननु यदि चक्षुरादिवदेवेश्वराधीनत्वं मुख्यप्राणस्य तर्हि तद्वदेव तस्यावान्तरेश्वरत्वाद्यसम्भवेन 'न प्राणः किञ्चिदाश्रितः' इति स्वातन्त्र्यश्रुतिर्व्यर्था स्यादित्याशङ्क्य परिहरत्सूत्रमुपन्यस्य व्याचष्टे—अकरणत्वादिति ॥ करणत्वादित्यनेन चशब्दश्चक्षुरादीनां करणत्वसमुच्चयार्थ इति सूचितम् । 'मुख्यस्य' प्राणस्येत्यनेन श्रेष्ठ इत्यस्य विपरिणामेनानुवृत्तिः सूचिता । 'तस्य' मुख्यस्य 'अन्येभ्यः' इन्द्रियेभ्य 'उत्तमत्वं' अतिशयः । यद्यपि चक्षुरादीनां मुख्यस्य चेश्वरवशत्वसाम्यात्तेषां कर्तृप्रयोज्यत्वरूपं करणत्वं मुख्यप्राणस्य तदप्रयोज्यत्वरूपमकरणत्वमित्येतद्वैलक्षण्यं नोपपद्यते । तथापि सुप्त्यादौ व्यापाराभावाभावरूपयुक्त्या 'तानि ह वा' इति श्रुत्याचैतद्वैलक्षण्यं सिद्ध्यतीति नानुपपत्तिः । युज्यत इत्यनन्तरमनो न वैयर्थ्याख्यदोष इति वाक्यशेषः । हेत्वसिद्धिपरिहाराय—तथाहीत्युक्तम् ।

(१०) तत्सूचितश्रुतिमुदाहर्तुं प्रतिजानीते—माण्डव्येति ॥ माण्डव्यानां

एवाकरणस्तस्मान्मुख्यस्तस्मान्मुख्य इत्याचक्षते ' इति ॥ १२ ॥

॥ इति चक्षुराद्यधिकरणम् ॥ ७ ॥

॥ ८. पञ्चवृत्त्यधिकरणम् ॥

(१) ' सर्वे वा एते मुख्यदासाः प्राणोऽपानो व्यान उदानः समान इत्यथ प्राणो वाव सम्राट् ' इति कौण्डिन्यश्रुतिः ।

(२) प्राणापानादयस्सर्वे मुख्यदासा यतोऽनिशम् ।

श्रुतिरत्रार्थे प्रमाणत्वेन भवतीत्यर्थः । न केवलं सूत्रोक्तिरिति चार्थः । तां श्रुतिं पठति—तानीति । ' तान्येतानि ' चक्षुरादीनि । सङ्कोचशङ्का-वारणाय—सर्वाणीति । ' करणानि ' कर्तृप्रयोज्यानि इति यतः ' अथ ' तस्मान्मुख्यप्राण एक एव ' अकरणः ' कर्त्रप्रयोज्यः ' तस्मान्मुख्यः ' तस्मा-न्मुख्यत्वादेनं प्राणं मुख्य इत्याचक्षते विद्वांस इत्यर्थः । इति माण्डव्यश्रुति-रित्यन्वयः । अनेन—'हि' यस्मात् ' तथा ' अकरणत्वादिप्रकारेण श्रुतिरेनं मुख्यं चक्षुरादींश्च 'दर्शयति' प्रतिपादयति । तस्मान्मुख्यस्याकरणत्वाच्चक्षु-रादीनां च करणत्वात्तस्माद्विलक्षणत्वात्तस्येतरेभ्योऽनिशयो युक्तो । अत एवमतो न श्रुतिवैयर्थ्याख्यो दोष इति सूत्रार्थ उक्तो भवति ।

॥ इति चक्षुराद्यधिकरणम् ॥ ७ ॥

॥ ८. पञ्चवृत्त्यधिकरणम् ॥

(१) अत्र प्राणापानादेर्मुख्यप्राणस्वरूपत्वतद्दासत्वविषये श्रुतिविरोधः परिह्रियते । सन्देहबीजं श्रुतिविगानं दर्शयन् पूर्वपक्षं च सूचयति सर्वे इति ॥ वैशब्दः प्रसिद्धौ । एत इत्येतद्विवृणोति—प्राण इति । इत्येत इत्यन्वयः । ' अथ ' तस्मात् ' प्राणो ' मुख्यः ' सम्राट् ' सर्वेश्वरत्वेन प्रकाशमानः । श्रुतिरिति । दासत्वं वक्तीति शेषः ।

(२) न चास्याः स्वरूपत्वश्रुतिविरोधो युक्तियुक्तत्वादित्याशयेन तां युक्तिं स्मृत्या दर्शयति—प्राणेति ॥ यतः सर्वे प्राणापानादयोऽनिशं मुख्यस्य प्राणस्य दासाः, अत एव तदाज्ञया नित्यं स्वानि कर्माणि कुर्वन्तीत्यर्थः । प्राणादीनां कर्माणि

अतस्मदाज्ञया नित्यं स्वानि कर्माणि कुर्वते ॥

इति युक्तिर्वायुप्रोक्ते ।

(३) मुख्यस्यैव स्वरूपाणि प्राणाद्याः पञ्च वायवः ।

स एव प्राणिनां देहे पञ्चधा वर्तनेऽनिशम् ॥

इति गौपवनश्रुतिः ॥

(४) अतो वक्ति—

सू—ॐ ॥ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ॐ॥१३॥

यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः । ( )

ऊर्ध्वं प्राण उन्नयत्यपानं प्रत्यगस्यति (कठ. ५-३.) ॥

इत्यादिश्रुतिषु,

प्राणः प्रवृत्तिहेतुः स्यादपानः तन्निवर्तने ।

वनकर्मा तथा व्यानः उदानो योगकर्मकृत् ॥

देहेन्द्रियमनोनेता समानोऽन्तस्स्थितिप्रदः ॥

इति बृहद्भाष्योदाहृतस्मृतौ चोक्तानि । इतीति । एवं वायुप्रोक्ताख्यग्रन्थवचने उक्तमित्यर्थः । अनेन प्राणादयो मुख्यदासास्तदाज्ञया कर्मकारित्वादिति सप्रतिज्ञा युक्तिरुक्ता भवति ।

(३) एवं दासत्वे श्रुतिमभिधाय प्राणादीनां मुख्यस्वरूपत्वेऽपि श्रुतिमुदाहरति—मुख्यस्यैवेति ॥ 'स एव' मुख्य एव । अत्र मुख्यस्य स्वरूपाण्येव, स एवेतिद्विरवधारणेन स्वरूपत्वे तात्पर्यमुक्तम् । तेन स्वरूपत्वे श्रुतेरपि प्राबल्यं सिद्ध्यति । अनेन श्रुतिद्वयस्यापि समानबलत्वेन विरुद्धत्वाच्चानिर्णायकत्वादप्रामाण्यमिति पूर्वपक्षः सूचितो भवति ।

(४) अथ सिद्धान्तयत्सूत्रमवतार्य, तस्य प्राणादयः पञ्च न केवलं मुख्यदासा एव, किंतु तद्वृत्तयोऽपि मुख्यप्राणस्वरूपभूताश्च । कुत एतत् ? यस्मात् 'अथ' इति श्रुतौ श्रेष्ठो मनोवत् पञ्चवृत्तिर्व्यपदिश्यते, तस्मात् । यद्वा—श्रेष्ठः 'पञ्चवृत्तिश्च' पञ्चदासवान् पञ्चवृत्तिमांश्च, कुतः ? यतो 'मनोवत्' मनोदृष्टान्तेन पञ्चवृत्तिर्व्यपदिश्यते, अत इत्यध्याहारविपरिणामानुषङ्गपदभेदैस्तं विना वा स्पष्टार्थत्वात्तदुपात्तश्रुतिमेवोदाहरति—

अथ पञ्चवृत्त्यैतत्प्रवर्तते । प्राणो वाव पञ्चवृत्तिः । प्राणोऽपानो व्यान उदानः समान इति । तेभ्यो वा एतेभ्यः पञ्च दासाः प्रजायन्ते । प्राणाद्वाव प्राणोऽपानादपानो व्यानाद्व्यान उदानादुदानः समानात्समानः ।

(५) यथा ह वै मनः पञ्चधा व्यपदिश्यते मनो बुद्धिरहङ्कारश्चित्तं चेतनेति । तेभ्यो वा एतेभ्यः पञ्च दासाः प्रजायन्ते । मनसो

अत इति ॥ अथेतिश्रुतौ प्रमेयान्तरारम्भेऽथशब्दः । 'पञ्चवृत्त्या' पञ्चवृत्तिना 'एतत्' शरीरम् । कः पञ्चवृत्तिरित्याह—प्राण इति । वावेति निपातसमुदायः । प्रसिद्धौ । पञ्च वृत्तयः स्वरूपाणि यस्य स तथोक्तः । कास्ताः पञ्चवृत्तय इत्यत आह—प्राण इत्यादि । इति पञ्चवृत्तिरित्यन्वयः । अत्र प्राणादिशब्दाः देवतापराः, न तु जडपराः 'तेभ्यो वा एतेभ्यः पञ्चदासाः प्रजायन्ते' इत्युत्तरवाक्यविरोधात् । एवं स्वरूपाण्यभिधाय दासानाह—तेभ्य इति । श्रुतिप्रसिद्धेभ्यः शरीरगतेभ्यश्चेत्यर्थः । पञ्चानां दासत्वोपपादनाय प्राणादिजन्यत्वमुक्तम् । कस्मात् कस्य जन्मेत्यतस्तद्विवृणोति—प्राणादिति ।

(५) एवं दार्ष्टान्तिकार्थकश्रुत्यंशमुदाहृत्येदानीं मनोवदिति दृष्टान्तं विवृण्वन् श्रुत्यंशमुदाहरति—यथेति । हेत्यास्वादने । प्रसिद्धौ वैशब्दः । सङ्कल्पविकल्पात्मकं मनः । करिष्ये यक्ष्ये इत्यादिक्रियाहेतुभूतः कामः सङ्कल्पः । स एव नानार्थविषयो विकल्पः । निश्चयरूपा बुद्धिः । अस्वरूपे स्वातन्त्र्याद्यस्वधर्मे स्वरूपत्वमतिः स्वधर्मत्वबुद्धिः अहङ्कारोऽभिमानः इति तत्त्वप्रदीपोक्तेः । स्मरणहेतुश्चित्तम् । चेतसः स्मरणस्य व्याप्तिर्वस्तुविषयकत्वं तदनुकूलशक्तिश्चेतना ।

चित्तिर्बुद्धिरिति ज्ञेया चित्तं तु स्मृतिकारणम् ।
बहुस्मरणशक्तिस्तु चेतनेत्यभिधीयते ॥

इति वचनात् । अत्र मनस इति शेषः । इति पञ्चधेत्यन्वयः । उपादानोपादेयैक्यविवक्षया सङ्कल्पविकल्परूपं मन इत्याद्युक्तिः । अत एवैतरेयभाष्ये सङ्कल्पविकल्पयोर्हृदयमनोरूपत्वमुक्तम् । अत्रापि मनआदिशब्दैर्देवता

वाव मनो वुद्धेर्वुद्धिरहङ्कारादहङ्कारश्चित्ताच्चित्तं चेतनाया एव चेतनैवमिति' इति ॥ १३ ॥

॥ इति पञ्चवृत्त्यधिकरणम् ॥ ८ ॥

॥ ९. अण्वधिकरणम् ॥

(१) 'प्राण एवाधस्तात्प्राण उपरिष्टात्प्राणो मध्यतः प्राणस्सर्वतः प्राण

उच्यन्ते। उत्तरवाक्ये दासत्वोक्तेः टीकायां जडलक्षणोक्तावपि तदभिमानितया चेतनानामपि लक्षितत्वान्न तद्विरोधः। एवं मनस्स्वरूपाण्युक्त्वा तस्य पञ्च वृत्तीराह—तेभ्य इति। तदुपपादयति—मनस इति। एवमित्यस्य एवं प्राणो वाव पञ्चवृत्तिरिति पूर्वेणान्वयः। श्रुतिगतस्य द्वितीयेतिकरणस्य इति तेभ्यः पञ्च दासाः प्रजायन्त इति पूर्वेणान्वयः। भाष्यकारीयस्यान्तिमस्येतिशब्दस्य श्रुतिसमाप्तिद्योतकस्य इति व्यपदिश्यत इति सौत्रपदेनान्वयः। अत एव टीकायां तदुपात्तश्रुतिमित्युक्तम्। श्रुतिनामाग्रहणात्कौण्डिन्यश्रुतिरियमिति निश्चेतुं न शक्ताः। पञ्चकविवेकस्तु—

प्राणाद्यास्त्रिविधाः पञ्च प्रधानो वायुरेव च।
मुख्यपञ्चकरूपस्तन् गरुडो मध्यपञ्चकः॥
अवमाः पञ्चकास्त्वन्ये प्राणाद्यास्तस्य सूनवः।
इति त्रेधा विभागोऽयं विभागोऽन्यश्चतुर्थकः॥
प्राणापानौ शेषवीन्द्रौ तथोदानसमानकौ।
रुद्रेन्द्रौ तत्परश्रेष्ठो वायुर्व्यान उदाहृतः॥

इति छान्दोग्यभाष्यादवगन्तव्यः। एतेन सयुक्तिकश्रुतिविरोधः परिहृतः। स्वरूपत्वदासत्ववचनयोर्भिन्नव्यक्तिविषयत्वात्।

॥ इति पञ्चवृत्त्यधिकरणम् ॥ ८ ॥

॥ ९. अण्वधिकरणम् ॥

(१) अत्राधिकरणे मुख्यप्राणपरिमाणविषयश्रुतिविरोधः परिह्रियते। यद्यपि जीवाणुत्वोक्त्यैव प्राणस्याप्यणुत्वं सिद्धमिति न पृथग्विचार्यत्वम्। तथापि तत्र चैतन्यविषये विचारः। अत्र तु रूपविषय इति न गतार्थता। यद्यपि 'अणुश्च' इत्यनेनेदं गतार्थं, मुख्यस्यापि प्राणत्वात्। तथाऽप्यस्य

एवेदं सर्वम् ' इति प्राणस्य व्याप्तिः प्रतीयते ।

(२) यतस्सर्वं जगद्व्याप्य तिष्ठति प्राण एव तु ।
अतो धृतं जगत्सर्वमन्यथा केन धार्यते ॥
इति च युक्तिर्वायुप्रोक्ते ।

बहिर्देहादपि व्याप्तेः सत्त्वात्, कर्त्रप्रयोज्यत्वेन इन्द्रियविलक्षणत्वाच्च ' अणुश्च ' इति पृथगणुत्वसमर्थनं युक्तमिति ध्येयम् । मुख्यप्राणो व्याप्तोऽणुर्वेति सन्देहबीजं श्रुतिविगानं दर्शयन् पूर्वपक्षं च सूचयति—प्राण एवेति ॥ अत्र प्राणशब्देन मुख्यप्राण उच्यते । तस्याभ्यासस्तात्पर्यार्थोऽन्यत्वशङ्कानिरासार्थश्च । ' सर्वतः ' सर्वदिक्षु अस्तीति शेषः । 'सर्व' सर्वसत्ताप्रदः । एवशब्दस्य द्विर्ग्रहणं सर्वत्रानुषङ्गार्थम् । प्राधान्याभिप्रायेणैवकारः । इतीत्यनन्तरं श्रुतेति शेषः ।

(२) नन्वणुत्वेऽपि श्रुतिरस्तीति तद्विरोधोऽस्या इत्यत आह— यत इति ॥ तुशब्दोऽवधारणे । अतस्त्विति सम्बध्यते । तेन पूर्वार्धोक्तस्य व्यापकतासिद्धिः । एवकारोऽन्यप्राधान्यव्यवच्छेदकः । सङ्कोचनिरासाय सर्वशब्दः । ' अन्यथा ' सर्वत्र व्याप्त्यभावे, असौ न धार्येतेति शेषः । ततश्च सर्वं जगत्केन धार्यते, न केनापीत्यर्थः । इति वायुप्रोक्ते ग्रन्थे उक्ता युक्तिश्चात्रार्थे मानमित्यर्थः । न केवलं श्रुतिरिति चार्थः । वायुप्रोक्ते चेति वा चान्वयः । तथात्वे न केवलं वायुप्रोक्ते जगद्धारकत्वयुक्तिरुक्ता, किंतु ' सप्तस्कन्धगतो लोकान्यो बिभर्ति महाबलः ' इति हरिवंशेऽपीति समुच्चयार्थश्चकारः । तथाच व्याप्तिश्रुतेर्युक्तियुक्तत्वेन प्राबल्यात् नाणुत्वश्रुतिविरोधोऽस्या इति भावः । एकोनपञ्चाशन्मरुतां दितिगर्भं प्रविष्टानां गणशः सप्तधेन्द्रेण विभक्तानां पुनश्चैकैकशः सप्तधा कृतानां सप्तस्कन्धसंज्ञा समजनि । तान् गतो यो महाबलो लोकान् बिभर्तीति हरिवंशवचनार्थः । ' सप्तस्कन्धा इमे सप्त चरन्तु मम पुत्रकाः ' इति दितिवचनात्, ' सप्तगणा वै मरुतः ' (तै.सं. २-२-५.) इति श्रुतेः, सप्तसप्तका हि ते इति ऋग्भाष्यटीकोक्तेश्च । केचित्तु स्वस्कन्धेन गतः प्राप्तः सप्त लोकान् बिभर्तीत्यर्थमाहुः । तन्न, ' सप्तस्कन्धगतो लोकान् त्रीन् दधार चचार ह ' इति पाठान्तरविरोधात् । मरुत्सु प्रधाना ये सप्त मरुतः तेषां स्कन्धगतो मुख्य-

(३) 'अणुर्नैतत्सृज्यते अणुर्नैतद्वार्यते अणौ लयमभ्युपैति प्राणो वा अणुः प्राणैर्ह्येतद्भवति' इति च मौत्रायणश्रुतिः ॥

(४) अत आह—

सू—ॐ ॥ अणुश्च ॥ ॐ ॥ १४ ॥

'स वा एष प्राणोऽणुर्महान् नामान्तर्वा अणुर्बहिर्महान्।
प्राणो वा ईशितव्येश ईशो ह्यसौ सर्वस्येशितव्यश्च परस्य'

वायुः लोकान् बिभर्तीति व्याख्यानमप्युक्तप्रमाणविरुद्धम्। एतेन महदहङ्कारपञ्चभूताख्यसप्तस्कन्धगत इत्यर्थ इति पक्षोऽपि निरस्तः।

(३) एवं व्याप्तिश्रुतिं प्रदर्श्याणुत्वश्रुतिं दर्शयति—अणुर्नेति ॥ 'एतत्' शरीरं जगद्वा। अणुः क इत्यत आह प्राणो वेति। अयोऽतोऽणुः श्रेष्ठः प्राणः कुतः अन्यः किं न स्यादित्यतो जगन्मष्टृत्वादिकमुक्तम्। तस्योपनयमाह प्राणैर्ह्येति। हिः प्रसिद्धौ यत इत्यर्थे च। 'एतत्' जगत्स्रष्टृत्वादिकम्। श्रुतिरित्यनन्तरमणुत्वं वक्ष्यति शेषः। अनेन प्रबलव्याप्तिश्रुतिविरोधादणुत्वश्रुतिरप्रमाणमिति पूर्वपक्षस्सूचितः।

(४) सिद्धान्तयन्सूत्रमवतारयति—अत इति ॥ सूत्रे चशब्द एवार्थो व्याप्तत्वमसुच्चयार्थश्च। श्रेष्ठ इति चानुवर्तते। तथाच श्रेष्ठो मुख्यप्राणरूपेणाणुरेव। न च व्याप्तिश्रुत्यादिविरोधः। यतो न केवलमणुः, किंतु बहिर्देहाद्वर्तमानेन मुख्यप्राणरूपेणापादादिव्याप्तश्च, अत इति सूत्रार्थः। कुतोऽयं विशेष इत्यत आह—स इति। वै प्रसिद्धौ। 'एष प्राणो' मुख्यप्राणोऽणुर्महांश्च भवति। न चैकस्मिन्नुभयोर्विरोध इत्यत आह—अन्तरिति। देहस्यान्तरणुः हृदयनुपरस्य सूक्ष्मत्वादिति तत्त्वप्रदीपोक्तेः। तथाच अध्यात्मगतप्राणरूपेणाणुरित्यर्थः। 'बहिः' देहात्। तथा चाधिदैवगतवायुरूपेण 'महान्' व्याप्त इत्यर्थः। तत्र बहिर्देहत एव व्याप्तिः, अन्तस्तु प्राणस्य देहतोऽप्यणुत्वमिति विवेकः। नन्वत्र श्रुतः प्राणो मुख्य इति कुत इत्यतो वाक्यशेषादित्याशयेन तमुदाहरति—प्राण इति। वै प्रसिद्धौ। ईशितव्यश्चासावीशश्चेति विग्रहः। तदुभयं विवृणोति—ईश इति। 'हि' यतः 'असौ' मुख्यः 'सर्वस्य'

इति कौण्डिन्यश्रुतिः ॥ १४ ॥

॥ इति अण्वधिकरणम् ॥ ९ ॥

॥ १०. ज्योतिरधिकरणम् ॥

(१) करणत्वं प्राणानामुक्तम् ।
जीवस्य करणान्याहुः प्राणानेतांस्तु सर्वशः ।
यस्मात्तद्वशगा एते दृश्यन्ते सर्वदेहिषु ॥
इति मौत्रायणश्रुतौ सयुक्तिकं जीवकरणत्वं प्रतीयते ।

(२) 'ब्रह्मणो वा एतानि करणानि चक्षुःश्रोत्रं मनो वागिति ।

स्वपरमात्मातिरिक्तस्य जगतः 'ईशः' स्वामी 'परस्य' परमात्मनः 'ईशितव्यः' भृत्यः । श्रुतिरित्यनन्तरं उक्तविशेषमाहेति शेषः । अनेन पूर्वोदाहृतव्याप्तिश्रुतौ प्राणशब्दो मुख्यवायुपर इति सूचितम् ।

॥ इति अण्वधिकरणम् ॥ ९ ॥

॥ १०. ज्योतिरधिकरणम् ॥

(१) अत्रेन्द्रियविषयश्रुतिविरोधः परिह्रियते । अधिकरणसङ्गतिं दर्शयति—करणत्वमिति ॥ 'प्राणानां' इन्द्रियाणां करणत्वं 'अकरणत्वाच्च' इति चशब्देन 'उक्तं' सूचितमित्यर्थः । सन्देहबीजं श्रुतिविरोधं दर्शयन् पूर्वपक्षं च सूचयति—जीवस्येति । तेषामेवेत्यादावुपस्कार्यम् । अस्य जीवकरणत्वं प्रतीयत इत्यनेनान्वयः । श्रुतौ तुशब्दोऽवधारणे । 'सर्वशः' सर्वान् । तथाच वृद्धाः ज्ञानिनः सर्वशः सर्वान् 'प्राणान्' इन्द्रियाणि 'जीवस्यैव करणानि' तदपेक्षयैव तत्प्रयोज्यानीत्याहुरित्यर्थः । कुत इत्यतस्तत्र हेतुमाह—यस्मादिति ॥ यस्मात् 'एते' प्राणाः 'सर्वदेहिषु' सर्वप्राणिभिः 'तद्वशगाः' जीववशवर्तिनः स्ववशा एव 'दृश्यन्ते' अनुभूयन्ते तस्मादित्यर्थः ।

(२) एवं जीवकरणत्वश्रुतिमुदाहृत्य तद्विरुद्धश्रुतिमुदाहरति—ब्रह्मण इति ॥ एतानीत्यस्य व्याख्यानं—चक्षुरित्यादि । इत्येतानीत्यन्वयः । अत्र हेतुमाह—तदिति । 'तत्' ब्रह्म । हिशब्दो यस्मादित्यर्थे । 'एतैः'

तद्धचेतैः कारयति ' इति कापायणश्रुतौ ।

(३) अत आह—

सू—ॐ ॥ ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ ॐ ॥ १५ ॥

इन्द्रियैः । इन्द्रियाणि कर्म कुर्वन्ति, तैर्ब्रह्म कारयतीति करणे कर्तृत्वोपचारः । एतैर्ब्रह्म करोतीति फलितार्थः । चः श्रुतिसमुच्चये । श्रुताविव्यनन्तरं ब्रह्मकरणत्वं प्रतीयते इति शेषः । श्रुताविव्यनेन सयुक्तिकमिति क्रियाविशेषणेन चक्षुरादीनि जीवस्यैव करणानि, तथा श्रुतेस्तद्वशत्वेनानुभवसिद्धत्वाच्चेति सयुक्तिकपूर्वपक्षः सूचितो भवति ।

(३) सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे-अत इति ॥ ज्योतिराद्यधिष्ठानमिति हेतुगर्भं पक्षविशेषणम् । अत्र ज्योतिश्शब्दो ' योऽग्नौ तिष्ठन् ' (बृ. ५-७-५.) इति श्रुताग्निपरः । आदिशब्देन पृथिव्यादिभूतं तद्देवता च गृह्यते । ' यस्तेजसि तिष्ठन् ' (बृ. ५-७-१४.) इति श्रुता प्रकृतिश्च । ' अधिष्ठानं ' प्रेरकम् । ज्योतिराद्यधिष्ठानं यद्ब्रह्म तदेवेत्यनेन सूत्रे तदिति व्यस्तमपि भवति । तच्च ब्रह्मपरं, तेन अवधारणार्थकतुशब्दस्यान्वय इत्युक्तं भवति । तदेव, न जीव इत्येवशब्दार्थः । ' एतैः ' चक्षुरादिभिः करणैः प्रवर्तयतीति । अनेन सूत्रे ज्योतिराद्यधिष्ठानमित्यावर्तते । अत्र ज्योतिश्शब्दोऽग्निकार्यचक्षुःपरः । तथाच ज्योतिराद्यधिष्ठानं यद्ब्रह्म तदेव ' ज्योतिराद्यधिष्ठानं ' ज्योतीरूपचक्षुरादिनियामकम्, न जीव इति सौत्रप्रतिज्ञापदतात्पर्यार्थ उक्तो भवति । केचित्तु—सूत्रे शेषोक्तिरियमित्याहुः । कुत इत्यतस्तत्र ज्योतिराद्यधिष्ठानमिति पक्षविशेषणेन ब्रह्मणः तेजःप्रभृतिभूतप्रेरकत्वे तदुपचितत्वेन तदंशभूतचक्षुरादिप्रेरकत्वस्यापि युक्तत्वादिति हेतोः, एवमादिपदगृहीतप्रकृतिमयाग्न्यादिनियन्तुः परस्य चक्षुरादिनियामकत्वस्य कैमुत्येन सिद्धत्वादिति हेतोश्च सिद्धत्वात् चक्षुरादिनियामकत्वे कैमुत्यान्तरपरतया तदामननादिति सूत्रखण्डं व्याचष्टे—य इति । इत्यादीति लुप्तविभक्तिको निर्देशः । इत्यादाविव्यर्थः । आदिपदेन ' यश्चक्षुषि तिष्ठन् ' (बृ. ५-७.) इत्यादिकं गृह्यते । तथाच इत्यादि-

यज्ज्योतिराद्यधिष्ठानं ब्रह्म तदेवैतैः करणैः प्रवर्तयति।
'यः प्राणे तिष्ठन्' (बृ. ५-७-१६) इत्यादि तदामननात् ॥१५॥

(४) कथं जीवकरणत्वश्रुतिरित्यतो वक्ति—

सू—ॐ ॥ प्राणवता शब्दात् ॥ ॐ ॥ १६ ॥

जीवेनैव स्वकरणैः कारयति परमात्माऽतो न विरोधः।

वाजसनेयवाक्ये तस्य सर्वेन्द्रियप्रेरकमुख्यप्राणप्रेरकत्वस्य आमननात् प्रतिपादनादित्यर्थः। 'यश्चक्षुषि' इत्यादिश्रुतिसूचनेन विष्णोश्चक्षुरादिनियामकत्वे श्रुतिप्रदर्शनपरतयाऽपि तदामननादित्यंशो व्याख्यातः। 'प्राणे' सर्वप्राणप्रेरकमुख्यप्राणे तिष्ठन्यस्तस्मात् 'अन्तरो' विविक्तः एष त आत्माऽन्तर्यामीति श्रुत्यर्थः। एवमुत्तरवाक्यस्यार्थोऽपि ज्ञेयः। यद्यपीन्द्रियप्रायपाठात् प्राणशब्दो घ्राणेन्द्रियपरो वा इन्द्रियमात्रपरो वा भवति। तथाऽप्यधिकार्थलाभादपौनरुक्त्याच्चेन्द्रियमुख्याभिमानिप्रधानवायुपरो व्याख्येयः। अत एव टीकायां मुख्यप्राणेत्युक्तम्। प्रमेयदीपेऽप्यमुख्यमुख्यसाधारण्येन घ्राणेन्द्रियदेवतापरोऽयमित्युक्तम्। ननु सूत्रे भूतक्रमेणोक्तौ आकाशाद्यधिष्ठानमिति वाच्यम्। श्रौतक्रमेण चेत्, पृथिव्याद्यधिष्ठानमिति। तदुभयं विहाय ज्योतिरादीति कथं निर्देश इति चेत्—न, पूर्वसूत्रे चक्षुरादिवदिति, 'ब्रह्मणो वा' (काण्वायण.) इति श्रुतौ चक्षुरिति, 'एषः' इति वक्ष्यमाणश्रुतौ च चक्षुषेति चक्षुष आदित्येन प्रकृतत्वात्तद्विवक्षया चक्षुरादीन्युक्तत्वात्। अत एव भाष्ये द्वितीयश्रुत्यनुसाराद्ब्रह्मेत्युक्तम।

(४) प्राणवतेतिसूत्रं तच्चिरसनीयशङ्काप्रदर्शनपूर्वकमवतारयति—कथमिति॥ नहीति शेषः। तथाच यदि प्राणानां ब्रह्मकरणत्वं नहीत्यर्थः। श्रुतिरित्यनन्तरमुपपद्यत इति शेषः। किंतु ब्रह्मकरणत्वस्य तद्विरोध एव भवेदिति वाक्यशेषः। सूत्रं व्याचष्टे—जीवेनेति। एवकारो भिन्नक्रमः। सूत्रे करणैस्वकरणैरेव. न तु जीवकरणैरित्यवधारणार्थकनुशब्दोऽन्वितः। सूत्रानुपात्तं तदिति पदं 'एषः' इति श्रुत्यनुसाराल्लिङ्गविपरिणामेन परमात्मेति व्याख्यातम्। दर्शनादिति इति श्रुतेरर्थ इति च शेषः। जीवेनेत्यनेन प्राणवता इन्द्रियवता जीवेनेति प्राणवदेत्यस्यार्थ उक्तः। न विरोध इति सूत्रे शेषोक्तिः। तथाच यतो 'जीवस्य करणानि' इति श्रुतेः स्वकरणैरेव

(५) ' एष ह्येनेनात्मना चक्षुषा दर्शयति श्रोत्रेण श्रावयति
मनसा मनयति बुद्ध्या बोधयति तस्मादेतावाहुः सृति-
स्मृतिरिति ' इति माध्यन्दिनश्रुतेः ॥
(६) करणैः कारणं ब्रह्म पुरुषापेक्षयाऽखिलम् ।
श्रोत्रादिभिः कारयति करणानीत्यतो विदुः ॥
(७) न जीवापेक्षया मुख्यं कारयेत्परमेश्वरः ।

प्राणैः परमात्मा जीवेनामुख्यकर्त्रा दर्शनादि कर्म कारयतीत्यर्थो युक्तः । अतः प्राणानां ब्रह्मकरणत्वोक्तेः जीवकरणत्वश्रुतिविरोधो नेत्यर्थः ।

(५) ब्रह्म इन्द्रियैः जीवेन दर्शनादि कारयतीत्येतत्कुत इत्यतस्तत्र हेतुत्वेन शब्दादित्यंशं व्याचष्टे—एष इति ॥ 'हि' यस्मात् 'एष' परमात्मा जीवस्य स्वाधीनतया किञ्चिदिन्द्रियस्वामित्वं दत्वा एतेनानेन 'आत्मना' जीवेनामुख्यकर्त्रा स्वापेक्षयैव करणभूतेन चक्षुषा रूपादिकं दर्शयतीत्यर्थः । 'बुद्ध्या' बुद्धीन्द्रियेण । मानबोधौ सामान्यविशेषज्ञान-रूपौ। यद्वा—मानयति विचारयति बोधयति ज्ञापयतीत्यर्थः । बाह्येन्द्रियेषु चक्षुषः प्राधान्यात्प्रथमोक्तिः । 'एतौ' परमात्मजीवौ सृत्यसृती स्वातन्त्र्येण प्रवृत्तियुक्तद्विहीनाविति आहुरित्यन्वयः । श्रुतेरित्यस्य जीवेनेति पूर्ववाक्ये-नान्वयः । इति ज्ञायत इति शेषः ।

(६) अस्तु ब्रह्म जीवेन चक्षुरादिभिर्दर्शनादि कारयतीति । तथापि जीवकरणत्वश्रुतिस्तदर्थेत्येतत्कुतः इत्यतः शब्दादित्यनेनैव सूचितां स्मृति-माह—करणैरिति ॥ यतः 'कारणं' ब्रह्म 'पुरुषापेक्षया' वस्तुतः परम-पुरुषापेक्षया जीवप्रयत्नापेक्षया च करणैः श्रोत्रादिभिर्जीवेन 'अखिलं' श्रवणादि कारयति । यद्वा—'पुरुषापेक्षया' पुरुषस्य जीवस्य यद्यत् ज्ञानमपेक्षितं तदनुसारेण तेनाखिलमपेक्षितं कारयति, अतस्तद्विवक्षया श्रोत्रादीनि जीवस्य करणानीति श्रुतिः प्रवृत्तेति वृद्धा विदुरित्यर्थः । पुरुषापेक्षयेत्यनेन श्रोत्रेन्द्रियस्य स्वशब्देन ग्रहणे श्रुतौ प्रथमनिर्दिष्टस्य चक्षुषः आदिशब्देन ग्रहणे च कारणमुक्तं भवति ।

(७) ननु यदि चक्षुरादीनि ब्रह्मप्रयोज्यत्वाद्ब्रह्मणः करणानीत्युच्यन्ते, तर्हि मुख्यप्राणस्यापि ब्रह्मप्रयोज्यत्वरूपं ब्रह्मकरणत्वं सम्भवतीति तस्या-

केवलात्मेच्छया तस्मान्मुख्यत्वं तस्य निश्चितम् ॥
इति वाराहे ॥ १६ ॥

(८) सू—ॐ ॥ तस्य च नित्यत्वात् ॥ ॐ ॥ १७ ॥

अनादिनित्यत्वाज्जीवकरणसम्बन्धस्य युज्यते तत्करणत्वश्रुतिः ।

करणत्वहेतुना 'प्राण एवाकरणस्तस्मान्मुख्यः' इत्युक्तं मुख्यत्वं विरुद्धं स्यात्। इन्द्रियाणां जीवकरणत्वे तु मुख्यप्राणस्य जीवप्रयोज्यत्वाभावेन इन्द्रियवज्जीवकरणत्वाभावादकरणत्वकृतमुख्यत्वोपपत्तिरित्यत आह—नेति॥ यस्मात्परमेश्वरो 'मुख्यं' मुख्यप्राणं 'जीवापेक्षया न कारयेत्' जीवेच्छाप्रयत्नप्रयोज्यमपि न कुर्यादिति यावत्, किंतु 'केवलात्मेच्छया' स्वेच्छाप्रयत्नमात्रप्रयोज्यं कुर्यात। 'तस्मात्' जीवापेक्षया करणत्वाभावात् 'तस्य' मुख्यप्राणस्य मुख्यत्वं 'निश्चितं' अविरुद्धमित्यर्थः। तथाच जीवापेक्षया ब्रह्मकरणत्वं परमेश्वरदत्तजीवप्रयोज्यत्वरूपजीवकरणत्वसहितब्रह्मकरणत्वमिन्द्रियाणां 'अकरणत्वात्' इति सूत्रे चशब्देन विवक्षितमिति तस्य च मुख्येऽनभ्युपगमात् न तस्याकरणत्वोक्तिविरोध इवि भावः। इति वाराहे उक्तमिति शेषः। अस्यानो न विरोध इनि पूर्ववाक्यानुवृत्त्याऽन्वयः।

(८) एवं भगवदधीनान्यपीन्द्रियाण्यस्वतन्त्रजीवकर्तृके कर्मणि साधनत्वात्तत्करणानीत्युच्यन्ते, यथा परकीयकुठारेणापि ब्रश्चनोऽसौ तत्करणमुच्यत इत्येवं मुख्यमर्थं जीवकरणत्वश्रुतेरुक्त्वा मुख्यार्थान्तरप्रतिपादकं सूत्रं पठित्वा व्याचष्टे—तस्य चेति ॥ सूत्रे नित्यत्वादित्युपलक्षणम्। अनेन नाशाभावोक्तावपि उत्पत्त्यभावस्यालाभादित्याशयेनानादीत्युक्तम्। मुक्तिपर्यन्तं सदा विद्यमानत्वादित्यर्थः। न केवलं जीवकर्तृके कर्मणि इन्द्रियाणां साधनत्वादिति चशब्दार्थः। अनेन चशब्दो भिन्नक्रमो निमित्तसमुच्चयार्थ इति सूचितम्। जीवकरणसम्बन्धस्येत्यनेन तस्येति पदं व्याख्यातम्। युज्यत इत्यादिना साध्याध्याहारस्सूचितः। 'तत्करणत्वश्रुतिः' 'जीवस्य करणानि' इति जीवकरणत्वश्रुतिरित्यर्थः। तथाच परकीयेऽपि बहुकालसम्बन्धिनि वस्तुनि उपचारतस्तदीयत्वव्यवहारदर्शनादत्रापि भगवदीये-

(९) अथावियोगीनि करणैर्वाव न वियुज्यते देहेनैव वियुज्यते इत्येतद्वाव करणानां करणत्वं यद्वाव न वियुज्यते ' इति गौपवनश्रुतिः ।

(१०) चशब्दः करणसम्बन्धग्राही ॥ १७ ॥

॥ इति ज्योतिरधिकरणम् ॥ १० ॥

ष्वपीन्द्रियेषु बहुकालीनजीवसम्बन्धितामादाय तत्करणत्वश्रुतिः प्रवृत्तेति श्रुतेरुपचरितार्थत्वमिति भावः ।

(९) अनादिकालीनसम्बन्धनिमित्तयमिन्द्रियाणां जीवकरणत्वश्रुतिरित्येतत्कुत इत्यत आह—अथेति ॥ प्रमेयान्तरारम्भार्थोऽथेतिशब्दः । 'अवियोगीनि' जीवेनेति शेषः । कुत इत्यत आह—'करणैः' इन्द्रियैरिति । वावेति प्रसिद्धौ न वियुज्यते जीवः, तर्हि कथं मृतिरित्यत आह—देहेनेति । न करणैरित्येवार्थः । एवं जीवकरणसम्बन्धस्यानादिनित्यत्वमुक्त्वा तस्य जीवकरणत्वव्यवहारनिमित्तत्वमुपपादयति—इत्येतदिति । इति वाक्यबोध्यमित्यर्थः । ' करणानां करणत्वं ' इन्द्रियाणां जीवकरणत्वव्यवहारे निमित्तम् । किमेतदित्यतो देहेनेत्युक्तव्यावर्तनेन करणैरित्यंशेनोक्तं पुनराह—यदिति । यद्वाव न वियुज्यत इत्यंशेनोक्तं जीवकर्तृकावियोगित्वमिन्द्रियधर्मिकावियोगित्वव्यवहारे हेतुभूतमनादिसम्बन्धित्वपर्यवसितं तदेतदिन्द्रियाणां जीवकरणत्वव्यवहारनिमित्तमित्यर्थः । श्रुतिरित्यनन्तरं यत इति शेषः । अस्यानादिनित्यत्वाच्चेति सहेतुकप्रतिज्ञावाक्येनान्वयः ।

(१०) ननु ' प्राणवता ' इति सूत्रे जीवस्य प्राणवत्पदेन प्रकृतत्वादत्र तच्छब्देन प्राधान्याज्जीवपरामर्शो युक्तः, न तु जीवकरणसम्बन्धस्य, अतः कथं व्याख्यायते सम्बन्धस्येत्यत आह—चशब्द इति ॥ सौत्रश्चशब्दः करणानामिन्द्रियाणां तत्सम्बन्धस्य च 'ग्राही' समुच्चायक इत्यर्थः । तथाच सत्यं तच्छब्दो जीवपरामर्शीति । तथापि यतोऽस्माभिः तच्छब्दपरामृष्टं चशब्दसङ्गृहीतो त्रयं च मिलित्वा प्राग्जीवकरणसम्बन्धस्येति व्याख्यातम्, न तु सम्बन्धमात्राभिप्रायेण, अतो नानुपपत्तिरिति भावः । अनेन तस्यान्यस्य चेति धर्मिसमुच्चयेऽपि चशब्द इत्युक्तं भवति । न च सूत्रे

॥ ११. न इन्द्रियाधिकरणम् ॥

(१) 'अथेन्द्रियाणि प्राणा वा इन्द्रियाणि प्राणा ह्येदं द्रवन्ति' इति सयुक्तिकपौत्रायणश्रुतिः सामान्येन प्राणानामिन्द्रियत्वं वक्ति। 'द्वादशैवेन्द्रियाण्याहुर्मनोबुद्धी तु द्वादशे' इति

सम्बन्धोक्तयैव प्रकृतार्थसिद्धेः व्यर्था सम्बन्धयुक्तिरिति वाच्यम्। सम्बन्धिनोरभावे सम्बन्धाभावेन तदुक्तेरसार्थकत्वात्।

॥ इति ज्योतिरधिकरणम् ॥ १० ॥

॥ ११. न इन्द्रियाधिकरणम् ॥

(१) अत्र मुख्यप्राणस्येन्द्रियत्वानिन्द्रियत्वश्रुतिविरोधः परिह्रियते। सन्देहबीजं श्रुतिविज्ञानं दर्शयन् विषयसंशयपूर्वपक्षांश्च दर्शयति—अथेति॥ प्रमेयान्तरारम्भार्थोऽथशब्दः। उच्यन्त इति शेषः। कानि तानीत्यत आह—प्राणा इति। वशब्दोऽप्यर्थः। सर्वेऽपि प्राणा इति। ते च 'प्राणाः' मुख्यप्राणद्वादशेन्द्रियरूपास्त्रयोदशसङ्ख्याका ज्ञेयाः। प्राणानामिन्द्रियत्वं कुत इत्यत आह—प्राणा इति। 'हि' यस्मात् 'इदं' विषयजातमुद्दिश्य प्राणाः 'द्रवन्ति' गच्छन्ति तस्मादित्यर्थः। एवमिन्द्रियाणां त्रयोदशत्व-प्रापकश्रुतिं समुदाहृत्य द्वादशत्वश्रुतिमुदाहरति—द्वादशेति। एवकारोऽधिकसङ्ख्याव्यावर्तकः। 'मनोबुद्धी' मनश्च बुद्धिश्च मनोबुद्धी इति विग्रहः। तुशब्दो विशेषार्थः। द्वादश इति। द्वादशं च द्वादशं च द्वादशे। इन्द्रिय-शब्दविवक्षया नपुंसकद्विवचनप्रयोगः। प्रथमयोरित्यत्रैव द्वादशशब्दस्यैकत्र लक्षणा एकादश द्वादशत्वारोपो वा। तथाच मनोबुद्धीन्द्रिये एकादशत्व-द्वादशत्वसङ्ख्यापूरके इत्यर्थः। यत्तु एकादशी च द्वादशं चेति ततो 'नपुंसकम्' इत्येकशेषे एकवद्भावे च द्वादश इति रूपं सिद्ध्यतीति व्याख्यानं, तत्तु बुद्धेरेकादशीत्वं मनसः द्वादशत्वं इति व्यत्यासेनान्वयस्य भिन्नार्थयोर्विरूपयोरेकशेषस्यादृष्टस्य कल्पयत्वादुपेक्ष्यम्। केचित्तु—एकादशं च एकादशी चैकादशे द्वादशं च द्वादशी च द्वादशे उभयत्र नपुंसकमित्येकशेषः। ततः एकादशे च ते द्वादशे चेति कर्मधारयः। एवं च मनोबुद्ध्योः प्रत्येकमेकादशत्वं द्वादशत्वं च लभ्यते इति एतट्टीकार्थ-

च कापायणश्रुतिः । अतः कस्येन्द्रियत्वं निवार्यमिति ।

(२) अतो वक्ति—

सू—ॐ ॥ त इन्द्रियाणि तद्व्यपदेशा-
दन्यत्र श्रेष्ठात् ॥ ॐ ॥ १८ ॥

माहुः । अपरे तु—काकेभ्यो दधि रक्ष्यतामित्यत्रोपलक्षितार्थमादाय बहुव्रीन्वयवदत्रापि द्वादशशब्दोपलक्षितैकादशशब्दवोध्यार्थमादाय द्वित्वान्वय इत्याहुः । अयं प्रथमपक्षान्तर्गत एव । स्वप्नबुद्ध्यर्थन्तु भालन्वा द्वौ दशशब्दौ ययोः पदयोः प्रविष्टौ ते द्वादश तत्पदवोध्ये इति यावत् । एकादशद्वादशपदयोः दशशब्दस्य प्रविष्टत्वादिति भावः । अत एवैकादशद्वादशे इति टीकाऽपि मनोबुद्धिपदसामानाधिकरण्यात् तत्पदवोध्यत्वाभिप्रायेति । अस्तु पूर्वपक्षसूत्रम्, ततः किमित्यत आह—अत इति । यतः कापायणश्रुतिः त्रयोदशानामपि प्राणानामिन्द्रियत्वं वक्ति । 'द्वादश' इति कापायणदृष्टश्रुतिश्च द्वादशानामेव । अतो विप्रतिपत्तेः संशय इत्यध्याहारेण योजना । अनेनाधिकरणाङ्गसंशयः इन्द्रियत्वाख्यविषयश्च दर्शितो भवति । एवं 'अथ' इति श्रुतिर्दशत्वोदशानामपि प्राणानामिन्द्रियत्वं वक्ति, अतः सर्वेऽपि प्राणाः इन्द्रियाणीति साध्याध्याहारेणानुक्त्या योजनायां पूर्वपक्षः प्रदर्शितो भवति । तत्र हित्वासंख्यापरिहाराय सामान्येनोक्तम् । तथाच यतः श्रुतिः 'सामान्येन' साधारण्येन सर्वेषामिन्द्रियत्वं वक्ति, अतो नानिर्द्धारितेति भावः । ननु विशेषश्रुतित्वात् द्वादशत्वश्रुत्या बाधितेयं त्रयोदशत्वश्रुतिरित्यत आह—सयुक्तिकेति । यतः इयं श्रुतिः 'सयुक्तिका' इदंद्रवणरूपयुक्तियुक्ता तद्रहिता अतः प्रावल्यान्न बाधितेति भावः । नन्वस्यतमस्य निवारणेन द्वादशानामेवेन्द्रियत्वनिर्धारणसम्भवात् कथमयं पूर्वपक्ष इत्यत आह—अत इति । यतः सामान्येनेन्द्रियत्वेदंद्रवणयोर्वचनमस्ति, अतः कस्य प्राणस्येन्द्रियत्वं 'निवार्यते' न कस्यापीत्यशक्यत्वात् इत्यर्थः ।

(२) सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ अन्यत्र श्रेष्ठादित्यस्यार्थो—मुख्यप्राणमृत इति । मुख्यप्राणादन्ये प्राणा इत्यर्थः । पूर्व-

मुख्यप्राणमृते त एवेन्द्रियाणि ॥

(३) द्वादशैवेन्द्रियाण्याहुः प्राणो मुख्यस्त्वनिन्द्रियम् ।
द्रवतामिन्द्रियाणां हि नियन्ता प्राण एकराट् ॥
इति पौत्रायणश्रुतिः ।

(४) श्रोत्रादीनि तु पञ्चैव तथा वागादिपञ्चकम् ।
मनोबुद्धिसहायानि द्वादशैवेन्द्रियाणि तु ॥

सूत्रानुवृत्तचशब्दस्य एवेत्यर्थ उक्तः । ते ऋत इति चावर्तते । एकमिति चाध्याह्रियते । तथाच 'एकमृते' विनैव 'ते' श्रुत्युक्ताः प्राणाः 'इन्द्रियाणि' द्वादशैवेन्द्रियाणि, न तु सर्वे प्राणा इत्यर्थः । तत्र कस्य व्यावृत्तिरित्यत आह - मुख्येति । तथाच मुख्यप्राणमेकमृतेऽन्ये प्राणाः इन्द्रियाणि, न तु मुख्यप्राणोऽपीत्यर्थः ।

(३) कुत इत्यतस्तत्र हेतुत्वेन तद्व्यपदेशादित्येतद्व्याचष्टे—द्वादशैवेति ॥ 'हि' यस्मात् इति विशेषश्रुतिरस्ति तस्मान्मुख्यप्राणमृतेऽन्य एवेन्द्रियाणि न तु मुख्योऽपीत्यर्थः । श्रुत्यर्थस्तु—इन्द्रियाणि द्वादशैवेत्याहुः, न तु त्रयोदशेति । अत्र कस्य व्यावृत्तिरित्यत आह—प्राण इति । मुख्यप्राणस्त्वित्यन्वयः । तुशब्दो विशेषार्थः । इत्याहुरित्यस्ति । नन्विदं द्रवणवतः तस्य कथमिन्द्रियत्वाभाव इत्यत उक्तम्—द्रवतामिति । गच्छतामित्यर्थः । विषयं प्रतीति शेषः । 'नियन्ता' स्वामी 'एकराट्' स्वतन्त्रः । तथाच मुख्ये इदंद्रवणादिति हेतुरसिद्ध इति भावः । तुरेवार्थो नियन्तेवेति सम्बध्यते ।

(४) अत्रैव स्मृतिमाह श्रोत्रादीनीति ॥ आद्यस्तुशब्दो ज्ञानेन्द्रियत्वरूपविशेषद्योतकः द्वितीयश्चेदित्यर्थे । एवशब्दो वागादिपञ्चकस्य ज्ञानेन्द्रियत्वव्यावर्तकः, तथाशब्दः समुच्चये, तथाच यानि श्रोत्रादीनि पञ्चैव ज्ञानेन्द्रियाणि यच्चातथाभूतं वागादिपञ्चकं कर्मेन्द्रियं तान्येव मनोबुद्धिसहायानि चेत् द्वादश भवन्ति । एतानि द्वादशैवेन्द्रियाणि, न त्वन्यदिति योजना । कुतो द्वादशानामिन्द्रियत्वमत आह—विषयेति । विषयं प्रति गमनादित्यर्थः । एतदन्यस्य मुख्यप्राणस्यानिन्द्रियत्वे हेतुमाह—'तेषां'

विषयद्रवणात्तेषां इन्द्रियत्वमुदाहृतम् ।
तेषां नियामकः प्राणः स्थित एवाखिलप्रभुः ॥
इति बृहत्संहितायाम् ॥ १८ ॥

(५) सू—ॐ ॥ भेदश्रुतेः ॥ ॐ ॥ १९ ॥

'स्थित एव हीदं मुख्यप्राणः करोति कारयति चलति चालयति धत्ते धारयति प्रभुं वा एनमाहुरथेन्द्रियाणि न स्थितानि न कुर्वन्ति न कारयन्ति न चलन्ति न

इन्द्रियाणामिति । गच्छन्नियामकस्यापि गमनमस्त्येवेति तस्यापीन्द्रियत्वं स्यात् इत्यत आह—स्थित इति । स्वस्थान इति शेषः । न तु विषयं प्रति स्वयमपि गच्छतीत्यर्थः । अत्रोपपत्तिमाह अखिलेति । अखिलेन्द्रिय स्वामीत्यर्थः । स्वामिनो भृत्यानुगमनमयुक्तमिति भावः । बृहत्संहितायामिति । उक्तमिति शेषः ।

(५) यदि मुख्यप्राणो नेन्द्रियं तर्हि चक्षुरपि न स्यात्, चक्षुर्मुख्यप्राणयोः सर्वथा विशेषाभावात् इदंद्रवणभावाभावरूपस्य स्थितत्वास्थितत्वरूपस्य सूत्रकृताऽनुक्तत्वात् अप्रयोजकत्वाच्च इत्याशङ्क्य परिहरत्सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति—भेदेति ॥ स्थित इत्यत्र प्राक्स्वस्थान इत्युपस्कार्यम् । हिशब्दः प्रसिद्धौ । 'इदं' सर्वं कार्यं करोति स्वयं, कारयत्यन्यमुखेन 'चलति' बलयुक्तवदाचरति चेष्टते वा 'चालयति' बलयुक्तान् करोति चेष्टयतीति वा । स्वयमखिलं 'धत्ते' बिभर्ति धारयत्यन्यमुखेन । उभयत्र हेतुमाह - प्रभुमिति । 'एनं' मुख्यं, अनेन मुख्यस्य सर्वकर्तृत्वकारयितृत्वबलत्वबालयितृत्वधर्तृत्वधारयितृत्वादिविशेषोक्त्या ईश्वरसाम्यमुक्तम् । तथाच सौम्येदशब्दो विशेषपरतया व्याख्यातः । एवं मुख्यप्राणधर्ममभिधाय तदभावमिन्द्रियेष्वाह—अथेति । इन्द्रियस्वामिस्थितिकथनानन्तरं तद्दशानीन्द्रियाणि लक्षणमुखेन कथ्यन्त इत्यर्थः । ततः किमित्यत आह—तानीति । हवेति प्रसिद्धौ । यस्मात्तान्येतानीन्द्रियाणि 'अबलानि' करणकारणबलनबालनधरणधारणपोषणादिष्वत्यन्तं असमर्थानि तस्मात्तज्जीवापेक्षया 'करणानि' तत्प्रयोज्यानि इति विद्वांस आहु-

वालयन्ति न धत्ते न धारयन्ति तानि ह वा एतान्यवलानि तस्मादाहुरिन्द्रियाणि क्रणानि' इति पौत्रायणश्रुतेः ॥१९॥

(६) सू—ॐ॥ वैलक्षण्याच्च ॥ ॐ ॥ २० ॥

पुरुषापेक्षया प्रवृत्तिरिन्द्रियाणां दृश्यते न मुख्यस्य ।

रित्यर्थः । श्रुतेरित्यस्य च प्रकृत्य चक्षुरादीनां चाविशेष इत्यवान्तरसाध्येनान्वयः ।

(६) नन्वयं मुख्यप्राणः परमात्मवशो न वा । आद्ये न तस्येन्द्रियत्वमिति । इशवश्यत्वमात्मनः इन्द्रियाणामात्मस्थत्वाद्यधर्म्यत्वलक्षण्यस्य चेन्द्रियेष्व प्यसम्भवात् । अन्त्ये चक्षुरादीन्युक्तावरोध इत्यतोऽङ्गां परित्यज्य पक्षं परिगृह्य व्याचष्टे —वैलक्षण्याच्चेति ॥ पुरुषेति । जीवप्रयत्नापेक्षत्वेत्यर्थः । तदपेक्षत्वमिति यावत् । 'प्रवृत्तिः' विषयेषु व्यापृतिः । इन्द्रियाणां जीवप्रयत्नापेक्षप्रवृत्तिकत्वं कुत इत्याशङ्क्याह—दृश्यत इति । यत इन्द्रियाणां जीवप्रयत्नापेक्षा प्रवृत्तिर्दृश्यते, मुख्यस्य चाप्रवृत्तिर्दृश्यते, अत इन्द्रियाणां प्रवृत्तिः पुरुषापेक्षयैव दृश्यत इति योजना । एवमिन्द्रियधर्मिके वैलक्षण्यं सप्रमाणकं प्रदर्श्य तदभावरूपवैलक्षण्यं मुख्यस्याप्याह —नेति । न पुरुषापेक्षया प्रवृत्तः मुख्यस्येत्यर्थः । मुख्यप्राणस्य प्रवृत्तिर्न पुरुषापेक्षेत्यत्र कुत इत्यतः सौत्रचकारसूचितां श्रुतिं पठति —इति च श्रुतिरिति । इति श्रुतिश्चेत्यन्वयः । चः प्रत्यक्षसमुच्चये । यत इति शेषः । अनेनोभयत्र वैलक्षण्यसिद्धिः परिकृता । वैलक्षण्यादिति हेतुवाक्यस्थं न एवेन्द्रियाणीति प्रधानसाध्येनान्वयः । अनेन सूत्रेऽप्यर्थश्चशब्दः श्रुतिसूचकश्च । न इन्द्रियाणीति मुख्यप्राणस्यैवानिन्द्रियत्वोक्तिविरोधो नेति साध्यं चानुषञ्जनीयम् । तथाच 'अपि' श्रेष्ठस्येशवशत्वेऽपि न 'ते' इन्द्रियोक्तिविरोधः । कुतः ? 'अपि' ईशाधीनत्वेऽपि 'वैलक्षण्यात्' इन्द्रियाणामीश्वरजीवोभयवशप्रवृत्तिकत्वात् मुख्यस्य च केवलेश्वराधीनप्रवृत्तित्वरूपवैलक्षण्यात् । न चासिद्धिः 'वैलक्षण्यात्' इन्द्रियपूक्तवैलक्षण्यस्य प्रत्यक्षसिद्धत्वात्, मुख्यप्राणे च श्रुतिसिद्धत्वादिति सूत्रार्थ उक्तो भवति । षट्प्रश्ने हि 'एष पुरुषो न शृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते' (प्र. ४-२)

'प्राणाग्नय एवैतस्मिन् पुरे जाग्रति' (प्र. ४-३.)
इति च श्रुतेः ॥ २० ॥

॥ इति त इन्द्रियाधिकरणम् ॥ ११ ॥

॥ १२. संज्ञाधिकरणम् ॥

(१) 'विरिञ्चो वा इदं विरेचयति विदधाति ब्रह्मा वाव विरिञ्च

इति पूर्ववाक्ये जीवस्य स्वापकाले श्रोत्रचक्षुर्घ्राणरसनत्वग्वाक्पाण्युपस्थपायुपादाख्यदशेन्द्रियव्यापाराभावमभिधाय तर्हि कानि तदा जाग्रतीति पिप्पलादऋषिं प्रति सौर्यायणिऋषिप्रश्नस्योत्तरमुच्यते—प्राणाग्नय इति। स्वापकाले 'एतस्मिन् पुरे' शरीरे 'प्राणाग्नयः' प्राणापानादिमुख्यप्राणरूपाण्येवाग्नयः त एव 'जाग्रति' शरीरधारणादिव्यापारं कुर्वन्तीत्यर्थः।

॥ इति त इन्द्रियाधिकरणम् ॥ ११ ॥

॥ १२. संज्ञाधिकरणम् ॥

(१) अत्राधिकरणे नामरूपविषये श्रुतिविरोधः परिह्रियते। न चासङ्गतिः। नामरूपात्मकप्रपञ्चमध्ये शरीरस्यापि प्रविष्टत्वात्तस्य प्रकृतेन्द्रियाश्रयत्वात्तद्विचारस्याध्यात्मविचारपादेऽन्तर्भावोपपत्तेः। यद्वा—रूपशब्दो देहार्थपरः, नामशब्दश्च तद्वाचकशब्दपर इति नासङ्गतिः। तत्त्वप्रदीपे तु प्राग एव प्राणत्वादुपरि ब्रह्मपदमधिष्ठास्यतीति ज्ञापनाय प्राण प्रसङ्गे चतुर्मुखप्रसञ्जनमिति सङ्गतिरुक्ता। शरीरं किं विरिञ्चसृष्टं परमात्मसृष्टं वेति सन्देहबीजं श्रुतिविज्ञानं दर्शयन् पूर्वपक्षं च सूचयति—विरिञ्च इति॥ वाशब्द एवार्थः। तथाच विरिञ्च एव 'इदं' विश्वं नामरूपात्मकं विरेचयति। तस्य व्याख्यानं—'विदधाति' करोतीति। तत्त्वप्रदीपे तु 'विरेचयति' सृजति 'विदधाति' विशेषेण धारयति नियोजयति चेति व्याख्यातम्। विरिञ्चशब्दोक्तः क इत्यत आह—ब्रह्मेति। चतुर्मुख इत्यर्थः। वावेति प्रसिद्धौ। ब्रह्मणः कुतो विरिञ्चत्वमित्यतस्तदर्थभूतविरेचकत्वस्य तत्र प्रसिद्धत्वादित्याह—एतस्माद्धीति। ब्रह्मण इत्यर्थः। हिशब्दः प्रसिद्धौ। 'इमे' प्रसिद्धे रूपनामनी उत्पद्येते इति शेषः। अत्र 'रूपं च तदपेक्षया' इति स्मृतेः अयोगिप्रत्यक्षगम्यं रूपं

एतस्माज्जायते नामरूपनामनी ' इति गौपवनश्रुतिः ।

(२) यस्माद्विरेचयेत्सर्वं विरिञ्चस्तेन भण्यते ।
एको हि कर्ता जगतो ब्रह्मैव तु चतुर्मुखः ॥
इति च युक्तिर्ब्राह्मे ।

(३) ' अथ कस्मादुच्यते परम इति परमाद्ध्येते नामरूपे व्याक्रियेते

त्रिवृत्क्रियापेक्षया भवति । नाम च तद्व्यवहार्यं तदपेक्षं भवतीति तत्त्वप्रदीपोक्तेः । अयोगिप्रत्यक्षगम्यं अस्मदादिशरीरमेव रूपशब्देनोच्यते, अयोगिभिर्व्यवहार्यमेव नामशब्देनोच्यते । अस्मदादिशरीरस्यैव त्रिवृत्कृतोपादानकत्वात्, उपादानार्थमेव त्रिवृत्क्रियापेक्षणात्, अयोगिभिर्व्यवहार्यनाम्नामेव रूपापेक्षत्वाच्च, न तु योगिप्रत्यक्षगम्यदेवतादिशरीरमपि रूपशब्देनोच्यते, तस्य केवलभूतोपादानकत्वेन तदर्थं त्रिवृत्क्रियानपेक्षणात् । योगिभिर्व्यवहार्यनाम्नां रूपानपेक्षत्वाच्च । श्रुतिरित्यनन्तरं विरिञ्चस्य नामरूपकर्तृत्वं वक्तीति शेषः ।

(२) श्रुत्यन्तरापेक्षयाऽस्याः प्रावल्योपपादनाय युक्त्युपेततां दर्शयति—यस्मादिति ॥ यस्मात् 'सर्वं' नामरूपात्मकं 'विरेचयेत्' सृजेत् तेन कारणेन ब्रह्मा विरिञ्च इति भण्यते । नास्य कर्तृत्वं द्वारत्वाभिप्रायं, किंतु मुख्यमेवेत्याशयेन अस्य साध्यमाह—एको हीति । हिः प्रसिद्धौ । तुरेव । यस्मादित्यावर्तते, तेनेति च । तथाच यस्माद्विरिञ्चो भण्यते, तेन ब्रह्मैव जगतः 'एको' मुख्यः कर्ता, न द्वारभूतः, स च 'ब्रह्मा' प्रसिद्धश्चतुर्मुख एवेत्यर्थः । चतुर्मुख इत्यनेन श्रुतिगतो ब्रह्मशब्दो जगत इत्यनेनेदंशब्दश्च विवृतः । केचित्तु—श्रुतौ विरेचकत्वनिमित्तेन विरिञ्चशब्दवाच्यत्वोक्तावपि तस्य जगत्स्रष्टृत्वे हेतुत्वानुक्तेः तदर्थं यस्मादित्यादिस्मृत्युदाहरणम् । तथा च यस्मात् विरिञ्चो भण्यते तस्मात् एको हि कर्ता जगत इत्यावृत्तिं विना स्मृतिवाक्यार्थमाहुः । इतीति । इति ब्राह्मवचने विरेचयितृत्वनिमित्तकविरिञ्चशब्दवाच्यत्वरूपयुक्तिश्चोक्तेत्यन्वयः । न केवलं श्रुतिरिति चशब्दार्थः । अनेन विरिञ्चस्यैव नामरूपात्मकदेहादिकर्तृत्वं तथा श्रुतेः विरिञ्चत्वयुक्तेश्चेति सयुक्तिकः पूर्वपक्षस्सूचितो भवति ॥

(३) एवं विरिञ्चकर्तृत्वे श्रुतिमुदाहृत्य परमात्मकर्तृत्वेऽपि तामुदा-

तस्मादेनमाहुः परम इति। अथ कस्मादुच्यते ब्रह्मेति वृहत्त्वाद्बृंहितत्वाच्च' इत्याग्निवेश्यश्रुतिः।

(४) अत आह—

सू—ॐ ॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ ॐ ॥ २१ ॥

नामरूपकृप्तिः परादेव। 'सर्वाणि रूपाणि विचित्यधीरः। नामानि कृत्वाऽभिवदन्यदास्ते' (तै. आ. ३-१२) इति श्रुतेः।

हरति—अथेति ॥ प्रश्नेऽथशब्दः। विष्णुः परम इति कस्मादुच्यत इति प्रश्नस्योत्तरमाह—परमादिति। 'हि' यस्मात् 'एते नामरूपे' संज्ञामूर्ती 'परमात्' विष्णोः 'व्याक्रियेते' सृज्येते तस्मादेनं परम इत्याहुः कवय इत्यर्थः। अत्र परमत्वे नामरूपकर्तृत्वाख्यो हेतुरुक्तः, स च नाप्रयोजकः, अवरस्याल्पशक्तेः सर्वनामरूपकर्तृत्वायोगात्। 'कर्तृत्वात्सगुणं ब्रह्म' इति भागवतोक्तेरिति ध्येयम्। न केवलं नामरूपकर्तृत्वं परमत्वे हेतुः, किंतु विष्णोर्ब्रह्मत्वेऽपि हेतुरिति सूचनाय ब्रह्मशब्दं प्रश्नपूर्वं निर्वक्ति—अथेति। यद्वा—'ब्रह्मा वा' ( ) इति श्रुतिगतब्रह्मशब्दप्रवृत्तेः सावकाशत्वोपपादनायेदमुदाहृतम्। पूर्ववत्प्रश्नार्थोऽथशब्दः। 'वृहत्त्वात्' वृद्धत्वात् 'बृंहितत्वात्' नामरूपात्मकजगत्सृष्ट्यादिगुणबृंहितत्वात् पूर्णत्वाच्च ब्रह्मेत्युच्यते इत्यर्थः। श्रुतिरिति। विष्णोर्नामकर्तृत्वं वक्तीति शेषः।

(४) सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ संज्ञामूर्तिक्लृप्तिरित्यस्य व्याख्यानं—नामरूपकृप्तिरिति। नामरूपात्मकदेहादिप्रपञ्चस्योत्पत्तिरित्यर्थः। 'परात्' परमात्मन इति लब्धविशेष्योक्तिः। न विरिञ्चादित्येवकारार्थः। भवतीत्यध्याहार्यम्। कुत इत्यतः प्रवृत्तमुपदेशादिति हेत्वंशं व्याचष्टे—सर्वाणीति। इतीति। इति तैत्तिरीयपुरुषसूक्तमन्त्रोक्तत्वादित्यर्थः। श्रुतौ यदिति लिङ्गव्यत्यासः। तथा च 'यो धीरः' परमधैर्यशीलो भगवान् सर्वाणि रूपाणि 'विचित्य' सृष्ट्वा तेषां 'नामानि' वाचकशब्दांश्च कृत्वा तानि तैः 'अभिवदन्' व्यवहरन्नास्ते। तमेवं विद्वान् अमृतो भवतीत्यर्थः।

(५) त्रिवृत्कुर्वत इति हेतुगर्भः ।
त्रिवृत्करणापेक्षत्वान्नामरूपयोः ॥
(६) सर्वनाम्नां च रूपाणां व्यवहारेषु केशवः ।

---

(५) नामरूपयोः विरिञ्चसृष्टत्वेऽप्यस्ति श्रुतिरतः कथमनया परमात्मसृष्टत्वनिश्चय इत्यतस्तत्परिहारत्वेन प्रवृत्तं भावप्रधानत्रिवृत्पदघटितं त्रिवृत्कुर्वत' इत्यंशं परस्य नामरूपकर्तृत्वे हेतुसमर्पकतया व्याचष्टे—त्रिवृत्कुर्वत इति ॥ त्रिवृत्कुर्वत इति विशेषणनिर्देशो हेतुगर्भः वाच्यो यस्य स हेतुगर्भो लिङ्गवाचीत्यर्थः। तथा च सिद्धान्तश्रुतेः प्राबल्यज्ञापनाय त्रिवृत्क्रियाकर्तृत्वरूपपरमात्मविशेषणवाचकपञ्चम्यन्तशब्देन परस्य नामरूपकर्तृत्वे त्रिवृत्त्वकर्तृत्वादिति युक्तिरुक्तेति भावः। कारणेन कार्यानुमानमिदम्। ननु त्रिवृत्त्वं नाम पृथिव्यप्तेजोरूपभूतत्रयस्य मिथोभावः, तत्कर्तृत्वे च कुतो नामादिकर्तृत्वं हरेः। तथा च हेतुरप्रयोजक इत्यत आह—त्रिवृदिति। त्रिवृत्करणसापेक्षत्वादित्यर्थः। 'नामरूपयोः' करणस्येति शेषः। तथाच त्रिवृत्करणमन्तरेण रूपोत्पत्त्यभावस्य वक्ष्यमाणत्वात् तदभावे च नामानुपपत्तेः साक्षाद्व्यवधानेन वा नामादिकरणस्य त्रिवृत्करणसापेक्षत्वेन तत्समाविनाभूतकार्यत्वात्तदभावे तदनुपपत्तेः नाप्रयोजकतेति भावः। न च विष्णोस्त्रिवृत्कर्तृत्वासिद्धिरित्याशङ्क्योत्तरत्वेनाप्युपदेशादिति सौत्रहेतुर्योज्यः। 'सेयं देवतैमास्तिस्रो देवता अनेन जीवेनाऽत्मनाऽनुप्रविश्य नामरूपे व्याकरोत्तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' (छा. ६-३-३.) इति श्रुतेरिति तदर्थः। 'अग्निहोत्रं जुहोति यवागूं पचति इतिवत् 'इयं' विष्ण्वाख्या देवता 'अनेन जीवेन' तदाख्येनानिरुद्धेनात्मना स्वरूपेण 'इमाः' तेजोऽबन्नाख्यदेवतास्त्रीन् देवाननुप्रविश्य नामरूपे 'व्याकरोत्' विशेषेणाकरोत्, तदर्थं तासां त्रिवृतं त्रिवृतमेकैकामकरोदिति अर्थक्रमेणेयं श्रुतिर्व्याख्याता तत्त्वप्रदीपे।

(६) ननु पूर्वपक्षयुदाहृतश्रुतेरपि विरिञ्चत्वादियुक्तियुक्तत्वेन बलवत्त्वात्पुनरनिर्णय एवेत्यतस्तस्याः सावकाशतां स्मृत्यैव दर्शयति—सर्वेति। व्यवहारस्येत्युक्तेः षष्ठ्यर्थे सप्तमी। तथाच यतो 'विरिञ्चादिसर्वनाम्नां' सर्वसंज्ञानां 'रूपाणां' मूर्तीनां 'व्यवहारेषु' अभिलपनादिव्यवहाराणां

एक एव यतः स्रष्टा ब्रह्माद्यास्तदवान्तराः ॥ इति पाद्मे ।

(७) त्रिवृत्क्रिया यतो विष्णो रूपं च तदपेक्षया ।
रूपापेक्षं तथा नाम व्यवहारस्तदात्मकः ॥
अतो नाम्नश्च रूपस्य व्यवहारस्य चैकराट् ।
हरिरेव यतः कर्ता पिताऽतो भगवान् प्रभुः ॥
इति च ब्रह्माण्डे ॥ २१ ॥

॥ इति संज्ञाधिकरणम् ॥ १२ ॥

च 'व्यवहारेषु' व्यवहारविषयीभूतानां सर्वनाम्नामिति वा 'केशवः' सृष्ट्यादिना ब्रह्मरुद्रप्रवर्तको हरिरेव 'एको' मुख्यः स्रष्टा 'तत्' तस्मा- द्ब्रह्माद्या देवाः 'अवान्तराः' सृष्टौ द्वारकारणीभूता इत्यर्थः । तदवान्तरा इत्यस्यैकपदत्वे तस्य विष्णोस्तस्यां सृष्टौ द्वारभूता इत्यर्थः । यतस्सर्वरूपाणां स्रष्टाऽतः सर्वनाम्नां चेत्यप्यन्वयः । तथा च पूर्वपक्षिश्रुतेः द्वारविषयत्वेन सावकाशत्वान्न तद्विरोध इति भावः । न च मुख्यार्थसम्भवे किममुख्यार्थ- श्रयणेनेति वाच्यम् । यतः कर्तृत्वशक्तिरूपं मुख्यकर्तृत्वं 'एक एव स्रष्टा' इत्यनेन विष्णोरेव, नान्येषां तस्यैव त्रिवृत्कर्तृत्वादिमुक्त्वा 'ब्रह्माद्यास्तद- वान्तराः' इत्यनेनेतरेषां द्वारकारणत्वरूपामुख्यकर्तृत्वमेवोक्तम् । इति पाद्मे इत्यस्य वचनादित्यध्याहारेण नामरूपकृतिः परादेवेति पूर्वेणान्वयः ॥

(७) सूत्रार्थं स्मृतिसम्मतिं चाह—त्रिवृदिति ॥ आद्यश्चस्त्वर्थः । तथाशब्द उपमायाम् । द्वितीयश्चशब्दः समुच्चये । भवतीति शेषः । तथा च 'यतस्त्रिवृत्क्रिया' पृथिव्यप्तेजसां मिश्रीभावकरणं विष्णोस्सम्बन्धि भवति । यतश्च रूपं 'तदपेक्षया' त्रिवृत्क्रियाऽपेक्षयैव भवति । यतश्च नाम 'रूपापेक्षं' तत्साध्यं यतश्च 'व्यवहारः' अभिलपनादिरूपः 'तदात्मकः' नामापेक्षः अतो नाम्नो रूपस्य व्यवहारस्य च हरिरेव 'एकराट्' स्वतन्त्रः कर्ता, नान्यः । यतः कर्ता भगवान् अतः सर्वजीवानां पिता । न केवल- मेतावत्, किंतु 'प्रभुः' स्वामी चेत्यर्थः । स्मृतिद्वयसमुच्चये चशब्दः ।

॥ इति संज्ञाधिकरणम् ॥ १२ ॥

॥ १३. मांसाधिकरणम् ॥

(१) 'अद्भ्यो हीदमुत्पद्यते आपो वाव मांसमस्थि च भवन्त्यापः शरीरमाप एवेदं सर्वम्' इति कौण्डिन्यश्रुतिः ।

(२) अम्मयं तु यतो मांसमतस्तृप्तिश्च मांसतः ।
इति च भारते ॥

(३) 'पृथिवीं शरीरमाकाशमात्मा' (बृ. ५-२-१३)

॥ १३. मांसाधिकरणम् ॥

(१) अत्राधिकरणे शरीरकारणश्रुतिविरोधः परिहियते । तत्रोपलक्षणाभिप्रायेण कोटिद्वयमात्रे सन्देहबीजं दर्शयन् पूर्वपक्षं च दर्शयति—अद्भ्य इति ॥ हिशब्दः प्रसिद्धौ । 'इदं' शरीरम् । एवं प्रतिज्ञातमपां सर्वशरीरकारणत्वमुपपादयति-आप इति । आपो मांसं भवन्ति, अस्थि च भवन्तीति प्रत्येकमन्वयः । यत इति शेषः । अतः 'आपः शरीरं' अद्जन्यं शरीरमित्यर्थः । शरीरस्य मांसाद्यात्मकत्वादिति भावः । निगमयति—आप एवेति 'इदं' शरीरम । श्रुतिरिति । आप्यत्वं शरीरस्य वक्तीति शेषः । अनेन शरीरमाप्यमेवेत्येकः पूर्वः पक्षः प्रदर्शितो भवति ।

(२) नन्वाप्यत्वश्रुतेः पार्थिवत्वादिप्रापकश्रुत्यन्तरविरोध इत्याशङ्क्य सयुक्तिकत्वेनास्याः प्राबल्यमित्याह—अम्मयमिति ॥ तुशब्दोऽवधारणे भिन्नक्रमः । यतो मांसमम्मयं, अत एव मांसतः तृप्तिर्जायते तर्पकत्वस्याब्धर्मत्वेन कार्यानुस्यूतेरावश्यकत्वादिति भावः । 'भारते' शरीरस्याप्यत्वे युक्तिरुक्तेति शेषः । शरीरैकदेशस्य मांसस्याप्यत्वे तर्पकत्वाख्ययुक्तिकथनाच्छरीरस्याप्याप्यत्वे युक्तिरुक्तप्रायेति भावः ।

(३) संशयकोट्यन्तरप्रदर्शनाय श्रुत्यन्तरमुदाहरति—पृथिवीमिति ॥ 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणः चक्षुरादित्यं मनश्चन्द्रं दिशःश्रोत्रं पृथिवीं शरीरमाकाशमात्मा' इति बृहदारण्यकश्रुतौ वागादीनामंशेन गमनमुक्त्वा आत्मशब्दितदेहान्तर्गतपरमात्मरूपस्याकाशपदोक्तमूलरूपप्राप्तिरुच्यते । तथाच पुरुषस्य वाक् अग्निमप्येति, पुरुषस्य शरीरं 'पृथिवीमप्येति' तत्र लीनं भवति, पुरुषस्य 'आत्मा' देहान्तर्गतो

इति च श्रुतिः

(४) अतो ब्रवीति—

सू—ॐ ॥ मांसादि भौमं
यथाशब्दमितरयोश्च ॥ ॐ ॥ २२ ॥

हरिः 'आकाशं' मूलरूपिणं परमात्मानं प्राप्नोतीत्यर्थः। 'आत्मा' जीवः आकाशं परमात्मानमाप्नोतीति व्याख्यानं तु 'पुरुषस्य' जीवस्य 'आत्मा' जीव इत्यन्वयायोगादयुक्तम्। 'आकाशाख्यं स्वरूपं तु विष्णुस्तद्धृदि संस्थितः' इति बृहद्भाष्यविरुद्धं च। इति श्रुतिरित्यनन्तरं शरीरस्य पार्थिवत्वमाहेति शेषः। चो भिन्नक्रमः समुच्चये। कार्यस्य कारण एवाप्ययनियमादन्नमयशरीरस्य पृथिवीकार्यत्वसिद्धिः। अनेन शरीरं पार्थिवमित्यपरः पूर्वः पक्षः प्रदर्शितो भवति। एवं शरीरस्य तैजसत्वपूर्वपक्षेऽपि 'सोऽग्नेर्देवयोन्या आहुतिभ्यः सम्भूय हिरण्यशरीर ऊर्ध्वः स्वर्गं लोकमेति' (ऐ.ब्रा. ७-४.) इति बह्वृचब्राह्मणवाक्यमुदाहर्तव्यम्। 'सः' यजमानो देवेभ्यः स्वदत्ताहुतिप्रदानेन देवपोषकत्वेन 'देवयोन्याः' देवमुखादग्नेः स्वेन दत्ताहुतिभ्यो निमित्तेभ्यो हिरण्यशरीरः 'सम्भूय' भूत्वा 'ऊर्ध्वः' ऊर्ध्वगतिस्सन् स्वर्गं लोकमेतीति श्रुत्यर्थः। एवं शरीरस्य भूतत्रयात्मकत्वेऽपि 'इमास्तिस्रो देवताः पुरुषं प्राप्य' (छा. ६-४-७.) इत्यादिश्रुतिरुदाहर्तव्या। 'इमाः' तेजोऽवन्नात्मिकाः तिस्रो देवताः।

(४) सिद्धान्तयत्सूत्रमवतार्य व्याचष्टे—अत इति ॥ यतोऽनेकधा विरुद्धश्रुतिरस्ति। यतश्च देहस्य भूतत्रयात्मकत्वश्रुतेः एकैकभूतोपादानकत्वश्रुतिविरोधेनाप्रामाण्ये तन्न्यायेन जगत्कारणत्वश्रुतेरप्यप्रामाण्यान्न तथा विष्णोर्जगत्कारणतासिद्धिः, अतस्तन्निराकरणार्थं सिद्धान्तमाह—सूत्रकार इत्यर्थः। इति श्रुतेरित्यनेन यथाशब्दमिति या श्रुतिः सूचिता, यच्च श्रुतेरङ्गीकारहेतुत्वं सूचितं तद्विवृतं भवति। तेन विपक्षे श्रुतिविरोध उक्तः। ग्रहणे 'यत्कठिनं' मांसादि सा पृथिवी। 'यद्रवं' शोणितादि तदापः। 'यदुष्णं' मज्जादि तत्तेज इति श्रुत्यर्थः। मांसादीनि शोणितादिमज्जादीन्यनयोरुपलक्षणम्। अतएव टीकायां शरीरेऽस्ति शोणितमज्जादी-

'यत्कठिनं सा पृथिवी यद्द्रवं तदापो यदुष्णं तत्तेजः'
(गर्भ. ३.) इति श्रुतेर्मांसाद्येव भौमं, न सर्वशरीरम्।
अप्तेजसोश्च कार्यं यथाशब्दमङ्गीकर्तव्यम्।

न्युक्तम्। तत्र प्रत्येकमादिशब्दान्वयः। अस्थिशोणितेत्यपपाठः। सूत्रे मध्यमधातुजन्यत्वेन मांसमनसयोः शोणितमज्जयोरेव ग्राह्यत्वात्, अस्तीति क्रियापदस्यैव अपेक्षितत्वाच्च। तत्र प्रथमादिशब्देन मनःपुरीषयोर्ग्रहणम्। द्वितीयेन मूत्रप्राणयोः, तृतीयेनास्थिवाचोर्ग्रहणम्। एवेत्यनेन पूर्वसूत्रादेवार्थस्य तुशब्दस्यानुवृत्तिस्सूचिता। चार्थो वा एवकारः। भौममित्येतत् आप्यं तैजसमित्यनयोरुपलक्षणम्। अत्र सर्वत्र तत्त्वप्रदीपोदाहृता सूत्रे यथाशब्दमित्यनेन सूचिता भाष्ये श्रुतेरित्यनेनोपलक्षिता टीकायामपि यथाशब्दन्यादित्यनेनोक्ता 'अन्नमशितं त्रेधा विधीयते तस्य यस्स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमः तन्मांसं योऽणिष्ठस्तन्मनः' (छा. ६-५-१.) इति तथा 'अन्नमयं हि सोम्य मनः' (छा. ६-६-५.) इति छन्दोगे पुरीषमांसमनसां पार्थिवत्वश्रुतिः, एवं 'आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुः तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठस्स प्राणः' (छा. ६-५-२.) इति तथा 'आपोमयः प्राणः' (छा. ६-६-५.) इति मूत्रशोणितप्राणानामाप्यत्वश्रुतिः, एवं 'तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुः तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक्' (छा. ६-५-३.) इति तथा 'तेजोमयी वाक्' (छा. ६-६-५.) इति चास्थिमज्जावाचां तैजसत्वश्रुतिश्च ज्ञापिकेति ध्येयम्। मांसाद्येवेत्यस्य व्यावर्त्यं दर्शयति—नेति। भौममित्यनुपज्यते। तर्हि शरीरे किमन्यदस्तीत्याशङ्क्यायां प्रवृत्तमितरयोरित्येतद्व्याचष्टे—अप्तेजसोरिति। इदं च भूमितेजसोः भूमिजलयोरित्यनयोरुपलक्षणम्। 'कार्यं' शोणितादि मज्जादि च। कार्यमित्यनन्तरं शरीरेऽस्तीति शेषः। अत एव टीकायामस्ति शोणितमज्जादीत्युक्तम। इतिशब्दोऽध्याहार्यः। अनेन सूत्रे कार्यमित्यादेः शेषो दर्शितः। न केवलं शरीरे भौमं मांसाद्येवास्ति, किं तर्हि अप्तेजसोश्च कार्यमस्तीति समुच्चये चशब्दः। यथाशब्दमित्येतत्क्रियाविशेषणमव्ययमिति भावेन अङ्गीकार्यमिति क्रियाध्याहारेण तद्योजितम्।

(५) 'यद्वावाथो विमिश्रं मिश्राद्धयेनद्भवति मिश्राणि हि भूतानि तस्मादेवमाचक्षते भूतानि' इति हि कापायणश्रुतिः ।

शब्दमनतिक्रम्य श्रुत्यनुसारेणेति तदर्थः । यद्वा—ननु कथं मांसस्य पार्थिवत्वमुच्यते 'आपो वाव मांसम्' (कौण्डिन्य.) इति श्रुत्या तर्पकत्वयुक्तया च विरोधादित्यत आह—अंतेजसोश्चेति । अत एव तत्त्वप्रदीपे मांसादि भौममुक्तमित्येतावता भौममेवेति नाशङ्क्यं, किन्त्वंतेजसोश्च कार्यं यथाशब्दमङ्गीकर्तव्यमिति अंतेजसोश्चेति भाष्यं प्रकारान्तरेणावतारितम् । अस्मिन् पक्षे नावधारणान्वयः, किन्तु 'मांसादि भौमं' न केवलं भौमं, किं तर्हि तत्रातेजसोश्च कार्यमङ्गीकार्यमित्यन्वयः । तथा च मांसादीनां अनेकभूतात्मकत्वाङ्गीकारान्न श्रुतियुक्तिविरोध इति भावः ॥

(५) मांसादीनामनेकभूतकार्यत्वाङ्गीकरणं शब्दानुसारेणोक्तम्, कोऽसौ शब्द इत्यतस्तं दर्शयति—यदिति ॥ वावेत्येवार्थे । हिः प्रसिद्धौ हेतौ च । तथा च 'यत्' यस्मात् विमिश्राणि भूतानीति प्रसिद्धं, 'अथो' तस्मात् यच्छरीरे मांसादि तदपि विमिश्रमेव स्यात् । न चाप्रयोजकता हेतोः, हि यस्मात् 'एतत्' मांसादि 'विमिश्रात्' भूम्यादेर्भवति 'अथो' तस्मात्कार्यस्य कारणानुरूपत्वादिति भावः । ननु भूतानां विमिश्रत्वमेव कुतोऽवगतमित्यतो भूतशब्दवाच्यत्वादित्याह—तस्मादेवेति । सम्भूतत्वात्सहभूतत्वाद्विमिश्रत्वादेवेत्यर्थः । अनेन वह्निमत्त्वादेव धूमवत्त्वमित्यादाविव विमिश्रत्वादेव पृथिव्यादीनि भूतानीत्येवमाचक्षते विद्वांस इत्युक्त्वा विमिश्रत्वस्य व्यापकता भूतशब्दवाच्यत्वस्य तु व्याप्यता बोध्यते । तच्छब्दप्रवृत्तिनिमित्तत्वात् तस्य, तदभावे तच्छब्दप्रवृत्त्ययोगात् । वस्तुतो भूतानामादिसृष्टौ मिश्रत्वेनैव सृष्टत्वाच्चेति भावः । अत्र तत्त्वप्रदीपे विमिश्रं शरीरादि मांसादि चेति व्याख्यानेन शरीरे अंतेजसोश्च कार्यमस्तीत्यत्रापीयं श्रुतिः प्रमाणमिति सूचनाच्छङ्कोत्तरटीका शरीरविषयतयाऽपि व्याख्येया । श्रुतिरित्यनन्तरं मांसादीनामनेकभूतकार्यत्वं शरीरस्याप्यनेकभूतात्मकत्वं वक्तीति शेषः । अनेन—यच्छरीरे मांसादि तदेव भौमम्, न सर्वशरीरं, किं तर्हि शरीरे 'इतरयोः' अंतेजसोश्च कार्यं शोणितमज्जाद्यस्तीत्यङ्गीकार्यम् । कुतो ? यतः तदङ्गीकरणं 'यत्कठिनम्' इति 'अन्न-

(६) पञ्चभूतात्मकं सर्वं तदप्येकविवक्षया ।
एकभूतात्मकत्वेन व्यवहारस्तु वैदिके ॥
(७) भौममित्येव काठिन्याच्छौक्ल्यादौदकमित्यपि ।

मयम्' इति 'यद्वाव' इति च श्रुत्यनुसारि भवति अतः। अथ वा—न केवलं मांसादि भौमं, किन्तु मांसादौ 'इतरयोः' अतेजसोश्च कार्यमस्तीत्यङ्गीकार्यम्। कुतो ? यतो 'यथाशब्दं' तद्भवति 'यद्वाव' इति श्रुत्यनुसारि भवति अतः। यत एवमतो न मांसस्याप्यत्वे युक्तिविरोध इति सूत्रार्थ उक्तो भवति।

(६) मांसादीनामनेकभूतकार्यत्वात् तदपेक्षयाऽऽप्यत्वाद्युक्तिर्युक्तेत्युक्तार्थं स्मृतिं चाह—पञ्चेति ॥ यद्यपि पार्थिवादिसर्वशरीरेष्वपि मांसादिकं सर्वमेकैकशः पञ्चभूतात्मकं 'तदपि' तथाऽपि 'एकविवक्षया' एकैकभूतसम्बन्धविवक्षया 'एकभूतात्मकत्वेन' एकभूतकार्यत्वेन भौममित्यादिरूपेण वैदिकवचने व्यवहारोऽस्ति।

(७) एतदेव विवृणोति—भौममित्यादिना ॥ काठिन्याच्छौक्ल्यात् ततोऽवगताद्भूजलसम्बन्धात् 'तेजिष्ठत्वात्' अतिशयिततेजोभागवत्त्वादेकस्यैव भौममित्याद्यनेकशब्दव्यवहारभाक्त्वं भवतीत्यर्थः। तदुदाहृत्य दर्शयति—यथेति। भौमत्वादिनेति शेषः। तत्र 'यत्कठिनम्' इति सामान्यश्रुतौ काठिन्यादवगनात् भूतसम्बन्धात् अस्थ्नां भौमत्वेन वचनम्, 'अस्थि च भवन्त्यापः' (कौण्डिन्य.) इति श्रुतौ च शौक्ल्यादवगतादप्सम्बन्धादौदकमित्याप्यत्वेन व्यवहारः, 'तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुः तदस्थि भवति' (छा. ६-५-३.) इति श्रुतौ च तेजिष्ठत्वान्निमित्तादस्थिषु तैजसत्वेन वचनमिति ज्ञेयम्। इयं च योजना यत्र प्रायो भूतसाम्यं तस्मिंस्तस्मिन्नंशे एकैकभूतानूनत्वविवक्षया तत्तदात्मकत्वं श्रुतिपूच्यते इत्युक्तिनानात्वेऽप्यविरोध इति तत्त्वप्रदीपेऽपि प्रदर्शिता। अत्रास्थ्नामित्यस्थिपदेन भूतसाम्यस्थलीयास्थिग्रहणम्। तथा च भूतसाम्यस्थले काठिन्यादिनिमित्तेनैकत्रैव भौममित्याद्यनेकव्यवहारस्तस्यैवोदाहरणेन प्रदर्शनं यथाऽस्थामित्यर्थः। पञ्चभूतात्मकमित्येतदेव तत्त्वप्रदीपे—एवं ग्रहणे 'यत्कठिनं' सा पृथिवी' इत्याद्युक्तिविरोध इत्यत आह, इत्यवतार्य मांसादि सर्वमप्ये-

तेजिष्ठत्वात्तेजसं च यथाऽस्थ्नां वचनं श्रुतौ ॥
इति वायुप्रोक्ते ॥ २२ ॥

(८) कथं तर्हि विशेषवचनमित्यत आह—

सू—ॐ॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥ॐ॥ २३॥

कैकशः पञ्चभूतात्मकं तत्र प्राधान्यविवक्षया भौमं मांसमित्यादिव्यवहारः।

सर्वं च भौतिकं मिश्रं मिश्रत्वेऽपि विशेषितम्।
भौमं मांसमसृग्वारि तेजो मज्जा विशेषतः ॥

इत्यादेश्चेति प्रकारान्तरेणापि व्याख्यानम्। अस्मिन् पक्षे 'एकविवक्षया' इत्यस्येकैकभूतप्राचुर्यस्थले एकैकभूतप्राचुर्यविवक्षयेत्यर्थः। भूतसाम्यस्थले चैकैकभूतानूनत्वविवक्षयेति चार्थः। 'भौममित्येव' इत्यादेश्च काठिन्यादिनिमित्तेन मांसादिषु पृथिव्यादिप्राचुर्यविवक्षया भौमत्वादिव्यवहार इत्यर्थः। अत एव तेजिष्ठत्वादिति इष्ठन्प्रत्ययेनास्थ्नि तेजोभागप्राचुर्यमवगम्यते। एतच्चोपलक्षणम्, अस्थ्नामित्यप्युपलक्षणम्। मांसादेर्भौमत्वादिवचनमित्यपि द्रष्टव्यम्। इयं च विशेषोक्तिर्गतिप्रदर्शकोत्तरसूत्रसूचिता योजना। अत एव टीकाकृता नोक्ता। तत्त्वप्रदीपकृता तु वक्ष्यमाणैव भाष्योदाहृतस्मृत्यर्थतयाऽपि दर्शिता। वायुप्रोक्त इत्यनन्तरमुक्तत्वादेकैकस्मिन्नेव मांसादावाप्यत्वाद्यनेकोक्तिर्युक्तेति वाक्यशेषः॥

(८) यदि शरीरं नैकभूतप्रकृतिकं, कथं तर्हि विशेषोक्तिरित्युक्तार्थमाशङ्क्य तत्परिहाराय सूत्रमवतार्य व्याचष्टे—कथमिति॥ तर्हीति श्रवणात् यदीति लभ्यते। यदि शरीरं नैकभूतोपादानकमिति तदर्थः। विशेषवचनमिति। आपः शरीरं, पृथिवी शरीरं, हिरण्यशरीर इति विशेषोक्तिरित्यर्थः। एवमिदमेव वाक्यं यदि मांसादिकं नैकभूतप्रकृतिकं, कथं तर्हि भौमं मांसमित्यादिविशेषव्यवहार इत्यप्यवतारणीयम्। भूतानामिति। पृथिव्यादिभूतानां पार्थिवादिशरीरेषु मांसादिषु च 'विशेषसंयोगात्' सम्बन्धाधिक्यात्तदपेक्षयैव 'विशेषव्यवहारः' पार्थिवमाप्यमित्यादिविशेषोक्तिरित्यर्थः। न तु एकैकभूतात्मकत्वादित्येवार्थः। उपपद्यते यत इति शेषः। अस्यातो न विशेषोक्तिविरोध इति लब्धसाध्येनान्वयः। अनेन—

भूतानां तु विशेषसंयोगादेव विशेषव्यवहारः ।
(९) पार्थिवानां शरीराणामर्धेन पृथिवी स्मृता ।
इतरेऽर्धे त्रिभागिन्य आपस्तेजस्तु भागतः ॥
इति सामान्यतो ज्ञेयं भेदश्च प्रतिपूरुषम् ।
स्वर्गस्थानां शरीराणामर्धं तेज उदाहृतम् ॥
इति च बृहत्संहितायाम् ।

सूत्रे तुरेवार्थः । तच्छब्दो वैशेष्यपरः । वैशेष्यशब्दश्च स्वार्थे ष्यञन्तो वा विशेषिणां भाव इति भावे ष्यञन्ते वा भूतानां धर्मिणां विशेषसंयोगपरः । पञ्चमी न्यक्कोपनिमित्तेति सूचितम् । तथा च यतः 'तद्गुणः' आपः अगन्, आपो वाद्यगन्धाद्यविशेषिताः 'विशेषात्तु' भूतानां धर्मिणां संयोगाधिक्यमपेक्ष्यैवोपपद्यते, अतो न शरीरस्य मांसादेर्वा नैकभूतोपादानकत्वे तद्विरोधः शङ्क्य इति सूत्रार्थ उक्तो भवति ।

(९) ननु शरीरे मांसादिषु वा भूतानां विशेषसंयोग एव कुतः?, सर्वशरीरेषु सर्वभूतानां विशेषसंयोगभावे च पुनः एकैकभूतप्राचुर्यविवक्षया पार्थिवादिविशेषोक्त्ययोग इत्यत आह--पार्थिवानामिति ॥ पृथिवीस्थितानां स्थलजानां शरीराणां 'अर्धेन भागेन पृथिवी स्मृता' तेष्वर्धं पृथिवीभाग इत्यर्थः । तेषामर्धादितरस्मिन् अर्धे 'त्रिभागिन्य आपः' त्रयोऽब्भागाः, तत्र स्मृता इति यावत् । 'भागतस्तु तेजो' भागमात्रं तेजः एकस्तत्र तेजोभाग इत्यर्थः । स्मृत इति विपरिणामेनानुषज्यते । एवं सामान्यतः पार्थिवाप्यशरीरेषु सर्वेष्वपि स्वस्वभागचतुष्टयमस्तीति ज्ञेयम् । अयं विशेषो न पार्थिवादिषु नियतः, किन्तु सर्वत्र नियत इत्याह—भेदश्चेति । विशेषसंयोग इत्यर्थः । 'प्रतिपूरुषं' पार्थिवादिप्रतिशरीरं सर्वशरीरेष्वपि नियत इत्यर्थः । तथाच पार्थिवादिदेहभेदेन तत्तद्भूतविशेषसंयोगस्य प्रमाणोक्तत्वात् न तस्यासिद्धिः, न वा तद्भावपक्षोक्तदोष इति भावः । तैजसशरीरेष्वेतं विशेषमाह—स्वर्गस्थानामिति । 'इतरेऽर्धे त्रिभागिन्य आपः' इति स्वर्गशरीरेऽपि बोद्धव्यमिति तत्त्वप्रदीपोक्तेः 'इतरेऽर्धे त्रिभागिन्य आपः' इत्यत्राप्यनुषञ्जनीयम् । तथा तेजःपदस्थाने

(१०) सर्वाध्यायार्थावधारणार्थाऽध्यायान्ते द्विरुक्तिः ।

(११) गारुडे च—

अध्यायान्ते द्विरुक्तिस्याद्वेदे वा वैदिकेऽपि वा ।
विचारो यत्र सज्येत पूर्वोक्तस्यावधारणे ॥

(१२) अनुक्तानां प्रमाणानां स्वीकारश्च कृतो भवेत् ।

पृथिव्यापदं प्रक्षिप्य पृथिव्या भागत इत्येतदपि । तथा च अर्धं तेजः इतरेऽर्धे त्रिभागिन्य आपः पृथिवी तु भागतः उदाहृता इत्यर्थः । एवं जलजानां शरीरेष्वर्धमापः इतरेऽर्धे त्रिभागिनी पृथिवी भागमात्रं तेज इत्यपि द्रष्टव्यम् । 'बृहत्संहितायां' वचनादिति शेषः । अस्य विशेषसंयोगादेवेति पूर्वभागेनान्वयः ।

(१०) ननु किमर्थेयं सूत्रपदे द्विरुक्तिः । अध्यायसमाप्तिज्ञापनार्थमिति चेत्, तस्या अर्थभेदेन ज्ञातुं शक्यत्वात् । अन्यथा पादान्तेऽपि तत्प्रसङ्गादित्यतो द्विरुक्तेः प्रयोजनं दर्शयति—सर्वेति ॥ सर्वो योऽयमध्यायार्थः तस्यैवमेवेत्यवधारणं निश्चयस्तदर्थः प्रयोजनं यस्याः सा तथोक्ता । 'द्विरुक्तिः' द्विर्वचनं 'अध्यायान्ते' सर्वाध्यायान्तिमसूत्रे । पदस्य क्रियते इति शेषः ।

(११) उक्तमेव किमर्थमुच्यत इत्यतोऽनुक्तमपि प्रयोजनं प्रमाणविशेषेणाह—गारुडे चेति ॥ पूर्वाध्यायोक्तस्मृतिसमुच्चये, न केवलमस्माभिः, किंतु गारुडे चेति समुच्चये वा चशब्दः । 'अध्यायान्ते' अध्यायान्तिमसूत्रेषु पदस्येति शेषः । 'वैदिके' वेदानुसारिषु । अपिः समुच्चये । वावेति निपातौ नियमसूचकौ । भागवतादावुक्तनियमस्य व्यभिचारमाशङ्क्याह—विचार इति । व्यापकधर्मनिर्णयहेतुव्याप्यधर्मनिश्चय इत्यर्थः । यथोक्तं 'जिज्ञासा धर्मनिर्णयः' इति । यद्वा—पूर्वोत्तरपक्षबलाबलचिन्तेत्यर्थः । 'यत्र' यस्मिन् ग्रन्थे 'सज्येत' सम्बध्येत येन क्रियेत इति यावत् । तत्राध्यायान्त इति पूर्वेणान्वयः । पूर्वोक्तस्येति । अध्यायादिमारभ्योक्तार्थस्येत्यर्थः 'अवधारणे' अवधारणार्थम् ।

(१२) उक्तमुक्त्वा द्विरुक्तेः पूर्वानुक्तं प्रयोजनविशेषमाह—अनुक्तानामिति ॥ सूत्रपदैर्मुखतोऽनुक्तानामित्यर्थः । सूचितानामिति यावत् ।

विनिन्द्य चेतरान् मार्गान् सम्पूर्णफलता तथा ॥

इति च ॥

॥ इति मांसाधिकरणम् ॥ १३ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते ब्रह्मसूत्रभाष्ये
द्वितीयाध्यायस्य चतुर्थः पादः

॥ द्वितीयाध्यायस्समाप्तः ॥

॥ ॐ ॥

'स्वीकारः' सङ्ग्रहो द्विरुक्तेरिति शेषः। प्रयोजनविशेषान्तरमाह--विनिन्द्येति। 'इतरान्' सूत्रतदनुकूलेतरान् 'मार्गान्' ज्ञानोपायान् तथाविधानि शास्त्राणि 'विनिन्द्य' विषयादिशून्यत्वेन अनुपादेयानीति गर्हयित्वा अनुक्तानां प्रमाणानां स्वीकारश्च कृतो भवेदित्यन्वयः। अनेन निन्दनार्थं प्रयोजनं सूचितम्। द्विरुक्तेः प्रयोजनविशेषान्तरं चाह—सम्पूर्णेति। विशिष्टमोक्षसाधनतेत्यर्थः। तथाशब्दः समुच्चये। शास्त्रस्योक्ता भवतीति शेषः। इति गारुडे इत्यन्वयः। अस्य सर्वाध्यायेत्यादिनोक्तमुक्तमित्यध्याहृतेनान्वयः।

॥ इति मांसाधिकरणम् ॥ १३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां
श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण श्रीमज्जगन्नाथयतिना
कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां
द्वितीयाध्यायस्य चतुर्थः पादः

॥ द्वितीयाध्यायस्समाप्तः ॥

॥ ॐ ॥

॥ श्रीः ॥

श्रीजगन्नाथयतिकृता

सूत्रदीपिका

॥ श्रीमद्भनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मक
लक्ष्मीहयग्रीवाय नमः ॥

॥ द्वितीयाध्यायस्य प्रथमः पादः ॥

॥ स्मृत्यधिकरणम् ॥ १ ॥

(१) ॐ **स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॐ** ॥ यतः स्मृत्यनवकाशदोषप्रसङ्गः स्मृतीनां पाशुपतादिरूपाणां अनवकाशेन विष्णुजगत्कर्तृत्वादौ निरवकाशत्वेन श्रुतीनां विष्णुकारणतापरत्वे तद्विरोधेन दोषप्रसङ्गः अप्रामाण्याख्यदोषप्राप्तिरस्ति । अतः न श्रुतीनां विष्णुकारणतापरत्वं युक्तम । किन्तु शिवादिकर्तृतापरत्वमेव युक्तमितिचेन्न । कुतः अन्यस्मृत्यनवकाशदोषप्रसङ्गात् पाशुपतादिभ्यो अन्यासां श्रुतिसंवादित्वेन रुद्राद्यपेक्षया सर्वज्ञतमविष्वादिप्रणीतत्वेन च इतरस्मृतिभ्यः प्रबलानां पञ्चरात्रादिस्मृतीनां अनवकाशेन रुद्रादिजगत्कर्तृत्वादौ निरवकाशेन तद्विरुद्धशैवादिस्मृतीनां । दोषप्रसङ्गात् अप्रामाण्याख्यदोषेण प्रकर्षेण सम्बन्धाङ्गीकारेण तद्विरोधस्याकिञ्चित्करत्वादित्यर्थः ॥ १ ॥

(२) ॐ **इतरेषां चानुपलब्धेः ॐ** ॥ अनुपलब्धेरित्यावर्तते । चशब्दः किञ्चित्फलोपलब्ध्यङ्गीकारसूचकः । तथाचानुपलब्धेः अतीन्द्रियात् । इतरेषां भिन्नानां प्रत्यक्षयोग्यानां पाशुपतादयुक्तफलानां अनिष्टानां च तदुक्तक्रियानुष्ठानपरित्यागयोः कृतयोरप्यनुपलब्धेः प्रत्यक्षतोऽदर्शनात् तासामप्रामाण्यमेव युक्तमित्यर्थः ॥ २ ॥

(३) ॐ एतेन योगः प्रत्युक्तः ॐ ॥ एतेन फलादर्शनलक्षणपूर्वोक्तहेतुनैव । योगः योगशास्त्रम् । प्रत्युक्तः निरस्तमित्यर्थः ॥ ३ ॥

॥ नविलक्षणत्वाऽधिकरणम् ॥ २ ॥

(४) ॐ नविलक्षणत्वादस्य तथात्वं च शब्दात् ॐ ॥ अस्य श्रुतितदनुसारिस्मृत्यादेः न शैवादिस्मृतिवदप्रामाण्यम् । कुतः विलक्षणत्वात् स्वतःप्रामाण्याख्येतरवैलक्षण्यात् । किञ्च श्रुतेर्नित्यत्वाख्यवैलक्षण्यवत्त्वात । स्मृतेः श्रुत्यनुसारित्वाख्यवैलक्षण्यवत्त्वाच्च नाप्रामाण्यं तथात्वं च उक्तवैलक्षण्यवत्त्वं च । शब्दात् वाचा विरूप नित्यया (ऋ० ८-६४-६) इत्यागमान्निश्चितमित्यर्थः ॥ १ ॥

(५) ॐ दृश्यते तु ॐ ॥ तुशब्दो विशेषार्थे । यतः तत्फलयोग्याधिकारिविशेषाणां श्रुत्याद्युक्तं फलं दृश्यते उपलभ्यते । अतो नाप्रामाण्यमित्यर्थः ॥ २ ॥

॥ अभिमान्यधिकरणम् ॥ ३ ॥

(६) ॐ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॐ ॥ तुशब्दोऽवधारणे । अभिमानिव्यपदेशः मृदब्रवीदित्यादौ अभिमानिनश्चेतनस्यैव व्यपदेशः उक्तिः न त्वचेतनस्य । कुतः नन्न वक्त्री जडत्वादिति युक्तिविरुद्धत्वात् । तथा च न वेदाप्रामाण्यम् । नन्वभिमानिनः विदेहत्वायोगेन सदेहत्वे तस्यादर्शनं अन्यवस्त्वधिष्ठानेन वक्तृत्वं अनेकाभिमन्यमानाधिष्ठातृत्वं चेत्यादिकं कथं युज्यत इत्यत उक्तम् । विशेषेत्यादि । विशेषः सामर्थ्यम् । अनुगतिः सर्वाभिमन्यमानव्याप्तिः । ताभ्यां सर्वं युज्यत इत्यर्थः ॥ १ ॥

(७) ॐ दृश्यते च ॐ ॥ अभिमानिदेवतायां सामर्थ्यं योगिभिः उपलभ्यते च । अतोऽपि नादर्शनविरोधइत्यर्थः ॥ २ ॥

॥ असदधिकरणम् ॥ ४ ॥

(८) ॐ **असदितिचेन्न प्रतिषेधमात्रत्वात्** ॐ ॥ असत् विश्वप्रागभाव एव । जगत्कर्तृत्वे नेश्वर इति चेन्न । कुतः प्रतिषेधमात्रत्वात् अभावधर्मात्मतामन्तरेण स्वरूपत एव निषेधबुद्धिविषयत्वादित्यर्थः ॥ १ ॥

(९) ॐ **अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्** ॐ ॥ अपीतौ प्रलये । तद्वत्प्रसङ्गात् । असन्मात्रवत्त्वप्रसङ्गात् । असत्कर्तृत्वं असमञ्जसं अयुक्तमित्यर्थः ॥ २ ॥

(१०) ॐ **ननु दृष्टान्तभावात्** ॐ ॥ तुगन्तोऽवधारणे । प्रलये सर्वासत्त्वं न युज्यते । कुतः तदा सर्वपदार्थसत्त्व एव दृष्टान्तस्य । भावात् सद्भावादित्यर्थः ॥ ३ ॥

(११) ॐ **स्वपक्षदोषाच्च** ॐ ॥ स्वपक्षे प्रलये सर्वासत्त्वपक्षे । दोषात् दृष्टान्ताभावाख्यदोषाच्च न तत्पक्षो युक्त इत्यर्थः ॥ ४ ॥

(१२) ॐ **तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः** ॐ ॥ तर्काप्रतिष्ठानात् दृष्टान्ताभावादिरूपतर्कस्याप्रतिष्ठानात् अव्यवस्थितत्वात् । अन्यथापि सिद्धान्तयुक्तप्रकारात् । अन्यरूपेणापि प्रतितर्केणानुमेयं साधनीयमिति चेत् । नेति शेषः । कुतः एवमपि एवं सति तर्कमात्रस्याप्रामाण्ये सति । अनिर्मोक्षप्रसङ्गः सर्वसिद्धान्तिभिः स्वस्वशास्त्रप्रयोजनत्वेनाङ्गीकृतस्यापि मोक्षस्यापि लोपप्रसङ्गः । कुतः तस्य विप्रतिपन्नं प्रति अनुमानेनैव साधनीयतया तस्याप्येवमप्रामाण्योक्तिसम्भवादित्यर्थः ॥ ५ ॥

(१३) ॐ **एतेन शिष्टा अपरिग्रहा अपि व्याख्याताः** ॐ ॥ एतेन स्वपरपक्षयोः दृष्टान्तभावाभावाख्यहेतुना । अपरिग्रहाः वेदपरिग्रहशून्याः । तद्विरुद्धाश्च । शिष्टाः अवशिष्टाः जीवकालस्वभावकर्तृत्वपक्षा अपि । व्याख्याताः प्रत्याख्याताः दूषिता इत्यर्थः ॥ ६ ॥

॥ भोक्त्राधिकरणम् ॥ ५ ॥

(१४) ॐ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॐ ॥ भोक्त्रापत्तेः यस्माद्भोक्तुः जीवस्य "परेऽव्यये सर्व एकीभवन्ति" (मु. ३-२-७) इति वाक्ये ब्रह्मभावापत्तेः श्रवणात् । तयोरविभागः भेदाभावः । तस्मादल्पजीवाभिन्नब्रह्मणः जगत्कारणत्वं न युक्तमिति चेत् । नेतिशेषः । कुतः यतः लोकवत् यथा लोके जले जलान्तरस्यैकीभावोक्तिस्तथात्रापि स्यानैक्याद्यालम्बनेन जीवेशयोः एकीभवन्तीत्यैक्योक्तिः स्यात् उपचरिता भवेत् । अतो नोक्तदोष इत्यर्थः ॥ १ ॥

॥ आरम्भणाधिकरणम् ॥ ६ ॥

(१५) ॐ तदनन्यत्वमारम्भणशब्दादिभ्यः ॐ ॥ तदनन्यत्वं तस्य स्वतन्त्रकारणस्य ब्रह्माभिन्नत्वं वाच्यम् । कुतः आरम्भणशब्दादिभ्यः आरम्भणे फलोपलक्षितकिंस्विदासीदि (ऋ० १०-८१-२) त्यधिष्ठा- [illegible] ॥ १ ॥

(१६) ॐ भावे चोपलब्धेः ॐ ॥ यतः ईक्षणान्यस्वतन्त्रसाधनस्य भावे सत्त्वे । उपलब्धेः दर्शनस्य । प्रसङ्ग इति शेषः । अतोऽपि नास्त्यन्यत्स्वतन्त्रसाधनमित्यर्थः ॥ २ ॥

(१७) ॐ सत्वाच्चावरस्य ॐ ॥ चोऽवधारणे । अवरस्य अस्वतन्त्रसाधनस्य सत्त्वादेव "अद्भ्यः सम्भूतः" इति (तै. आ. ३-१३) वाक्यं तत्परं भवतीति न तद्विरोध इत्यर्थः ॥ ३ ॥

(१८) ॐ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॐ ॥ असद्व्यपदेशात् "नासदासीत्" इत्यन्यस्यासत्त्ववचनात् । अन्यसत्त्वं न युक्तमिति चेन्न । कुतः यतः तन्निषेधः धर्मान्तरेणास्वातन्त्र्यादिधर्मविशेषेण युज्यते । कुत एतत् वाक्यशेषात् । "तम आसीत्" (ऋ १०-१२९-३) इत्यवशिष्टवाक्यशेषादित्यर्थः ॥ ४ ॥

(१९) ॐ **युक्तेः शब्दान्तराच्च** ॐ ॥ प्रलये युक्तेः लीलया दण्डमवष्टभ्य गन्तुः पङ्गुत्वाभाववत् भगवतोऽपि लीलया स्वाधीनसाधनावलम्बस्य युक्तत्वात् । शब्दान्तरात् । तस्माच्छक्तोऽपीत्यागमविशेषाच्च उक्तं युक्तमित्यर्थः ॥ ५ ॥

(२०) ॐ **पटवच्च** ॐ ॥ पटसृष्टिवच्च विश्वसृष्टिरपि कर्तृभिन्नसाधनान्तर-साध्येत्यर्थः ॥ ६ ॥

(२१) ॐ **यथा प्राणादिः** ॐ ॥ यथा प्राणदेहेन्द्रियादिकं न स्वतन्त्रम् । एवं प्रकृत्यादिसाधनान्तरमपीत्यर्थः ॥ ७ ॥

॥ इतरव्यपदेशाधिकरणम् ॥ ७ ॥

(२२) ॐ **इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः** ॐ ॥ इति यदि तर्हीति च शेषः । इतरव्यपदेशात् "जीवाद्भवन्ती"ति श्रुतावुक्तत्वात् । स एव कर्ता नेश्वर इति । यदि तर्हि हिताकरणादिदोषप्रसक्तिः जीवनिष्ठयोः हितानाचरणाहिताचरणयोर्दोषत्वप्रसङ्गः । जीवस्य स्वतन्त्रत्वात् ते न स्यातामिति भावः । विद्येते च ते जीवे तस्मान्न जीवः स्वतन्त्रकर्तेत्यर्थः ॥ १ ॥

(२३) ॐ **अधिकन्तु भेदनिर्देशात्** ॐ ॥ तुशब्दः जीवसाम्यव्यावर्तकः । ब्रह्म तु जीवापेक्षया अधिकम् । कुतः श्रोता मन्ता (ऐ.आ.३-२-४.) इत्यादौ श्रोतृत्वादिरूपविशेषस्योक्तत्वादित्यर्थः ॥ २ ॥

(२४) ॐ **अश्मादिवच्च तदनुपपत्तिः** ॐ ॥ चशब्दोऽपिशब्दार्थः । अश्मादिवत् । पाषाणादेरिव । अपि जीवस्य चेतनत्वेऽपि । तदनुप-पत्तिः अस्वातन्त्र्यात् स्वतः कर्तृत्वानुपपत्तेरित्यर्थः ॥ ३ ॥

(२५) ॐ **उपसंहारदर्शनान्नेतिचेन्न क्षीरवद्धि** ॐ ॥ उपसंहारदर्शनात् जीवेनारब्धकार्यस्य समापनदर्शनात् । स एव कर्तेति उक्तब्रह्मकर्तृत्वं नेति चेन्न । कुतः हि यस्मात् । क्षीरवत् गोषु दृश्यमानक्षीरस्य

यथा मुख्यप्राणकर्तृत्वं तथा जीवकृतोपसंहारोऽपि परमात्मकृत एवेत्यर्थः । हिशब्देनात्रार्थे "अन्नम" इति प्रमाणप्रसिद्धिश्च सूचिता ॥ ४ ॥

(२६) ॐ देवादिवदपि लोके ॐ ॥ एवम्भूतेश्वरस्यापि देवादिवत अदर्शनं युज्यते । कथमेतदित्यत उक्तम् । लोक इति । लोके जगति पिशाचादीनामपि अदृश्यत्वादिशक्तिर्दृष्टा । सर्वेश्वरस्य तु किं वाच्यमित्यर्थः ॥ ५ ॥

(२७) ॐ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॐ ॥ वाशब्दः पक्षभेदेन दोषापादनसूचकः । जीवस्य स्वतःकर्तृत्वे सर्वकात्स्न्र्येन प्रवर्तने चाङ्गीकृते कृत्स्नप्रसक्तिः तृणादानादिसर्वकार्येष्वपि सर्वसामर्थ्यप्रवृत्तिप्रसङ्गः । तत्परिहाराय एकदेशेन प्रवृत्त्यभ्युपगमे च निरवयवत्वशब्दकोपः " नित्यो निरवयवः " इति (भाल्लवेय) श्रुतिविरोधःस्यादित्यर्थः ॥ ६ ॥

॥ श्रुतेस्तु शब्दमूलत्वाधिकरणम् ॥ ८ ॥

(२८) ॐ श्रुतेस्तु शब्दमूलत्वात् ॐ ॥ ईश्वरकर्तृत्वपक्षे तु कृत्स्नप्रसक्तिरित्यादिना जीवकर्तृत्वपक्षोक्तयुक्तिविरोधदोषो नास्ति । कुतः श्रुतेस्तु "योऽसौ विरुद्ध" (पैंगि) इति श्रुतेरेव । नन्वेतावता कथं युक्तिविरोधशान्तिरित्यत उक्तम् । शब्दमूलत्वादिति । ईश्वरतद्धर्माणां शब्दैकप्रमाणवत्वे युक्त्यविषयत्वात् न तत्र युक्तिविरोधः प्रवर्तते । जीवे तु न तथा । तस्य प्रमाणान्तरेणापि गम्यत्वादित्यर्थः ॥ १ ॥

(२९) ॐ आत्मनि चैवं विचित्राश्च हि ॐ ॥ आद्यश्चशब्दोऽवधारणे । द्वितीयः समुच्चये । हिशब्दः प्रसिद्धौ । तथा च हिशब्दात् । आत्मनि ईश्वर एव । एवं सकलयुक्तिविरोधनिरासकाः विचित्राः अचिन्त्याः "विचित्रशक्तिः" इति श्रुतिप्रसिद्धाः शक्तयः सन्ति न जीवे । तस्माच्च जीवपक्ष एव युक्तिविरोधः नेश्वरपक्ष इत्यर्थः ॥२॥

॥ श्रीः ॥

द्वितीयाध्यायस्य द्वितीयः पादः

॥ रचनानुपपत्त्यधिकरणम् ॥ १ ॥

(१) ॐ **रचनानुपपत्तेश्च नानुमानम् ॐ** ॥ अनुमीयत इत्यनुमानम् । साङ्ख्यानुमानकल्पितं प्रधानं न जगत्कर्तृ । कुतः **रचनानुपपत्तेः** प्रधानस्य जडत्वेन स्वतः प्रवृत्त्यनुपपत्तेः । अचेतनस्य स्वतः प्रवृत्तौ प्रमाणाभावाच्चेत्यर्थः ॥ १ ॥

(२) ॐ **प्रवृत्तेश्च** ॐ ॥ अहं करोमीति चेतनस्यैव प्रवृत्तेर्दर्शनाच्च न प्रधानं जगत्कर्तृ इत्यर्थः ॥ २ ॥

(३) ॐ **पयोऽम्बुवच्चेत्तत्रापि** ॐ ॥ अपिशब्दश्चेतनप्रवृत्त्याकर्षणार्थः । पयोऽम्बुवत् यथाऽचेतनयोः पयोऽम्बुनोः प्रवृत्तिर्दृष्टा तथा प्रधानस्याप्यस्विति चेन्न । कुतः यतस्तत्रापि पयोऽम्बादावपि अन्ततः ईश्वरादेव प्रवृत्तिः । न स्वतः प्रवृत्तिरित्यर्थः ॥ ३ ॥

(४) ॐ **व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॐ** ॥ व्यतिरेकानवस्थितेः "नक्ऋते" (ऋ. १०-११३-९) इति श्रुत्या ईश्वरव्यतिरेकेण कस्यापि कर्मणः असत्त्वावगमात् । तत एवाचेतनस्यैव स्वतः प्रवृत्तिरिति निरीश्वरसाङ्ख्यमतस्याप्रामाणिकत्वात् । अतएवानपेक्षत्वात् सद्भिरनादरणीयत्वान्नतद्विरोधो विष्णुकर्तृत्वस्येत्यर्थः ॥ ४ ॥

॥ अन्यत्राभावाधिकरणम् ॥ २ ॥

(५) ॐ **अन्यत्राभावाच्च न तृणादिवत् ॐ** ॥ तृणादिवत् यथा पृथिवीजन्यतृणादिकार्ये पर्जन्यः सहकारिमात्रं तथा प्रकृतिजन्यमहदादिकार्येऽपीश्वरः अनुग्राहकः । न स्वतन्त्र इति सेश्वरसाङ्ख्यपक्षोऽपि न । कुतः अन्यत्राभावात् ईश्वरादन्यत्र तत्प्रेरणां विना जगतोऽभावादीश्वरस्य प्रकृतिसत्तादिप्रदत्वाच्चेत्यर्थः ॥ १ ॥

॥ अभ्युपगमाधिकरणम् ॥ ३ ॥

(६) ॐ **अभ्युपगमेऽप्यर्थाभावात्** ॐ ॥ नेत्यनुवर्तते । अनभ्युपगमेऽपि चार्वाकैः स्वशास्त्रस्य सिद्धान्तत्वानभ्युपगमे सिद्धमस्मदिष्टम् । अभ्युपगमेऽपि अर्थाभावात् सिद्धान्तत्वव्यापकयोः अर्थशब्दितविषयप्रयोजनयोः असत्त्वाङ्गीकारात् स्वव्याघातः स्यादिति न तत्पक्षोऽपि युक्त इत्यर्थः । ॥ १ ॥

॥ पुरुषाश्माधिकरणम् ॥ ४ ॥

(७) ॐ **पुरुषाश्मवदिति चेत्तत्रापि** ॐ ॥ पुरुषाश्मवत् यथा पुरुषसम्बन्धादचेतनं शरीरं अश्मानयनादौ प्रवर्तते तथा अचेतनप्रकृतिः चेतनसम्बन्धात्प्रवर्तत इति चेन्न । कुतः यतः तत्रापि शरीरप्रवृत्तावपि चेतनस्य ईश्वरस्यैव कर्तृत्वं । न दृष्टान्ताभावः । अत इत्यर्थः ॥ १ ॥

(८) ॐ **अङ्गित्वानुपपत्तेः** ॐ ॥ पुरुषस्याङ्गत्वेऽङ्गीकृते सति "अङ्गमङ्गीति" वाक्ये अङ्गित्वस्य प्राधान्यस्य उक्त्यनुपपत्तेः । न पुरुषोपसर्जनप्रकृतिकर्तृत्वपक्षे दृष्टान्तोऽस्तीत्यर्थः ॥ २ ॥

॥ अन्यथानुमित्यधिकरणम् ॥ ५ ॥

(९) ॐ **अन्यथानुमितौ च ज्ञशक्तिवियोगात्** ॐ ॥ चशब्देनाङ्गित्वानुपपत्तेरित्यस्य समाकर्षः । यथा प्राचीनपक्षान्यप्रकारेण प्रकृत्युपसर्जनपुरुषकर्तृत्वस्यानुमितौ साधनेऽपि । ज्ञशक्तिवियोगात् ज्ञस्य जीवस्य शरीरसम्बन्धार्थं प्रवृत्तिशक्तिवियोगात् अङ्गित्वानुपपत्तेरेवेत्यर्थः ॥ १ ॥

(१०) ॐ **विप्रतिषेधाच्चासमञ्जसम्** ॐ ॥ विप्रतिषेधात् सकलश्रुतिस्मृतियुक्तिविरुद्धत्वादनीश्वरमतमसमञ्जसमयुक्तमित्यर्थः ॥ २ ॥

॥ वैशेषिकाधिकरणम् ॥ ६ ॥

(११) ॐ **महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्** ॐ ॥ महद्दीर्घवत् वैशेषिकमते त्र्यणुकादिगतान्महत्त्वात् दीर्घत्वाच्च चतुरणुकादिगतपरिमाण-

मुत्पद्यते । तथा ह्रस्वपरिमण्डलाभ्यामपि द्व्यणुकपरमाणुभयगत-ह्रस्वत्वपारिमाण्डल्यपरिमाणाभ्यामपि त्र्यणुकव्यणुकगतपरिमाणोत्पत्तिः स्यादित्यर्थः । अन्यथा महत्वदीर्घत्वाभ्यामपि कार्योत्पत्तिर्न स्यादिति वाशब्दार्थः । तस्माद्वैशेषिकमतमनुपपन्नमिति भावः ॥ १ ॥

(१२) ॐ **उभयथाऽपि न कर्माऽतस्तदभावः** ॐ ॥ यतः उभयथापि ईश्वरेच्छाया नित्यत्वानित्यत्वरूपपक्षद्वयेऽपि । न परमाणुषु क्रियोत्पत्तिसम्भवः । अतस्तदभावः तस्मिन् व्यणुकादिकार्याभावः स्यादित्यर्थः ॥ २ ॥

(१३) ॐ **समवायाभ्युपगमाच्च साम्यादनवस्थितेः** ॐ ॥ वैशेषिकैः अवयवावयव्यादीनां भिन्नत्वनिमित्तेन समवायाभ्युपगमात् । समवायसम्बन्धाङ्गीकारात् । साम्यात् समवाय्यसमवायिनोरपि भिन्नत्वसाम्यात् । तत्रापि समवायाभ्युपगमे अनवस्थितेः अनवस्थानाच्च तन्मतमयुक्तमित्यर्थः ॥ ३ ॥

(१४) ॐ **नित्यमेव च भावात्** ॐ ॥ दोषसमुच्चये चः । ईशेच्छापरमाण्वादिकारणानां सदात्वात् । वैशेषिकमते नित्यमेव सर्वदैव । भावात् कार्योत्पत्तिः स्यात् । न तु कदाचिदित्यर्थः ॥ ४ ॥

(१५) ॐ **रूपादिमत्त्वाच्च विपर्ययो दर्शनात्** ॐ ॥ किञ्च वैशेषिकमते पार्थिवाप्यतैजसपरमाणूनां रूपादिमत्त्वात् । विपर्ययः नित्यत्वविपरीतानित्यत्वं स्यात् । कुतः दर्शनात् यद्रूपादिमत् तदनित्यमिति व्याप्तेः घटादौ दृष्टत्वादित्यर्थः ॥ ५ ॥

(१६) ॐ **उभयथा च दोषात्** ॐ ॥ वैशेषिकमते उभयथा च परमाणुनित्यत्वानित्यत्वरूपपक्षद्वयेऽपि । दोषात् तद्धर्मस्यनित्यत्वकारणाभावनिमित्तकतदुत्पत्त्यभावस्य दोषस्य सत्त्वात् न तत्पक्षो युक्त इत्यर्थः ॥ ६ ॥

(१७) ॐ **अपरिग्रहाच्चात्यन्तमनपेक्षा** ॐ ॥ अपरिग्रहात् वैशेषिकमतस्य श्रुत्यादिपरिग्रहशून्यत्वात् तद्विरुद्धत्वाच्च । तत्रात्यन्तमनपेक्षा अनादरः कार्य इत्यर्थः ॥ ७ ॥

॥ समुदायाधिकरणम् ॥ ७ ॥

(१८) ॐ **समुदाय उभयहेतुकेऽपि तदप्राप्तिः** ॐ ॥ यतः समुदाये परमाणुसमुदायेऽनेकत्वसङ्ख्यारूपे मिलितानेकपरमाणुनिमित्तकेऽङ्गीकृते सत्यपि विरलानेकहेतुके वाऽङ्गीकृते सति । तदप्राप्तिः तस्य समुदायस्य विरलानेकहेतुकस्याप्राप्तिः अनुपपत्तिः । कुतः अन्योन्याश्रयादिदोषादिति शेषः । तदुपपादितं टीकायाम् । अतः परमाणुपुञ्ज एव घटावयवीति बौद्धपक्षोऽपि न क्षम इत्यर्थः ॥ १ ॥

(१९) ॐ **इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्** ॐ ॥ ननु परमाणुपुञ्जस्य सदा सत्त्वेऽपि नास्मत्पक्षे प्रलयानुपपत्तिः । कुतः तद्व्यवहारादेरितरेतरप्रत्ययत्वात् । इदमिदं चेति परमाणुपरस्परापेक्षाबुद्धिनिमित्तकत्वात् । तथा च तादृशबुद्ध्यभावकाले समुदायव्यवहारादेरसत्त्वात्प्रलयोपपत्तिरिति चेन्न । कुतः उत्पत्तिमात्रनिमित्तत्वात् परमाणूनां स्वसमुदायोत्पत्तिमात्रनिमित्तत्वात् । न तेभ्योऽपेक्षाबुद्ध्यादेरप्युत्पत्तिः सम्भवतीति मात्रशब्दार्थः । तथाच तन्निमित्तकव्यवहारादिः क्षणिकमते न कदापि सम्भवतीत्यर्थः ॥ २ ॥

(२०) ॐ **उत्तरोत्पादे च पूर्वनिरोधात्** ॐ ॥ चोऽवधारणे समुच्चये च । नेत्यनुवर्तते । सामर्थ्यादिति शेषः । तथाच न केवलं क्षणिकमते समुदायव्यवहारानुपपत्तिः । किन्तु विशेषकार्योत्पत्तिश्च न युक्ता । कुतः उत्तरोत्पादे च कारणस्य सदृशकार्यजननसामर्थ्यात् तेन कारणं प्रथमं स्वसदृशमुत्पाद्य पश्चाद्विसदृशकार्यमुत्पद्यताम् । को दोष इत्यतोऽप्याह । उत्तर इति । तथाच उत्तरस्य स्वसदृशकार्योत्पादे उत्पत्तौ

सत्यामेव । पूर्वनिरोधात् पूर्वस्य कारणस्य नाशात् । पुनर्विसदृश-कार्यजनकत्वासम्भव इत्यर्थः ॥ ३ ॥

(२१) ॐ **असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा** ॐ ॥ क्षणिकमते न प्रतिक्षणं कार्योत्पत्तिर्युज्यते । कुतः असति कारणे कार्यमुत्पद्यत इत्यङ्गीकारे प्रतिज्ञोपरोधः तस्य तत्कार्यत्वमिति प्रतिज्ञाय सिद्धान्तव्यवहारस्योपरोधो हानिः स्यात् । अन्यथा कारणे सति कार्यमुत्पद्यत इत्यङ्गीकारे यौगपद्यं कारणेन सह कार्याणामेकदावस्थानं प्रसज्यत इत्यर्थः ॥ ४ ॥

(२२) ॐ**प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात्**ॐ॥ एवं क्षणिकमते प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधाप्राप्तिः प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधयोः प्रतिक्षणविनाशमन्तानविनाशयोः अप्राप्तिः अनुपपत्तिः । कुतः अविच्छेदात् । तद्रीत्या कार्योत्पत्तावकार्याणां चाविच्छिन्नत्वादित्यर्थः ॥५॥

(२३) ॐ **उभयथा च दोषात्** ॐ ॥ उभयथा कारणे सति कार्यं भवत्येवेति नियमपक्षे तदभावपक्षे च । दोषसत्त्वात् कार्यकारणविशेषकार्यानुत्पत्त्याद्यदोषात । नान्यतरपक्षावलम्बेनार्थापत्त्या क्षणिकपक्षो युक्त इत्यर्थः ॥ ६ ॥

(२४) ॐ **आकाशे चाविशेषात्** ॐ ॥ चोऽप्यर्थे । दीपदृष्टान्तेन सत्त्वहेतुना जगति क्षणिकत्वसाधने आकाशदृष्टान्तेनाक्षणिकत्वस्यापि साधनापातः । ननु दृष्टान्ते साध्यवैकल्यमित्यत उक्तं आकाशेऽविशेषादिति । क्षणिकत्वसाधकत्वेन परोक्तपरिमाणविशेषादर्शनादित्यर्थः । तथाच सत्प्रतिपक्षोऽयं हेतुरिति न तेन क्षणिकत्वसिद्धिरिति भावः ॥७॥

(२५) ॐ **अनुस्मृतेश्च** ॐ ॥ तदेवेदमिति प्रत्यभिज्ञानाच्च तद्विरोधात् न सत्त्वहेतुना क्षणिकत्वसाधनं युक्तमित्यर्थः ॥ ८ ॥

॥ असदधिकरणम् ॥ ८ ॥

(२६) ॐ **नासतोऽदृष्टत्वात्** ॐ ॥ असतःशून्यस्य । न जगत्कर्तृत्वं युक्तम् ।

कुतः प्रमाणाभावादिति शेषः । तत्कुतः अदृष्टत्वात् । काप्यसतः कारणत्वादर्शनात् । अतएवानुमानागमयोरप्यभावादित्यर्थः ॥ १ ॥

(२७) ॐ उदासीनानामपि चैवं सिद्धिः ॐ ॥ एवं सत्यसतः कार्योत्पादकत्वेऽङ्गीकृते सति । उदासीनानां हेयोपादेयत्वबुद्ध्यविषयाणां गगनकुसुमादीनां सकाशादपि सौरभ्यादिकार्यसिद्धिः स्यादित्यर्थः । अन्यथा शून्यादपि कार्योत्पत्तिर्न स्यादिति चशब्दार्थः ॥ २ ॥

(२८) ॐ नाभाव उपलब्धेः ॐ ॥ जगत् अभावः असत् न । कुत उपलब्धेः सदिति प्रतीयमानत्वादित्यर्थः ॥ ३ ॥

(२९) ॐ वैधर्म्याच्च न स्वप्नादिवत् ॐ ॥ जगत् स्वप्नादिवत् स्वाप्नवस्तुन्यारोपितजाग्रत्वादिवदप्यसत्न । कुतः वैधर्म्यात् स्वाप्नजाग्रत्वस्य बाध्यत्वाबाध्यविलक्षणधर्मवत्त्वात् जगति च तदभावादित्यर्थः ॥ ४ ॥

॥ अनुपलब्ध्यधिकरणम् ॥ ९ ॥

(३०) ॐ न भावोऽनुपलब्धेः ॐ ॥ जगत् भावः ज्ञानात्मकमपि न । कुतः अनुपलब्धेः ज्ञानज्ञेययोरभेदाननुभवादित्यर्थः ॥ १ ॥

(३१) ॐ क्षणिकत्वाच्च ॐ ॥ ज्ञानस्यैकक्षणावस्थायित्वाज्जगतः स्थायित्वात्तद्विरोधान्नतयोरैक्यमित्यर्थः ॥ २ ॥

(३२) ॐ सर्वथाऽनुपपत्तेश्च ॐ ॥ सर्वप्रकारेणानुपपत्तेः बौद्धसिद्धान्तस्य युक्तिशून्यत्वात् तद्विरुद्धत्वाच्च न ग्राह्यत्वमित्यर्थः ॥ ३ ॥

॥ नैकस्मिन्नधिकरणम् ॥ १० ॥

(३३) ॐ नैकस्मिन्नसम्भवात् ॐ ॥ जैनोक्तसप्तप्रकारा एकस्मिन्वस्तुनि न युक्ताः । कुतः असम्भवात् अप्रामाणिकत्वेन तेषामेकत्रासम्भावितत्वादित्यर्थः । सप्तप्रकारास्तु सत्त्वं, असत्त्वं, सदसत्त्वं, सद्विलक्षणत्वं,

सत्त्वे सति सद्विलक्षणत्वं, असत्त्वे सति असद्विलक्षणत्वं, सदसत्त्वे सति सदसद्विलक्षणत्वमित्येवंरूपाः ज्ञातव्याः ॥ १ ॥

(३४) ॐ **एवञ्चात्माकात्स्न्यम्** ॐ ॥ एवञ्चात्मनः कायपरिमाणेऽङ्गीकृते सत्यात्माकात्स्न्यं आत्मनः प्राक् पिपीलिकादेहं प्राप्तस्य तत्कायपरिमितस्य जीवस्याकात्स्न्यं गजगर्दभादिशरीरप्राप्तावपूर्णता स्यादित्यर्थः । एवं गजशरीरं प्राप्तस्यात्मनः पिपीलिकादेहप्राप्तावकात्स्न्यमाधिक्यं च स्यादित्यपि द्रष्टव्यम् ॥ २ ॥

(३५) ॐ **न च पर्यायादप्यविरोधो विकारादिभ्यः** ॐ ॥ पर्यायात् क्रमात् क्रमेण तत्तद्देहपरिमाणत्वाङ्गीकारादपि । अविरोधः नोक्तदोष इति च न युज्यते । कुत. यतः पर्यायो न युज्यते । तदपि कुतः विकारादिभ्यः तथा सति तत्तत्कालीनपरिमाणभेदेन वस्तुभेदात् । आत्मनो विकारित्वापत्तेः । ततश्चानित्यत्वान्निर्मोक्षत्वादिदोषप्रसङ्गादित्यर्थः ॥ ३ ॥

(३६) ॐ **अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषात्** ॥ पूर्वसूत्रादेवं चेत्यनुषज्यते । अन्त्यावस्थितेरित्येतदा । चशब्दोऽवधारणे समुच्चये च । तथाच एवं सति ः कायपरिमाणत्वेऽङ्गीकृते अन्त्यावस्थितेः प्रसङ्ग इति शेष मोक्षेऽपि सतः आत्मनः शरीरसत्त्वमङ्गीकार्यं स्यादित्यर्थः । कुतः अन्त्यावस्थितेश्च अन्त्यस्य मौक्तिकपरिमाणस्यावस्थितेरवश्यमङ्गीकार्यत्वात् । अवच्छेदकशरीरं विना अवच्छेद्यपरिमाणस्यायोगादिति भावः । परिमाणमेव कुत इत्यतोऽप्याह । अ थेति । अन्त्यस्य मौक्तिकात्मस्वरूपस्य मुक्तावस्थितेरवश्यं स सत्त्वस्य परिमाणं विनाऽयोगादिति भावः । अस्तु मोक्षेऽपि रं ततः किमित्यत उक्तं उभयनित्यत्वादिति । तथा सति उ मुक्तकालीनयोर्देहात्मनोर्नित्यत्वप्रसङ्गादित्यर्थः । अस्तु

मौक्तिकशरीरनित्यत्वं ततः किमित्यत आह । ततश्च सर्वनित्यत्वं स्यादित्यापाद्यवाक्यमध्याहार्यम् । अत एव समुच्चयार्थकश्चशब्दः । सर्वेषामधुनातनशरीराणां नित्यत्वं स्यादित्यर्थः । कुत इत्यत आह अविशेषादिति । मुक्तिकालीनानां अधुनातनानां च शरीराणां शरीरत्वाविशेषादित्यर्थः । तस्मान्न कायपरिमाणत्वमात्मनो युक्तमिति भावः ॥ ४ ॥

॥ पत्युरधिकरणम् ॥ ११ ॥

(३७) ॐ **पत्युरसामञ्जस्यात्** ॐ ॥ पत्युः पशुपतेः जगत्कारणत्वं न युक्तम । कुतः असामञ्जस्यात् पारतन्त्र्योत्पत्यादिदोषवत्त्वादित्यर्थः ॥ १ ॥

(३८) ॐ **सम्बन्धानुपपत्तेश्च** ॐ ॥ शिवस्याशरीरत्वेन जगता सम्बन्धानुपपत्तेः न तस्य कर्तृत्वमित्यर्थः ॥ २ ॥

(३९) ॐ **अधिष्ठानानुपपत्तेश्च** ॐ ॥ प्रलये सर्वेषां नष्टत्वात् पुनः सृष्टिकाले पशुपतेः पृथिव्याद्याश्रयानुपपत्तेश्च न तस्य जगत्कर्तृत्वमित्यर्थः ॥ ३ ॥

(४०) ॐ **करणवच्चेन्न भोगादिभ्यः** ॐ ॥ ननु यतः साधनजातं पशुपतेः करणवत् शरीरवत् शरीरेण तुल्यं अधिष्ठानतुल्यं च अतो नोक्तदोष इति चेन्न । कुतः भोगादिभ्यः शरीरकृतसुखदुःखभोगोत्पत्तिमरणादिदोषेभ्य इत्यर्थः ॥ ४ ॥

(४१) ॐ **अन्तवत्त्वमसर्वज्ञता वा** ॐ ॥ यतः शिवस्य देहित्वतदभावपक्षयोः क्रमेणान्तवत्त्वं नाशवत्त्वं असर्वज्ञता न सर्वज्ञत्वं स्यात् अतो न तद्युक्तमित्यर्थः ॥ ५ ॥

॥ उत्पत्त्यधिकरणम् ॥ १२ ॥

(४२) ॐ **उत्पत्त्यसम्भवात्** ॐ ॥ न शक्तिर्जगत्कारणम् । कुतः उत्पत्त्यसम्भवात् शक्तिशब्दितकेवलस्त्रीभ्यः अपत्योत्पत्त्ययोगादित्यर्थः ॥१॥

(४३) ॐ न च कर्तुः करणम् ॐ ॥ यतः कर्तुः शक्त्यनुग्राहकशिवस्य च करणं ज्ञानादिसाधनं न । अतो न तस्य शक्त्यनुग्राहकत्वमित्यर्थः ॥ २ ॥

(४४) ॐ विज्ञानादिभावे वा तदप्रतिषेधः ॐ ॥ विज्ञानादिभावे वा शिवस्य ज्ञानेच्छादिसत्त्वेऽङ्गीकृते च । तदप्रतिषेधः तस्य शैवपक्षस्याप्रतिषेधः अनिरासः अनुमतिः कृता स्यात् स च दूषित एवेत्यर्थः ॥ ३ ॥

(४५) ॐ विप्रतिषेधाच्च ॐ ॥ सकलश्रुतिस्मृतिविरुद्धत्वाच्च शाक्तेयमतमसमञ्जसमयुक्तमित्यर्थः ॥ ४ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
द्वितीयाध्यायस्य द्वितीयः पादः ॥ २ ॥ २ ॥

॥ श्रीः ॥

॥ द्वितीयाध्यायस्य तृतीयः पादः ॥

॥ वियदधिकरणम् ॥ १ ॥

(१) ॐ न वियदश्रुतेः ॐ ॥ वियत् आकाशमनुत्पत्तिमन्न किन्त्वीशादुत्पत्तिमदेव । कुतः । अश्रुतेः वियदनुत्पत्तौ श्रुत्यभावादित्यर्थः ॥१॥

(२) ॐ अस्ति तु ॐ ॥ आकाशोत्पत्तौ "आत्मन आकाशः सम्भूतः" इति (तै. २-१) श्रुतिरस्त्येवेत्यर्थः ॥ २ ॥

(३) ॐ गौण्यसम्भवात् ॐ ॥ 'अनादिर्वाऽयमाकाशः' इति श्रुतिर्गौणी अमुख्यानादित्वपरा । कुतः । असम्भवात् तस्याः मुख्यार्थत्वे बहुलोत्पत्तिश्रुत्ययोगादित्यर्थः ॥ ३ ॥

(४) ॐ शब्दाच्च ॐ ॥ "अथ ह वाव नित्यानि" इति श्रुतिबलाच्चानादित्वश्रुतिर्गौणार्थेत्यर्थः ॥ ४ ॥

(५) ॐ स्याच्चैकस्य ब्रह्मशब्दवत् ॐ ॥ चोऽवधारणे । ब्रह्मशब्दवत् यथा एकस्यैव ब्रह्मशब्दस्य विष्णौ मुख्यत्वं जीवेष्वमुख्यताऽस्ति । तथा एकस्यैव नित्यत्वबोधकशब्दस्य ब्रह्मणि मुख्यार्थता स्यात् भवेदित्यर्थः ॥ ५ ॥

(६) ॐ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॐ ॥ आकाशस्य मुख्यानुत्पत्त्युक्तौ प्रतिज्ञाहानिः "स इदं सर्वमसृजत" (तै. २-६) इति विष्णोः स्रष्टृत्वप्रतिज्ञाहानिः स्यात् । कुतः अव्यतिरेकात् आकाशस्य सर्वशब्दार्थानतिरिक्तत्वात् । किञ्च यतः शब्देभ्यः "आत्मा वा इदम्" (ऐ. १-१) इत्यादिस्पष्टश्रुतिभ्यश्च ब्रह्मण एव मुख्यानुत्पत्तिः । न त्वन्यस्येत्यवसीयते अत उक्तं युक्तमित्यर्थः ॥ ६ ॥

(७) ॐ यावद्विकारन्तु विभागो लोकवत् ॐ ॥ यावच्छब्दोऽवधारणे । यावद्विकारमित्यव्ययम् । तुशब्दश्चशब्दार्थे । तथाच यतः यावद्विकारं विक्रियमाणमेव वस्तु । विभागः विभागशब्दितोल्पशक्तिमत् । न त्वन्यदिति निगमः सिद्धः । अतो लोकवत् लोक इव । यथा लोके घटादौ विभक्तत्वात् विकारित्वमङ्गीकृतं तथाकाशादेरपि विभक्तत्वहेतुना विकारित्वं सिध्यति । तत एव सादित्वमपि सिध्यतीत्यर्थः ॥ ७ ॥

॥ मातरिश्वाधिकरणम् ॥ २ ॥

(८) ॐ एतेन मातरिश्वा व्याख्यातः ॐ ॥ एतेन पूर्वोक्तविभक्तत्वादि-हेतुना । मातरिश्वा मुख्यवायुः । व्याख्यातः उत्पत्तिमत्त्वेनोक्त इत्यर्थः ॥ १ ॥

॥ असम्भवाधिकरणम् ॥ ३ ॥

(९) ॐ असम्भवस्तु सतोऽनुपपत्तेः ॐ ॥ तुशब्दोऽवधारणे । सतः विष्णोः । असम्भवः अनुत्पत्तिरेव । न तु "असतः सदजायत" (तै. २-७) इति श्रुत्या असतः सकाशादुत्पत्तिर्वाच्या । कुतः अनुपपत्तेः । अतो विष्णोरसदुत्पत्तेरयोगादित्यर्थः ॥ १ ॥

॥ तेजोऽधिकरणम् ॥ ४ ॥

(१०) ॐ तेजोऽतस्तथाह्याह ॐ ॥ तेजस्तेजोभूतम् । अतः ब्रह्मण-एवोत्पद्यते न वायोः कुतः हि यस्मात् । "तत्तेजः" इति (छां. ६-२-३) श्रुतिः तथा उक्तप्रकारेणाह वक्ति तस्मादित्यर्थः ॥ १ ॥

॥ अवधिकरणम् ॥ ५ ॥

(११) ॐ आपः ॐ ॥ अत्रापि अतः तथाह्याहेत्यनुवर्तते । तथाच आपः अतः विष्णोरेवोत्पत्तिमत्यः । न त्वन्यतः । कुतः हि यस्मात् ब्रह्मैवेदमिति श्रुतिस्तथाऽऽह तस्मादित्यर्थः ॥ १ ॥

॥ पृथिव्यधिकरणम् ॥ ६ ॥

(१२) ॐ पृथिव्यधिकाररूपशब्दान्तरादिभ्यः ॐ ॥ पृथिवी पृथिव्येव "ता अन्नमसृजन्त" इति श्रुतिः । तथान्नशब्देनोच्यते न प्रसिद्धान्नम् । कुतः अधिकाररूपशब्दान्तरादिभ्यः अधिकारशब्दित-भूतप्रकरणात् रूपशब्दोक्तकृष्णरूपस्य च श्रवणात् । शब्दान्तरं शब्दविशेषः "पृथिवी वा अन्नम्" इति (तै. ३-९) श्रुतिविशेषा-च्चेत्यर्थः । अपौरुषेयत्वेनादोषस्य वाक्यस्य नाप्रामाण्यमित्यादियुक्ति-रादिशब्दार्थः ॥ १ ॥

॥ तदभिध्यानाधिकरणम् ॥ ७ ॥

(१३) ॐ तदभिध्यानादेव तु तल्लिङ्गात्सः ॐ ॥ तुशब्दोऽवधारणे । अभिध्यानशब्देनेच्छोच्यते । तच्छब्देन विष्णुर्गृह्यते । तथा च स विष्णुरेव संहारकर्ता न रुद्रः । कुतः तदभिध्यानात् "तस्याभिध्यानात्" (श्वे.१-१०) इति श्रुत्युक्तत्वात् तस्य विष्णोः अभिध्यानरूपशब्दज्ञापित-सच्चिहीर्षाविशेषितादनादिबन्धसंहारेच्छारूपात्तल्लिङ्गादेव सादिजग-त्संहर्तृत्वसाधकादेवेत्यर्थः । एवकारस्तु भाष्यरीत्या किमु श्रुतिभ्य इति कैमुत्यसूचकः ॥ १ ॥

॥ विपर्ययाधिकरणम् ॥ ८ ॥

(१४) ॐ विपर्ययेण तु क्रमोऽत उपपद्यते च ॐ ॥ तुशब्दोऽवधारणे । अत इत्यावर्तते । अत उत्पत्तिक्रमात् । विपर्ययेण वैपरीत्येन । क्रमः लयक्रमः । न तूत्पत्तिक्रमेण । कुतः अत एव व्युत्क्रमादिति श्रुतेरेव । किञ्च उपपद्यते युज्यते चायं व्युत्क्रमः । कुतः पूर्वोत्पन्नानां उत्तरोत्पन्नेभ्योऽधिकसामर्थ्येन तेषां अधिककालावस्थानस्य युक्तत्वा-दित्यर्थः ॥ १ ॥

॥ अन्तराधिकरणम् ॥ ९ ॥

(१५) ॐ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॐ ॥ विज्ञानमनसी विज्ञानतत्त्वमनस्तत्त्वे । अन्तरा विना । अन्यत्र क्रमेण व्युत्क्रमेण लयः न तयोरपि । कुतः तल्लिङ्गात् "मनसश्च विज्ञानम्" इत्यत्र विज्ञानात्पूर्वोत्पन्नतया भूतस्यापि मनसः "यच्छेद्वाङ्मनसि" इति पूर्वमेव लयोक्तिरूपमाधकदर्शनादिति चेन्न । कुतः अविशेषात् । विज्ञानमनस्तत्त्वयोर्यथोत्पत्तिलय इत्यत्र विशेषप्रमाणाभावादित्यर्थः ॥ १ ॥

(१६) ॐ चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॐ ॥ चराचरव्यपाश्रयः चराचरशब्दितेन्द्रियतद्वृत्तिज्ञानविषयसाधारणः। तद्व्यपदेशस्तु "मनसश्च विज्ञानम्" इति श्रौतव्यवहारस्तु । भाक्तः एकदेशः मनोविज्ञानशब्दार्थैकदेशभूतेन्द्रियवृत्तिज्ञानविषयक एव न तत्त्वविषयकः । कस्मान्निमित्तात् । तद्भावभावित्वात् । तस्यावृत्तिः तस्मिन् चराचरशब्दितचेतनाचेतनविषये तद्भावेन मनोभावेन आलोचनेन भावित्वात् उत्पद्यमानत्वात् । अतो नोक्तलिङ्गदर्शनं बाधकमित्यर्थः ॥ २ ॥

॥ आत्माधिकरणम् ॥ १० ॥

(१७) ॐ नात्माऽश्रुतेः नित्यत्वाच्च ताभ्यः ॐ ॥ आत्मा परमात्मा न विलीयते । अश्रुतेः तल्लयस्य क्वाप्यश्रवणात् । किञ्च ताभ्यः "स नित्यो निर्गुणः" इत्यादिश्रुतिभ्यः नित्यत्वात् विष्णोर्नित्यत्वावगमाच्च न तस्य नाश इत्यर्थः ॥ १ ॥

॥ ज्ञाधिकरणम् ॥ ११ ॥

(१८) ॐ ज्ञोऽत एव ॐ ॥ जानातीति ज्ञः जीवोऽपि । अतः विष्णोः उत्पद्यत एव । कुतः अत एवाविनष्टा एवोत्पद्यन्त इति (क्वापायण) श्रुतेरेवेत्यर्थः ॥ १ ॥

(१९) ॐ युक्तेश्च ॐ ॥ अनादिनित्यस्यापि जीवस्येशाधीनत्वदेहवत्त्वरूपोत्पत्तेः युक्तत्वाच्च जीवः उत्पत्तिमानेवेत्यर्थः ॥ २ ॥

॥ उत्क्रान्त्यधिकरणम् ॥ १२ ॥

(२०) ॐ उत्क्रान्तिगत्यागतीनाम् ॐ ॥ सोऽस्मादित्यादिवाक्योक्तदेहोत्क्रमणं लोकान्तरगमनैतल्लोकागमनरूपहेतूनां सकाशात् अणुरेव जीवः न विभुरित्यर्थः ॥ १ ॥

(२१) ॐ स्वात्मना चोत्तरयोः ॐ ॥ चशब्द एवार्थः । जीवः स्वात्मना स्वतन्त्रपरमात्मनैव तत्प्रेरणयैवोत्क्रान्त्यादिमान् न स्वतः । कुतः उत्तरयोः सकाशात् "स एतेनैव स्वात्मना एष ह्येनं जीवम्" इति (पौष्यायण) उत्तरवाक्यबलादित्यर्थः ॥ २ ॥

(२२) ॐ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॐ ॥ ननु न जीवोऽणुः । कुतः अतच्छ्रुतेः "व्यासाद्व्यात्मानः" इत्यणुत्वविरुद्धव्यासत्वश्रुतेः श्रवणादिति चेन्न । कुतः इतराधिकारात् परमात्मप्रकरणात् । तथा च व्यासत्वश्रुतेः परमात्मविषयत्वात् नाणुत्वबाधकत्वमित्यर्थः ॥ ३ ॥

(२३) ॐ स्वशब्दोन्मानाभ्याञ्च ॐ ॥ चः समुच्चये । न केवलं प्रकरणबलाद्व्यासत्वश्रुतिर्विष्णुपरा । किन्तर्हि "एषोऽणुरात्माऽऽचेतसा वेदितव्यः" इति (काषायण) वाक्यस्थस्वशब्दगृहीतब्रह्मवाचकात्मशब्दादुन्मानशब्दितापरिमितत्वलिङ्गाच्च व्यासत्वश्रुतिर्विष्णुपरैव न जीवपरेत्यर्थः ॥४॥

(२४) ॐ अविरोधश्चन्दनवत् ॐ ॥ चन्दनवत् चन्दनरस इव । यथा चन्दनबिन्दोरेकदेशपरिमितस्यैकैव स्वांशैः शरीरव्याप्तिः । तथाऽविरोधः जीवस्याणुत्वेऽपि स्वांशैर्देहव्याप्तौ न विरोध इत्यर्थः ॥ ५ ॥

(२५) ॐ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदिहि ॐ ॥ ननु युक्तं चन्दनबिन्दोः शरीरे व्यासत्वम् । कुतः अवस्थितिवैशेष्यात् देहैकचित्प्रदेशे सन्यगवस्थानसत्त्वात् न तथा जीवस्य तदभावादिति चेन्न ।

कुतः यतः हृदिहि "हृदि ह्येषः" इति (प्र. ३-६) श्रुतिः जीवस्यापि हृदि सम्यगवस्थानमवयवान्तरेत्वसम्यगवस्थानाङ्गीकारादित्यर्थः ॥६॥

(२६) ॐ **गुणाद्वाऽऽलोकवत्** ॐ ॥ वाशब्दः प्रकारान्तरे । आलोकवत् प्रदीपस्येव । यथा दीपस्य प्रभया व्याप्तिः । तद्वदणोरपि जीवस्य । गुणात् प्रकाशगुणात् व्याप्तिर्युज्यत इत्यर्थः । अविरोध इति सूत्रोक्तांशतो व्याप्तिः देवानां, गुणाद्वेति सूत्रोक्तप्रकाशतो व्याप्तिस्तु मनुष्याणामिति विवेको द्रष्टव्यः ॥ ७ ॥

॥ व्यतिरेकाधिकरणम् ॥ १३ ॥

(२७) ॐ **व्यतिरेको गन्धवत्तथा च दर्शयति** ॐ ॥ चशब्दो "अचिन्त्यये"ति स्मृतिसमुच्चायकः । गन्धवत् गन्धस्येव । यथा पुष्पगन्धस्य स्वांशैः व्यतिरेको विभागस्तथा अणोरपि जीवस्य स्वांशैः ईशशक्त्या व्यतिरेको युज्यते । कुत एतत् प्रतिपादयति यतो अथेति (शाण्डिल्य) श्रुतिः तथा दर्शयति अत एवेत्यर्थः ॥ १ ॥

॥ पृथगधिकरणम् ॥ १४ ॥

(२८) ॐ **पृथगुपदेशात्** ॐ ॥ जीवः परमात्मना पृथक् भिन्नः । कुतः उपदेशात् "भिन्नोऽचिन्त्यः" इति (कौशिक) श्रुतेरित्यर्थः ॥ १ ॥

(२९) ॐ **तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्** ॐ ॥ प्राज्ञवत् ब्रह्मण इव । यथा प्राज्ञे ब्रह्मणि "सर्वं खल्विदं ब्रह्म" इति (छां. ३-१४-१) जगदभेदोक्तिः । तथा जीवे तद्व्यपदेशः तत्त्वमसीति ब्रह्मैक्योक्तिर्युज्यते । कुतः तद्गुणसारत्वात् जीवस्य ब्रह्मगुणसदृशज्ञानानन्दादिगुणस्वरूपत्वान्निमित्तादित्यर्थः ॥ २ ॥

॥ यावदधिकरणम् ॥ १५ ॥

(३०) ॐ **यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्** ॐ ॥ यावदात्मभावित्वाच्च जीवस्य यावत्परमात्मसत्त्वात् । नित्यत्वादिति यावत् । न

दोषः "सोऽनादिना" इति पुण्यपापसम्बन्धबोधकश्रुत्यप्रामाण्यदोषो नास्ति। कुत एतत् तद्दर्शनात् तस्य नित्यत्वस्य "नित्यो जीवः" इति (आग्निवेश्य) श्रुतावुक्तत्वाच्च आत्मा नित्यः जीव इति (भारत) स्मृतिद्वयाच्चेत्यर्थः ॥ १ ॥

॥ पुंस्त्वाधिकरणम् ॥ १६ ॥

(३१) ॐ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॐ ॥ तुशब्द एवार्थे पुंस्त्वादिवत् पुंस्त्वादेरिव पुरुषयोपिदादीनामपत्योत्पत्तिशक्तिस्वरूपत्वेऽपि कालविशेषे तदभिव्यक्तेः। तथा सतः जीवस्वरूपत्वेन मुक्तेः पूर्वमपि विद्यमानस्यैवास्य ज्ञानानन्दादेरभिव्यक्तियोगात् मुक्तावभिव्यक्त्या निमित्तभूतया योगात्" आनन्दीभवतीति (पैङ्गि) श्रुत्युपपत्तेः न जीवस्यानन्दादिरूपत्वे तच्छ्रुतिविरोध इति जीव आनन्दादिरूप एवेत्यर्थः ॥ १ ॥

(३२) ॐ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॐ ॥ वाशब्दो व्यवस्थितविकल्पार्थः। उपलब्धिरनुभवः। अन्यथा जीवस्यानन्दादिरूपत्वमङ्गीकृत्यावरणानङ्गीकारे नित्योपलब्ध्यनुपलब्धिप्रसङ्गः। यथायोग्यमन्वयः। मुक्तियोग्यानां नित्यमानन्दानुभवःस्यात्। तमोयोग्यानां न कदाप्यानन्दानुभवःस्यात्। किन्तु स्वरूपदुःखानुभव एव स्यात्। एवं मध्यममनुष्याणामन्यतरनियमः अन्यतरयोः सुखदुःखानुभवयोः। नियमः साम्यमेव स्यात्। प्रतिबन्धकीभूतावरणगतादित्यर्थः। तस्माज्जीवस्यावरणमङ्गीकार्यमिति भावः ॥ २ ॥

॥ कर्तृत्वाधिकरणम् ॥ १७ ॥

(३३) ॐ कर्ता शास्त्रार्थवत्त्वात् ॐ ॥ जीवोऽपि कर्ता। कुतः तथा सत्येव शास्त्रार्थवत्त्वात् विधिनिषेधरूपशास्त्रस्य प्रयोजनवत्त्वात् अन्यथा वैयर्थ्यप्रसङ्गादित्यर्थः ॥ ३ ॥

(३४) ॐ **विहारोपदेशात् ॐ** ॥ मुक्तावपि "जक्षन् क्रीडन्" इति विहार-कर्तृत्वोक्तेः जीवः परमार्थत एव कर्ता । न काल्पनिककर्तेत्यर्थः ॥२॥

(३५) ॐ **उपादानात् ॐ** ॥ जीवस्य मोक्षार्थे साधनाद्यनुष्ठानदर्शनात् ततः फलदर्शनाच्च न जीवः संसारेऽपि काल्पनिककर्तेत्यर्थः ॥ ३ ॥

(३६) ॐ **व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॐ** ॥ क्रियायां "आत्मानमेव लोकमुपासीत" इति (बृ. ३-४-१५)' उक्तोपासन-क्रियायां व्यपदेशाज्जीवस्य कर्तृत्वोक्तेश्च । जीवः कर्ता न चेत् कर्तृत्वं न चेत् । निर्देशविपर्ययः निर्देशस्य जीवस्य कर्तृत्वेन ईश्वरस्य कर्मत्वेन वचनस्य विपर्ययः आत्मैवोपासीतेत्येवं रूपवैपरीत्यं स्यादित्यर्थः ॥४॥

(३७) ॐ **उपलब्धिवदनियमः ॐ** ॥ उपलब्धिवत् उपलब्धाविव । यथा जीवस्योपलब्धौ ज्ञाने । अनियमः स्वेच्छानुसारेण ज्ञानालाभः । तथा क्रियायामपि अनियमो युक्त इत्यर्थः ॥ ५ ॥

(३८) ॐ **शक्तिविपर्ययात् ॐ** ॥ ईशजीवयोः शक्तिविपर्ययात् पूर्णापूर्ण-रूपशक्तिभेदमपेक्ष्य कर्तृत्वमपि स्वतन्त्रपरतन्त्रभेदभिन्नमित्यर्थः । यद्वा ईश्वरवत् जीवे पूर्णशक्त्यभावान्न तस्य स्वतन्त्रकर्तृत्वमित्यर्थः ॥ ६ ॥

(३९) ॐ **समाध्यभावाच्च ॐ** ॥ समाधिरलंबुद्धिस्तदभावात् न जीवस्य स्वतन्त्रकर्तृत्वं किंतु परतन्त्रकर्तृत्वमेवेत्यर्थः ॥ ७ ॥

(४०) ॐ **यथा च तक्षोभयथा'ॐ** ॥ दार्ष्टान्तिकसमुच्चये चशब्दः । यथा तक्षा वर्धकिः । उभयथा प्रासादादिकारयितृप्रेरितत्वेन तत्कर्तृत्वेन च व्यपदिश्यते तथा ईश्वरनियतोऽपि जीवः कर्तेति वक्तुं शक्यत इत्यर्थः ॥ ८ ॥

(४१) ॐ **परात्तु तच्छ्रुतेः ॐ** ॥ जीवस्य कर्तृत्वशक्तिः परात्तु परमात्मान-मनुसृत्यैव तदधीनैवास्ति । कुतः । तच्छ्रुतेः । कर्तृत्वं करणत्वञ्चेति (पैङ्गिश्रुतौ) जीवकर्तृत्वस्येशाधीनत्वश्रवणादित्यर्थः ॥ ९ ॥

(४२) ॐ कृतप्रयत्नापेक्षस्तु विहितप्रतिषेधवैयर्थ्यादिभ्यः ॐ ॥ तुरवधारणे। यतः परमात्मा विहितप्रतिषेधावैयर्थ्यादिभ्यः। तादर्थ्ये चतुर्थी। विधिनिषेधशास्त्राऽऽवैयर्थ्याय स्वस्य वैषम्यनैर्घृण्यपरिहाराय च। कृतप्रयत्नापेक्षः जीवकर्मप्रयत्नयोग्यतामपेक्षमाण एव जीवं प्रेरयति न त्वनपेक्षः सन् अतो जीवशक्तेरीशाधीनत्वेऽपि तस्यापेक्षितकृतिमत्त्वमस्त्येवेत्यर्थः ॥ ११ ॥

॥ अंशाधिकरणम् ॥ १८ ॥

(४३) ॐ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॐ ॥ जीवः परमात्मनोंऽश एव। पितापुत्रत्वादिसम्बन्धेन केवलं तदुपजीवकत्वरूपांशत्वेन च न तु न कदाचित् ईश्वरवत् उपजीव्यः। कुतः। नानाव्यपदेशात् "मां रक्षतु" इत्यादौ पितृत्वभ्रातृत्वादिनानाप्रकारेण जीवस्येशसम्बन्धित्वोक्तेः। किञ्च यतः एके शाखिनः "अन्यः परोऽन्यो जीवः" (कापायण श्रु०) इत्यादिना एनं जीवं परात्। अन्यथा भिन्नत्वेन अधीयते पठन्ति। यतः अन्ये च शाखिनः "ब्रह्म दाशाः" इत्यादिना ब्रह्मणो दाशकितवादित्वं दाशकितवशब्दितजातिविशेषयुक्तजीवप्रभृतिभावम्। तदभेदमितियावत्। दाशकितवादेव चाब्रह्मत्वमधीयते। अतोंऽशत्वरूपांशत्ववानित्यर्थः ॥ १ ॥

(४४) ॐ मन्त्रवर्णात् ॐ ॥ "पादोऽस्येति" (ऋ. १०-९०-३) श्रुतेश्च जीवः परमात्मांश इत्यर्थः ॥ २. ॥

(४५) ॐ अपि स्मर्यते ॐ ॥ जीवस्यांशत्वं कृष्णादिभिः "ममैवांशः" इति (भ.गी. १५-७) स्मृत्या कथ्यते चेत्यर्थः ॥ ३ ॥

(४६) ॐ प्रकाशादिवन्नैवं परः ॐ ॥ जीवः प्रकाशादिवत् खद्योताद्यभिमानितेजोंऽशवत्। परमात्मनो भिन्नांशः। परः मत्स्यादिरूपी विष्णुस्तु।

नैवं जीववद्भिन्नांशो न । किन्तु प्रकाशादिवत् कालान्याद्यभिमानितेजोऽशवत् ईशाभिन्नांश एवेत्यर्थः ॥ ४ ॥

(४७) **ॐ स्मरन्ति च ॐ** ॥ स्मर्तारः जीवेशयोः भिन्नांशत्वाभिन्नांशत्वे "एते स्वांशकलाः" (भागवते. १-३-२८) इत्यादिस्मृत्या कथयन्ति चेत्यर्थः ॥ ५ ॥

(४८) **ॐ अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॐ** ॥ यतो ज्योतिरादिवत् चक्षुर्गोलकादिस्थिता पञ्चाष्टदेवतादेः तत्तद्देहसम्बन्धात् सूर्यवरणाद्यनुज्ञया तत्प्रवृत्त्यादिरिव जीवस्यापि तत्तद्देहसम्बन्धाद्धेतोः । अनुज्ञापरिहारौ परमात्मानुज्ञाधीनप्रवृत्तिसम्बन्धपरिहारौ न तथा मत्स्यादेः । किंतु ज्योतिरादिवत् सूर्यप्रभाद्यभिमानिनः यथा तदधीनप्रवृत्त्यादिमत्त्वं तथेशाधीनप्रवृत्तिरेव अतोऽपि जीवः परमात्मनो भिन्नांशः । मत्स्यादिस्तु अभिन्नांश इति व्यवस्था सिद्धेत्यर्थः ॥ ६ ॥

(४९) **ॐ असन्ततेश्चाव्यतिकरः ॐ** ॥ असन्ततेः जीवस्य सम्यक् शक्त्यभावात् मत्स्यादीनां तु तद्भावात् । अव्यतिकरः जीवेशयोर्भिन्नाभिन्नांशत्वमित्युक्तार्थस्य व्यत्यासाभाव इत्यर्थः ॥ ७ ॥

(५०) **ॐ आभास एव च ॐ** ॥ चः समुच्चये । यतो जीवः परस्य आभास एव प्रतिबिम्ब एव । मत्स्यादिस्तु न तथा । अतोऽप्युक्तस्य न व्यत्यास इत्यर्थः ॥ ८ ॥

॥ अदृष्टाधिकरणम् ॥ १९ ॥

(५१) **ॐ अदृष्टानियमात् ॐ** ॥ अदृष्टपदोपलक्षितविद्याकर्मसंस्काराणामनियमात् । नियमो नामैकप्रकारता । अनियमोऽनेकप्रकारता । तथाच वैचित्र्यं वैचित्र्यात् प्रतिबिम्बभूतजीवानामपि देवदानवमानवादिवैचित्र्यं युज्यत इत्यर्थः ॥ १ ॥

(५२) ॐ अभिमन्थ्यादिष्वपि चैवम् ॐ ॥ ततोऽभिमन्थ्यादिषु काम-क्रोधादिदोषेष्वपि । एवमदृष्टादिवैचित्र्यादेव वैचित्र्यं वाच्यम् । अत आवश्यकत्वादृष्टवैचित्र्यमेव जीववैचित्र्यकारणम् । न दोषादि-वैचित्र्यनियमः ॥ ४ ॥

(५३) ॐ प्रदेशादिविशिष्टान्तर्भावात् ॐ ॥ ननु प्रदेशात् स्वभूम्यादि-स्थानवैचित्र्यादेव सुरनरादिजन्मवैचित्र्यमस्तु नादृष्टवैचित्र्यादिति चेन्न। पुनः आवर्णात् स्थानवैचित्र्ये किं कारणमिति कारणान्वेषणे तत्कारणत्वादृष्टवैचित्र्य प्रवान्तर्भावात् तद्वत्त्वात् । अत आवश्य-कत्वादृष्टवैचित्र्यमेव सुरनरादिवैचित्र्यनियामकमित्यर्थः ॥ ५ ॥

इति ॐ स्वाध्यायसंकृतायां सूत्रदीपिकायां
द्वितीयाध्यायस्य तृतीयः पादः ॥ २ ॥ ३ ॥

॥ श्रीः ॥

॥ द्वितीयाध्यायस्य चतुर्थः पादः ॥

॥ प्राणाण्वध्यधिकरणम् ॥ १ ॥

(१) ॐ तथा प्राणाः ॐ ॥ यथा [illegible] तथा प्राणाः इन्द्रियाणि उत्क्रमन्ति [illegible] इत्यर्थः ॥ १ ॥

(२) ॐ गौण्यसम्भवात् ॐ ॥ प्राणा [illegible] इत्यादिश्रुतिः गौणी श्रुत्या मुख्यरूपेणानुत्पत्तिविषया। कुतः असम्भवात् इन्द्रियाणां संख्यानादित्वायोगात्। "एतस्मात्" इति (मुं. २-१-३) श्रुत्ययोगाच्चेत्यर्थः ॥२॥

(३) ॐ प्रतिज्ञानुपरोधाच्च ॐ ॥ "स ईक्षत मनश्च" (प्रं. ६-४) इति प्रतिज्ञानुपरोधात् प्रतिज्ञानुसारेण च प्राणा उत्क्रामन्त इत्यङ्गीकार्यमित्यर्थः ॥ ३ ॥

॥ तन्मनोऽधिकरणम् ॥ २ ॥

(४) ॐ तत्प्राक् श्रुतेश्च ॐ ॥ तदनुत्पत्तीति स्मृतिसमुच्चये चशब्दः । तस्य मनसः । तेभ्य इन्द्रियेभ्यः प्राक् [illegible] उत्क्रमत्वेन [illegible] श्रुतेः "मनः सर्वेन्द्रियाणि च" (मुं. २-१-३) इति श्रवणात् । मन उत्पत्तिमदेव न त्वनुत्पत्तिमदित्यर्थः ॥ १ ॥

॥ तत्पूर्वकत्वाधिकरणम् ॥ ३ ॥

(५) ॐ तत्पूर्वकत्वाद्वाचः ॐ ॥ वाचः वागिन्द्रियस्य तत्पूर्वकत्वात् "मन एव पूर्वरूपम्" (ऐ.आ. ३-१-१) मनःकारणकत्वश्रवणाद्वागिन्द्रियमुत्पत्तिमदेव न त्वनुत्पत्तिमदित्यर्थः ॥ १ ॥

॥ सप्तगत्यधिकरणम् ॥ ४ ॥

(६) ॐ सप्त गतेर्विशेषितत्वाच्च ॐ ॥ चशब्दः सप्तप्राणान्ववगतेरिति प्रमाणसमुच्चये । गतेः ज्ञानस्य । जनकानीन्द्रियाणि सप्त सप्तसङ्ख्याकानीति

निर्णय एव । न त्वनिर्णयः । कुतः विशेषितत्वात् सप्त प्राणा इति (मु. २-१-८) श्रुतौ गुहाशयां बुद्ध्यर्थं निहिताः विशेषणयुक्तत्वा निर्दिष्टत्वादित्यर्थः ॥ १ ॥

(७) ॐ हस्तादयस्तु स्थितेऽतो नैवम् ॐ ॥ तुशब्दो वैलक्षण्यद्योतकः । यतो हस्तादयस्तु हस्तादीन्द्रियाणि तु । स्थिते स्थितं कर्म । तादर्थ्ये सप्तमी । कर्मार्थानि । अतः अस्माद्वैलक्षण्यात्तानि । एवं ज्ञानेन्द्रिय-सहभावेन न पठितानि । अतस्तेषां सप्तता सिद्धैवेत्यर्थः ॥ २ ॥

॥ अण्वधिकरणम् ॥ ५ ॥

(८) ॐ अणवश्च ॐ ॥ प्राणाः इन्द्रियाणि अणवः स्वतोऽणूनीत्यर्थः । न केवलमणूनि किंतु तेजसा व्याप्तानि चेति चशब्दार्थः ॥ १ ॥

॥ श्रेष्ठाधिकरणम् ॥ ६ ॥

(९) ॐ श्रेष्ठश्च ॐ ॥ यथेतरे प्राणा उत्पद्यन्ते एवं श्रेष्ठः मुख्यप्राणोऽपि विष्णोरुत्पद्यत एव न त्वनुत्पत्तिमानित्यर्थः ॥ १ ॥

(१०) ॐ न वायुक्रिये पृथगुपदेशात् ॐ ॥ वायुक्रिये बाह्यवायुचेष्टात्मक-कर्मणी न । एतस्मादिति (मु. २-१-३) प्राणोत्पत्तिश्रुतिप्रतिपाद्ये न भवतः । किंतु मुख्यवायुरेव तत्प्रतिपाद्यः । कुतः पृथगुपदेशात् "स प्राणमसृजत" (प्र. ६-४) इत्यादौ मुख्यवायूत्पत्तेः वायुक्रियो-त्पत्तिभ्यां सकाशात् पृथक् श्रवणादित्यर्थः ॥ २ ॥

॥ चक्षुराद्यधिकरणम् ॥ ७ ॥

(११) ॐ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॐ ॥ तुशब्द एवार्थे । मुख्यप्राणोऽपि चक्षुरादिवत्परमात्माधीन एव न तु स्वतन्त्रः । कुतः । तत्सहशिष्ट्यादिभ्यः तैश्चक्षुरादिभिः सह मुख्यवायोरपि "सर्व ह्येवैत-

(३०) ॐ **स्वपक्षदोषाच्च** ॐ ॥ चोऽवधारणे । तथाच "ये दोषाः" इति श्रुतौ जीवपक्षे युक्तिविरोधस्य दोषस्यैवोक्तेः नासावदोषतां नेतव्यः । किन्तु ईश्वरपक्ष एव अदोषतां नेतव्य इत्यर्थः ॥ ३ ॥

(३१) ॐ **सर्वोपेता च तद्दर्शनात्** ॐ ॥ यतः परमात्माख्यदेवता नकेवलं सामान्यतो विचित्रशक्तिमर्ता । किन्तु सर्वोपेता सर्वविषयसार्वकालिक-शक्तिमती च । कुतः तद्दर्शनात "सर्वैर्युक्ता" इति (चतु. शि.) तथा श्रुतेः । अतो नेश्वरे युक्तिविरोधः शङ्कनीय इत्यर्थः ॥ ४ ॥

(३२) ॐ **विकरणत्वान्नेतिचेत्तदुक्तम्** ॐ ॥ नेत्यावर्तते । विकरणत्वात् "अपाणिपादो" (श्वे ३-१९) इति श्रुत्या ईश्वरस्य हस्तादीन्द्रिय-शून्यत्वावगमात् । नेति चेत् ईश्वरस्य कर्तृत्वं न युक्तमिति चेन्न । कुतः यस्मात् तदुक्तं तस्मिन्न तस्येत्याद्यागमेन तत्करणराहित्यस्य प्राकृतेन्द्रियविषयत्वमुक्तं तस्मादित्यर्थः ॥ ५ ॥

॥ न प्रयोजनाधिकरणम् ॥ ९ ॥

(३३) ॐ **न प्रयोजनवत्त्वात्** ॐ ॥ ईश्वरस्य सृष्ट्यादौ प्रवृत्तिर्न स्वप्रयो-जनोद्देशेन । कुतः [illegible]जनवत्त्वात् । पूर्णानन्दत्वेन प्राप्तप्राप्तव्यत्वा-दित्यर्थः ॥ १ ॥

(३४) ॐ **लोकवत्तु लीलाकैवल्यम्** ॐ ॥ तुशब्द एवार्थे । लोकवत् लोके मत्तादिप्रवृत्तेरिवेश्वरप्रवृत्तेः । लीलाकैवल्यं केवललीलारूपत्वमेव न स्वप्रयोजनोद्देश्यत्वमित्यर्थः ॥ २ ॥

॥ वैषम्यनैर्घृण्याधिकरणम् ॥ १० ॥

(३५) ॐ **वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति** ॐ ॥ स्वातन्त्र्य-सिद्ध्यर्थमीश्वरस्य जीवेभ्यः फलदाने कर्मापेक्षाङ्गीकारे निर्निमित्तं वैषम्येण फलदातुस्तस्य वैषम्यनैर्घृण्ये विषमत्वनिर्दयत्वे ये प्रसक्ते ते

न स्तः । कुतः सापेक्षत्वात् ईश्वरस्य कर्मापेक्षावत्त्वाभ्युपगमात् । तत्कुतः हि यस्मात् । "पुण्येन पुण्यं" (प्र. ३-७) इति श्रुतिः तथा दर्शयति प्रतिपादयति तस्मादित्यर्थः ॥ ३ ॥

(३६) **ॐ न कर्माविभागादितिचेन्नानादित्वात् ॐ ॥** वैषम्यनैर्घृण्यादिदोष-परिहाराय ईशेनापेक्षणीयं यत्कर्म तन्नास्तीति विशिष्टनिषेधः । कुतः अविभागात् तस्य कर्मणः अस्वतन्त्रवस्तुभ्यः अविभक्तत्वात् । अस्वतन्त्रत्वादितियावत् । तथाच स्वाधीनकर्मापेक्षया वैषम्यादेर-परिहार इति चेन्न । कुतः अनादित्वात् कर्मपरम्परायाः अनादि-त्वादित्यर्थः । तथा चेश्वरः पूर्वपूर्वमपेक्ष्योत्तरोत्तरकर्म जीवेन कार-यतीत्यङ्गीकारेण कर्मणः अपेक्षणीयत्वापत्तेः नोक्तदोष इति भावः ॥४॥

(३७) **ॐ उपपद्यते चाप्युपलभ्यते च ॐ ॥** ईश्वरस्य कर्मापेक्षायामप्युप-पद्यते स्वातन्त्र्यं युज्यत एव । कर्मणः स्वाधीनत्वात् । ननु पुनः स्वाधीनकर्मसापेक्षत्वकृतवैषम्यापात इत्यत उक्तं उपलभ्यतेचेति । "स कारयेत्" (चतु. शि.) इति श्रुत्या तादृशवैषम्यं अदोषत्वेन ज्ञायते चेत्यर्थः ॥ ५ ॥

॥ सर्वधर्मोपपत्त्यधिकरणं ॥ ११ ॥

(३८) **ॐ सर्वधर्मोपपत्तेश्च ॐ ॥** गुणदोषाभाववत्त्वरूपाणां सर्वेषां धर्माणां उपपत्तेः स्वातन्त्र्यादिना ब्रह्मणि युक्तत्वाच्च न तस्य गुणपूर्णत्वे युक्ति-विरोधः शङ्कनीय इत्यर्थः ॥ १ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
द्वितीयाध्यायस्य प्रथमः पादः ॥ २ ॥ १ ॥

दिति (गौपवन) श्रुतौ पराधीनत्वोक्तेः। सर्वकर्तेत्यादिवचनोक्तयुक्तिभ्यश्चेत्यर्थः ॥ १ ॥

(१२) ॐ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॐ ॥ मुख्यप्राणस्य करणत्वात्। कर्तृप्रयोज्यत्वरूपकरणाभिन्नत्वात् चक्षुरादीनां तद्रूपत्वाच्च अस्मादेव वैलक्षण्यान्मुख्यस्येतरेभ्य उत्तमत्वसिद्धेः। न दोषः मुख्यप्राणस्वातन्त्र्यवाचिश्रुतेरवान्तरेश्वरपरत्वाभावदोषो नास्ति। कस्मादेवं कल्पत इति चेत्। हि यस्मात्। "तानि ह वा" (माण्डव्य) इति श्रुतिस्तथा उक्तप्रकारेण। दर्शयति ज्ञापयति। तस्मादित्यर्थः ॥२॥

॥ पञ्चवृत्त्यधिकरणम् ॥ ८ ॥

(१३) ॐ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॐ ॥ मनोवत् मनस इव। यथा मनसः मनोबुध्यहङ्कारचितचेतनाख्यपञ्चप्रकारोपेतत्वं तथा मुख्यप्राणोऽपि पञ्चवृत्तिः प्राणापानादिपञ्चरूपवान्। कुतः यस्मात् अथ पञ्चवृत्त्येति (कौण्डिन्य) श्रुतौ तथा व्यपदिश्यते प्रतिपाद्यते। तस्मादित्यर्थः ॥ १ ॥

॥ अण्वधिकरणम् ॥ ९ ॥

(१४) ॐ अणुश्च ॐ ॥ मुख्यप्राणः प्राणरूपेणाणुः। वायुरूपेण व्याप्तश्चेत्यर्थः ॥ १ ॥

॥ ज्योतिराद्यधिकरणम् ॥ १० ॥

(१५) ॐ ज्योतिराद्यधिष्ठानं तु तदामननात् ॐ ॥ ज्योतिराद्यधिष्ठानमित्यावर्तते। तच्चित्यन्वयः। तथाच ज्योतिराद्यधिष्ठानं अन्नादिभूतप्रेरकं तत् ब्रह्मैव। ज्योतिराद्यधिष्ठानं च चक्षुरादिप्रेरकं न जीवः। कुतः तदामननात् "यश्चक्षुषि तिष्ठन्" (बृ. ५-७-१६) इत्यादिना तथा प्रतिपादनादित्यर्थः ॥ १ ॥

(१६) ॐ प्राणवता शब्दात् ॐ ॥ परमात्मा स्वप्रयोज्यैरेव चक्षुरादिभिः करणैः प्राणवता जीवेन कर्त्रा दर्शनादि कारयति न जीवप्रयोज्यैः । कुतः शब्दात् "एष ह्यनेन" (भाल्लवेय) इति श्रुतेरित्यर्थः ॥ २ ॥

(१७) ॐ तस्य च नित्यत्वात् ॐ ॥ चक्षुरादीनां ब्रह्मकरणत्वेऽपि तस्य जीवस्य करणस्य च तयोः सम्बन्धस्य च नित्यत्वात् । तद्विवक्षया जीवकरणत्वश्रुतिरप्युपपद्यत इत्यर्थः ॥ ३ ॥

॥ त इन्द्रियाधिकरणम् ॥ ११ ॥

(१८) ॐ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॐ ॥ श्रेष्ठात् मुख्यप्राणात् अन्यत्र ये प्राणाः । त एवेन्द्रियाणि न तु [illegible] प्राणोऽपि । कुतः तद्व्यपदेशात् द्वैदशैवेन्द्रियाणीति (पौत्रायण) श्रुतौ तथोक्तत्वादित्यर्थः ॥ १ ॥

(१९) ॐ भेदश्रुतेः ॐ ॥ मुख्यप्राणस्य सर्वकर्तृत्वकारयितृत्वरूपभेदकधर्मस्यान्येषां तदभावस्य "स्थित एव हीति" (पौत्रायण) श्रुतौ श्रुतत्वात् न तस्य चक्षुराद्यविशेष इत्यर्थः ॥ २ ॥

(२०) ॐ वैलक्षण्याच्च ॐ ॥ मुख्यप्राणस्य तदितरप्राणानाञ्च केवलेश्वराधीनत्वेश्वरजीवोभयाधीनत्वरूपवैलक्षण्यसत्त्वाच्च न तस्येन्द्रियत्वं किंतु चक्षुरादीनामेवेत्यर्थः ॥ ३ ॥

॥ संज्ञाधिकरणम् ॥ १२ ॥

(२१) ॐ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॐ ॥ तुशब्दोऽवधारणे । संज्ञामूर्तिक्लृप्तिर्नामरूपात्मकदेहेन्द्रियप्रपञ्चोत्पत्तिः । त्रिवृत्कुर्वतः पृथिव्यप्तेजसां मिश्रीभावं कुर्वतः परमात्मनः सकाशादेव भवति । न विरिञ्चात् । कुतः उपदेशात् "सर्वाणि रूपाणि विचित्य धीरः" इति (तै.आ. ३-१२) श्रुतेरित्यर्थः ॥ १ ॥

॥ मांसाधिकरणम् ॥ १३ ॥

(२२) ॐ मांसादिभौमं यथाशब्दमितरयोश्च ॐ ॥ भौममित्युपलक्षणम। यच्छरीरे कठिनं मांसादि तदेव भौमं पार्थिवं न सर्वशरीरम्। किं तर्हि यथाशब्दं "यत्कठिनं सा पृथिवी" (गर्भ ३) इति श्रुतिमनुसृत्य। शरीरे इतरयोः अप्तेजसोश्च कार्यं शोणितमज्जादिरूपमप्कार्यम्। यथा मांसादिकं भौमं पृथिवीकार्यम्। न केवलं पृथिवीकार्यं किन्तामेतरयोरप्तेजसोश्च कार्यं यथा श्रुत्यङ्गीकारमित्यर्थः ॥ १ ॥

(२३) ॐ वैशेष्यात्तु तद्वादस्तद्वादः ॐ ॥ पार्थिवमाप्यं तैजसमिति विशेषोक्तिस्तु वैशेष्यात् पृथिव्यादिभूतानां तत्तच्छरीरविशेषसंयोगमपेक्ष्य भवति। अतः न तद्विरोध इत्यर्थः। एतदध्यायोक्तसर्वस्वार्थावधारणार्थमध्यायान्ते द्विरुक्तिः ॥ २ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
द्वितीयाध्यायस्य चतुर्थः पादः ॥ २ ॥ ४ ॥

॥ इति द्वितीयाध्यायः समाप्तः ॥